VERZEICHNIS DER ORIENTALISCHEN HANDSCHRIFTEN
IN DEUTSCHLAND · SUPPLEMENTBAND 9,3

VERZEICHNIS DER ORIENTALISCHEN HANDSCHRIFTEN
IN DEUTSCHLAND

IM EINVERNEHMEN MIT DER DEUTSCHEN
MORGENLÄNDISCHEN GESELLSCHAFT HERAUSGEGEBEN VON

WOLFGANG VOIGT

SUPPLEMENTBAND 9,3

# KAUṢĪTAKIBRĀHMAṆA

## VYĀKHYĀ OF UDAYA

HERAUSGEGEBEN VON

E. R. SREEKRISHNA SARMA

FRANZ STEINER VERLAG GMBH · WIESBADEN
1976

# KAUṢĪTAKIBRĀHMAṆA

3

VYĀKHYĀ

OF

UDAYA

HERAUSGEGEBEN VON

E. R. SREEKRISHNA SARMA

FRANZ STEINER VERLAG GMBH · WIESBADEN

1976

**CIP-Kurztitelaufnahme der Deutschen Bibliothek**

**Verzeichnis der orientalischen Handschriften in Deutschland**
im Einvernehmen mit d. Dt. Morgenländ. Ges. hrsg. von Wolfgang Voigt. – Wiesbaden: Steiner

NE: Voigt, Wolfgang [Hrsg.]

Suppl.-Bd. 9. → Kauṣītakibrāhmana

**[Kauṣītakibrāhmana]**
Kauṣītakibrāhmana / hrsg. von E. R. Sreekrishna Sarma. – Wiesbaden: Steiner.

NE: Sarma, E. R. Sreekrishna [Hrsg.]

3. Vyākhyā of Udaya. – 1. Aufl. – 1976.

(Verzeichnis der orientalischen Handschriften in Deutschland; Suppl.-Bd. 9)
ISBN 3-515-01904-9

All rights reserved

This book is copyright under the Berne Convention. Apart from any fair dealing for the purposes of private study, research, criticism or review, as permitted under the Copyright Act, 1911, no portion may be reproduced by any process without written permission. Enquiry should be made to the Publishers. Printed with the financial aid of the German Research Association (DFG). © 1976 Franz Steiner Verlag GmbH., Wiesbaden

Printed in Germany

TABLE OF CONTENTS

Addendum and Corrigenda to vol. 1 ⟨**KB**⟩ — VI

Preface — VII

The Kauṣītakibrāhmaṇavyākhyā of Udaya ⟨**KBV**⟩

KBV, Vol. 9,2 – 1–14 — 1

KBV, Vol. 9,3 – 15–30 — 343

Appendices — 683

# ADDENDUM AND CORRIGENDA TO VOL. 1 ⟨**KB**⟩

C in the footnotes stands for the Commentary on KB by Udaya.

## CORRIGENDA

| | |
|---|---|
| I, 1, २ | °मूचुः |
| I, 1, footnote 2 | सतनूः |
| I, 5, ६ | भवत्या पूर्वा° |
| VII, 12, २० | मयोभुव |
| VIII, 12, १५ | अनन्तर्हितो |
| XI, 8, २३ | भ्रेषोऽन्वेतोः |
| XI, 9, ११ | योगमा वेद |
| XII, 2, १४ | यदास्वैषी° |
| XIII, 5, ७ | युक्ता |
| XIX, 2, १३ | महाव्रती° |
| XIX, 3, ८ | पुरोळाश° |
| XXVI, 12, footnote 2–2 | ऐतीव (omit वा) |

अथ

## पञ्चदशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

प्रातःसवननिविष्टा निर्दिष्टाः स्पष्टमत्र विधयः प्राक् ।
माध्यंदिनसवनजुषो निर्दिश्यन्तेऽधुना क्रमायाताः ॥

तत्र तावन्माध्यंदिनसवनमुखानुष्ठेयसोमाभिष्वकर्मदशायां तदभिषव-
साधनभूतग्रावाभिष्टवनलक्षणं ग्रावस्तुन्नाम्न ऋत्विजोऽनुष्ठेयं कर्म विधत्ते—
**देवा-संकल्पम्** । 'अथ यत्र ह तत् सर्वचरौ'[a] इत्यत्रोपरिष्टात् प्रपञ्चेन ग्राव- 1.१-४
स्तुत्कर्म[1] विधास्यते । तत् किमर्थमिदानीमिह तद्विधानमिति ? उच्यते ।
विधानक्रमानतिलङ्घनार्थं विस्तरेण विधास्यमानस्यापीह संक्षेपेणाभिधानमिति
नानर्थदोषः । अन्यथा ग्रावस्तोत्रियं कर्म मध्यपाति परित्यज्य तदुपरितनं कर्म[2]
विधीयमानमन्तरितबुद्ध्या श्रोतॄणां बुद्धिपदवीमञ्जसा नोपारोढुमर्हति । संगृ-
हीतस्य च पुनर्होत्रकप्रकरणे विस्तरेण विधानं तत्कर्मसाकल्यावधारणप्रयोजन-
तया संगतमेवेति । अर्बुदो नाम कश्चिद् ऋषिः । तेन दृष्टत्वात् 'प्रैते वदन्तु'[b]
इति सूक्तमर्बुदशब्देनोच्यते । 'काद्रवेयोऽर्बुदः प्रैत'[c] इत्यार्षानुक्रमण्यां दर्शनात् ।
पवमान आसामृचां देवतेति पावमान्यः । पुरा देवा अर्बुददृष्टेन 'प्रैते वदन्तु'[b]
इति सूक्तेन पावमानीभिर्विहृतेनाविहृतेन वाऽर्बुदसूक्तेन सोमाभिषवकरणभूतान्
ग्राव्णोऽभिलक्ष्य स्तवनं कृत्वा अमृतत्वम् आभूतसंप्लवावस्थानलक्षणं मुख्यं वा

a. KB. XXIX. 1. १.
b. RV. 10. 94.
c. SA. X. 94.

1. T. ग्रावस्तुतः कर्म
2. T. omits

सत्यम् अमोघं संकल्पं मनोरथं[1] सत्यसंकल्पतां च प्राप्तवन्तः। तथो एवैतदि-त्यादि गतम्।

तत्र तावद् यज्ञः प्रवर्ग्यवानप्रवर्ग्यवांश्च विकल्पेन भवतीत्युक्तं प्राक्। तत्र प्रवर्ग्यवति यज्ञे दधिघर्मयागः माध्यंदिनपवमानस्तुत्यनन्तरं कर्तव्यः। तथा च सूत्रं—'माध्यंदिने स्तुते पवमानेन दधिघर्मेण चरन्ति यदि प्रवर्ग्यवान्'[a] इति।
1.५-७ तमेतं विधत्ते—**अथ-सरसतायै**। अत्र पवमानस्तुत्यनन्तरं कालो यस्य दधिघर्मस्य स तथोक्तः। अथो अपि च सवनस्य माध्यंदिनसवनस्य प्राचीनेन सोमाभिषवेण किंचिद् विरसीकृतस्य[2] सरसत्वार्थमेव दधिघर्मयागः[3] संपद्यते। तस्य सरसत्वात्।
1.८ अत्रापि सवनीयपुरोळाशयागं विधत्ते—**अथ-ब्राह्मणम्**। अत्र 'पशवो वै हवि-ष्पङ्क्तिः'[b] इत्यादिकं ब्राह्मणं द्रष्टव्यमित्याह—तस्या इति। होतुः प्रस्थितसोम-
1.९-१० यागे याज्यां विधत्ते—**भारद्वाज्या-प्रददौ**। सा च 'पिबा सोममभि यमुग्र तर्द'[c] इत्येषा। भरद्वाजनाम्ना महर्षिणा दृष्टत्वादेषा भारद्वाजी। तच्च भरद्वाजदृ-ष्टषष्ठमण्डलान्तःपातित्वात्। तथा चानुक्रमणी—'बार्हस्पत्यो भरद्वाजः षष्ठं मण्डलमपश्यद्'[d] इति। कुतो भारद्वाज्या मध्यंदिने याग इति चेत्। यस्मात् भरद्वाजनामा महर्षिः पुरा मध्यंदिन इन्द्राय सोमं दत्तवान्। अत्र श्रुत्यन्तरप्र-सिद्धि हशब्दो द्योतयति। तस्मान्मध्यंदिने भारद्वाज्या अस्त्याभिरूप्यम्। तस्या
1.११,१२ इन्द्रदेवत्यत्वं त्रिष्टुप्छन्दस्कत्वं च स्तौति—**सा-सवनम्**। तथा चानुक्रमणी—'पिब पञ्चोनैन्द्रं त्रैष्टुभम्'[e] इति। यस्मान्माध्यंदिनं सवनमैन्द्रं त्रैष्टुभं च। 'इन्द्र-स्य माध्यंदिनं सवनम्'[f] इत्याम्नायदर्शनात्। 'त्रैष्टुभं माध्यंदिनं सवनम्'[g] इति 'तस्मिंस्त्रिष्टुभं छन्दसामदधुरिन्द्रं देवतानाम्'[h] इति च ब्राह्मणम्। **अनुवषट्क-**
1.१३,१४ **रोति-प्रतिष्ठित्यै**। गतम्।

a. ŚS. 7. 16. 1. b. KB. XIII. 1. १०.
c. RV. 6. 17. 1. d. SA. VI. 1.
e. SA. VI. 17. f. KB. XIV. 7. ७.
g. ŚB. 4. 1. 1. 10. h. AB. 3. 27. 1.

1. T. adds बहुवचनं तत्र after मनोरथं (?) 2. T. विरसीकृत्य तस्य
3. T. दधिघर्मः

मैत्रावरुणादीनां प्रस्थितयाज्या विधत्ते—**अथ-ब्राह्मणम्**। ताश्च 'द्वितीया 1.१५,१६
मैत्रावरुणस्य'[a] इत्यादिना सूत्रकृता दर्शिताः। अत्र 'यजमानमेव तद्'[b] इति ब्राह्म-
णमतिदिशति—तासामुक्तं ब्राह्मणमिति। इळाह्वानहोतृचमसभक्षणविधितद्-
ब्राह्मणातिदेशकथनपरं वाक्यं स्पष्टार्थम्। क्रमप्राप्तं दक्षिणादानं विधत्ते—
**हुतेषु-भवति**। दाक्षिणहोमानन्तरं द्वादशशतसंख्यगोरूपा दक्षिणा दद्यात्। नय- 1.१७,१८
तिना तत्पूर्वकं दानं लक्ष्यते। यस्मात् सोमस्याभिषवोऽत्रापवर्गो भवति। अस्मि-
न्नपवर्गः समाप्तिः यस्य[1] स तथोक्तः। तस्माद्दक्षिणाकालत्वमस्य युक्तम्। पुन-
रपि स्तौति—**अथो-नीयन्ते**। यदेतद्दक्षिणानयनमस्ति तेन यजमानः ऋत्वि- 1.१९
ग्भ्यो दत्तमात्मानं पुनर्निष्क्रीणाति। यथा लोके परहस्तन्यस्तं स्वकीयं वस्तु
तत्तुल्यद्रव्यान्तरसमर्पणेन तदेव पुनरादत्ते तद्वदेतद् भवति। दक्षिणाशब्दनिर्वच-
नेनापि स्तौति—**अथो-नाम**। दक्षयति समर्थयत्याभिर्यज्ञमिति व्युत्पत्त्या दक्षि- 1.२०-२२
णाशब्दः प्रवृत्तः। तथा च 'दुहीयदिन्द्र दक्षिणा मघोनी'[c] इत्यत्र दक्षिणाशब्दं
निर्ब्रुवाण आह भगवान् यास्कः—'दक्षिणा दक्षतेः[2] समर्द्धयतिकर्मणः'[d] इति।
प्रसंगात् सत्रेषु विशेषं विधत्ते—**आत्मदक्षिणम्-नयन्ति**। आत्मैव सत्रिणां 1.२३-२६
दक्षिणा नाग्निष्टोमवद् गवादिकं यस्य तत् तथोक्तम्। कस्तर्हि तत्रानुष्ठानप्र-
कार इति चेत्? यस्मादात्मैव सत्रे दक्षिणा तस्माद्धेतोर्नाग्निष्टोमवदनुष्ठानप्र-
कारः, तत्रात्मव्यतिरिक्तानां गवामेव देयद्रव्यत्वात्। तथाभूतानां च प्रतिग्रही-
तृत्वात्। इह त्वात्मन एव तथाभावात्। तस्य चात्मत्वादेव परस्वत्वं नेतुमश-
क्यत्वात्, अन्यप्रतिग्रहीत्रभावाच्च। किं तु अहरहः प्रत्यहं दक्षिणाकाले 'इदम-
हम्'[e] इत्यादिमन्त्रजप एव कार्यः। मन्त्रस्य तात्पर्यमाह—आत्मानमेवेति। इह
लोके कल्याणी कीर्तिः। परत्र स्वर्गलोकेऽमृतत्वं च कैवल्यात्मकं फलम्। तत्
प्राप्तुं ते यजमाना आत्मानमेव दक्षिणात्वेन नयन्ति।

a. ŚŚ. 7. 17. 6.
b. KB. XIII. 5. २१.
c. RV. 2. 11. 21.
d. N. 1. 7. 1.
e. ŚŚ. 13. 14. 6.

1. T. अस्य
2. MSS. दक्षयति

अथ 'इन्द्राय मरुत्वतेऽनुब्रूहि'[a] इति प्रैषानन्तरं पठनीयां पुरोनुवाक्यां च
1.२७-३० याज्यां च विधत्ते—**वैश्वामित्रीम्-तायते**। ते च 'इन्द्र मरुत्व इह पाहि सोमम्'[b]
'सजोषा इन्द्र सगणो मरुद्भिः'[c] इत्येते। तयोर्दाशतय्यां तृतीयमण्डलान्तःपाति-
त्वेन तन्मण्डलद्रष्टृविश्वामित्रदृष्टत्वात्। सूत्रितं च—'इन्द्र मरुत्व इति पुरोनु-
वाक्या। सजोषा इन्द्रसगण इति यजति'[d] इति। स्तौति—सवनततिरिति।
योऽयं मरुत्वतीयग्रहोऽस्ति स सवनततिः सवनसन्तानरूप एव भवति मरुत्व-
तीयग्रहस्य प्रथमवर्तित्वात्। योऽयं विश्वामित्रः स वागेव। विश्वमस्य मित्र-
मिति वाग् विश्वामित्रः। मैत्री च वागेकनिर्वर्त्या। 'वाचा मित्राणि संदधाति'[e]
इति श्रुतेः। लोकप्रसिद्धेश्च। तेन वस्तुतो वागेव विश्वामित्रशब्दाभिधेया।
यज्ञश्च मन्त्ररूपया वाचैव तायते विस्तारं गच्छति प्रवर्तते। 'वाचि वै यज्ञः
श्रितः'[f] इति श्रुत्यन्तरम्। अनयोर्देवताच्छन्दोनिबन्धनमाभिरूप्यमाह—
1.३१-३४ **ते-प्रतिष्ठित्यै**। गतमेतत्।

इति प्रथमः खण्डः

अथ विधास्यमानस्य मरुत्वतीयशस्त्रस्य छन्दोनिबन्धनमवान्तरभेदं
2.१-५ दर्शयति—**अथ-भवति**। षट्संख्या विधाः प्रकारा यस्य तत् तथोक्तम्। षट्-
संख्यां स्तौति—षड्वा इति। गतमेतत्। कथं पुनरस्य षड्विधत्वमित्यत
आह—अनुष्टुभमिति। यस्मादस्मिन् शस्त्रेऽनुष्टुबादीनि षट्[1] छन्दांसि शस्यन्ते
तस्मादुपांशुशस्त्रस्यापि षड्विधत्वमित्यर्थः। मरुत्वतीयग्रहस्य भक्षणानन्तरं
मरुत्वतीयं शस्त्रं शंसनीयम्। सूत्र्यते हि—'तं भक्षयित्वा मरुत्वतीयं शंसति'[g]
इति। तस्य मरुत्वतीयात्मकशस्त्रस्य क्लृप्तिं दर्शयिष्यन्नादौ प्रातिपदे तृचे प्रथ-

a. ŚB. 4. 3. 4. 23.
b. RV. 3. 51. 7.
c. RV. 3. 47. 2.
d. ŚŚ. 7. 19. 2; 4.
e. AA. 3. 1. 6.
f. TS. 2. 6. 9. 2.
g. ŚŚ. 7. 19. 5.

1. T. सप्त

तामृचं विधत्ते—**आ-त्वारथम्**। अनुष्टुप्छन्दस्का हीयमृक्। तथा चानुक्रम- 2.६-९
ण्याम्—'आ त्वैकोना प्रियमेध आदावनुष्टुम्मुखास्तृचाश्चत्वारः'[a] इति। चतुर्षु सूक्तगतेष्वनुष्टुम्मुखेषु **तृचेषु** आद्यस्य **तृचस्य** प्रथमा हीयम्। अतोऽनुष्टुप्छन्दस्का भवति। प्रतिपद्यते शस्त्रं प्रारभते। अनुष्टुप्छन्दस्त्वं स्तौति—पवमानोक्थमिति। यदेतन्मरुत्वतीयाख्यं शस्त्रमस्ति तत् पवमानस्य माध्यंदिनपवमानस्तोत्रस्य शस्त्रं भवतीति प्रसिद्धम्। पवमानात्मकस्य च सोमस्य स्वभूतमेतदनुष्टुप्नामकं छन्दः। 'अनुष्टुभा सोम उक्थैर्महस्वान्'[b] इति मन्त्रवर्णात्। अतोऽनुष्टुप्छन्दः अस्मिञ्छस्त्रे अभिरूपम्। आज्यशस्त्रसंबन्धिन्या-माद्यायामृचि पूर्वस्मिन्नर्धर्चे यथा पादयोर्विगृह्य संधानमेवमिहापि पूर्वार्धर्चे पाद-विग्रहणं कर्तव्यमित्येतत् सिद्धं कृत्वा तत्रोक्तं '**तत्** प्रजात्यै रूपम्'[c] इत्यादि-कमत्रापि द्रष्टव्यमित्यतिदिशन्नाह—उक्तमिति।

अथ **पञ्च** गायत्रीछन्दस्का ऋचो विधत्ते—**गायत्रीः-धत्ते**। ताश्च 'तुवि- 2.१०-१२
शुष्म तुविक्रतो'[d] 'यस्य ते महिना महः'[e] 'इदं वसो सुतमन्धः'[f] 'नृभिर्धूतः सुतो अश्नैः'[g] 'तं ते यवं यथा गोभिः'[h] इत्येताः। आसामाद्ये ऋचौ प्रतिपत्तृचस्य द्वितीयतृतीये। उत्तरास्तिस्रोऽनुचराख्यस्तृचः। आद्ययोस्तावद् गायत्रीत्वं 'अनुष्टुम्मुखास्तृचाश्चत्वार'[i] इत्यत एव सिध्यति। 'अनुष्टुब्गायत्र्यौ चानुष्टु-म्मुखास्तृचा इत्युक्ते'[j] इति परिभाषणात्। 'इदं वसो'[f] इति तृचस्य 'परं गायत्रं प्राग्बृहत्यः'[k] इति परिभाषाबलात् सिध्यति। 'इदं वसो द्विचत्वारिंशत्'[l] इत्यत्र छन्दसोऽनुक्तेः। गायत्र्याः प्राशस्त्यं प्रागुपपादितम्। अथानुचरं तृचं
विधत्ते—**इदं-पतन्**। प्रतिपत्तृचमनु पश्चादनुचरति गच्छतीति अनुचरस्तृचः। 2.१३,१४
'सुतमन्धः' 'सुतो अश्नैः' इति सुतशब्दवान्। पिबेति पानार्थधातुयुक्तश्च। यस्मा-देतन्मरुत्वतीयशस्त्रं पवमानस्तोत्रस्य संबन्धि भवति, **तस्मात्** पवमानत्वगुणक-

a. SA. VIII. 68.
b. RV. 10. 130. 4.
c. KB. XIV. 2. २२.
d. RV. 8. 68. 2.
e. RV. 8. 68. 3.
f. RV. 8. 2. 1.
g. RV. 8. 2. 2.
h. RV. 8. 2. 3.
i. SA.VIII. 68.
j. SA. 11. 6.
k. SA. IX. 1.
l. SA. VIII. 2.

सोमाभिधायकत्वादभिरूपः । अथेन्द्रनिहवाख्यं बार्हतं प्रगाथं विधत्ते—**इन्द्र-**
2.१५-१८ **सोमपीथः** । इन्द्रो नितरां निकटे वा हूयतेऽनेनेतीन्द्रनिहवः । प्रग्रथ्यते संमेल्यते छन्दसा छन्द इति प्रगाथः । तच्च 'बृहतीतृतीयो द्वादशकः'[a] 'अयुजौ जागतौ सतोबृहती'[b] इति लक्षितयोर्बृहतीसतोबृहत्योरनयोः संमेलनात् । अत एवायं बार्हतः प्रगाथ इति सिध्यति । 'बृहतीसतोबृहत्यौ बार्हतः'[c] इत्युक्तेः । 'बृहती पूर्वा ककुब् वा सतोबृहत्युत्तरा । तं प्रगाथ इत्याचक्षते । बार्हतो बृहत्यां पूर्वस्याम्'[d] इति सूत्राच्च । स्तौति—नेदीय इति । पुरा किलैनमिन्द्रं मरुत इत्युक्तवन्तः । किमिति चेत् ? हे इन्द्र अमुं वृत्रं हन्तुमतिशयेन निकटं निर्भयः सन्नुपसर्पेति । कीदृशा मरुतः ? प्रधर्षयन्तः । वृत्रहननकर्मणीन्द्रस्य उत्साहं वर्धयन्त इत्यर्थः । अत्रेयमाख्यायिका—

ग्रस्ताग्नीषोमरूपाखिलजगति सुते त्वष्टुरुच्चैर्विवृद्धे
वृत्रे विश्वैकभर्ता विबुधपतिरमुं हन्तुकामः सुरौघान् ।
आहूयोवाच हन्तास्म्यहमहिमिह मे साधु साह्यं भवन्तः
सर्वे कुर्वन्तु संसिध्यति न खलु सहायं विना किंचनेति ॥
इत्युक्तास्ते तथेति त्वरितमभिययुर्वृत्रमत्रस्तचित्ताः
स त्वेनान् भीषयिष्यन् प्रबलतरमभिप्राश्वसीदाश्वसीदत् ।
भीतेर्निश्वासवायोः प्रचलितभुवनात् कान्दिशीकैर्बभूवे[1]
विश्वैरेवं मरुद्भिः पुनरुपविबुधस्वामि तत्रैव तस्थे ॥
प्रोचे चेन्द्र प्रभो त्वं प्रहर जहि जगन्नाथ वृत्रं स्वशत्रुं
वीर्यं विश्वातिशायि प्रकटय निजमित्येवमुद्धट्टयद्भिः ।
हत्वाहिं तैः सहायैरनितर[जन]साधारणं सख्यमेषा-
माद्ये माध्यंदिनोक्थे भजनमपि सह स्वेन शक्रेण चक्रे ॥

इत्थं मरुद्भिः प्रोत्साहितः स इन्द्रः वृत्रवधं कृत्वा तत एव विजयं प्राप्य मरुतः प्रसन्नोऽब्रवीत् । यस्माद् युष्मन्मात्रसहायसंपत्संपन्नः संपूर्णसामर्थ्य एव सन्नहं

a. SA. 7. 1. b. SA. 8. 4.
c. SA. 11. 2. d. ŚS. 7. 25. 3-4.

1. T. कान्दिशीका बभूवे

निहन्तुमन्यैरशक्यमहिं निहत्य निरस्तातिशयसाम्यं महत्त्वं प्राप्तवानस्मि । तस्माद्धेतोरयं मरुत्वतीयसंबन्धी सोमपीथः सोमपानमित आरभ्य मम युष्माभिः सहैव भवत्विति । यस्मादित्थमिन्द्रेण स्वकीये सोमपीथे स्वस्य मरुतां च साधारण्यं संपादितं प्राक् तस्मादद्याप्यस्येन्द्रस्य तैर्मरुद्भिः सहैवायं सोमपीथो भवति । तथा च भक्षणमन्त्रवर्णः 'इन्द्रेण मरुत्वता पीतस्य'[a] इति । प्रगाथान्तरं विधत्ते—
**प्र-सोमपीथः** । 'उपरिष्टाद् ब्राह्मणस्पत्यम्'[b] इत्यनुक्रमणीवचनाद् ब्रह्मण- 2.१९-२२
स्पतिदेवताकसूक्तान्तर्वर्तित्वादयं ब्राह्मणस्पत्यः । कथं ब्रह्मणस्पतिदेवतया मरुत्वद्गुणकेन्द्रदेवत्ये शस्त्रे संगतिरिति शङ्कां शमयन् स्तौति—प्रहरेति । एतत् पूर्ववद् व्याख्येयम् । स्वसाहाय्यकाचरणप्रीणितेनेन्द्रेण ब्रह्मणस्पतये दत्तत्वाद् भागस्य प्रगाथस्य ब्राह्मणस्पत्यस्यापि प्रशंसनमुचितम् । न केवलमयं प्रगाथो ब्राह्मणस्पत्य एव किंतु सर्वदेवत्यश्च । अतोऽपि प्रशस्त इत्याह—**तस्मिन्-**
**अन्वाभक्ताः** । कथमस्मिन् प्रगाथे देवतानामन्वाभजनमिति चेत्, अस्मिन् इन्द्र 2.२३-२५
इत्युत्तरार्धर्चे तावदिन्द्राद्या देवता अभिधीयन्ते । न च ते प्राधान्येनाभिधेयाः । किंतु गुणत्वेन उद्देशवाक्यगतत्वात् । अत एवान्वाभक्ताः । ब्रह्मणस्पतिना प्रधानदेवतया अनु पश्चादाभक्ताः कृताभजनाः । यथा राज्ञान्वाभक्ताः प्रकृतयो राष्ट्र इति । यद्यपि देवतान्तरमत्र प्रधानतया नाभिधेयं तथापि गुणत्वेनाप्यभिधानसद्भावात् सर्वदेवत्यत्वमस्त्येव । अभिधेयत्वस्यैव देवतात्वप्रयोजकत्वात् । तस्य च तस्मादाभिधानिकप्रत्यये सत्यनपवादात् । **तस्मात्** सर्वदेवत्यत्वादपि प्रशस्तोऽयं प्रगाथः ॥

इति द्वितीयः खण्डः

यदेतत् प्रागाथद्वयं विहितं तस्य शंसने कंचित् प्रकारविशेषं विधित्सुः
तद्विषयं किंचिच्चोद्यमुद्भावयति—**तद्-क्रियते** । तत् तत्र प्रगाथद्वये विषये 3.१-३
जिज्ञासवः प्रश्नवाक्यं वक्ष्यमाणमाहुः । किमिति चेत् तदाह—**यत्रेति** । सामगा **यत्र** स्तुतिं कुर्वन्ति स तृचः स्तोत्रियशब्देनोच्यते । 'एकं **साम तृचे**

a. BŚ. 7. 7. 22. b. SA. I. 40.

क्रियते स्तोत्रियम्'[a] इति सामगानामाम्नानात्। स्तोत्रियतृचादनन्तरतृचः अनुरूप-शब्दाभिधेयः। अनु पश्चाद् रूप्यते पठ्यते इत्यनुरूपशब्दव्युत्पत्तेः। यावेताविन्द्र-निहवब्राह्मणस्पत्याख्यौ प्रगाथौ स्तः तयोस्तावत् स्तोत्रियत्वमनुरूपत्वं वा नास्तीति निर्विवादमेतत्। सामगानाम् अनयोरन्यतरस्मिन्नपि स्तुत्यदर्शनात्। 'इदं वसो'[b] इत्यस्यैवानुचरतृचस्य विहितत्वाच्च। यस्मादेवं तस्मात् केन हेतुना एताविन्द्रनिहवब्राह्मणस्पत्यौ प्रगाथौ पुनरादायं पठितमेव पादं पुनः पुनः पठित्वा बृहतीं सतीं ककुप्छन्दः कृत्वा होत्रा शस्त्रे पठ्येते ? 'स्तुतमनुशंसति'[c] इति न्यायेन सर्वत्र स्तुतिप्रकारानुविधायित्वात् शंसनप्रकारस्य। अत्र च साम-गानां स्तुत्यदर्शनादुक्तप्रकारेण शंसनमयुक्तमिति चोद्यार्थः। अस्योत्तरं दत्ते— पुनरादायमित्यादि। इह खलु यस्यैतन्मरुत्वतीयं शस्त्रं तस्मिन् माध्यंदिने पवमाने त्रिषु गायत्रीबृहतीत्रिष्टुप्छन्दःसु सामगाः स्तुतिं कुर्वन्ति। अत एव 'त्रिच्छन्दाः पञ्चदशो माध्यंदिनः पवमानः'[d] इति श्रुतिषूद्घोषः। तत्रादौ[1] षट्संख्यासु 'उच्चा ते जातमन्धसः'[e] इत्याद्यासु गायत्रीछन्दस्कास्वृक्षु गायत्र-माहीयवाभ्यां सामभ्यां स्तुतिं कुर्वन्ति। अनन्तरं षट्संख्याकासु बृहतीछन्द-स्कासु 'पुनानः सोम'[f] इत्याद्यासु रौरवयौधाजयाख्याभ्याम्। ततः परं त्रिसंख्यासु त्रिष्टुप्छन्दस्कासु 'प्र तु द्रव'[g] इत्याद्यासु औश[स]नाख्येन साम्ना। तत्र या बृहतीषु रौरवयौधाजयसामभ्यां सामगैः स्तुतिः क्रियते, सा पुन-रादानेनैव तावत् क्रियते। एवं सति यदेतदिन्द्रनिहवब्राह्मणस्पत्ययोः प्रगाथयोः पुनरादानेन शंसनमस्ति, तत् पुनरादानेन स्तुतानां बृहतीनामनु-शंसनरूपमेव भवति। 'स्तुतमनुशंसति'[c] इति शस्त्रस्य स्तुत्यनुकरणरूपत्व-स्थितौ यद्यपि स्तुत्याश्रयभूताभ्यो बृहतीभ्य एता बृहत्यो वस्तुतोऽन्या एव; तथापि बृहतीशब्दवाच्यत्वाकारेणैकत्वात् तदुपाधौ स्तोत्रशस्त्रयोः समाना-श्रयत्वस्य कथंचित् संपादयितुं शक्यत्वात् 'स्तुतमनुशंसति'[c] इति न्यायस्यान-

a. Śabara on JS. 9. 2. 16; 10. 6. 2.
b. RV. 8. 2. 1.
c. AB. 5. 23. 6.
d. AB. 3. 17. 8.
e. RV. 9. 61. 10.
f. RV. 9. 107. 6.
g. RV. 9. 87. 1.

1. T. अत्रादौ

पबाध एव। वस्तुतस्तु स्तुतिशस्त्रयोरेकाश्रयत्वं न प्रयत्नेन प्रतिपादनीयम्। पुनरादानेन शंसनस्य स्तोत्रसंबन्धमात्रस्य प्रतिपिपादयिषितत्वात्। तच्च भिन्नदेशस्थत्वेऽपि प्रतिपादयितुं शक्यमेव। यैषा पवमाने बृहतीषु पुनरादानेन स्तुतिः सामगैः क्रियते तदनुकरणार्थमेवैतदिह पुनरादानेन शंसनमिति एकाश्रयत्वेऽपि तस्यैव[1] तत्प्रयोजनत्वात्। अत एव तस्यैवैतद्रूपं क्रियते इत्युक्तम्। तस्मादिन्द्रनिहवब्राह्मणस्पत्ययोः पुनरादानेन शंसनमुपपन्नमिति।

अथ तिस्र एकपातिनीः ऋचो विधास्यन् आदौ द्वे ऋचौ विधत्ते—
**अग्निर्-अह्न्**। पठेदिति शेषः। प्रथमा अग्निदेवत्या। 'अग्निमुषसम्'[a] 3.४-१०
इत्यस्मिन् पञ्चर्चे सूक्ते चतुर्थी खल्वेषा 'अग्निर्नेता'[b] इति। तच्च सूक्तमग्निदेवत्यं 'मण्डलादिष्वाग्नेयमैन्द्राद्'[c] इति न्यायानुसारेण इच्छन्तीति। अत ऐन्द्रात् प्राक् सामान्येनैन्द्रत्वस्यासत्यपवादे प्राप्तत्वात्। 'तत्राग्निमुषसमाद्यान्त्ये वैश्वदेव्यौ'[d] इत्युक्तेः। 'अग्निमुषसम्'[e] 'दधिक्रामग्निम्'[f] इत्येतयोर्विशेषतो विश्वेदेवाख्यदेवतान्तरोपदेशाद् आग्नेयत्वापवादाद् अनुपदिष्टदेवतान्तराणामग्निदेवत्यत्वस्य स्वरसताप्राप्तत्वात् चतुर्थ्या 'अग्निर्नेता'[b] इत्यस्या अग्निदेवत्यत्वं सिद्धम्। 'त्वं सोम क्रतुभिः'[g] इत्येषा 'त्वं सोम प्र चिकित'[h] इत्यस्मिन् त्रयोविंशत्यृचे द्वितीया। तच्च सोमदेवत्यम्। 'त्वं सोम त्र्यधिका सौम्यम्'[i] इत्युक्तेः। अतोऽस्या अपि सोमदेवत्यत्वम्। एतदृग्द्वयं यथाग्नीषोमदेवत्यं जातं तत्प्रकारप्रतिपादिकां वृत्रसंबन्धिनीमाख्यायिकां संक्षिप्य दर्शयति—अग्नीषोमाविति। सैषाख्यायिका विस्तरेण तृतीयाध्याये अग्नीषोमयागविध्यर्थवादव्याख्याने प्रदर्शितेति नेह प्रदर्श्यते। एतयोरग्नीषोमयोर्यः पूर्णमासयागसंबन्धी भागोऽस्ति तमेतमृग्द्वयरूपं भागं च उत्कोचत्वेनेन्द्रेण वृत्रं जिघांसता दत्तमुपलक्ष्य वृत्रस्य वदनान्निर्गतावभूतामिति योजना। न केवलमेतदेव

a. RV. 3. 20.
b. RV. 3. 20. 4.
c. SA. 12. 12.
d. SA. III. 20
e. RV. 3. 20. 1.
f. RV. 3. 20. 5.
g. RV. 1. 91. 2.
h. RV. 1. 91.
i. SA. I. 91.

1. M. V. तस्यै

शस्त्रावयवभूतमृग्द्वयमेव वृत्रवधहेतुत्वात् प्रशस्तम्, अवयविभूतमेतच्छस्त्रमपि इत्याह—तदेतदिति । यस्मादेतेन शस्त्रेण पूर्वमिन्द्रो वृत्रं हतवांस्तस्मादेतदुक्थं वार्त्रघ्नमेव । इन्द्रनिहवादीनां तावद् वृत्रवधोपयोगो दर्शितः । वक्ष्यते च 'पिन्वन्त्यप' इत्यादिना । अतः कृत्स्नस्यापि शस्त्रस्य
3.११-१४ वृत्रवधसंबन्धः सिद्धः । अथापरामृचं विधत्ते—**पिन्वन्त्यपः–पिन्वन्त्यपीया ।** पिन्वन्त्यपीया पिन्वन्त्यप इति शब्दवती । ऋक् पठनीयेति शेषः । एतामप्यृचं वृत्रवधसंबन्धप्रदर्शनेन स्तौति—आप इति । पिन्वन्त्यप इत्यृचा[1] आप उच्यन्त इत्यर्थः । तदभिधायकत्वात् तद्रूपत्वम् । यद्यप्यस्यामृचि मरुतामेव प्राधान्येनाभिधानं तथापि अप्राधान्येनापामपि मरुत्प्रेरितत्वाभिधानादस्त्यभिधानम् । तावता कथमस्य वृत्रवधसंबन्धसिद्धिरित्यत आह—तद् यदिति । यत् तदिति वृत्रवधनिमित्तमपां स्यन्दनमिति नैरुक्तप्रसिद्धं परामृशति । तथा च भगवान् यास्कः—'तत् को वृत्रः ? मेघ इति नैरुक्ताः । त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते । विवृद्ध्या शरीरस्य स्रोतांसि निवारयांचकार । तस्मिन् हते प्रसस्यन्दिर आपः'[a] इति । वृत्रे आवारके मेघे वपुर्विवृद्ध्या अग्नीषोमात्मकजगदावारके त्वाष्ट्रे इन्द्रेण हते सति तदावृता आपः विविधं विशेषेण वा आयन् जगद् व्याप्तवत्यः । यदेव तत् प्रसिद्धमस्ति एतदेव पिन्वन्त्यप इत्येतेन द्योत्यत इत्याशयेनाह—यत् प्रापिन्वन्निति । यदेतदापः प्रकर्षेणासेचनमकुर्वन् वृत्रवधादूर्ध्वम् , तस्माद्धेतोः पिन्वन्त्यप इत्येषा प्रवृत्ता । वृत्रवधनिमित्तमपां स्यन्दनं 'पिन्वन्त्यप'[b] इत्येतया सूच्यत इत्यर्थः ।

3.१५,१६ अस्या जगतीछन्दस्त्वं स्तौति—**सा-भवन्ति ।** 'वृष्णे शर्धाय'[c] इत्यस्मिन् पञ्चदशर्चे सूक्ते षष्ठी खल्वेषा । तस्मिश्चतुर्दशर्चो जगत्यः । अन्त्या त्रिष्टुप् । 'वृष्णे पञ्चोना मारुतं त्रिष्टुबन्तम्'[d] इत्यनुक्रमण्यामुक्तत्वात् । 'त्रिष्टुबन्तस्य

a. N. 2. 16. 2–3.
b. RV. 1. 64. 6.
c. RV. 1. 64.
d. SA. I. 64.

1. T. इत्यनया

सूक्तस्य शिष्टा जगत्यः'[a] इति परिभाषानुसारेणातिरिक्तानां जगतीत्वाव-धारणात्। तया जगत्या सर्वाणि सवनानि, न केवलमेतदेव माध्यंदिनं सवनम्, जगद्वन्ति जगतीछन्दोयुक्तानि भवन्ति। अस्याः सर्वमध्यवर्तित्वात्।

अथ सूक्तं विधत्ते—**जनिष्ठा-यजते**। शंसेदिति शेषः। मरुत्वतीयं मरुत्व- 3.१७-१९
द्गुणकेन्द्रदेवत्यम्। जातवच्च जनिष्ठा इति जनिधातुमत्। जातवत्त्वं वृत्रवध-सूचकत्वेन स्तौति—एतद् वा इति। यदायमिन्द्रो वृत्रं हतवान्, एतद् इदानीमेव जन्म प्राप्तवानासीत्। तद्वधात् पूर्वं तद्भीतस्य कुत्रापि निलीया-वस्थितत्वेनाजातकल्पत्वात्। तथा च श्रूयते—'इन्द्रो वै वृत्रं हत्वा महानभवद्'[b] इति। यजमानस्य याज्ञं यद् द्वितीयं मुख्यं जन्म तत्प्रत्यायकत्वादपि जातवत्त्वं प्रशस्तमित्याशयेनाह—एतद् वा इति। यो यागं करोति स एतदेतस्मिन् काले एव जन्म प्राप्नोति। अत्र यज्ञनिमित्तद्वितीयजन्मसद्भावोऽस्यैव जन्मन आमुष्मिकसंबन्धत्वेन। मुख्यं चोभयमपि प्रतिपाद्यते। तदेतदुभयमपि तल-वकारब्राह्मणे विस्पष्टमेव निष्टङ्कितम्—'द्विर्ह यजमानो जायते। मिथुनाद-न्यद् यज्ञादन्यत्। तद् यन्मिथुनाज्जायते तदस्मै लोकाय। अथ यद् यज्ञा-ज्जायते तदमुष्मै लोकाय'[c] इति। तथा 'अजातो ह वा एष तावन्मनुष्यो यावद् यज्ञे न जायते। तद् यदण्डं प्रथमनिर्भिण्णमेवमेव तदा'[d] इति।

स्त्रीपुंव्यतिकरोत्थं यदाद्यं जन्म द्विजन्मनाम्।
साधारणं तत् पश्वाद्यैः षट्कौशिकशरीरगम्।
क्षयिष्णु फल्गु दुःखोर्मिग्रस्तवस्तूपभोगदम्।
अत एव न मुख्यं तत् कृमिभस्मावधित्वतः।
यत् पुनर्यज्ञनिर्वृत्तं जन्म मुख्यं तदिष्यताम्।
मुख्यामृतत्वपर्यन्तमहाफलनिदानतः।
ब्राह्मणस्य हि देहोऽयं नोपभोगाय कल्पते।
इह क्लेशाय महते प्रेत्यानन्तसुखाय च।
इति जन्मन आद्यस्य यज्ञार्थत्वं च दर्शितम्।

a. SA. 12. 13.
b. AA. 1. 1. 1.
c. JB. 1. 259.
d. JUB. 3.3.4.8. (varies form printed edns. )

ब्राह्मणे चाथ यद्यज्ञादित्यत्राथेति यत् पदम् ।
तेन व्यावृत्तिरुदिता पूर्वोक्तादाद्यजन्मनः ।
सा चोपरिष्टादुद्दिष्टमहाबहुफलत्वतः ।
देवान् भावयतानेनेत्यपि गीतागतो हरिः ।
देवभावनमेवाह कार्यमेकं द्विजन्मनाम् ॥

अथ होतृप्रत्ययत्वात् प्रतिगरस्य सूक्ताद्याया ऋचः पठने तत्र कंचिद्
3.२०,२१ विशेषं विधत्ते—**तस्य-अमाद्यत्**। मदिधातुयुक्तं यथा भवति तथा 'मदामो दैव'[a] इति प्रतिगरमेकवारं पठेत् । सूत्र्यते हि—'मद्वानस्मिन् प्रथमः प्रतिगरः'[b] इति । स चात्राभिरूपः । यस्मादत्र सूक्ताद्यायामृचि पठ्यमानाया-मिन्द्रः प्रथमं मदं हर्षं करोति । अस्य सूक्तादिवर्तित्वात् । शस्त्रे सूक्तस्यैव प्राधान्यात् । 'आत्मा सूक्तम्'[c] इति हि वक्ष्यति । तस्मान्मद्वान् प्रतिगरः प्रथमं वक्तव्य इत्युपपद्यते ॥

इति तृतीयः खण्डः

४. १, २ प्रकारान्तरेण सूक्तं स्तौति—**तद्-अजयत्** । शत्रुसंबन्धिनीः पृतनाः सेना जयत्यनेनेति पृतनाजित्[1]। कुतोऽस्य पृतनाजित्त्वमित्यत आह—एतेन हीति । यस्मादेतेन 'जनिष्ठा उग्र'[d] इति सूक्तेनेन्द्र आसुरीः पृतनाः पूर्वं जितवान् , तस्मादेतत् सूक्तं पृतनाजिन्नाम संपन्नम् । तेन शत्रुसेनाजिगीषोः तज्जयसाधनमपीति सिध्यति । अथास्य निवित्पदपठनस्थानतामाह—**तस्य-**
४. ३, ४ **धीयते**। उक्तं हि प्राक् 'मध्ये सूक्तस्य माध्यंदिने सवने'[e] इति । अत्र च क्रमेण 'जनिष्ठा उग्र'[f] इत्याद्याः षळृचः शस्त्वा सप्तम्याः शंसनात् प्राङ् निवित्पद-

a. AŚ. 5. 20. 6.
b. ŚŚ. 7. 19. 16.
c. KB. XV. 6. ७.
d. RV. 10. 73.
e. KB. XIV. 2. ४.
f. RV. 10. 73. 1.

1. T. सेनाजित्

प्रक्षेपः । तथा च सूत्रम्—'जनिष्ठा उग्र इति षट्च्छस्त्वाहूय निविदम्'[a] इति । 'एकया भूयसीः शस्त्वा विषमर्चानाम्'[b] इति च । ननु द्वयोर्भागयोस्तदन्तरालदेशस्य मुख्यतया मध्यशब्दवाच्यत्वप्रसिद्धेरिह कथं मध्ये निवित्पाठसंभवः ? अस्य सूक्तस्य विषमर्चत्वेन मध्यदेशसंपादनस्याशक्यक्रियत्वात् , उच्यते । 'ग्राममध्ये द्विजो वसति, सेनामध्ये राजा भवति' इत्यादावपि किंचिद्भवनवैषम्ये मध्यशब्दस्य लोके प्रयोगदर्शनात् । सूक्तस्यात्मत्वं निविदोऽन्नत्वं च वक्ष्यमाणं बुद्धौ कृत्वा स्तौति—मध्ये वा इति ।

निवित्पदपाठं विधाय स्तौति—**अथ-धत्ते** । षष्ठ्या ऋचः पठनानन्तरं 4.५-७
निवित्पदानि पठेत् । तत्र या निविदः सन्ति ताः प्राणा आत्ममध्यवर्तिनस्तद्वीर्यवत्ताहेतवश्च । एवं निविदोऽपि सूक्तमध्यवर्तिन्यः तद्वीर्यसंपत्तिहेतवश्चेति प्राणसाम्यात् प्राणाः । तेन निविच्छंसनेन होतात्मनि प्राणान् धारयत्येव ।
तेषां विच्छेदेन शंसनं विधत्ते—**तासाम्-धत्ते** । अवग्रहणं विच्छेदः । तं कृत्वा 4. ८, ९
शंसेत् । पूर्वं पदं पठित्वावसायोच्छ्वस्योत्तरं पदं पठेदित्यर्थः । सूत्र्यते हि—'पच्छो निविदः शंसति'[c] इति । उत्तमाया निविदोऽवसाने प्रणवपाठं विधत्ते—
**उत्तमेन-अनुप्राणन्ति** । उत्तमेन पदेन संधाय प्रणवं कुर्यात् । सूत्र्यते हि— 4.१०-१२
'उत्तमे प्रणवः पदे'[d] इति । तत् तेनेमं मुख्यं प्राणं उत्सृष्टमन्येषां प्राणानां मध्ये प्राधान्येनोद्गतं करोत्येव । यस्मादयं मुख्यः प्राणः सर्वेभ्यः उद्गततया वर्तते, तस्माद्धेतोरिमं प्राणं स्वव्यापारं कुर्वन्तमनु पश्चात् सर्वे चक्षुराद्याः प्रतिस्वं व्यापारं कुर्वन्ति स्वामिनमिव भृत्याः । एतच्चारण्यकेषु प्राणसंवादे[e] प्रसिद्धमिति हिशब्दोक्तिः । निविदां विलम्बितवृत्त्या पठनं विधत्ते—**अथो-**
**अत्ति** । न केवलं निविदां प्राणरूपत्वमेव, यावता विद्वांसो निविदोऽन्नरूपा 4.१३-१५
इत्यपि कथयन्ति । अस्तु तथा, किं तत इति चेत् । यस्मादन्नरूपा एता निविदो विद्वद्भिः स्तुताः तस्मादेना निविदो विलम्बितवृत्तिमाश्रित्य पठेत् । यस्माल्लोके भुञ्जानो जनः स्वेच्छया विषयीकृतः प्रभूतव्यञ्जनं व्रीह्याद्यन्नं त्वरामकुर्वाण आस्वाद्य भुङ्क्ते । त्वरायां क्रियमाणायाम् आस्वादनस्या-

a. ŚŚ. 7. 19. 15.
b. ŚŚ. 7. 19. 17.
c. ŚŚ. 7. 19. 23.
d. ŚŚ. 7. 19. 24.
e. Cf. BṛhU. 6.1.

शक्यसंपादनत्वात्। तस्मादत्वरमाणेनैव निविदः पठनीयाः। सूत्र्यते हि—'वियतं पच्छो निविदः'[a] इति। वियतं विलम्बितमित्यर्थः। निवित्पदानि क्रमेण पठित्वा 'त्वं जगन्थ'[b] इत्यादि सप्तम्याद्याः पञ्चर्चः पठेत्। पञ्चम्या परिधानीयाख्यया शस्त्रं समापयितव्यम्। शस्त्रे समाप्ते पठनीयां ग्रहहोम-
4.१६ याज्यां विधत्ते—**ये—यजति**। इषत्यस्मिन् देवताप्रसाद इत्युक्थं शस्त्रम्। तत् पठित्वा 'ये त्वाहिहत्य'[c] इति याज्यां ब्रूयात्। अस्याः प्रतीकोपादानपुरः-
4.१७-१९ सरं तात्पर्यार्थमाह—**ये-सोमपीथः**। अस्या अयमर्थः—हे इन्द्र, मघवन् ये मरुतो वृत्रवधकर्मणि त्वामवर्धयन् 'प्रहर भगवो जहि' इति वदन्तः तव वीर्यवत्तां संपादितवन्तः। ये च मरुतः शम्बरसंबन्धिनि युद्धेऽवर्धयन्नित्यनुषङ्गः। हे अश्वयुक्तेन्द्र ये मरुतः पणिभिरपहृतानां गवामन्वेषणे अवर्धयन्। ये च मरुत इदानीं त्वामनु मदन्ति मेधाविनः[1]। तैर्मरुद्भिः त्वं सोमं पिबेति। एतैर्मरुद्भिः सहायभूतैः सहैतानि सुदुष्कराणि वृत्रवधादीनि वीरकर्माणि इन्द्रोऽकरोत्। यस्मादेवं तस्मादेतैर्मरुद्भिः[2] सहैवास्यैष सोमपीथः सोमस्य पानं भवति। तेभ्यः साहाय्यकाचरणसंतुष्टेन तेन दत्तत्वात्। अयमर्थः 'ये त्वाहिहत्य'[c] इत्यनयार्चोच्यत[3] इत्यर्थः।

4.२०-२३ **सा-प्रतिष्ठित्यै**। सा वा ऐन्द्रीत्यादिकम् आहुतीनां प्रतिष्ठित्या इत्यन्तं गतम्।

आ त्वेत्यादिस्तृचः स्यात् प्रतिपदनुचरश्चेदमित्यादिरिन्द्र
प्रेत्यादी बार्हतौ द्वौ पठितपदपुनःपाठशस्यौ प्रगाथौ।
अग्निस्त्वं सोम पिन्वन्त्यप इति च जनिष्ठा निविद्धानसूक्तं
शस्त्रे माध्यंदिनीये प्रथमऋच इमा अत्र ये त्वेति याज्याः॥

एवं मरुत्वतीयशस्त्रक्लृप्तिं विधाय क्लृप्तस्य शस्त्रस्य पुरुषविधत्वसंपाद-
4.२४-२९ नेन प्रशंसां करोति—**वागेव-याज्या**। 'आ त्वा रथं यथोतये'[d] इत्येषा या

a. ŚS. 7. 19. 23.
b. RV. 10. 73. 7.
c. RV. 3. 47. 4.
d. RV. 8. 68. 1.

1. T. मेधाविनं
2. T. तैः for एतैः
3. T. उच्चत for उच्यत

प्रथमा शस्त्रस्यानुष्टुप्छन्दस्का ऋक् सा वागेव शस्त्रात्मकस्य पुरुषस्य । अनुष्टुभो वाग्रूपस्योक्तत्वात् । प्राधान्याच्च । 'प्राणानां वागुत्तमा'[a] इति श्रुतेः । तां वाग्रूपामनुष्टुभं पञ्चसंख्याकाः 'तुविशुष्म तुविक्रतो'[b] 'यस्य ते महिना महः'[c] 'इदं वसो'[d] इत्याद्यास्तिस्रो गायत्र्योऽनुगच्छन्ति । अनुष्टुभोऽधिकाक्षरत्वात् तत्र चतुर्विंशत्यक्षराया गायत्र्या अनुष्टुब्रूपत्वात् । ता गायत्र्यो वागेव भवन्तीत्यर्थः । योऽयमिन्द्रनिहवाख्यः प्रगाथः स मन एव भवति शस्त्रपुरुषस्य । यथा मनः सर्वव्यवहारप्रवर्तयितृत्वात् चक्षुरादीनां मध्ये प्रधानभूतम् , एवमयं प्रगाथोऽपि इन्द्रस्य वीरकर्मप्रतिपादकत्वात् प्रधानभूत इति मनःसादृश्यम् । ब्रह्मणस्पतिदेवत्यः प्रगाथः श्रोत्रमेव । ब्रह्मणः श्रोत्रप्रतिष्ठत्वात् । 'श्रोत्रं वै ब्रह्म श्रोत्रेणैव हि ब्रह्म शृणोति श्रोत्रे ब्रह्म प्रतिष्ठितम्'[e] इति श्रुत्यन्तरात् । 'अग्निर्नेता'[f] इत्यादिकास्तिस्र ऋचः शस्त्रशरीरिणः प्राणाः त्रित्वसाम्यात् । 'जनिष्ठा'[g] इति सूक्तं शस्त्रस्यात्मा मध्यभाग एव । शस्त्रे सूक्तस्य प्राधान्यात् । यदात्मन्यन्तः जीवशब्दवाच्यमात्मचैतन्यवस्तु तदिह निविदिति ज्ञेयम् । सारत्वसाम्यात् । परिधानीयाख्या ऋक् प्रतिष्ठा । प्रतितिष्ठत्यस्मिन् इति प्रतिष्ठा[1] । समाप्तिस्थानत्वात् । याज्या 'ये त्वाहिहत्ये'[h] इत्येषान्नम् ; आहुतिसम्बन्धात् । उक्तप्रकारेण शंसिता शस्त्रशंसनकालेऽस्मिञ्छस्त्रे पुरुषरूपसंपादनेनोपासनां कुर्वन्नेतच्छस्त्रं शंसेत् । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति'[i] इत्युपासनासमुच्चितस्य कर्मणो वीर्यवत्तरत्वश्रुतेः ॥

इति चतुर्थः खण्डः

a. TB. 1. 3. 4. 5.
b. RV. 8. 68. 2.
c. RV. 8. 68. 3.
d. RV. 8. 2. 1.
e. AB. 2. 40. 4.
f. RV. 3. 20. 4.
g. RV. 10. 73.
h. RV. 3. 47. 4.
i. ChU. 1. 1. 10.

1. T. adds ग्रहम् (?)

मरुत्वतीयसंज्ञस्य क्लृप्तिः शस्त्रस्य वर्णिता ।
अथ क्रमावतीर्णस्य निष्केवल्यस्य वर्ण्यते ।।

5.१-४ श्रोतृबुद्धिसमाधानार्थमादौ विवक्षितमर्थं प्रतिजानीते—**अथ–निष्केवल्यत्वम्।** अथशब्द आनन्तर्यार्थः। तच्चानन्तर्यं पूर्ववृत्तमरुत्वतीयापेक्षम्। वक्ष्यत इति शेषः। निष्केवल्यमिति शस्त्रस्य नामधेयम्। तत् किं डित्थादिनामवद् यादृच्छिकमेव ? नेति तन्नामनिर्वचनमुखेन दर्शयति—बह्वृच इत्यादिना। निष्केवल्यापेक्षया प्राच्यः प्राग्भवा या देवता शस्त्रैः शस्यन्ते ता बह्वृच एव भवन्ति । आज्यादिशस्त्राणामनेकदेवत्यत्वात्, तथा निष्केवल्यादूर्ध्वभवा[1] देवता अपि बह्वृच एव। एवं निष्केवल्यव्यतिरिक्तानि कृत्स्नानि शस्त्राणि साधारणानि। तर्हि निष्केवल्यमपि नानादेवतासाधारणं किं न स्यादिति चेत्, न। अपितु यदेतन्निष्केवल्यं शस्त्रमिति प्रसिद्धं तदिन्द्रस्यैव स्वभूतम्। नान्यदेवतासाधारणम्। एतदेवास्य शस्त्रस्य निष्केवल्यशब्दवाच्यत्वनिमित्तम्। केवलेन्द्रदेवत्यतया निश्चितत्वात्। निश्चयेन नितरां वा केवल इन्द्रो देवता यस्य। छान्दसो यत्। तत्र साधुरिति वा। स्वार्थिको वा। इत्थं निष्केवल्यशब्दवाच्यमेतच्छस्त्रम्। न तु डित्थादिवद् यादृच्छिकशब्दवाच्यम्। इत्थं नामनिर्वचनेन शस्त्रस्वरूपं प्रशस्य तस्य क्लृप्तिं क्रमेण

5.५-७ विधित्सुः स्तोत्रियतृचे प्रथमामृचं तावद् विधत्ते—**अथ–समर्थयति।** निष्केवल्यशस्त्रस्य तावद् रथन्तरनामकं बृहन्नामकं वा साम सामगैर्विकल्पेन क्रियते। तत्र रथंतरपृष्ठपक्षे 'अभि त्वा शूर नोनुमः'[a] इत्ययं बार्हतः प्रागाथः स्तोत्रियः कर्तव्यः। बृहत्पृष्ठपक्षे 'त्वामिद्धि हवामहे'[b] इति। बार्हते च प्रगाथे बृहती पूर्वा, उत्तरा च सतोबृहती। 'बृहतीसतोबृहत्यौ बार्हतः प्रगाथः'[c] इत्युक्तेः। तत्र रथंतरपक्षे 'अभि त्वा शूर नोनुमः'[a] इति। बृहत्पृष्ठपक्षे 'त्वामिद्धि हवामहे'[b] इति। एतया बृहतीछन्दस्कयर्चा निष्केवल्यशस्त्रं प्रारभेत। तदेतत् प्रशस्तम्। यस्मादसौ द्युस्थाने प्रकाशमान आदित्यो बार्हतो भवति। आदित्यस्य छन्दोमयत्वात्। छन्दसां च बृहत्या एव प्राधान्यात्। 'बृहती छन्दसां स्वाराज्यं

a. RV. 7. 32. 22. b. RV. 6. 46. 1.
c. SA. 11. 2.

1. T. ऊर्ध्वं भवा अपि for ऊर्ध्वभवा

परीयाय'[a] इति तैत्तिरीये श्रवणात्। ब्राह्मणग्रन्थे च रथरूपणार्थवादे 'तस्य गायत्री च जगती च पक्षावभवताम्। उष्णिक् च त्रिष्टुप् च प्रष्ठ्यौ। अनुष्टुप् च पङ्क्तिश्च धुर्यौ। बृहत्येवोरोऽभवत्'[b] इति बृहत्या एव प्रधानरथावयत्वरूपणात्। 'एकं साम तृचे क्रियते'[c] इति न्यायेन द्वृचस्यापि प्रगाथस्य तृचीकरणेन स्तुतत्वात् तदनुकरणार्थशस्त्रे तृचीकरणं विधत्ते—**द्वे-रूपम्**। 5.८,९
वस्तुतो द्विसंख्याके अपि बार्हतप्रगाथगते ऋचौ पठितमेव पादं पुनः पठित्वा त्रिसंख्याकाः तिस्रः कुर्यात्।

बृहतीछन्दस्कां प्रथमामृचं पठित्वा तदुत्तमं पादम्।
द्विरुदीर्य सतोबृहतीपादं प्रोदीर्य चादिमं विरमेत्॥
प्रणवपुरःसरमथ च प्रत्यादाय द्वितीयमेतस्याः।
विरमेत्तृतीयमुक्त्वा तार्तीयेन प्रणौति पादेन॥
कथितेन वर्त्मना ते द्वे अपि सत्यौ भवन्ति तिस्र ऋचौ।
स्तुत्यनुशंसनविधितः सिद्धः सोऽयं द्वृचे तृचीकारः॥

तदेतद् द्वयोस्त्रित्वसंपादनं प्रजोत्पत्ते रूपं भवति। कथमिति चेदुच्यते—
**द्वाविव-उपप्रजायते**। लोके प्रजोत्पत्तिकालात् पूर्वस्मिन् काले द्विसंख्यायुक्तावेव 5.१०,११
स्त्री च पुमांश्च भवतः। ततः पश्चात् तयोः संयोगे सति तस्मान्मिथुनात् प्रजोत्पद्यते। तत्र यत् तावत् तृतीयः पुत्रो नामास्ति स तावन्न द्वाभ्यां स्वरूपतोऽत्यन्तभिन्नः। अपि तु पितैव रूपान्तरमापन्नः पुत्र इत्युच्यते। तथा च मन्त्रः—'आत्मा वै पुत्रनामासि'[d] इति।

'पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते॥'[e]

इति च। अतो द्वयोरेव त्र्यात्मना परिणतत्वसाम्याद् द्वृचस्य तृचीकरणं प्रजोत्पत्तिरूपं भवति।

स्तोत्रियं विधायानुरूपतृचं विधत्ते—**स्तोत्रियं-नाप्रतिरूपः**। स च 5.१२-१५
रथन्तरपक्षे 'अभि त्वा पूर्वपीतये'[f] इति। बृहत्पृष्ठपक्षे 'त्वं ह्येहि

a. TS. 5. 3. 2. 4. b. TB. 1. 5. 12. 5.
c. Śabara on JS. 9. 2. 16. d. ŚB. 14. 9. 4. 26.
e. AB. 7. 13. 9. f. RV. 1. 19. 9.

चेरवे'[a] इति । तथा सूत्रकृता दर्शितत्वात्[b] । स्तौति—आत्मा वा इति । योऽयं स्तोत्रियस्तृचः स आत्मा; प्राधान्यात् प्राथम्याच्च । योऽनुरूपस्तृचः स तत्सम्बन्धिनी प्रजा पुत्रादिलक्षणा भवति । गुणभावात् पश्चाद्भावित्वाच्च । यस्मात् स्तोत्रियानुरूपयोरात्मप्रजारूपत्वं तस्माद्धेतोरनुरूपं तृचं स्तोत्रियतृचेन प्रतिरूपं सदृशं कुर्यात् न तु विसदृशम् । तच्च सादृश्यं प्रगाथत्वतृचीकरणलक्षणम् । प्रतिरूपत्वे किं फलमिति चेत् । अस्य यजमानस्य होतुः प्रजायां सन्ततौ यो जायते स प्रतिरूपो वेदविद्यावृत्तादिभिः आत्मना सदृश एव जायते । न तु मात्रयापि विसदृशः । तथा च लौकिकाः—'कुपुत्राद् वरमपुत्रता' इति । अथै-
5.१६-१८ कामृचं विधत्ते—**धाय्यां-धत्ते** । सा च 'यद् वावान पुरुतमम्'[c] इत्येषा । 'यद्वावान'[d] इति सूत्रकृदुक्तेः । यथा प्राणो देहविधारकः, 'अहमेतद् बाणमवष्टभ्य विधारयामि'[e] इति प्राणोक्तिरूपश्रुतेः, प्राणोत्क्रान्तौ झटिति देहपतनदर्शनाच्च, एवं धाय्यापि यज्ञस्य विधारयित्रीति तस्याः प्राणरूपत्वम् । तथा चान्यत्र यज्ञच्छिद्रापिधानेन तद्धारकत्वं धाय्याशब्दनिर्वचनेन दर्शितम्—'यत्र वै देवा यज्ञस्य छिद्रं निरजानन् । तद् धाय्याभिरपिदधुः, तद् धाय्यानां धाय्यात्वम् । अच्छिद्रेण हास्य यज्ञेनेष्टं भवति य एवं वेद'[f] इति । तेन धाय्यापठनेन
5.१९-२३ प्राणमेवात्मनि[1] स्थापयति । सामप्रगाथं विधत्ते—**प्रगाथं-धत्ते** । रथन्तरपक्षे 'पिबा सुतस्य रसिनः'[g] इति । बृहत्पक्षे 'उभयं शृणवच्च नः'[h] इति । 'पिबा सुतस्य रसिन इति प्रगाथो रथन्तरस्य । उभयं शृणवदिति बृहतः'[i] इति सूत्रकारवचनात् । पशूनां प्रग्रथ्यमानत्वदर्शनात् तद्धर्मकस्य प्रगाथस्य पशुरूपत्वम् । अतः प्रगाथस्य शंसनं पशूनां प्राप्त्यर्थं संपद्यते । प्रकारान्तरेण स्तौति—अथो इति । योऽयं प्रकृतो बार्हतः प्रगाथः स प्राणापानावेव भवति । अत्र बृहत्याः प्राणरूपत्वं सतोबृहत्या अपानरूपत्वं च केनचिद्

a. RV. 8. 61. 7.
b. ŚŚ. 7. 20. 4.
c. RV. 10. 74. 6.
d. ŚŚ. 7. 20. 5.
e. PraśnaU. 2. 3.
f. AB. 3. 18. 4–5.
g. RV. 8. 3. 1.
h. RV. 8. 61. 1.
i. ŚŚ. 7. 20. 6–7.

1. MSS. ब्राह्मणम् for प्राणम्

रूपसाम्येनाभिप्रेत्य तदुभयमेलनरूपस्य प्रगाथस्य प्राणापानात्मकत्वमुक्तम्।
प्राणापानयोर्देहान्तर्वर्तिनोरन्योन्यं प्रग्रथ्यमानयोरिव नित्यं व्यतिषक्तत्वात्।
तेन प्रगाथपठनेनात्मनि प्राणापानयोर्धारणमेव क्रियते। अत्र सूक्तं विधत्ते—
**इन्द्रस्य–अत्ति**। निष्केवल्यमिति विशेषणं सूक्तस्य प्राधान्यसूचनार्थम्। 5.२४-३६
पञ्चदश इत्यादिः संख्यास्तुत्यर्थवादो गतः। तस्य मध्य इत्यादिः निविच्छंश-
नार्थवादश्च॥

इति पञ्चमः खण्डः

अथास्य सूक्तस्यान्त्ययर्चा परिधानविधिं सिद्धवत्कृत्य तस्या नीचैः-
पठनीयतामाह—**नितरां–भवति**। नितरां नीचैस्तरां परिधानीयामृचं पठेत्। 6. १-४
तथा नितरां शंसनेऽस्य यजमानस्य होतुर्वा पत्नी अप्रच्यावुका अप्रच्यावन-
शीला भवति। प्रच्यवनं स्वधर्मतः पतिशुश्रूषणादेः परित्यागादिलक्षणम्।
उक्तमेव नीचैःशंसनं निषेधेन द्रढयति—अनुदायिततरामिति। शंसेदिति
शेषः। अतिशयेनोच्चैष्ट्वराहित्यसंपादनेन परिधानीयां ब्रूयात्। एवं शंसने
पत्नी अनुद्धतेन औद्धत्यरहितेन अतिशयितविनयोपपन्नेन मनसा युक्ता भवेत्।
पूर्ववदेवैतदपि शस्त्रं पुरुषविधत्वसंपादनेन स्तौति—**आत्मा–याज्या**। धाय्या 6. ५-८
महिषी पत्नी। स्त्रीलिङ्गशब्दवाच्यत्वसाम्यात्। शेषं पूर्ववत्।

इत्थं शस्त्रक्लृप्तिं विधाय तच्छस्त्रं मृत्युमोचनहेतुत्वेन स्तौति—**पव-
माने–पवम्**। पवमाने सामर्थ्यात् बहिष्पवमानसम्बन्धिनि[1] स्तूयमाने सामगैः 6. ९-१६
मृत्युर्मारयिता देवो होतारं प्रतिलक्ष्य तस्मिन्नवसरे हन्तुकामोऽलीयत निगूढाव-
स्थानमकरोत्। तं मृत्युं होता पूर्वमाज्याख्येन शस्त्रेण न्यकरोत्। निकारो वञ्चनं
तदकरोत्। किं सर्वथैव निकारः कृत इति? नेत्युच्यते। स्तोत्रियात् तृचादन्यत्रैव
विषये मृत्योर्निकारः न तु स्तोत्रिये। शस्त्रस्य स्तोत्रियेणानारम्भात्। तेनाज्य-
शस्त्रस्य न मृत्युमोचकत्वम्। उक्तप्रकारेणाज्यशस्त्रस्य यथा न मृत्युमोचन-
सामर्थ्यमेवं प्रउगमरुत्वतीययोरपीति दर्शयति—आद्ये सामाज्य इति। चतुर्णा-
माज्यानां मध्य आद्ये सामरूप आज्ये मृत्युर्होतारं प्रत्यालीयत। आज्यं

1. T. बहिर्देशः fo बहिष्पवमान

शस्त्ररूपमप्यस्ति । तद्व्यावृत्त्यर्थं सामविशेषणम् । आज्यप्रउगमरुत्वतीयवैलक्षण्येन निष्केवल्यस्य मृत्युमोचकत्वं हेतुप्रदर्शनमुखेनाह—अथ वै निष्केवल्यमिति । अथशब्दो विशेषार्थः । निष्केवल्याख्यं शस्त्रम् । स्तोत्रियेण सामगैः यस्मिंस्तृचे स्तुतिः कृता स तृचः स्तोत्रियः । 'एकं साम तृचे क्रियते स स्तोत्रियः'[a] इत्युक्तेः । तेन 'अभि त्वा शूर नोनुमः'[b] इत्येतेनैव प्रारभते होता । न तु पूर्ववत् तृचान्तरैरेव । तच्चोक्तं प्रागेव । अथ महाव्रतीयनिष्केवल्यगतचतुरुत्तरशंसनसंपादनेन प्रकृतस्तोत्रियानुरूपशंसनं[1] स्तोतुं प्रश्नमुत्था-
6. १७ पयति—तद्–इति । इत्याहुरित्युपरितनेनान्वयः । तत् तत्र प्रकृते निष्केवल्ये विषये एतद्विजिज्ञासवः प्रश्नवाक्यमाहुः । किमिति चेद् उच्यते । तदिदं प्रकृतिरूपाग्निष्टोमगतनिष्केवल्यशस्त्रम् । अदो महाव्रतगतनिष्केवल्यम् । नात्र विवादः कश्चित् । अस्याग्निष्टोमस्य एकाहाहीनसत्रावयवात्मकत्रिविधमहाव्रतमूलप्रकृतिरूपत्वात् । अमुत्र च महाव्रतसंबन्धिनि निष्केवल्यशस्त्रे चतुरुत्तराणि तृचानि शस्यन्ते । तथा च महाव्रतविषयपञ्चमारण्यके तद्विधायकं वचनम्—'अथैतानि चतुरुत्तराणि तृचानि शंसति । इन्द्राय मद्वने सुतम् इन्द्रं वृत्राय हन्तवे गायन्ति त्वा गायत्रिणः[2] नत्वा बृहन्तो अद्रय इति चत्वारि तृचानि । तान्यर्द्धर्चशः । इत्था हि सोम इन्मद इति वा सूक्तम् । तत् पङ्क्तिशंसम् । सं च त्वे जग्मुर्गिर इन्द्रपूर्वीरादङ्गिरा प्रथमं दधिरे वय इति त्रैष्टुभजागते तृचे । ते पच्छः शस्त्वाथ सूददोहसम्'[c] इति । तदेतच्चतुरुत्तरशंसनमिहापि संपादयितव्यम् । तदभिन्नस्वरूपत्वादस्य । न च तदिह शंसनमस्ति । तस्मात् प्रयत्नेन संपादने कर्तव्ये तदुपाप्तिप्रकारः कथमिति
6.१८-२२ तदुपाप्तिव्युत्पादनायायं प्रश्नः । अस्योत्तरमाह—तानि–दधाति । इह निष्केवल्ये तानि महाव्रतिकनिष्केवल्यगतानि चतुरुत्तराणि न केवलमुपाप्तानीत्येव । अपितु अतिशयेनोपाप्तानि भवन्ति । केन प्रकारेणेत्यपेक्षायामाह—स्तोत्रियानुरूपाविति । महाव्रतिके खलु निष्केवल्यशस्त्रे गायत्र्यादीनि जगतीपर्य-

a. Śabara on JS. 9. 2. 16; 10. 6. 2. b. RV. 7. 32. 22.
c. ŚŚ. 18. 6. 1–6.

1. T. प्रस्तुत for प्रकृत 1. MSS. omit गायन्ति त्वा गायत्रिणः

न्यानि चतुरुत्तराणि सप्तसंख्यानि छन्दांसि शस्यन्ते । 'इन्द्राय मद्वने सुतम्'[a] इत्याद्यानामनुदाहृतानामृचां क्रमेण गायत्र्यादिजगत्यन्तसप्तच्छन्दस्कत्वात् । तत्र 'चतुर्विंशत्यक्षरा गायत्री'[b] 'अष्टाविंशत्यक्षरोष्णिक्'[c] इत्येवमुत्तरोत्तरचतुष्टयाभिवृद्धया प्रत्येकमक्षरपरिमाणेऽवस्थिते समुदितानां तेषामक्षरगणनायां क्रियमाणायां[1] संभूय द्विपञ्चाशदधिकशतद्वयमक्षराणि संपद्यन्ते । एवं सतीह स्तोत्रियानुरूपयोः बार्हतयोः प्रगाथयोः वस्तुतो बृहतीसम्मेलनरूपत्वेन प्रत्येकं 'तृचयोर्द्वे तिस्रः करोति'[d] इति वचनानुरोधेन चतुर्थषष्ठयोः पादयोः पुनः पठनेन पूर्वभिक्तां बृहतीमुत्तरे च द्वे ककुभौ कृत्वा तृचीकृतयोराद्याचतुर्थ्यौ बृहत्यौ । शिष्टाश्चतस्रः ककुभ इत्येवं षट्संख्यास्वृक्षु संपन्नासु आद्याया बृहत्यास्त्रिवारं पठ्यमानायास्त्रिसंख्यात्वे सति चतस्रो बृहत्यश्चतस्रश्च ककुभ इत्येवं संभूयाष्टावृचो भवन्ति । एतासामृचां च मिलितानामक्षरगणनायां बृहत्याः षट्त्रिंशदक्षरत्वाद् बृहतीचतुष्टयस्य मिलितस्य चतुश्चत्वारिंशच्छतमक्षराणि । ककुभोऽष्टाविंशत्यक्षरतया तच्चतुष्टयस्य मिलितस्य द्वादशशतमक्षराणि । एषां बृहत्यक्षराणां ककुबक्षराणां च मेलने कृते षट्पञ्चाशच्छतद्वयमक्षराणि । तत्र चतुरुत्तरच्छन्दःसप्तके संपिपादयिषिते द्विपञ्चाशदधिकेन शतद्वयेन गायत्र्यादीनि जगत्यन्तानि छन्दांस्याप्तानि भवन्ति । तेषां तावत्संख्याक्षरत्वात् । एवमुक्तसंख्यैरक्षरैश्चतुरुत्तरोपाप्तौ चत्वार्यक्षराणि तावदतिरिक्तानि वर्तन्ते । अत एवोपाप्ततराणीत्ययमातिशयनिकस्तरपप्रत्ययः । एकद्व्यक्षरन्यूनतायामपि ह्युपाप्तिः कथंचिद् वक्तुं शक्या । इह पुनः प्रत्युताक्षरचतुष्कस्यातिरेक एव । तेन नानुपाप्तिशङ्कापीत्ययमर्थः तरप्प्रत्ययेनाभिधीयते । तस्मादिह स्तोत्रियानुरूपाक्षरेषु महाव्रतिकनिष्केवल्यगतचतुरुत्तरशंसनसंपादनेन तयोः पठनं कर्तव्यम् । यानि पुनरतिरिक्तानि चत्वार्यक्षराणि तेषु पशुदृष्टिः कर्तव्या । पशुसंख्यान्वयित्वाम्नानात् । ततश्च तस्याक्षरचतुष्टयस्य शंसनेन यजमाने पशून् प्रतिष्ठितान् करोति ।

a. RV. 8. 92. 19.
b. KB. XII. 4. १३.
c. KB. XXVI. 1. ७.
d.

1. V. omits.

6.२३-२५ अथ शस्त्रानन्तरपठनीयां याज्यां विधातुमाह—**विराड्-यजति**। योऽयमग्निष्टोमः स दशपरिमाणा विराडेव भवति। केन प्रकारेणेत्यत्राह—नवतिशतमिति। नवत्यधिकं शतं नवतिशतम्। तथाहि—त्रिवृद् बहिष्पवमान इति हि प्रसिद्धम्। तत्र नव स्तोत्रियाः पञ्चदशान्याज्यानि। तत्र संभूय षष्टिः स्तोत्रियाः। पूर्वाभिः सहैकोनसप्ततिः। पञ्चदशो माध्यंदिनः पवमानः। तत्र पञ्चदश। पूर्वाभिश्चतुरशीतिः। सप्तदशानि पृष्ठानि। तेषु संभूयाष्टषष्टिः। पूर्वाभिर्द्विपञ्चाशच्छतम्। सप्तदश आर्भवः पवमानः। तत्र सप्तदश। पूर्वाभिरेकोनसप्ततिशतम्। एकविंशं यज्ञायज्ञियं साम। तत्रैकविंशतिः। पूर्वाभिः सह नवत्यधिकं शतं स्तोत्रिया एव। संभूयाग्निष्टोमे नवतिशतं स्तोत्रिया भवन्ति। अयमत्रसंग्रहश्लोकः—

कर्तव्ये पवमाननामनि बहिस्तोत्रे नव स्तोत्रिया
षष्टिश्चाज्यचतुष्टये दश ततः पञ्चापि माध्यंदिने।
षष्टिः पृष्ठचतुष्टयेषु च दशाथो सप्त चैवार्भवे
सैका विंशतिरग्निसामनि शतं ताः स्युर्नवत्युत्तरम्॥

तत्र विराजो 'दशाक्षरा विराड्'[a] इति दशपरिमाणतया प्रसिद्धत्वाद् अग्निष्टोमस्तोत्रियाणां च दशसंख्याधिकायां **नवतिसंख्यायां** पर्यवसितत्वात् स्तोत्रियसंख्याया दशपरिमाणत्वाद् अग्निष्टोमस्य विराड्रूपत्वं सिद्धम्। अस्त्वेवं किमतः? तत्राह—प्रत्यक्षमेवेति। विराट्छन्दस्कयर्चा 'पिबा सोममिन्द्र मन्दतु त्वा'[b] इत्येतया यजतीति यदस्ति, तदेतत् प्रत्यक्षात्मकमेव वैराजं रूपमग्निष्टोमसंबन्धि भवति। स्तोत्रियसंख्यया क्लेशेन या विराट्संपत्तिः सा परोक्षैव। दशपरिमाणत्वधर्मान्वियोपपत्तिसाध्यत्वात्। इदं तु रूपं प्रत्यक्षमेव। अस्या ऋचः साक्षादेव विराट्च्छन्दस्कत्वात्। 'पिब नव वैराजम्'[c] इति वचनात्। तस्मादियं याज्यात्राभिरूपा। अस्या ऋचः[1] पठनेऽर्धर्चे उच्छ्व-
6.२६-३२ सनरूपं विशेषं विधत्ते—**पिबा-प्रतिष्ठित्यै**। पदं पादः। 'सोतुर्बाहुभ्यां सूयतो

a. AB. 6. 20. 20.; PB. 3. 13. 3. b. RV. 7. 22. 1.
c. SA. VII. 22.

1. T. omits

नार्वा' इत्येतं परिशिष्टं कृत्वार्धर्चे 'हर्यश्वादिः' इत्यत्रोच्छ्वासं कुर्यात् । श्रीविराळित्यादि गतम् । अत्रायं मन्त्रक्लृप्तिश्लोकः—

आद्यौ तस्यौ प्रगाथौ द्विरभिहितपदौ स्तोत्रियश्चानुरूप-
श्चाभि त्वेत्येवमादिर्यदिति पिब सुतस्येति धाय्याप्रगाथौ ।
इन्द्रस्येत्यादिसूक्तं सनिविदथ परोधानकस्याग्निभा स्या-
दृङ् निष्केवल्यशस्त्रं विदितमिति पिबा सोममिन्द्रेति याज्या ।।

अभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः[1] ।।

इति षष्ठः खण्डः

अध्यायार्थं धियं परत्र विषये शक्त्या श्रुतेर्व्याक्रिया-
मव्यासेन[2] वितन्वता खलु मया यत् पुण्यमद्यार्जितम् ।
अव्याजेन समर्पितं तदखिलं विष्णोः पदाम्भोजयो-
रव्यान्नः सततं प्रसन्नहृदयः सोऽयं निवासः श्रियः ।।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
द्वैतीयं सवनं स्फुटं प्रकटयन् कौषीतकिब्राह्मण-
व्याख्यानेऽञ्चितवाचि पञ्चदश एषोऽध्याय आसीद् गतः ।।
यत्कारुण्यसुरद्रुरङ्कुरित एवाग्र्यं प्रसूते फलं
मोहाख्यं च यदङ्घ्रिरेणुरणुरप्यम्भोधिमाचामति ।
यद्वाणीविभवाय सोऽपि बटभागीशः करोति स्पृहां
तेभ्यः शुभ्रयशोविशोधितदिगन्तेभ्यो गुरुभ्यो नमः ।।

## इति कौषीतकिब्राह्मणव्याख्याने
## द्वितीयदशके पञ्चमोऽध्यायः

1. T. समाप्ति for परिसमाप्ति
2. V. अभ्यासेन for अव्यासेन

अथ

## षोडशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ।।
इत्थं प्रपञ्चितः पञ्चदशे माध्यंदिनः सवः[1] ।
षोडशेऽत्र क्रमप्राप्तस्तृतीयोऽथ विधीयते ।।

आदौ तावत् सवनारम्भप्रयोगयोग्यमादित्यग्रहं स्तौति—**वसूनां-**
1.१-५ **प्रतिपद्यते।** वैशब्दः श्रुत्यन्तरप्रसिद्धिद्योतनार्थः। प्रातःसवनं वसूनां देवगण-
विशेषाणां स्वभूतम्। एवमुत्तरमपि वाक्यद्वयं योज्यम् । तत्रादित्यग्रहेण
तृतीयसवनं प्रारभत इति यदस्ति तत् प्रतिपदनं स्वया स्वीयया आदित्या-
त्मकयैव देवतया क्रियत इत्यतो हेतोस्तृतीयसवनारम्भ आदित्यग्रहप्रचारोऽय-
मारभ्यते हि । आदौ तृतीयसवनमादित्यग्रहेण चरन्तीति । इतश्च तृतीयसवने
1.६-८ अत्रैष ग्रहो युक्त इत्याह—**अथो-करोति**। यदेतत् तृतीयं[2] सवनमस्ति तद्
धीतरसं पीतरसमिति प्रसिद्धम्। कथं पीतरसत्वप्रसिद्धिरिति चेत्, श्रूयतां
श्रुत्यन्तरगता काचिदाख्यायिका—

गन्धर्वलोके किल सोम आसीन्नान्यत्र तैरेव सुरक्ष्यमाणः ।
आनेतुमेनं सहिताः सुरौघाः महर्षयोऽपि स्म विचिन्तयन्ति ।।
संचोदयामासुरमी तदर्थं छन्दांसि देवाश्चतुरक्षराणि[3] ।
गन्धर्वलोकं समुपेत्य[4] यूयं सोमं समानो .... .... .... ।।
जगत्यथोत्पत्य पथोऽर्धमेत्य श्रान्ताक्षराणां त्रितयं विहाय ।
एकाक्षरैवापतदेवमेव त्रिष्टुप् च सा त्वक्षरमौज्झदेकम् ।।

1. MSS. सह
2. V. तृतीय
3. M. ° श्चतुरुत्तराणि
4. T. गन्धर्वलोकतमेत्य

देवैः कृतस्वस्त्ययना नियुक्ता गायत्र्यथाभ्येत्य कृशानुमुख्यान् ।
वित्रास्य सोमं जगृहे पदास्ये छन्दोन्तरीयाणि **तथाक्षराणि** ॥
तस्यास्तु यद्दक्षिणपद्गृहीतं[1] समृद्धिमत् प्राक् सवनं तदासीत् ।
वैकल्यशून्यं तदिदं स्वयं सा स्वकीयमेवायतनं चकार ॥
सव्येन पादेन तु यत्तदेतन्माध्यंदिनाख्यं सवनं तथासीत्[2] ।
विस्रंसवैकल्यनुदेऽत्र देवास्ते त्रिष्टुबिन्द्रौ न्यदधुः समृद्ध्यै ॥
मुखेन यत्तत्सवनं तृतीयं रसं तदीयं धयती पतन्ती ।
अकल्पयन् त उ दिशस्य [तत्सवनस्य] देवाः समृद्धिमाशीरवनीतिपूर्वैः ।
त्रीण्येवमासन् सवनानि पूर्वं सर्वाणि चाथो समवीर्यवन्ति ।
यथोक्तहेतोः सवनं तृतीयं जगत्यभूद् धीतरसं प्रसिद्धम् ॥

अतो गायत्र्या सोमरसस्य तदाहरणवेलायां पीतत्वात् धीतरसमेव[3] । अथोशब्दो[4] वैलक्षण्यार्थः । ग्रहेष्वादित्यग्रहनामा य एष ग्रहोऽस्ति स एष सरसो[5] भवति । रसात्मकदधिग्रहरूपत्वात् । तेन सरसेन आदित्यग्रहेण तन्नीरसं सत् तृतीयसवनं सरसमेव करोति । अतो नीरसस्य सरसीकरणार्थमस्मिन् सवनेऽस्य ग्रहस्याभिरूप्यमस्तीत्यर्थः । तस्यादित्यग्रहस्य याज्यापुरोनुवाक्ये विधत्ते—
**त्रिष्टुभम्–दधाति** । आदित्यग्रहयागे त्रिष्टुप्छन्दस्का पुरोनुवाक्या पठनीया । 1.९-११
सा च 'आदित्यानामवसेति पुरोनुवाक्या[6][a] इति सूत्रोक्तेः त्रिष्टुप्छन्दस्कैवर्ग् 'आदित्यासो अदितिर्मादयन्ताम्'[b] इत्येषा याज्या कर्तव्या । 'आदित्यासो अदितिः इति यजति'[c] इति सूत्रकृद्वचनादेव । अनयोश्च त्रिष्टुप्छन्दस्त्वमेकादशाक्षरपादत्वात् । तथा चानुक्रमणिका—'आदित्यानां तृचमादित्यं तु'[d] इति । अत्र छन्दोविशेषादेशाभावादनादेशपरिभाषया त्रिष्टुप्छन्दः सिध्यति । स्तौति—बलं वा इति । बलं प्रसह्य कर्मकरणसामर्थ्यम् । वीर्यं शत्रूणां प्रेरणे सामर्थ्यम् । त्रिष्टुभः प्रजापतिवीर्यसृष्टत्वादौपचारिकं तद्रूपत्वम् । तत् तेन

a. ŚŚ. 8. 1. 4. b. RV. 7. 51. 2.
c. ŚŚ. 8. 1. 6. d. SA. VII. 51.

1. T. omits तस्यास्तु यद्भक्ष
2. M. तदासीत्
3. T. नीरसमेव
4. T. अथो
5. T. रसो
6. T. येयानुवाक्ये

त्रिष्टुप्छन्दस्त्वेन बलं वीर्यं यजमाने स्थापयति । इतरयागवत् प्रसक्त-
1.१२-१४ मनुवषट्कारं प्रतिषेधति—**तस्य-इति**। तस्य आदित्यग्रहस्यानुवषट्कारं न
कुर्यात् । कुत इत्यत्राह—सवनततिर्वा इति । सवनं तायते प्रवर्ततेऽस्मि-
न्नादित्यग्रहप्रचरणकर्मणीति सवनततिरूप आदित्यग्रहः । सवनादिवर्तित्वात् ।
अनुवषट्कारः[1] संस्था[1] समाप्तिरेव प्रतिपत्तिकर्मत्वात् । अतः कालात्
संस्थाकालात् पूर्वमेवारम्भ एव सवनं संस्थापितं करवाणीति परिभयं
द्योतयन् अनुवषट्कारं न कुर्यात् ।

याज्याया 'मादयन्ताम्' इति मदिधातुमत्तां स्तौति—**मद्वती-तृतीय-**
1.१५ **सवनम्**। मदिधातुमत्य ऋचस्तृतीयसवनार्हा इति तृतीयसवनस्य मद्वत्त्वं
प्रसिद्धम् । तस्माद् याज्याया मद्वत्त्वं युक्तम् । आर्भवपवमानस्तुत्यनन्तरं
1.१६ मनोतादिपश्विळान्तं पशुकर्म विधत्ते—**अथ-ब्राह्मणम्**। तथा च सूत्रम्—
'आर्भवेण स्तुते पवमानेन मनोतादीळान्तं पशुकर्म कृत्वा पुरोळाशैः सवनीयैश्च-
रन्ति'[a] इति। अत्र 'सोम एवैष प्रत्यक्षं यत् पशुः'[b] इत्युक्तं ब्राह्मणमतिदिशति—
1.१७ तस्योक्तं ब्राह्मणमिति। सवनीयपुरोळाशचरणं विधत्ते—**अथ-ब्राह्मणम्**। तस्या
उक्तं 'पशवो वै हविष्पङ्क्तिः'[c] इत्यादिकं ब्राह्मणं द्रष्टव्यम् ।।

इति प्रथमः खण्डः

'उन्नीयमानेभ्योऽनुब्रूहि'[d] इति संप्रेषितेन मैत्रावरुणेन पठनीयमुन्नीयमान-
2.१ सूक्तं विधत्ते—**ऐन्द्रार्भवीः-अन्वाह**। उन्नीयमानान् सोमानभिधातुमैन्द्रार्भवीः
ऋचः प्रशस्ताः पठेत् । इन्द्र ऋभवश्च देवता यासां ता ऋचस्तथोक्ताः ।
ताश्च 'इहोप यात'[e] इति सूक्तगता विवक्षिताः । 'इहोपयातेत्युन्नीयमानसूक्तम्'[f]
इति सूत्रात् । आर्भवप्रसंगादार्भवं पवमानमधिकृत्य किमपि चोद्यं हृदि

a. ŚŚ. 8. 1. 9. b. KB. XII. 7. ७.
c. KB. XIII. 1. १०. d. ĀpŚ. 12. 21. 13.
e. RV. 4. 35. f. ŚŚ. 8. 2. 3.

1. T. omits

निधाय तदुत्तरमाह—**यत्र-आचक्षते**। चोद्यमेवम्। ननु कथमस्य पवमानस्या- 2. २-५
र्भवः पवमान इति व्यपदेशः प्रसिद्धः ? न खल्वत्रार्भवीष्वृक्षु सामगाः स्तुतिं कुर्वन्ति। तेन व्यपदेशोपपत्त्यर्थमृभुदेवत्यासु ऋक्षु स्तुत्या भवितव्यम्। माध्यंदिनपवमानवत् सवनशब्देनैव वा व्यपदेशोऽङ्गीकार्यः। प्रमत्तगीतत्वं वार्भवव्यपदेशस्याभ्युपेयमिति। अस्योत्तरम्—यत्र ह तदिति। हशब्द ऐतिह्यार्थः। यत्र यस्मिन् काले तत् तथा ऋभव एतन्नामकाः केचिन्मनुष्यविशेषाः प्रजापतेस्तपसा प्रीणितस्य प्रेमाणं स्नेहप्रकर्षात्मिकां मनोवृत्तिं गोचरत्वेन प्राप्तवन्तः। तत् तस्मिन् काले प्रजापतिना प्रयुक्त इन्द्र एनानृभूनितरवदेव तुल्यतया सोमपीथेऽन्वाभक्तानकरोत्। तथा च मन्त्रः—'ये देवासो अभवता सुकृत्या'[a] इति। 'ऋभवो वै देवेषु तपसा सोमपीथमभ्यजयन्'[b] इति च ब्राह्मणान्तरम्। किमतो यद्येवमिति चेद् उच्यते। यस्मादेवं ऋभवः पूर्वं जन्मतो मनुष्या एव तस्माद्धेतोरार्भवीस्वृक्षु सामगा न स्तुतिं कुर्वन्ति। पश्चादिन्द्रेण तृतीयसवन आभक्तत्वादार्भव इति व्यपदेशस्योपपत्तिः। एतच्चैतरेये स्पष्टमेव श्रूयते—'तदाहुर्यन्नार्भवीषु स्तुवते। अथ कस्मादार्भवः पवमान इत्याचक्षत इति। प्रजापतिर्वै पिता ऋभून् मर्त्यान् सतोऽमर्त्यान् कृत्वा तृतीयसवन आभजत्। तस्मान्नार्भवीषु स्तुवते। अथार्भवः पवमान इत्याचक्षते'[c] इति।

होतुः प्रस्थितयाज्यां विधत्ते—**ऐन्द्रार्भव्या-करोति**। सा च 'इन्द्र ऋभु- 2. ६,७
भिर्वाजवद्भिः'[d] इत्येषा। 'इन्द्र ऋभुभिर्वाजवद्भिरिति यजति'[e] इति सूत्रात्। तेनैन्द्रार्भव्या याज्यायाः पठनेन इन्द्रं तृतीयसवनस्यार्धभाजं करोति। माध्यंदिनं सवनं हि केवलमैन्द्रमेव। अनेन तु वैश्वदेवस्यापि तृतीयसवनस्यार्धभाग इन्द्रं निवेशयति। अस्या जगतीछन्दस्त्वं स्तौति—**जगत्या-तृतीयसवनम्**। 2. ८,९
यजतीति शेषः। यस्मात् तृतीयसवनं जगतीछन्दःसम्बन्धि तस्मादस्या जगतीछन्दस्त्वमनुरूपम्। 'सह मत्स्वा नृभिः'[f] इति मदिधातुमत्तां स्तौति—मद्वत्येति। यजतीति शेषः। अन्यद् गतम्। **अनुवषट्करोति-प्रतिष्ठित्यै**। गतम्। 2.१०,११
प्रशास्त्रादीनां प्रस्थितयाज्या आह—**अथ-ब्राह्मणम्**। ताश्च 'इन्द्रावरुणा 2.१२,१३

a. RV. 4. 35. 8.
b. AB. 8. 30. 2.
c. AB. 6. 12. 2–3.
d. RV. 3. 60. 5.
e. ŚŚ. 8. 2. 5.
f. RV. 3. 60. 5.

सुतपौ'[a] इत्याद्याः सूत्रकृता दर्शिता द्रष्टव्याः। अथेळेति। गतम्। नाराशंससादनादनन्तरम्[1] 'अत्र पितरो मादयध्वम् यथाभागं पितर आवृषायध्वम्'[b] इति मन्त्रेण होत्रादीनां यथास्वं चमसानां दक्षिणभागे परिवापमिश्रपुरोळाश-
2.१४,१५ पिण्डत्रयप्रक्षेपं विधत्ते—**औपासनान्-प्रीणन्ति।** उप चमसानां समीपे अस्यन्ति क्षिपन्ति निदधतीत्यर्थः। अत एवौपासना इति पिण्डानां संज्ञाप्रवृत्तिः। उप समीपे अस्यमानत्वात्। तथा च सूत्रम्—'पुरोळाशस्य परिवापमिश्रस्य नाराशंसानां सन्नानां यथाचमसं दक्षिणतस्त्रींस्त्रीन् पिण्डानुपास्यन्ति'[c] इति। तेन पिण्डनिधानेनर्त्विजः पितॄनेव प्रीतान् कुर्वन्ति। 'पितरो मादयध्वम्'[b] इति मन्त्रलिङ्गात्।

2. १६ क्रमप्राप्तं सावित्रग्रहं विधत्ते—**अथ-चरन्ति।** सवितृदेवत्यो ग्रहः सावित्रः। अस्य तृतीयसवने प्रचरणे हेतुं वदन् स्तौति—**प्रातःसवन-**
2.१७-२३ **सविता।** पुरा देवाः प्रजातिकामाः एतं सवितारं प्रातःसवन इष्टवन्तः। सावित्रग्रहेण प्रातःसवने प्रचरणं कृतवन्त इत्यर्थः। एवं सवितृयागे कृते सति प्रजाः प्रजातिमभिवृद्धिं न प्राप्तवत्यः। अथ ते प्रातःसवने सवितृयागस्य कृतत्वादेवाभीष्टफलानवाप्तिरिति मन्वाना हन्त माध्यंदिने तद्यागं कुर्म इति निश्चित्य तत्र सवितृयागं कृतवन्तः। तदापि नेष्टफलं लब्धवन्तः। अथ तं सवितारमत्र प्रस्तुते तृतीयसवन इष्टवन्तः। तदा तु प्रजाभिवृद्धिलक्षणं फलं लब्धवन्तः। यस्मादेवं तस्माद्धेतोः सविता तृतीयसवनेऽवधृतः। सवनद्वयव्यावृत्त्या तृतीयसवनस्थानतया विनिश्चितः। सवितृयागस्तृतीयसवन एव कर्तव्यः। न प्रातःसवने मध्यंदिनसवने वेति व्यवस्था जातेत्यर्थः।
2.२४-२६ इतश्च सवितुस्तृतीयसवनभाक्त्वमेव युक्तमित्याह—**अथो-यजन्ति।** य एव सविता नाम देवोऽस्ति स द्वादशसंख्यानां मध्येऽन्यतम आदित्य एव भवति। तृतीयसवनं चादित्यानां स्वभूतम्। अतोऽपि हेतोः सवितृयागस्तृतीयसवन एव युक्तः।

2.२७-३० अथास्य याज्यापुरोनुवाक्ये दर्शयति—**त्रिष्टुभम्-प्रतितिष्ठति।** त्रिष्टु-

a. ŚŚ. 8. 2. 6. b. VS. 2. 31; ŚŚ. 4. 4. 11.
c. ŚŚ. 8. 2. 13.

1. T. नाराशं सम्पादनादनन्तरं

प्छन्दस्काम् 'अभूद्देवः'[a] इत्येतां पुरोनुवाक्यां पठेत्। सूत्र्यते हि—'देवाय सवित्र इत्युक्तोऽभूद्देव इति पुरोनुवाक्या'[b] इति। यद्यपि 'अभूद्देवस्त्रिष्टुबन्तम्'[c] इत्यनुक्रमण्यामुक्तत्वात् 'त्रिष्टुबन्तस्य सूक्तस्य शिष्टा जगत्यः'[d] इति परिभाषानुरोधेन 'अभूद्देवः सविता'[a] इत्यस्या जगतीछन्दस्त्वमेव। तथाप्यक्षरगणनायां क्रियमाणायां पञ्चचत्वारिंशदक्षराणामेव संभवात् त्रिष्टुप्छन्दस्त्वमुक्तम्। न च त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वादत्र चैकाक्षराधिक्यान्न त्रिष्टुप्छन्दस्त्वमिति वाच्यम्। 'न ह्येकेनाक्षरेणान्यच्छन्दो भवति नो द्वाभ्याम्'[e] इति एकद्व्यक्षराधिक्यन्यूनतायामपि छन्दोऽन्तरत्वाभावस्याम्नायमानत्वात्। कथं तर्हि जगतीछन्दस्त्वमनुक्रमण्यामुक्तमिति चेत्, क्षैप्रसंयोगादिव्यूहनेन पादपूरणविधायकवचनानुरोधेन अष्टाचत्वारिंशदक्षरत्वसंपादनाभिप्रायेणेति ब्रूमः। जगत्या जगतीछन्दस्कया 'दमूना देवः सविता वरेण्यः'[f] इत्यनया शाखान्तरीयया। अस्या अष्टाचत्वारिंशदक्षरत्वाज्जगतीत्वम्। बलं वै वीर्यमिति। गतम्। जगत्याः पशूनां चैककारणोत्पन्नत्वादभेदोपचारः। तच्च 'मध्यतः सप्तदशं निरमिमीत। विश्वेदेवा देवता अन्वसृज्यन्त। जगतीच्छन्दो वैरूपं साम वैश्यो मनुष्याणां गावः पशूनाम्'[g] इति सृष्टिवाक्ये तैत्तिरीये श्रुतम्। अथवा जगत्याः पशूनाममुष्माल्लोकादाहृतत्वात् पशूनां जागतत्वम्। तच्च सोमाहरणाख्यायिकायां 'पशुभिश्च दीक्षया चागच्छत्। तस्माज्जगती छन्दसां पशव्यतमा'[h] इति तत्रैव श्रुतम्। **तस्य–तृतीयसवनम्।** 2.३१-३५
सावित्रग्रहस्य प्राणरूपत्वं सवितुः प्राणरूपत्वात्। तच्च सर्वभूतप्रणेतृत्वात्। तथा च श्रुत्यन्तरम्—'उद्यन् उ खलु वा आदित्यः सर्वाणि भूतानि प्रणयति। तस्मादेनं प्राण इत्याचक्षते'[i] इति। संस्था समाप्तिः। अतःसावित्रग्रहयागेऽनुवषट्कारं कुर्वन् प्राणस्य संस्थितत्वमेव संपादयति। तन्माभूदिति तत्रानुवषट्कारं न कुर्यात्। शिष्टं गतम्॥

इति द्वितीयः खण्डः

a. RV. 4. 54. 1.
b. ŚŚ. 8. 3. 1-2.
c. SA. IV. 54.
d. SA. 12. 13.
e. KB. XXVII. 2. १६-१७.
f. AV. 7. 14. 4.
g. TS. 7. 1. 1. 5.
h. TS. 6. 1. 6. 2.
i. AB. 5. 31. 3.

इति शस्त्रस्य पुरस्तात् कर्तव्यं कर्मजातमुपदिष्टम् ।
आ सौम्ययागविधितः शस्त्रं विदधाति वैश्वदेवमथ ॥

3. १-३ तत्रादौ प्रतिपदनुचरसूक्तानां सवितृदेवत्यतां स्तौति—**सवित्रा-भवन्ति** ।
विश्वेदेवदेवत्यत्वाद् वैश्वदेवाख्यं शस्त्रं सवित्रा देवतया प्रारभेत । यस्मात्
पुरा देवाः सवित्रा प्रसूता अनुज्ञाताः सन्तस्तृतीयसवनं संभृतवन्तः । तस्मा-
द्धेतोः प्रतिपन्नामकस्तृचोऽनुचरनामकश्च तदनन्तरपठनीयम् 'अभूद्देवः'[a] इति
सूक्तमेतानि सर्वाणि सवितृदेवत्यान्येव कुर्यात् । एतेषां सवितृदेवत्यानां एत-
च्छस्त्रारम्भे पाठः समञ्जस इत्यर्थः । प्रतिपत्तृचे प्रथमामृचं तावद् विधत्ते-
3. ४-६ **तत्-छन्दः** । 'तत् सवितुर्नव गायत्रमाद्यानुष्टुब्'[b] इत्यनुक्रमण्युक्तेरस्या अनुष्टु-
प्त्वं सिद्धम् । प्रतिपत्तृचगते 'अस्य हि'[c] 'स हि रत्नानि'[d] इत्येते ऋचौ
गायत्र्यौ[1] । 'अद्या नो देव सवितः'[e] इत्यादिकमनुचरं तृचं विधत्ते—**उक्तं-**
3.७-१० **धत्ते** । सूत्र्यते च—'तत् सवितुर्वृणीमहेऽद्या नो देवसवितरिति तृचौ[2] प्रति-
पदनुचरौ वैश्वदेवस्य'[f] इति । 'अभूद्देवः सविता'[a] इति सूक्तं विधत्ते—
3.११-१३ **सावित्रं-अनुशंसति** । सवितृदेवत्यं सूक्तम् । अध्यात्मं चैतत् । तथा च
सूत्रम्—'अभूद्देव इति सावित्रम्'[g] इति । यस्मादिह सावित्रस्य ग्रहस्य ग्रहणं
कृतम् , तस्मात् तस्य ग्रहस्यानुशंसनीयत्वात् तदनुशंसनार्थं सवितृदेवत्यस्य
सूक्तस्य शंसनमनुरूपम् । 'एकया च दशभिश्च[3]'[h] इत्येतां शाखान्तरीयामेका-
3.१४-१६ मृचं विधत्ते—**वायव्यां-धत्ते** । अध्यात्ममवस्थितस्य वायोः प्राणशब्दाभि-
धेयत्वात् । वायुदेवत्ययर्चा प्राणस्यैव प्रतिपाद्यत्वात् वायव्यायाः प्राणरूपत्वम् ।
ततश्च प्राणमेव होतात्मनि स्थापयति ।

3.१७,१८ अत्र प्रसंगादाध्वर्यवं विधिमनूद्य स्तौति—**तस्यै-प्राणान्** । तस्या वाय-
व्यायाः शंसने सति द्विदेवत्यानैन्द्रवायवादीन् विमुञ्चन्ति पात्रेष्वपिसृजन्ति ।

a. RV. 4. 54.
b. SA. V. 82.
c. RV. 5. 82. 2.
d. RV. 5. 82. 3.
e. RV. 5. 82. 4.
f. ŚŚ. 8. 3. 8.
g. ŚŚ. 8. 3. 9.
h. AV. 7. 4. 1; ŚŚ. 8. 3. 10.

1. T. omits
2. T. omits
3. T. तिसृभिश्च

तथा च बौधायनः—'अथ यत्र होतुरभिजानाति एकया च दशभिश्च[1] स्वभूत[2] इति। तत् प्रतिप्रस्थाता द्विदेवत्यपात्राणि मार्जालीये मार्जयित्वा पात्रेष्वपिसृजति'[a] इति। तच्च वायव्याशंसनकाले क्रियमाणं वायुरूपे प्राणेऽपानादीनां प्राणानां विमोचनरूपमेव। द्विदेवत्यानां प्राणरूपस्योक्तत्वात्।
'प्र द्यावा यज्ञैः पृथिवी ऋतावृधा'[b] इति सूक्तं विधत्ते—**द्यावापृथिवीयं-एव।** 3.१९,२०
द्यावापृथिव्यौ देवते यस्य तत् तथा। सूत्र्यते हि—'प्र द्यावा यज्ञैः पृथिवी ऋतावृधेति द्यावापृथिवीयम्'[c] इति। प्रतितिष्ठन्त्यस्यां भूतानीति प्रतिष्ठा। तत्र मनुष्यादीनां प्रतिष्ठा पृथिवी देवादीनां प्रतिष्ठा द्युलोकः। तेन द्यावापृथिवीयशंसनं लोकद्वयेऽपि प्रतिष्ठाफलाय संपद्यते। अस्मिन् सूक्तेऽध्वर्युकर्तृके
प्रतिगरे कंचिद् विशेषं विधत्ते—**तस्मिन्-तृतीयसवनम्।** मदिधातुयुक्तं यथा 3.२१,२२
तथा प्रतिगरं कुर्यात्। शेषं गतम्। 'सुरूपकृत्नुमूतये'[d] इत्येकामृचं विधत्ते—
**सुरूपकृत्नुं-धत्ते।** शोभनं रूपं सुरूपं यस्येति सुरूपशब्देनान्नमभिधीयते। 3.२३-२५
तेन तस्या ऋचः पठनेनान्नमेवात्मनि स्थापयति। प्रकारान्तरेण स्तौति—
**अथो-धत्ते।** अपि च य एष सोमपीथः स सर्वेषां रूपाणां संबन्धी भवति। 3.२६,२७
सर्वरूपसमृद्धत्वात्। तत् तेन सुरूपकृत्नुमित्यस्या ऋचः[3] शंसनेन रूपमेवात्मनि
धारयति। 'तक्षन् रथम्'[e] इति सूक्तं विधत्ते—**आर्भवं-शस्यते।** ऋभुदेवत्यं 3.२८-३०
सूक्तमिति शेषः। यस्मादेभ्य ऋभुभ्योऽत्र तृतीयसवने प्रजापतिर्भागं कल्पितवान् तस्मादत्र तृतीयसवन आर्भवशंसनं युक्तम्। अत्र हेत्थमितिहासो[4] भवति—

> मनुष्याः पूर्वमभवन्नृभवो न तु देवताः।
> तपसाऽथ सुतप्तेन देवत्वं ते प्रपेदिरे॥
> देवतान्तरवत्तांस्तु चिकीर्षन् यज्ञभागिनः।
> प्रातःसवन आदित्सन् भागमेषां प्रजापतिः॥

a. BŚ. 8. 13. 15.
b. RV. 1. 159.
c. ŚŚ. 8. 3. 11.
d. RV. 1. 4. 1.
e. RV. 1. 111.

1. T. तिश्वभिश्च
2. T. श्वभूत्
3. T. omits.
4. V. इत्थम् for हेत्थम्

तानग्निर्वसवश्चेमे नात्रेत्येवमपानुदन् ।
माध्यंदिने त्वथादित्सत् तत्रेन्द्रो रुद्रसंयुतः ।
नात्रेत्यपानुदद् भूयस्तृतीयसवनेऽपि तान् ।
विश्वेदेवाननुमतान् सवितारं प्रजापतिः ।
उवाच संपिबैतैस्त्वमित्यसौ तत्तथाकरोत् ।
एवं प्रजापतिस्तेषां यज्ञभागमचीक्लृपत् ।
तृतीयसवने तेन तेऽभवन् यज्ञभागिनः ॥
एवमेतां कथां ब्राह्मणान्तरप्रतिपादिताम् ।
हृदि कृत्वा प्रवृत्तेयमत्र ह्येभ्य इति श्रुतिः ॥

3.३१,३२ अथ तिस्र एकपातिनीः ऋचो विधत्ते—**अथ-अनुशंसति**। वेनदेवत्या वेना । सा च 'अयं वेनश्चोदयद्'[a] इत्येषा । अदितिदेवत्या आदित्या 'येभ्यो माता मधुमद्'[b] इत्येषा । द्वितीयपादेऽदितिशब्दश्रवणात् । बृहस्पति-देवत्या 'एवा पित्रे'[c] इत्येषा । एताभिः ऋग्भिः क्रमेण शुक्रामन्थ्याग्रयण-संज्ञितानां ग्रहाणामेवानुशंसनं क्रियते । 'आ नो भद्राः क्रतवो यन्तु विश्वतः'[d]
3.३३,३४ इति सूक्तं विधत्ते—**अथो-शंसति**। वैश्वदेवसूक्तस्य प्राधान्यप्रयुक्तं विशेष-मथोशब्दो द्योतयति । इदं हि शस्त्रं वैश्वदेवं विश्वेदेवदेवत्यम् । अतोऽत्र विश्वेऽपि देवाः शस्त्रे शंसनीयाः । इतरथा तद्देवत्यत्वहानिप्रसक्तेः । न च ते प्रत्येकमृग्भिः शंसितुं शक्यन्ते; अनन्तत्वात् । 'अनन्ता वै विश्वेदेवाः'[e] इति श्रुतेः । अतोऽत्र शस्त्रे वैश्वदेवसूक्तशंसनाकरणे तेषामशंसनात् परिहाणं परित्यागः स्यात् । तत्परिहाराय विश्वेदेवदेवत्यम् 'आ नो भद्राः'[f] इत्येतत् सूक्तं शंसेत् । तथा च सूत्रम्—'आ नो भद्रा इति वैश्वदेवस्य'[g] इति ।
3.३५,३६ विधान्तरेण स्तौति—**वैश्वदेवो-अनुशंसति**। वैश्वदेवो ग्रह आग्रयणाख्यः । तस्यानुशंसनरूपमेतत् सूक्तं भवति । देवतैक्यात् । अस्मिन् सूक्ते द्वे ऋचौ परिशिष्य निवित्पठनम् । एतत् सिद्धवत्कृत्यान्त्यामृचं परिधानीयां विधत्ते—

a. RV. 10. 123. 1.
b. RV. 10. 63. 3.
c. RV. 4. 50. 6.
d. RV. 1. 89.
e. BṛhU. 3.1.9.
f. RV. 1. 89.
g. ŚS. 8. 3. 16.

**तस्य–उपाप्त्यै ।** तस्य शस्त्रस्य परिधानीयाम् 'अदितिर्द्यौरदितिः'[a] इत्येतां 3.३७-४१
पठेत् । तस्यास्त्रिवारं पठने क्रियमाणे द्विवारं यः पाठः स पच्छः कर्तव्यः ।
तृतीयायामावृत्तावर्धर्चशः । अनेन प्रकारेण पाठेऽस्यामृचि विराडभिसंपत्तिः
सिद्ध्यति । विराजो हि दशसंख्यान्वयः प्रसिद्धः । 'दशाक्षरा विराट्'[b] इति
तत्र तत्रोद्घोषात् । परिधानीयाया अप्युक्तप्रकारवत्तया पाठे दशसंख्यान्वयो
भवति । चतुष्पदाया ऋचोऽस्याः पच्छो द्विवारं पठने चतुर्णां पादानां द्विवारं
पाठे सत्यष्टसंख्यानिष्पत्तिः । अर्धर्चद्वयपाठे द्विसंख्योत्पत्तिः । संभूय दश-
संख्या संपन्ना भवति । श्रीर्वै विराळित्यादि गतम् ।।

इति तृतीयः खण्डः

अथैतच्छस्त्रसंस्थानां सूक्तानां संख्यां पशुप्राप्तिहेतुत्वेन स्तौति—
**चत्वारि–आप्त्यै ।** वैश्वदेवाख्ये अस्मिन् प्रस्तुते शस्त्रे चतुःसंख्यानि सूक्तानि 4.१-४
सावित्रद्यावापृथिवीयार्भववैश्वदेवानि शंसेत् । यस्माद् वैश्वदेवं शस्त्रं पशवः,
तद्धेतुत्वात् । विश्वेषां देवानां प्रीतिहेतुत्वाद् वा । अथवा यथा वैश्वदेवं शस्त्रं
बहुदेवत्यत्वाद् बहुरूपम् ; एवं पशवोऽपि बहुरूपा इति सादृश्यनिमित्तस्तद्रूप-
त्वव्यपदेशः । पशवश्चतुष्टयाः मेदोऽसृङ्मांसमज्जारूपचतुरवयवोपेताः, चतुर्भिः
पादैरन्विताश्च भवन्ति । अतः संख्यासाम्यात् सूक्तसंख्या पशूनां प्राप्तये
संपद्यते । उक्तं पशुप्राप्तिहेतुत्वमुपजीव्य विलम्बितवृत्त्या पठनीयतामाह—
**तस्माद्–पशवः ।** एतद् वैश्वदेवाख्यं शस्त्रमारमणयुक्तं यथा तथा शंसेत् । 4. ५,६
अनेन विलम्बितवृत्त्या पठनीयत्वमुक्तम् । एवं शंसने सत्यस्मिन् होतरि यजमाने
वा पशवो रमन्ते । रमणेन शस्त्रस्य शंसितत्वात् । तथा च सूत्रम्—'वियतं
शस्त्रं वैश्वदेवस्य'[c] इति । वियतं विलम्बितम्, शस्त्रं शंसनम् । शस्त्रगता-
हावसंख्यां स्तौति—**षोळशाहावं–आप्त्यै ।** षोळशसंख्या आहावा यस्य तत् 4. ७-९
तथा । प्रतिपदनुचरसावित्र-वायव्या-द्यावापृथिवीय-सुरूपकृत्न्वार्भवैकपातिनी-

a. RV. 1. 89. 10.    b. AB. 6. 20. 20; PB. 3. 13. 3.
c. ŚŚ. 8. 7. 19.

त्रितयवैश्वदेव-निविच्चतुष्कपरिधानीयानां पुरस्ताद्धयाहावः पठनीयः। तत्र षोळशस्थानेष्वाहावस्य पठनात् षोळशसंख्या आहावाः संपद्यन्ते। षोळशकलमिति गतम्।

तस्यैव शस्त्रस्य सप्तदशधा भेदविधानपूर्वकं तत्संख्यां स्तौति—
4.१०-१३ **तत्-प्रजापतिसंमितम्।** सप्तदशसंख्या विधाः प्रकाराः यस्य तत् तथोक्तम्। कथं साप्तदशविध्यमित्यत आह—एकादशदेवता इति। देवताशब्देन तदभिधायकानां प्रतिपदादिशस्त्रभागानां ग्रहणम्। तथाहि—प्रतिपदनुचरसावित्रवायव्याद्यावापृथिवीयसुरूपकृत्न्वार्भवैकपातिनीत्रयवैश्वदेवसूक्तभेदेनैकादशसंख्याः शस्त्रगता ऋक्संघा भवन्ति। निविदश्चतुस्संख्याका भवन्ति। उक्थवीर्याख्यो 'भूतमसि'[a] इत्यादिको मन्त्रः। एका याज्या विधास्यमाना 'विश्वे देवाः'[b] इत्येषा। एवं संभूय सप्तदश भवन्ति। सप्तदशो वा इत्यादि गतम्।
4.१४-३० अथ याज्यां विधत्ते—**विश्वे-याज्या।** वैश्वदेव्या यजतीति शेषः। एवं त्रिष्टुभेत्यादौ योजना। वागेवासावित्यादिः शस्त्रस्य पुरुषविधत्वसंपादकः[1] संदर्भः पूर्ववद् व्याख्येयः। सवितुर्मनोवृत्तिप्रेरकत्वात् सावित्रस्य मनोरूपत्वम्। वायोरध्यात्ममवस्थितस्य प्राणरूपत्वाद् वायव्यायाः प्राणरूपत्वम्। द्यावापृथिवीयस्य चक्षूरूपत्वं द्वित्वसंख्यासाम्यात्। योऽयमनिरुक्तो मुख्यः प्राणः स सुरूपकृत्नुः। अस्या अनभिहितदेवतापदत्वेनानिरुक्तत्वात्। प्राणस्यानिरुक्तत्वमशेषात्मकत्वात्। शेषं गतम्॥

इति चतुर्थः खण्डः

अथ 'अदितिर्द्यौः'[c] इत्येषैव नियमेन सर्वत्र तृतीयसवने परिधानीया कर्तव्या, नेतरयोः सवनयोरिवानियमेनेति विशेषं दर्शयितुं चोद्यमाह—**तद्-**
5.१ **इति।** ब्रह्मक्षत्रे ब्राह्मणाः क्षत्रियाश्च। प्रच्यावुके प्रच्यवनशीले। प्रच्यवन-

a. ŚŚ. 8. 21. 3. b. RV. 6. 52. 13.
c. RV. 1. 89. 10.

1. T. प्रतिपादकः for संपादकः

मस्थिरनिवासत्वम् । विड् वैश्याः। कृष्यादिजनितधनसंपदां तेषामखिलजनोपजीव्यत्वाद् अपराधीनलाभगृहक्षेत्रधनधान्यसमृद्धिलब्धप्रतिष्ठत्वाच्चाच्युतत्वं प्रसिद्धमेव । इतरेषां परापेक्षविधिभूतित्वात् तद्वैपरीत्यं च स्पष्टम् । अत्र कारणं दर्शयन् उत्तरमाह—**ब्रह्म-इति** । सवननिर्वाहकदेवताछन्दःप्रभृति- 5.२-६
संबन्धद्वारकं ब्राह्मणादिरूपत्वम् । यथोपपादं यथासंभवमनियमेनापरापरा ऋक् परिधानीया क्रियत इति यदस्ति ततो हेतोः ब्रह्मजातिसम्बन्धिन्यः क्षत्रजातिसंबन्धिन्यश्च प्रजा अनवधृतं अनियतस्थानत्वेन क्षियन्ति निवसन्ति । अथेति विशेषे । तृतीयसवनसम्बन्धिनी 'अदितिर्द्यौः'[a] इत्येषा तु परिधानीया अच्युतेति यदस्ति, ततो हेतोर्वैश्यजातिरच्युतैव । परिधानीयायाः प्रतिष्ठात्वात् ।

वैश्वदेवशस्त्रशंसनादनन्तरं[1] सौम्ययागः । तस्य पुरस्तात् तदङ्गभूतो घृतयागो नित्यः । तयोर्घृतयागसौम्यचरुयागयोः अध्वर्युणा होतारं प्रति वक्तव्यं प्रैषद्वयमनूद्य स्तौति—**घृतस्य-इति** । यदेतद् घृतं सोम इति च द्रव्ये 5.१०-१३
भवतः, एताभ्यामेव सर्वोऽपि श्रुतिचोदितो विश्वसृजामयनपर्यन्तो यज्ञः प्रयुज्यते । ते तादृशे घृतं च सोमं चात्र घृतसौम्ययागे कर्मणि प्रीते करोति । किमिति तत्प्रीणनमिति चेत्, प्रीते प्रीतियुक्ते सती एते सर्वमपि स्वसाध्यं यज्ञं निर्वर्तयत इत्यनेन हेतुना ते प्रीणयति घृतसोमशब्दोच्चारणेन । न चाचेतनत्वात् घृतसोमद्रव्यमात्रप्रीणनोक्तिरसमञ्जसेति शङ्कनीयम् । द्रव्यवाचिभिरपि शब्दैस्तत्तदभिमानिदेवताविशेषाणामेवाभिधानम्, न द्रव्यमात्रस्येत्यस्यार्थस्य 'अभिमानिव्यपदेशस्तु'[b] इति वैयासिकसूत्रे न्यायतः समर्थितत्वात् । 'घृतं मिमिक्षे'[c] इत्येषा घृतयागे याज्या । तस्या उपांशुत्वं विधत्ते—**उपांशु-सिच्यते** । सूत्र्यते हि–'घृतस्य यजेत्युक्तो घृतं मिमिक्ष इत्युपांशु यजति'[d] इति । 5.१४-१६
योऽयं घृतयागः स रेतःसेक एव । घृतस्य रेतःकारणत्वात् । रेतःसेकश्च उपांशु क्रियते । अतस्तद्रूपो घृतयाग उपांशु कर्तव्यः । 'त्वं सोम पितृभिः'[e]

a. RV. 1. 89. 10.
b. BS. 2. 1. 5.
c. RV. 2. 3. 11.
d. ŚŚ. 8. 4. 1.
e. RV. 8. 48. 13.

1. T. शसनानन्तरं fo शंसनादनन्तरं

5.१७-१९ इति सौम्ययागयाज्या । तस्या उच्चैष्ट्वं विधत्ते--**अथ-चन्द्रमाः** । सोमशब्देन हि सकलजीवलोकाह्लादकररश्मियुक्तो ज्योतिर्मण्डलमध्यस्थः प्रकृष्टप्रकाशश्चन्द्र एवाभिधीयते । स च चन्द्रमा निरुक्तः । यथा निरुक्तं वस्तु स्पष्टतया प्रकाशते तथाऽयमपि विस्पष्टप्रकाशः । तस्माद् याज्याया निरुक्ताभिधानं युक्तम् । सौम्ययागादूर्ध्वमपि विष्णुदेवत्यं घृतयागं विधित्सुः तद्विरोधिनं तदकर्तव्यतापक्षं
5.२०-२२ प्रथममुपक्षिपति—**तस्य-स्थितम्** । तस्य सौम्ययागस्य परस्तादूर्ध्वं परितः यागो न कर्तव्य इति केचिच्छाखिन आहुः । तत्र हेतुं चाहुः । किमिति चेत् । तेन कारणेनामी दिवि दृश्यमानाः सूर्यादयः अमुतो लोकाच्चान्द्रमसादर्वाग्गता एवेदं जगत् पश्यन्ति सर्वलोकोपरिस्थितत्वाच्चन्द्रलोकस्य । सौम्ययागादूर्ध्वं न यागः कार्यः । अस्य पक्षस्य हेयतां दर्शयन् स्वमतमाह—परियजेदिति ।
5.२३-२६ **देवलोको-चरन्ति** । 'आज्यं वै देवानां सुरभि'[a] इत्याम्नायादाज्यस्य देवसंबन्धित्वावगमादाज्यस्य देवलोकत्वम् । 'त्वं सोम पितृभिः संविदानः'[b] इत्यादिमन्त्रेषु सोमस्य पितृमत्त्वदर्शनात् । पितृलोकाधिपतित्वाद् वा सोमस्य पितृलोकत्वम् । तत् तेन सौम्ययागादूर्ध्वं घृतयागकर्मणा पितृलोकाद् देवलोकमभिलक्ष्य आगच्छन्ति । पुरस्ताद् घृतयागे देवलोकावस्थितानां सतां सौम्ययागे पितृलोकप्राप्तिर्भवति । तदनन्तरं घृतयागे सति पितृलोकाद् यथापूर्वं देवलोकमेव प्राप्ता भवन्ति । परितः क्रियमाणयोर्घृतयागयोर्देवते दर्शयन्
5.२७-२९ यागत्रयसंघातं स्तौति—**अथो—इदम्** । एतदिति क्रियाविशेषणम् । उत्सृज्यन्तेऽनुष्ठीयन्त इति यावत् । कुत उपसदनुष्ठानरूपत्वमिति चेत्, एकदेवत्यत्वनिमित्तात् सारूप्यादित्याह—अग्निं सोममिति । उपसद्यागा हि क्रमेण अग्निसोमविष्णुदेवत्याः । तथैवैतेऽपि यागा इत्यतो हेतोः उपसद्यागा एवैतेऽपीति वक्तुं शक्यते । श्रूयते चान्यत्र 'उपसदां किल वै तद् रूपं यदेता देवता अग्निः सोमो विष्णुः'[c] इति । आध्वर्यवकर्मानुवादपूर्वकं होतुः सौम्यप्रतिग्रहोपनिधानात्मावेक्षणसर्पिरुपस्पर्शनचक्षुर्मार्जनोद्गातृहस्तप्रदानानि क्रमेण विधत्ते—

a. AB. 1. 3. 5.
b. RV. 8. 48. 13.
c. AB. 3. 32. 4.

1. V. उपसदो

**हरन्ति-प्रयच्छति**। एतं सौम्यं सदोदेशं प्रतिहरन्त्यध्वर्यवः। तमध्वर्युभि- 5.३०-३५
र्हृतं सौम्यं होता प्रतिगृह्णीयात्। प्रतिगृह्य च स्वस्य समीपदेशे निदध्यात्। निधानानन्तरमस्य सौम्यस्य सम्बन्धिनि सर्पिष्यात्मानं प्रतिबिम्बितं पश्येत्। आत्मावेक्षणानन्तरं अङ्गुष्ठोपकनिष्ठिकाभ्यामङ्गुलिभ्यां सौम्यगतं सर्पिः स्पृशेत्। स्पृष्ट्वा 'चक्षुष्पा'[a] इति मन्त्रेणाक्ष्णोरञ्जनं कुर्यात्। अत्र यत् सर्पिषा अक्ष्णोर्मार्जनमस्ति तेनास्य होतुः चक्षुषो रक्षां करोत्येव। हे सर्पिः त्वं चक्षुष्पाः चक्षुषः पालयिता भवसि। सर्पिश्चक्षुषोर्द्वयोरपि तेजोरूपत्वेन सर्पिषा चक्षुषस्तेजोभिवृद्धिसंभवात्। अतस्त्वं मदीयं चक्षुः पाहीति मन्त्रार्थः। अथ तं सौम्यमुद्गातृभ्यः सामर्त्विग्भ्यो दद्यात्। तदेतत् सूत्रकृता दर्शितम्— 'होतावेक्ष्याङ्गुलिभ्यां सर्पिरुपस्पृश्य चक्षुष्पा असि चक्षुर्मे पाहीति चक्षुषी विमार्ष्टि'[b] इति॥

इति पञ्चमः खण्डः

व्यधायि सौम्ययागः प्राक् तदनन्तरसंगतः।
विधीयतेऽधुनाथेति खण्डे पात्नीवतो ग्रहः॥

**अथ-चरन्ति**।पत्नीभिस्तद्वन्तो देवाः पत्नीवन्तः। 'पत्नीवतस्त्रिंशतं त्रींश्च 6. १
देवान्'[c] इति दर्शनात्। तेषां ग्रहः पात्नीवतग्रहः। **पत्नीः-कुर्वन्ति**। तत् तेन 6. २
चरणेन गार्हपत्यभाजः पत्नीः यजमानवदाहवनीयभाजः कुर्वन्ति। आहवनीये तस्य ग्रहस्य चरणात् तन्मुखेन पत्नीनामाहवनीयसंबन्धसंभवात्। इतरग्रह-
सामान्यप्रसक्तमनुवषट्कारं प्रतिषेधति—**तस्य-आज्यम्**। तस्य पात्नीवतग्रह- 6. ३-५
स्यानुवषट्कारो न कार्यः। पात्नीवतस्य आज्यसंबन्धित्वात्। तस्मिन् हि ग्रहे 'अहं परस्तादहमवस्ताद्'[d] इति मन्त्रेण घृतेन श्रयणमध्वर्युभिः क्रियते। तथाहि बौधायनकल्पवचनम्—'बर्हिषी अन्तर्धाय घृतेन श्रीणाति'[e] इति।

a. TS. 1. 2. 1. 2. b. ŚŚ. 8. 4. 5–6.
c. AV. 20. 13. 4. d. TS. 3. 5. 5. 1.
e. BŚ. 8. 14. 24.

आज्यस्य च नानुवषट्कारयोग्यत्वमस्ति । अतो न पात्नीवतग्रहेऽनुवषट्कारः ।

6. ९-१० **उपांशु-इति ।** 'पाठक्रमादर्थक्रमो बलीयान्'[a] इत्यनेन न्यायेनानुवषट्करोतीत्ययमर्थवादः पाठक्रमं भङ्क्त्वात्रैव घटनीयः । रेतोनिधानभूतपात्नीवतसंबन्धित्वात् पात्नीवतस्य रेतस्त्वम् । पुरा कालात् प्रजारूपेण परिणामलक्षितात् पूर्वमेव संस्थापयानि विनाशयानीति परिभयेनानुवषट्कारं न कुर्यात् । याज्याया उपांशुपठनीयत्वमाह—उपांशु इति । गतम् ।

'अग्नीत् पात्नीवतस्य यज'[b] इति प्रेषितेनाग्नीध्रेण 'ऐभिरग्ने **सरथम्**'[c] इति याज्या पठनीया । सूत्र्यते हि—'अग्नीत् पात्नीवतस्य यजेत्युक्त ऐभिरग्ने सरथमित्युपांशु यजति'[d] इति । अथास्या याज्यायाः आग्नीध्रेण पठनीयत्वं

6. ११ विशेषं चोद्योत्तरच्छलेन विधत्ते—**तद्-इति ।** एषा याज्या नेष्टुर्युक्ता । तस्य पत्नीभाजनत्वात् । यस्मादेवं तस्मात् कस्माद्धेतोराग्नीध्र एनया याज्यया यागं करोति, न तु नेष्टा इत्येवमत्रार्थे केचिज्जिज्ञासवः प्रश्नं कुर्वन्ति ।

6.१२-१४ उत्तरमाह—**आग्नेयी-यजति ।** एषा 'ऐभिरग्ने'[c] इति याज्या अग्निदेवत्या भवति । आग्नीध्रश्च अग्निसमिन्धनलक्षणक्रियासम्बन्धननिबन्धनप्रवृत्तशब्दवाच्यत्वादग्निसम्बन्धी । तथा चोपरिष्टाद् 'अग्निं हि स समिन्धे'[e] इति तत्प्रवृत्तिनिमित्तं दर्शयिष्यति । तस्मादाग्नेयत्वाविशेषाद्धेतोः एषा याज्या

6. १५ आग्नीध्रेण पठनीया । हेत्वन्तरेणापि उक्तमेवार्थं समर्थयते—**अथो-इति ।** अपि च एवं सत्याग्नीध्रस्य याज्यापाठ इत्येवं स्थित एवानुवक्थानां शस्त्ररहितानां नेष्ट्रादीनां वषट्कारयागाः समा भवन्ति, नान्यथा इत्यतो हेतोरप्याग्नीध्रस्यैव याज्यापाठकत्वं न नेष्टुरित्येतदुपपन्नमेव ॥

इति षष्ठः खण्डः

पात्नीवतग्रहेणेज्या गते खण्डे निरूपिता ।
अथ खण्डद्वयेनाग्निमारुतं शस्त्रमुच्यते ॥

a. Cf. JS. 5. 4. 1.
b. ŚB. 4. 4. 2. 15.; ŚŚ. 8. 5. 1.
c. RV. 3. 6. 9.
d. ŚŚ. 8. 5. 1.
e. KB. XXVIII. 3. ३७.

तत्र तावदाग्निमारुतशस्त्रगताहावसंख्यां स्तौति—**एकविंशत्याहावम्—एष।** एकविंशतिसंख्या आहावा यस्य तत् तथोक्तम्। तद् यथा—वैश्वानरीय- 7. १-३
रौद्री-मारुत-स्तोत्रिय-अनुरूप-जातवेदसीय-आपोहिष्ठीय-अहिर्बुध्न्य-देवानांपत्नी-राका-अक्षरपङ्क्ति-पैत्री-यामी-स्वादुष्किलीय-एकपातिनीत्रय-परिधानीया-निवित्त्रयाणां पुरस्तात् प्रत्येकमाहावः पठनीयः। एवं सति ते सर्वेऽप्याहावाः संभूय एकविंशतिसंख्या भवन्ति। त्रिवृदादीनां च ज्योतिष्टोमसंबन्धिनां स्तोमानां मध्ये एकविंशतिस्तोमः परम उत्तमो भवति। अत एव समाप्तिहेतुरयमेकविंशाख्यः स्तोमः। 'एकविंशो वै स्तोमानां प्रतिष्ठा'[a] इति श्रुत्यन्तरात्। तस्मादेकविंशतिसंख्या प्रतिष्ठाफलाय संपद्यते।

अस्मिन्नेव शस्त्रे चतुश्चत्वारिंशत्संख्यां संपाद्य स्तौति—**तत्-दधाति।** 7. ४-९
पूर्वोक्ता वैश्वानरीयादय एकविंशतिरुक्थवीर्ययाज्याभ्यां त्रयोविंशतिः। 'अध्वर्यो शो शोंसावो'[b] इति तार्तीयसवनिक आहावः। तेन चतुर्विंशतिः। पर्वाणि सन्धयः। तानि विंशतिसंख्यानि। वैश्वानरीयादिष्वेकविंशतिसंख्येषु मध्ये पर्वाणि विंशतिर्भवन्ति। यथा करचरणाद्यवयवसन्धिस्थानानि देहे प्रसिद्धानि तथा शस्त्रावयविनि वैश्वानरीयाद्यवयवसन्धिस्थानानि। तथा च चतुर्विंशतिश्च मिलित्वा चतुश्चत्वारिंशद् भवन्ति। शिष्टं गतम्।

अथ क्रमेण शस्त्रकल्पनां विधित्सुरादौ पठनीयं सूक्तं विधत्ते—**वैश्वानरीयं-अनुशंसति।** 'अध्वर्यो शो शोंसावो'[b] इति तार्तीयसवनमाहावं सर्वं 7.१०-१२
पठित्वा वैश्वानरगुणाग्निदेवत्यं वैश्वानरीयं सूक्तं पठेत्। तच्च 'वैश्वानराय पृथुपाजसे विपः'[c] इति। सूत्र्यते हि—'यज्ञायज्ञीयं स्तोत्रियमाग्निमारुतस्य' इत्युपक्रम्य 'वैश्वानराय पृथुपाजसे विप इति वैश्वानरीयम्'[d] इति। यस्मादिह शस्त्रे वैश्वानराग्निदेवत्यो ग्रहो गृहीतो वर्तते, तस्मात्तस्यैव ग्रहस्यानुशंसनरूपमेवैतद् वैश्वानरीयसूक्तशंसनम्।

अस्य सूक्तस्य सनिवित्कस्य शंसनानन्तरम् 'आ ते पितर्मरुताम्'[e] इत्यृचं

a. AA. 1. 4. 2.
b. AB. 3. 12. 4.; ŚŚ. 8. 3. 5.
c. RV. 3. 3. 1.
d. ŚŚ. 8. 6. 1–2.
e. RV. 2. 33. 1.

7.१३-१५ पठेदित्याह—**रौद्रीम्-कुरुते**। 'आ ते पितरित्येका'[a] इति सूत्र्यते। तत्र योऽयं रुद्रनामा देवोऽस्ति स घोर इत्येतत् प्रसिद्धम्। 'रुद्रो वै क्रूरः'[b] इत्यादिश्रवणात्। तेन रौद्रया ऋचः शंसनेन भैषज्यं रोगशमनमेव करोति। यथा लोके आर्द्रस्य व्रणविशेषस्य कटुकवीर्यवत्सिद्धौषधसेवनेन विरोपणं भिषग्भिः
7.१६,१७ क्रियते तद्वत्। इतश्च अत्र रौद्रयाः शंसनमुपपन्नमित्याह—**अथो-शंसति**। अपि च एष रुद्रोऽन्तभाक्। यज्ञस्यान्तमवसानं भजत इति। यस्मादयं रुद्रोऽन्तभाक् तस्मादिहान्त्ये अग्निष्टोमसंस्थापेक्षयावसानगते आग्निमारुताख्ये शस्त्रे रौद्रयाः शंसनमुपपन्नम्।

7.१८-२० अथ मरुद्दैवत्यं किंचित् सूक्तं विधत्ते—**मारुतं-समर्धयति**। तच्च 'प्र त्वक्षसः'[c] इति सूक्तम्। सूत्र्यते हि—'प्र त्वक्षस इति मारुतम्'[d] इति। योऽयं रुद्रः स एतत्पूगो भवति। एते मरुत एव पूगः परिवारः यस्य स तथा। 'शृणोतु नो हवं रुद्रो मरुत्वान्'[e] इत्यत्र मरुत्सखत्वदर्शनात्। अयं तु विशेषः—इन्द्रस्य सख्यनिबन्धनं मरुत्सखत्वम्; रुद्रस्य जन्यजनकभावनिबन्धनमिति। तेन रौद्रयाः शंसनानन्तरं[1] मारुतशंसनेन रुद्रं स्वेनात्मीयेन पूगेन परिवारेण समृद्धं करोति। लोके राजादेः परिवारपरिवृतत्व एव समृद्धिदर्शनात्।

अस्य सनिवित्कस्य शंसनादनन्तरपठनीयत्वेन 'यज्ञायज्ञा वो अग्नये'[f]
7.२१-२३ 'देवो वो द्रविणोदाः'[g] इति प्रगाथौ विधत्ते—**अथ-योनिः**। मारुतशंसनानन्तरं यज्ञायज्ञियस्य[2] साम्नः संबन्धिनौ स्तोत्रियानुरूपौ 'यज्ञायज्ञा वो अग्नये'[f] इति स्तोत्रियं प्रगाथं 'देवो वो द्रविणोदाः'[g] इत्यनुरूपं च शंसेत्। अनयोः शस्त्रमध्ये पठनलक्षणं विशेषमितरस्तोत्रियानुरूपवैलक्षण्येन दर्शयति–तौ वा

a. ŚŚ. 8. 6. 3.
b. TS. 6. 1. 7. 7.
c. RV. 1. 87.
d. ŚŚ. 8. 6. 4.
e. RV. 1. 114. 11.
f. RV. 6. 48. 1.
g. RV. 7. 16. 11.

1. T. पठनानन्तरं
2. T. यज्ञायज्ञियाख्यस्य

इति। तौ स्तोत्रियानुरूपौ न[1] शस्त्रादौ पठनीयौ। किंतु मध्ये शस्त्रस्य पठेत्। किमर्थमिति चेद् भिया भयस्य परिहारार्थमेव तन्मध्ये शंसनं भवति। यथा लोके भयस्थाने कान्तारादौ बहुषु सार्थीभूय गच्छत्सु मध्येवर्तमानानां भयपरिहारो भवति, तद्वदनयोः स्तोत्रियानुरूपयोर्भयपरिहारार्थमेव शस्त्रमध्ये पठनं कुर्यात्। यस्मादियं प्रसिद्धा स्त्रीसंबन्धिनी योनिरात्मनः शरीरस्य मध्ये भयपरिहारार्थमेव धृता। तस्माद् योनिरूपत्वात् स्तोत्रियः प्रगाथस्तन्मध्ये पठनीयः। योन्यनुरूपगमनशीलत्वादनुरूपोऽपि तत्रैव पठितव्यः।

सूक्तान्तरं विधत्ते—**जातवेदसीयं–आख्यायते**। जातवेदा अग्निर्देवता 7.२४,२५
यस्य तत् तथोक्तम्। तच्च 'प्र तव्यसीं नव्यसीम्'[a] इति सूक्तम्। नन्वनुक्रमण्यां 'प्र तव्यसीमष्टौ ह्याग्नेयम्'[b] इत्यस्य केवलाग्निदेवत्यत्वमुक्तम्। तत् कथमत्र जातवेदसीयमित्यनेन तस्य सूक्तस्याभिधानम्? उच्यते, जातवेदःशब्देनाग्नेरेवाभिधानम्। यद्यपि जातवेदस्त्वगुणाभिधानमुखेनैवाग्न्यभिधानम्[2], तथापि गुणिन एवाग्नेस्तत्पदप्रतिपाद्यमानत्वान्नाग्नेयत्ववचनविरोधः। गुणयोर्द्वयोर्हि मिथो विरोधः, न[3] गुणिनोः। 'तेनाग्निमारुतमित्याख्यायते' इत्यर्थवादबलाच्च जातवेदःशब्दोऽग्नेरेव वाचकोऽवगम्यते। श्रुत्यन्तरे च समानप्रकरणे 'जातवेदस्यं शंसति' इत्युपक्रम्य प्रजापतिसृष्टानां प्रजानामग्निना परिगमनान्निरोधमुक्त्वा 'सोऽब्रवीज्जाता वै प्रजा अनेनावेदिषमिति। यदब्रवीज्जाता वै प्रजा अनेनावेदिषमिति तज्जातवेदस्यमभवत्। तज्जातवेदसो जातवेदस्त्वम्'[c] इति प्रजापतिवचनरूपेणाग्निवाचितया जातवेदःशब्दनिर्वचनं श्रूयते। सूत्रकारश्च 'प्र तव्यसीमिति जातवेदसीयम्'[d] इति ब्रुवन् जादवेदःशब्दस्याग्निवाचितामभिप्रेयायेति गम्यते। यस्मादेतस्मिन् सूक्तेऽग्निः स्तूयते सामान्येन तस्माद्धेतोरेवैतच्छस्त्रमाग्निमारुतमित्येवं प्रसिद्धया संज्ञया वैदिकैरभिधीयते। आग्निमारुतसंज्ञाप्रसिद्धेरेतत्सूक्तशंसनमेव मूलमित्यर्थः। इतरथा डित्थादिवद् याद-

a. RV. 1. 143. b. SA. I. 143.
c. AB. 3. 36. 1. d. ŚŚ. 8. 6. 6.

1. T. omits
2. T. गुणिताग्न्यभिधानम् for अग्न्यभिधानम्
3. T. adds तु

च्छिकमेवैतन्नाम स्यात् । तेन मारुतजातवेदसीयसूक्तशंसनादाग्निमारुतसंज्ञा-प्रवृत्तिः । उक्तमेवास्य शस्त्रस्याग्निसंबन्धं हेतूकृत्य शंसने शस्त्रान्तरेभ्यः
7.२६,२७ कंचिद् विशेषं विधत्ते—**तस्माद्-एवम्** । अभ्यग्रम् अतित्वरितमित्यर्थः । तत्रा-भ्यग्रताया दृष्टान्तः—यथाग्निमिति । यथा कश्चित् काननचरः प्रदाव्यं वने तरुसंघसंघर्षसंजातं विजृम्भमाणमग्निमतिक्रम्य गच्छन् तस्मान्मोक्षं प्राप्तुमति-शयेन त्वरावान् गच्छति, तथायं होता तादृशपुरुषतुल्यत्वरावानेवैतच्छस्त्रं पठेत् ॥

इति सप्तमः खण्डः

८.१-३ अथ 'आपो हि ष्ठा'[a] इत्यादिकं तृचं विधत्ते—**आपोदेवत्याः-क्रियते** । आपो देवता यासामृचां तास्तथोक्ताः । छान्दसो विभक्त्यलोपः । ताश्च 'आपो हि ष्ठा'[a] इत्याद्यास्तिस्रः । सूत्र्यते हि—'आपोहिष्ठीयास्तिस्रः'[b] इति । शान्तिर्वा इत्यादि गतम् ।

८.४,५ आसामृचां विलम्बितवृत्त्या पठनीयतामाह—**तस्माद्-एवम्** । यस्मा-देताः शान्तिभेषजरूपा आप एव भवन्ति, तद्देवत्यत्वात्, तस्मादेना अब्देवत्या ऋच आरतं विलम्बितवृत्तिमाश्रित्य पठेत् । अत्र दृष्टान्तः—यथा कश्चित् पुरुष उग्रतरग्रीष्मोष्मभरपरितापितकलेबरः सन्[1] तज्जनिततापपरिहर-णार्थम्[2] अतिशीतलह्रदावतीर्णः सन्[1] तत्सलिलसेचनावगाहनादिना शरीरसेचनं कुर्वाणो विलम्बितवृत्तिमाश्रित्य तापनिबर्हणनिदानं शरीरसेचनं करोति ; तद्वदाग्निमारुताख्यशस्त्रदावाग्निमध्यपतनसमुस्थिततापनिवारणार्थमेताः[3] पठन् आरतमेव पठेत् ।

a. RV. 10. 9. 1. b. ŚS. 8. 6. 7.

1. T. omits. 2. T. निवारणार्थम् for परिहरणार्थम्
3. T. परिवर्तन for मध्यपतन; विनिवारणार्थम् for निवारणार्थम्

'उत नोऽहिर्बुध्न्यः'[a] इत्येकामृचं विधत्ते—**अहिम्-उज्ज्वलयति**। अहि- 8.६-८
र्बुध्न्यशब्देनाग्निरेवोच्यते। 'अहिरसि बुध्नियो रौद्रेण'[b] इति मन्त्रे अग्नेरेवाहि-
र्बुध्न्यपदेनाभिधानदर्शनात्। तस्मादेतयर्चा अग्निरेव स्तुतो भवति। **अथो-
अनुशंसति**। अथो अपि च। ये धिष्ण्ये स्थिता अग्नयस्तान् सर्वानेवैतयर्चा 8.९
स्तौति। न केवलमहिर्बुध्न्य एव। अहेर्बुध्न्यस्य धिष्ण्यानामन्यतमत्वादुप-
लक्षणन्यायेनान्येषामपि शसनसंभवात्।

'देवानां पत्नीः'[c] इति द्वृचं 'राकामहम्'[d] इति द्वृचं च विधत्ते—**देवानां-
शंसति**। सूच्यते हि—'देवानां पत्नीरिति द्वे राकामहमिति द्वे'[e] इति। एता- 8.१०-१३
भिश्चतसृभिः पात्नीवताख्यस्य ग्रहस्यैवानुशंसनं होत्रा क्रियते। पत्नीनामाभि-
र्ऋग्भिः प्रतिपादनात्। तद्वारा तत्संबन्धिग्रहानुशंसनसंभवात्। इतरथासामृचा-
मत्र शंसनमुपपन्नमित्याह–अथो इति। अपि च पत्न्यो ह्यन्तभाजः प्रसिद्धाः।
अन्तमवसानं भजन्ते सेवन्ते प्राप्नुवन्तीत्यन्तभाजः। अतिथिपूजादिकर्मावसाने
भर्तृभुक्तान्नशेषभोजनादिस्मरणात्[f]। तस्मादेनाः पत्नीरन्त्ये शस्त्रे शंसेत्।
एतत् प्राग् व्याख्यातम्।

'अविदद् दक्षम्'[g] इत्याद्यास्तिस्र ऋचो विधत्ते—**अक्षरपङ्क्तयः-आप्त्यै**। 8.१४-१६
द्वितीयास्थाने[1] प्रथमा। पशूनां पाङ्क्तत्वप्रसिद्धेरक्षरपङ्क्तयः पशव एव।
अतस्तच्छंसनं पशूनां प्राप्त्यर्थमेव संपद्यते। प्रकारान्तरेण स्तौति—**अथो-
सेन्द्रताये**। या एता अक्षरपङ्क्तयः सन्ति ताः प्राणापानावेव भवन्ति। 8.१७-१९
तेनाक्षरपङ्क्तीनां शंसनेन प्राणापानावेवात्मनि होता स्थापयति। पुनरपि
स्तौति—अथो इति। अस्याग्निमारुताख्यशस्त्रस्य सेन्द्रतायै इन्द्रसाहित्यार्थमे-
वैतदक्षरपङ्क्तीनां शंसनं संपद्यते। 'अविदद् दक्षम्'[g] इत्याद्यानामृचामिन्द्र-
देवत्यत्वात्। अन्यासामिन्द्रदेवत्यानामृचामत्रादर्शनाच्च।

a. RV. 1. 186. 5.
b. TS. 1. 3. 3. 1.
c. RV. 5. 46. 7.
d. RV. 2. 32. 4.
e. SS. 8. 6. 9-10.
f. Cf. MBh. XIII. 134. 46.
g. RV. 6. 44. 7.

1. T. द्वितीयार्थे

८.२०,२१ पितृदेवत्यं यमदेवत्यं च तृचं विधत्ते—**पैत्रीः-अनुशंसति** । पितृदेवत्या 'उदीरताम्[1][a] इत्याद्यास्तिस्र ऋचः शंसेत्। तदनन्तरं यमदेवत्या 'इमं यम'[b] इत्याद्यास्तिस्रः शंसेत् । सूत्र्यते हि—'उदीरतामिति पैत्र्यस्तिस्र इमं यम मातली कव्यैरङ्गिरोभिरिति यामीस्तिस्रः'[c] इति । एताभिर्ऋग्भिर्नाराशंस-संज्ञितानाप्यायितसादितान् पितृदेवत्यांश्चमसानेव स्तौति । इतश्चासामृचामत्र
८.२२,२३ शंसनमुपपन्नमित्याह--**अथो-शंसति** । दिनादेरन्तमवसानं भजन्ते सेवन्ते इत्यन्तभाजः । एतच्च 'अपक्षयभाजो वै पितरः'[d] इत्येतद्व्याख्याने विस्तरेण प्रदर्शितं पञ्चमेऽध्याये । तस्माद्धेतोरेषां पितृणामन्त्येऽस्मिन् शस्त्रे शंसन-मुपपन्नम् ।

८.२४,२५ 'स्वादुष्किलायम्'[e] इत्याद्यास्तिस्रो विधत्ते—**स्वादुष्किलीयाः-स्वदयति।** एताभिः स्वादुष्किलशब्दयुक्ताभिरिन्द्राय सोमं स्वादुं करोत्येव । यथा लोके कश्चिद् गृहमेधी भोजयिता अतिथिभ्योऽभ्यागतेभ्यो भोक्तृभ्यो दीय-मानमन्नमिदं तदात्वमधुरतरं विपाकसुखकरं भवदर्थमेव सकलपरिकरपरि-बृंहिततया निष्पादितं मृष्टतममित्याद्यादरातिशयसुभगया प्रशंसात्मिकया वाचा रुचिगोचरीकुर्वाणः प्रयच्छति तथायं भवदर्थमभिषुतः सोमः स्वादू रसवांश्च इत्यादितद्गुणगणश्लाघारूपया वाचा रुचिविषयीक्रियते ।
८.२६–२८ विधान्तरेण स्तौति—**अथो-अभ्युत्क्रामन्ति** । इन्द्रस्य देवलोकत्वं तदाधि-पत्यात् । एवं यमस्य पितृलोकत्वमपि । तत् तेन यमदेवत्यानामृचां शंसना-नन्तरमिन्द्रदेवत्यानाममीषां स्वादुष्किलीयानां शंसनेन पितृलोकसकाशाद् देव-लोकमभिलक्ष्यागमनमेव क्रियते । अत्र प्रतिगरे विशेषं विधत्ते—**तासु-**
८.२९,३० **तृतीयसवनम्** । तासु स्वादुष्किलीयासु । सूत्र्यते हि—'मद्वानासु प्रति-गरः'[f] इति । गतमन्यत् ।

८.३१–३५ 'ययो रोजसा'[g] इति शाखान्तरीयामृचं विधत्ते—**वैष्णुवारुणीम्-एषा।**

a. RV. 1. 123. 6.
b. RV. 10. 14. 4.
c. ŚŚ. 8. 6. 12-14. ( varies )
d. KB. V. 8. २.
e. RV. 6. 47. 1.
f. ŚŚ. 8. 6. 15.
g. VS. 8. 59.

1. T. उदीरतामवर

विष्णुर्वरुणश्च देवता यस्याः सा तथा। यद् यज्ञसंबन्धि स्खलितमन्तरितम् उल्बणं तीव्रगुणदोषयुक्तमन्यथाकरणलक्षणं वा भवति, तस्यैतयर्चा प्रतिसमाधानमेव क्रियते। यस्मादेषर्ग् भैषज्यं दोषसमाधानरूपमेव भवति।

'विष्णोर्नु कम्'[a] 'तन्तुं तन्वन्'[b] इति द्वे विधत्ते—**वैष्णवीम्-शंसति**। ८.३६–३८
विष्णुदेवत्या 'विष्णोर्नु कम्'[a] इत्येषा। अग्निदेवत्या 'तन्तुं तन्वन्'[b] इत्येषा। यस्मादग्निर्विष्णुश्च देवानामन्तभाजौ भवतः। तत्र देवानां मुखमग्निः। अग्रं विष्णुः। अनयोर्मध्ये सर्वेऽन्ये देवा आभ्यां विधृता वर्तन्ते संदंशपरिदष्टा इव। तथा च मन्त्रः—'अग्निर्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीद्'[c] इति। ब्राह्मणं च 'अग्निरवमो देवतानां विष्णुः परमः'[d] इति। यस्मादनयोरुक्तदिशान्तभाक्त्वम्, तस्मादनयोरग्नाविष्ण्वोरन्त्येऽस्मिन् शस्त्रे शंसनमुपपन्नम्।

इदानीमस्य शस्त्रस्य परिधानीयाम् 'एवा न इन्द्रो मघवा विरफ्शी'[e]
इत्येतामृचं विधत्ते—**ऐन्द्र्या-प्रतिष्ठापयति**। इन्द्रस्यास्यामृच्यभिधानाद् ८.३९–४१
इयमैन्द्री। यस्मादेष सोमयाग इन्द्रस्यैव स्वभूतः प्रसिद्धः। 'ऐन्द्रः सोमः'[f] इति श्रुतेः। अस्या ऋचोऽन्तेऽवसाने शंसनेन यस्यैष सोमयागः स्वभूतः तस्मिन्निन्द्र एवैनं सौम्यमध्वरम् अन्ततोऽवसाने प्रतिष्ठितं करोति। युक्तं चैतद् यो यस्य स्वभूतस्तस्य तस्मिन्[1] प्रतिष्ठापनमिति। तस्मादैन्द्रचा शस्त्रपरिसमापनमुपपन्नम्। सूत्रितं च—'एवा न इन्द्रो मघवा विरफ्शीति परिधाय'[g] इति॥

इत्यष्टमः खण्डः

a. RV. 1. 154. 1. b. RV. 10. 53. 6.
c. KS. 4. 16. d. TS. 5. 5. 1. 4.
e. RV. 4. 17. 20. f. TS. 3. 1. 8. 2.
g. ŚS. 8. 6. 17.

1. T. यद् यस्य न स्वभूतं तस्य तस्मिन्नेव for यो—तस्मिन्

ऐन्द्रीशस्त्रान्तऋग्युज्यत इति वदितुं येन्द्रदेवत्यता प्राक्
सौम्यस्येहाध्वरस्य[1] स्फुटतरमुदिता तत्प्रसंगादिदानीम् ।
सोमेज्यादेवतावस्तुनि विमतिमृषीणां त्रयाणां क्रमेण
ब्रूते गौश्रस्य पैङ्ग्यस्य च महितमहत्त्वस्य कौषीतकेश्च ॥

तत्र तावत् प्रश्नप्रदर्शनपूर्वकं गौश्रनाम्नो महर्षेर्मतमाह—**किंदेवत्यः–**
9. १-३ **प्रत्युवाच**। सोमयागः किंदेवत्यः—का देवता अस्येति किंदेवत्यः—इत्येवं मधुकनामा कश्चिन्महर्षिः गौश्रनामकं महर्षिं पृष्टवान् । अत्र बह्वीनां देवतानां यागस्तुतिशंसनं दृश्यते । तत्र किं सर्वासां सममेव प्राधान्यम् ? न वा ? न चेत् कस्याः प्राधान्यम् ? कस्या गुणत्वम् ? इत्येवमादिनिर्धारणाय प्रश्नः । अथ तदुक्तमुत्तरं दर्शयति—स हेति । हशब्द ऐतिह्यार्थः । मधुकेन पृष्टो गौश्रनामकः स महर्षिः 'सोमः पवते जनिता मतीनाम्'[a] इत्येतां सोममाहात्म्यप्रतिपादिकां दाशतयीगतामृचं प्रथममुदाहृत्य एतस्येत्यादिप्रतिवचनरूपं वाक्यमुक्तवान् किल । एतस्य 'सोमः पवते'[a] इत्यनयर्चा प्रतिपादितानुभावो यः सोमस्तस्यैव विभूतयोऽन्येऽग्न्यादयो भवेयुः[2]। न स्वातन्त्र्येण प्रधानभूता अत्यन्तभिन्ना अन्याः काश्चिद् देवता भवन्ति । किं तु सोम एक एव तत्तद्रूपविशेषवत्तया तत्तद्व्यपदेशगोचरो भवति । अस्मिन्नर्थे[3] प्रमाणत्वेन 'सोम'[a] इत्यस्या ऋचोऽनुद्रवणम् । अनया हि सोमस्य सर्वजनयितृत्वोपक्षेपेण मृद्घटवत् कार्यकारणयोरभेदन्यायेन सर्वदेवतात्मकता[4] प्रतिपाद्यते । तस्या ऋचोऽयमर्थः । अयं द्रव्याभिन्नो देवतात्मा सोमः पवते क्षरति । क्षरणलक्षणस्य पवनस्य द्रव्यात्मन्येवोपपत्तेर्बुद्ध्यादिजनयितृत्वस्य देवतात्मन्येवोपपत्तेश्च । मतिशब्देनान्तःकरणवाचिना तद्वन्तो जीवा उच्यन्ते । जनिता जनयिता । न केवलं प्राणभृतामेव जनयितासौ, तदायतनानां लोकानां चेत्याह—जनिता दिव इति । दिवो द्युलोकस्य । तथा द्युलोकस्य जनयिता । उपलक्षणं चैतदितरेषां लोकानामपि । ननु अग्न्यादय एव देवा भोक्तृभोग्यात्मकजगतो

a. RV. 9. 96. 5.

1. T. सोमस्य pr सौम्यस्य
2. V. देवाः स्युः
3. T. अस्मिंश्चार्थे
4. T. सर्वदेवात्मकता

जनयितारः किं न स्युरिति चेन्न[1]। तेषामपि सोमविभूतित्वादित्याह—जनि-तान्गेरिति। किं बहुना ? आसतां तावदग्न्यादयो देवाः। विष्णोर्व्यापन-शीलस्य देवानामपि देवस्य यदा सोम एव जनयिता तदा किं वक्तव्यमन्येषां जनयितृत्वमित्याह—उत विष्णोरिति। अतः सर्वेषामग्न्यादीनां सोमात्मकत्वात् स एव सोमयागदेवता भवितुमर्हतीत्येवं गौश्रनाम्नो महर्षेर्मनीषितम्।

प्रश्नोत्तररूपेण गौश्रमतं प्रदर्श्य पैङ्ग्यमतं[2] दर्शयति—**बह्वृचवद्-आस**। पैङ्ग्यनाम्नो महर्षेः पुनर्यथा बह्वृचानाम् ऐन्द्रःसोमयागोऽभिप्रेतः तथैव 9. ४,५
इन्द्रदेवत्य एव सोम इति स्थितिः निश्चिता धीर्बभूव।

**ऐन्द्राग्नः–इति**। कौषीतकिनामधेयस्य महर्षेस्तु न केवलमैन्द्र एव किंतु 9. ६-९
ऐन्द्राग्न इति। इन्द्राग्नी देवते अस्यैन्द्राग्नः सोमयाग इति स्थितिरास। कथमैन्द्राग्नत्वमित्यपेक्षायामाह—अग्निना वा इति। आज्येन शस्त्रेण सोम-यागं प्रारभत इति यदस्ति तदग्निनैव प्रतिपद्यते। आज्यस्याग्निदेवत्य-त्वात्। तथा[3] 'एवा न इन्द्र'[a] इति परिधानीयामृचमनु लक्ष्यीकृत्य सोम-यागः संतिष्ठते संस्थां गच्छतीति यत् तदिन्द्रमेवानुलक्ष्यीकृत्य संस्थां गच्छति। तस्या इन्द्रदेवत्यत्वात्। तस्मादग्निना प्रारम्भादिन्द्रेणोपसंहाराच्च ऐन्द्राग्न एव सोमयागः। यद्यपि मध्यवर्तिदेवतान्तरमत्र सोमयागे विद्यत एव तथापि 'इन्द्राग्नी वै देवानामोजोभृतौ'[b] इत्यादिवाक्यानुरोधात् तयोः प्राधान्यात् तद्गुणभावादन्यासां तद्देवत्य एवासौ। गुणस्य प्रधानानुरोधित्वस्थितेः। तस्मात् सुस्थितं कौषीतकेर्मतम्।

तथाग्निमारुतशस्त्रान्तस्य ज्योतिष्टोमस्य सोमयागस्याग्निष्टोमसंज्ञत्व-
माह—**एष वा अग्निष्टोमः**। योऽयं 'वाग् दीक्षा[c]' इत्यादिना 'तमिन्द्र एवा- 9. १०
न्ततः प्रतिष्ठापयति'[d] इत्यन्तेन वाक्यसन्दर्भेण प्रतिपादितो ज्योतिष्टोमः सोऽयमाग्निमारुतशस्त्रान्तोऽग्निष्टोम इति वेदितव्यम्। अथवा योऽग्निष्टोम इति

a. RV. 7. 24. 6.
b. TS. 5. 3. 2. 1.
c. KB. VII. *1*. १.
d. KB. XVI. 8. ४१.

1. T. omits इति चेत्
2. T. पैङ्ग्यस्य मतं
3. T. adds एताम्।

प्रसिद्धो ज्योतिष्टोमस्य सप्तसंस्थस्य प्रथमसंस्थाविशेषः स[1] इदानीं 'वाग् दीक्षा'[a] इत्यादिना विहितप्रकारवत्तयावसेय इति । तमेतमग्निष्टोमं सर्वकामा-
9. ११ वाप्तिहेतुतया[2] स्तौति—**एष-आह्रियते ।** काम्यन्त इति कामाः पशुस्वर्गादयः । आहरणमनुष्ठानम् । यद् यदैहिकमामुष्मिकं वा फलं कामयेत तस्य सर्वस्यापि प्राप्तिहेतुरयमग्निष्टोमः । तथा चान्यत्र श्रूयते—'यं कामं कामयेत तमेतेनाभ्यश्नुते'[b] इति । 'एकस्मै वा अन्ये क्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः'[c] इति च ।

अथास्य प्रथमानुष्ठेयतां विपक्षे बाधकप्रदर्शनेन दर्शयन्[3] स्तौति—**यो-**
9.१२,१३ **स्माह ।** इति ह स्माह कौषीतकिरिति शेषः । यो यजमान एतेन प्रकृतेनाग्निष्टोमेन यागमकृत्वा अन्येन वक्ष्यमाणस्वरूपेणोक्थ्यादिना अहीनादिना वा यागं करोति स्वेच्छानुरोधेन, तत् कर्तपत्यमेव उच्छिष्टगर्तपतनतुल्यमेव । यथोच्छिष्टगर्तपतितं पत्रादि न क्वाप्युपयुज्यते तथा तत् कर्म निष्फलमेव संपद्यत इत्यर्थः । अपि चायं यजमानः शत्रुभिः पराभूयते अपमृत्युभाक् च भवति । ननु सप्तसंस्थस्य ज्योतिष्टोमस्याद्या संस्थेयमग्निष्टोमः । अतः समानजातीयत्वादुक्थ्यादिसंस्थान्तरमेव बुद्धिस्थत्वादन्यशब्देन गृह्यत इत्येकाहादीनां विकृतिसोमयागानां प्रथममनुष्ठाने नोक्तदोष इति चेत्, न । मीमांसान्यायतोऽन्यथा निर्णीतत्वात् । तथा हि क्रमलक्षणे स्थितम्[d]—एष वाव प्रथमयज्ञो यज्ञानां यज्ज्योतिष्टोमः । य एतेनानिष्ट्वाथान्येन यजते कर्तपत्यमेव हि तज्जीयते प्र वा मीयत इति श्रूयते । अत्र संशयः—अत्रान्यशब्देन उक्थ्यादिसंस्थान्तरमेव गृह्यते अहोस्विदेकाहादयोऽपि इति । तत्र समानजातीयत्वेन संस्थान्तरस्यैव बुद्धिपदव्यारोहात् तस्यैवान्यशब्देन ग्रहणमिति पूर्वः पक्षः । सिद्धान्तस्तु—यज्ञानां प्रथम इति सर्वयज्ञापेक्षमत्र प्राथम्यमुपन्यस्यते । अतः संस्थान्तरस्यैकाहादेरिव बुद्धिसांनिध्याविशेषात् तेषां सर्वेषामप्यन्यशब्देन

a. KB. VII. 1. १.
b. TS. 7. 1. 1. 2.
c. Cf. PB. 6. 3. 1-2; quoted by Śabara on JS. 4. 3. 25.
d. JS. 5. 3. 37-38.

1. T. adds एष
2. T. हेतुत्वेन for हेतुतया
3 V. omits

ग्रहणात् सर्वेऽपि यज्ञा अग्निष्टोमात् प्राङ् नानुष्ठेया इति। नन्वेवं सति यज्ञत्वाविशेषादिष्टयादिहविर्यज्ञानामपि प्रागनुष्ठानं न प्राप्नोति। अभ्युपगम्यते च तेषां प्रागनुष्ठानक्रम उक्त आश्वलायनेन—'दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथ सोमेन'[a] इति। आपस्तम्बः—'अथैकेषामग्नीनाधाय हस्ताववनिज्य संवत्सरमग्निहोत्रं हुत्वा दर्शपूर्णमासावारभते। ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते। तत ऊर्ध्वमन्यानि कर्माणि कुरुते'[b] इति। अत्रोच्यते—अस्य नियमस्य विकृतिष्वेव स्थितत्वात्। तथा च ब्राह्मणान्तरे लिङ्गदर्शनं भवति—'प्रजापतिर्वा अग्निष्टोमः। स उत्तरानेकाहानसृजत। ते सृष्टा अब्रुवन्। न वयं स्वेनात्मना प्रभवाम इति। तेभ्यः स्वां तनूं प्रायच्छत्। तया प्राभवन्'[c] इति। तस्मात् सोमविकृतिष्वेव यज्ञेषु यथोक्तो नियम इति।

**स–आप्नोति।** इत्थं प्रसक्तं तदनुप्रसक्तं च किंचिदभिधाय प्रकृतमाग्निमा- ९.१४-१७
रुतशस्त्रमेवोपसंक्रम्य परिधानीयाया अनन्तरपठनीयां ग्रहहोमयाज्यां विधत्ते—
**अग्ने–प्रतिष्ठित्यै।** अग्निर्मरुतश्च यस्या देवता सा तथोक्ता। तथा 'अग्ने ९.१८-२३
मरुद्भिः'[d] इत्यृचा यजतीत्यन्वयः। यस्मादेतच्छस्त्रमग्निमरुद्देवत्यं भवति तस्मादाग्निमारुती याज्याभिरूपा। छन्दस्तोऽप्याभिरूप्यमाह—**जगत्येति**। यजतीत्यनुवर्तते। यस्मात् तृतीयसवनं जागतं तस्माज्जगतीछन्दस्त्वं युक्तम्। शाब्दमप्याभिरूप्यमाह—**मद्वत्येति**। यजतीत्यनुषङ्गः। 'मन्दसानः'[e] इति मदिधातुमत्या। शेषं गतम्॥

इति नवमः खण्डः

निःशेषोत्तरसौमिकाध्वरभिदामूलं प्रकृत्यात्मक-
ज्योतिष्टोमनिवेशिनीष्वचरमा संस्थासु या सप्तसु।
संस्थां द्वादशभिस्तरङ्गिततनुं स्तोत्रैश्च शस्त्रैश्च ता-
मग्निष्टोमगिरोदितां प्रथमतस्तावद् व्यधत्त श्रुतिः॥

a. AŚ. 4. 1. 1.
b. ApŚ. 5. 23. 2.
c. Quoted by Śabara on JS. 5. 3. 40.
d. RV. 5. 60. 8.
e. RV. 1. 10. 11.

ज्योतिष्टोमवपुर्निजं खलु यतोऽग्निष्टोम इष्टो बुधैः
सर्वेषां प्रकृतिश्च नैवमपरास्तेनादितस्तद्विधिः।
उक्थ्यं षोळशिनामधेयमतिरात्राख्यं च संस्था इमाः
सत्रादिप्रकृतीः क्रमेण विदधत् प्राहोक्थ्यमत्रादितः॥

10. १-४ **ऐन्द्राग्नानि—प्रीत्यै।** ऐन्द्राग्नानीत्ययमुक्थ्यस्तोत्राणामिन्द्राग्निदेवत्यत्वस्तुत्यर्थवादः। इन्द्राग्नी देवता येषां तानि तथा। उक्थ्यसंस्थागतान्युक्थानि स्तोत्राण्युक्थ्योक्थानि। अत्र शस्त्रमात्रविधानादुक्थ्ये होत्रकाणां तृतीयसवनेऽपीतरसवनयोरिव शस्त्रसद्भावमात्रं विशेषः। इतः प्राक्तनं सर्वमग्निष्टोमवदेव तद्विकृतित्वादस्येत्येतत् सिद्धं भवति। तदेतदैन्द्राग्नत्वं सर्वदेवप्रीत्यर्थं संपद्यते। यस्मात् सर्वेऽपि देवा इन्द्राग्नी एव। तयोर्देवानां प्रधानत्वात्। प्रधाने गुणानामन्तर्भावात्। न चास्मिन् सवने किमर्थं सर्वदेवप्रीणनमिति शङ्क्यम्। यस्मात् तृतीयसवनं विश्वेदेवदेवत्यं भवति तस्मादत्र सर्वदेवप्रीणनमावश्यकम्।

10. ५,६ कस्मादेषामैन्द्राग्नत्वमित्यपेक्षायामाह—**आग्नेयीषु–भवन्ति।** 'एह्यू षु ब्रवाणि ते'[a] इत्याद्यास्वग्निदेवत्यास्वृक्षु साकमश्वाख्यं साम सामगा मैत्रावरुणाय प्रणयन्ति प्रवर्तयन्ति। इतरयोर्ब्राह्मणाच्छंस्यच्छावाकयोः 'वयमु त्वामपूर्व्य'[b] 'अधा हीन्द्रगिर्वणः'[c] इत्याद्यास्विन्द्रदेवत्यास्वृक्षु सौभरनार्मेधनामनी सामनी प्रणयन्ति सामगाः। तेन सामाश्रयभूतानामृचामिन्द्राग्निदेवत्यत्वाद् उक्थानामैन्द्राग्नत्वं संपन्नम्। अत एव हि प्रागाम्नातम्—'ऐन्द्राग्नं वै सामतस्तृतीयसवनम्'[d] इति। अनेनैन्द्राग्नतास्तुत्यर्थवादेन होत्रकाणां स्तोत्रियानुरूपा अर्थाद् दर्शिता भवन्ति। तत्र मैत्रावरुणस्य 'एह्यू षु ब्रवाणि ते'[a] 'आग्निरगामि भारतः'[e] इति स्तोत्रियानुरूपौ भवतः। ब्राह्मणाच्छंसिनो 'वयमु त्वामपूर्व्य'[b] 'यो न इदमिदं पुरा'[f] इत्येतौ। अच्छावाकस्य 'अधा हि'[c] 'त्वं न'[g] इत्येतौ।

a. RV. 6. 16. 16. b. RV. 8. 21. 1.
c. RV. 8. 98. 7. d. KB. IV. 4. २१.
e. RV. 6. 16. 19. f. RV. 8. 21. 9.
g. RV. 8. 98. 10.

प्रत्येकं स्तोत्रियानुरूपपाठादनन्तरपठनीयानां[1] सूक्तानां विधिं सिद्धवत्कृत्य
तत्संख्यां स्तौति—**चत्वारि-आप्त्यै** । तानि च '**चर्षणीधृतम्**'[a] 'अस्तभ्नाद् 10.७-१०
द्याम्'[b] 'इन्द्रावरुणा युवम्'[c] 'आ वां राजानौ'[d] इति मैत्रावरुणस्य । 'प्र
मंहिष्ठाय'[e] 'योऽद्रिभिद्'[f] 'अस्तेव सु प्रतरम्'[g] 'उदप्रुतः'[h] इति ब्राह्मणाच्छं-
सिनः। 'ऋतुर्जनित्री'[i] 'विष्णोर्नु कम्'[j] 'प्र वः पान्तमन्धसः'[k] 'सं वां
कर्मणा'[l] इत्यच्छावाकस्य। उक्थानां पशुरूपत्वं तद्धेतुत्वात्। 'पशुकाम
उक्थ्यं गृह्णीयात्'[m] इति श्रुतेः । चतुष्टया इत्यादि गतम् ।

शस्त्रत्रयगतानां सूक्तानामुक्तानां समुदितानां संख्यां स्तौति—**तानि-
आप्त्यै** । गतमेतत् । याज्यानां द्विदेवत्यतां स्तौति—**द्विदेवत्या-प्रति-** 10.११-१७
**ष्ठित्यै** । द्वे देवते इन्द्रावरुणादिरूपे यासां तास्तथोक्ताः। द्विपात् । पादद्वयोपेतः । 10.१८-२०
**तानि-आप्त्यै** । गतम् । द्विपदा यजमानेन सह याज्यानां चतुःसंख्यत्वम् । 10.२१-२४

अथ मैत्रावरुणादीनां याज्या विधत्ते—**ऐन्द्रावरुणी-भवति** । 'इन्द्रावरुणा 10.२५-३०
मधुमत्तमस्य'[n] इत्येषा । तद्देवत्यमुक्थं तद्देवत्यत्वाद् याज्यानामाभिरूप्य-
मित्यर्थः । इन्द्राबृहस्पतिदेवत्या 'बृहस्पते युवमिन्द्रश्च वस्वः'[o] इत्येषा । इन्द्रा-
विष्णुदेवत्या 'इन्द्राविष्णू मदपती मदानाम्'[p] इत्येषा । एवं याज्यात्रयस्य
देवताकृतमाभिरूप्यमुक्तम् । 'इन्द्रावरुणा मधुमत्तमस्य'[n] इति प्रथमाया मैत्रा-
वरुणयाज्यायाः 'इन्द्राविष्णू मदपती'[p] इत्यच्छावाकयाज्यायाश्च सवनाभि-
रूप्यमाह—**प्रथमोत्तमे-तृतीयसवनम्** । 'मादयेथाम्' इति मदिधातुमती 10.३१,३२

a. RV. 3. 51. b. RV. 8. 42.
c. RV. 7. 82. d. RV. 7. 84.
e. RV. 1. 57. f. RV. 6. 73.
g. RV. 10. 42. h. RV. 10. 68.
i. RV. 2. 13. j. RV. 1. 154.
k. RV. 1. 156. l. RV. 6. 69.
m. Quoted by Śabara on JS. 3. 6. 43. n. RV. 6. 68. 11.
o. RV. 7.97. 10. p. RV. 6. 69. 3.

1. T. omits. पाठ

10.३३-३७ प्रथमा। 'मदपती' इत्युत्तमा । **ता-प्रतिष्ठित्यै।** गतम् ॥

इति दशमः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
अध्यायो विदधत्तृतीयसवनं कौषीतकिब्राह्मण-
व्याख्याने श्रुतिपारगश्रुतिपुटायुष्ये गतः षोडशः ॥

## इति कौषीतकिब्राह्मणव्याख्याने
## द्वितीयदशके षष्ठोऽध्यायः

अथ

## सप्तदशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
पञ्चदशस्तुतिशस्त्रैरञ्चित उक्थ्यः प्रपञ्चितः पूर्वम् ।
सप्तदशेऽथाध्याये विधास्यते षोळशी च पर्यायाः ॥
उक्थ्योक्थानामूर्ध्वमेकस्य तावद्
भूयः शस्त्रस्यागमे षोळशी स्यात् ।
षोळश्याख्याकारणं यत्तदेकं
शस्त्रं वक्तुं तत्प्रशस्तिं करोति ॥

**आनुष्टुभो-अपघ्नन्ति** । षोळशीति यदस्ति तदानुष्टुभो वज्र एव । 1. १-३
कथं वज्रस्यानुष्टुभत्वमिति चेद्, अनुष्टुभो वाग्रूपत्वात् । 'वागनुष्टुप्'[a] इति दर्शनात् । तच्चोपपादितं प्राक् । वाचश्च वज्ररूपत्वात् । 'वाग्घि वज्रः'[b] इति श्रुतेः । षोळशिनश्चानुष्टुभत्वमत्र शस्यमानानां छन्दोन्तराणामनुष्टुप्त्व-संपादनात् । वज्ररूपत्वं च वीर्यहेतुत्वात् । 'षोडशिना वीर्यकामः स्तुवीत'[c] इति श्रुतेः । तद् यत् षोळशिनमित्यादि स्पष्टम् ।

तत्र तावद् 'इन्द्र जुषस्व प्रवहा याहि शूर हरी इह'[d] इति स्तोत्रियतृचे हरिशब्दश्रवणात् तदवयविनः शस्त्रस्य तद्द्वारा प्राप्तं हरिशब्दवत्त्वं स्तौति—
**स-भवति** । तत्र तावद्धरिशब्देन मुख्यः प्राणोऽभिधीयते । कथमिति चेत्, 1. ४-७
यस्मात् स मुख्यः प्राण एव हरति कार्यकरणसंघातं तत्तत्कर्मसु व्यापारयति ।

a. KB. V. 8. ११.
b. AB. 4. 1. 4.
c. Quoted by Śabara on JS. 3. 6. 43; PB. 12. 13. 13. शक्वरीषु षोडशिना स्तुवीत
d. ŚŚ. 9. 5. 2.

तदुत्क्रान्तौ सेन्द्रियस्य शरीरस्य काष्ठलोष्टतुल्ययोगक्षेमत्वदर्शनात् । चक्षुराद्यभिमानिदेवतोत्क्रान्तौ प्रतिनियतदर्शनादिव्यापारविशेषविरहितया यथा-[पूर्व]मितराशनादिव्यापारवत्तया शरीरावस्थितिदर्शनाच्च । एतच्च प्राणसंवादे[a] प्रसिद्धम् । अत एव प्रसिद्धयर्थो हिशब्दः । तस्मात् प्राणस्य हरिशब्दवाच्यत्वं युक्तम् । शस्त्रप्रतिपादितस्य इन्द्रस्य[1] प्राणरूपत्वात् तदभिधायकहरिशब्द[व]त्त्वमभिरूपमित्यर्थः ।

1. ८,९ आदित्यात्मकाभिधानेनापि स्तौति—**तद्-प्रीणाति** । योऽयं जगत् प्रकाशयन् आदित्यो दिवि दीप्यते स एवायं षोळशी, तत्प्राप्तिहेतुत्वात् । तेनादित्यमेवानेन प्रीणयति ।

1.१०,११ षोळशिशब्दनिर्वचनेनापि स्तौति—**अथो-आख्यायते** । अपि च एतद् वक्ष्यमाणम् 'इन्द्र जुषस्व'[b] इत्यादिशस्त्रसंबन्धि स्तोत्रं पवमानादिस्तोत्रादारभ्य षोळशसंख्यापूरकं भवति । अग्निष्टोमे हि द्वादश स्तोत्राण्युक्थ्ये त्रीणीति इतः प्राक् पञ्चदशस्तोत्राणि भवन्ति । अत इदं स्तोत्रं षोळशम् । तथैतच्छस्त्रमपि षोळशं भवति । अग्निष्टोमे हि द्वादश शस्त्राण्युक्थ्ये त्रीणीति पञ्चदश । अनेन तु षोळशसंख्या पूर्यते । एतत् षोळशस्तोत्रशस्त्रवत्त्वमेव षोळशिशब्दप्रवृत्तिनिमित्तम् । न तु डित्थादिवद् यदृच्छामात्रम् । तथा तैत्तिरीये—'न वै षोडशी नाम यज्ञोऽस्ति । यद् वाव षोडशं स्तोत्रं षोडशं शस्त्रं तेन षोडशी । तत्
1.१२-१४ षोडशिनः षोडशित्वम्'[c] इति । **तद्-आप्त्यै** । गतम् ।

1.१५-१७ विधान्तरेण हरिशब्दवत्तां स्तौति—**अथो-हीन्द्रः** । इन्द्रस्यानेन षोळशिना शस्यमानत्वादिन्द्र एव षोळशी यस्मात् तस्माद्धरिशब्दवत्त्वं युक्तम् । यस्मादयमिन्द्रस्तत्र तत्र स्तुतिप्रदेशेषु हरिस्तवो भवति । इन्द्ररथसंबन्धिभ्यां हरिभ्यामश्वाभ्यां सहैवायं स्तूयत इति तथोक्तः । 'हरिवाँ इन्द्रो धाना'[d] इति । 'युक्ता ते ब्रह्मणा हरी'[e] इति । 'आ याहि शूर हरी इह'[b] इति । एवं तत्र तत्र द्रष्टव्यम् ।

a. BṛhU. 6.1.
b. ŚŚ. 9. 5. 2.
c. TS. 6. 6. 11. 1.
d. KS. 29. 1.
e. RV. 1. 84. 3.

1. V. शस्त्रप्रतिपादितेन्द्रस्य

एवं बहुधा शस्त्रं प्रशस्य 'इन्द्र जुषस्व' इत्यादिना 'तन्न रात्र्यामुपे-याद्'[a] इत्यतः प्राक्तनेन वाक्यसन्दर्भेण तस्य शस्त्रस्य क्लृप्तिं कुर्वन्नादौ स्तोत्रिय-तृचं प्रतीकग्रहणेन विधत्ते—**इन्द्र-इहेति**। इति तृचं शंसेदिति शेषः। एताः 1.१८
शाखान्तरीया ऋचः सूत्रकृता तत एव प्रदर्शिताः।

'इन्द्र जुषस्व प्र वहा याहि शूर हरी इह।
पिबा सुतस्य मतिर्न मध्वश्चकानश्चारुर्मदाय॥
इन्द्र जठरं नव्यं न पृणस्व मध्वोर्दिवो न।
अस्य सुतस्य स्वर्णोप त्वा मदाः सुवाचो अस्थुः॥
इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न।
बिभेद बलं भृगुर्न ससाहे शत्रून् मदे सोमस्य॥'[b] इति।

एतासां चतुस्त्रिंशदक्षराणामादितः पञ्चविंशत्यक्षराण्युत्तराणि च नवा-क्षराणि विभज्य स्तौति—**ताः-उपसृजते**। उपसृष्टाः संयुक्ता भवन्तीति 1.१९-२३
शेषः। तत्र योऽयं पञ्चविंशतिसंख्योपेतोऽक्षरसमुदायः स आत्मेति ज्ञेयः आत्मनः पञ्चविंशत्वात्। 'पञ्चविंशोऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पञ्चविंशः'[c] इति श्रुत्यन्तरात्। आत्मा मध्यदेहः। य उपसर्गः उपसृज्यत इत्युपसर्गोऽक्षरराशिः स प्रजापशुरूपः भोक्तुरात्मनः स्वभूतो भोग्य-वर्गः। तेन पञ्चविंशत्यक्षराणां नवभिरक्षरैः संसृज्य पठनेन प्रजादिभोग्यद्रव्य-संपन्नं भोक्तारं करोति। प्रजा पुत्रपौत्रादिरूपा। प्रैषयोग्याः प्रेष्याः। अत्तुं योग्यं शाल्यादिजनितमन्नमन्नाद्यम्। इतिः प्रकारार्थः।

अथ समुदितानामक्षराणां संख्यां स्तौति—**ताः-आप्नोति**। यत् किंचिद् 1.२४-२६
गायत्र्यादिच्छन्दसां मध्ये चतुस्त्रिंशदक्षरं छन्दोऽस्ति, तत् सर्वं स्वराट् नाम छन्दो वेदितव्यम्। वैशब्दः छन्दःशास्त्रप्रसिद्ध्यर्थः। तथा चोक्तं शौनकेन—

'एकन्यूनाक्षरा सैव निचृदेकाधिका भुरिक्।
विराजस्तूत्तरस्याहुर्द्वाभ्यां या विषये स्थिताः।
स्वराज एवं पूर्वस्य याः काश्चैवंगता ऋचः॥'[d] इति।

a. KB. XVII. 4. ४.
b. ŚŚ. 9. 5. 2. ( Pr. edn हरिह )
c. AA. 1. 1. 2.
d. RP. 17. 16-17.

कात्यायनेनापि—'ऊनाधिकेनैकेन निचृद्भुरिजौ । द्वाभ्यां विराट्स्वराजौ'[a] इति । इह च द्वात्रिंशदक्षरानुष्टुब् द्वाभ्यामक्षराभ्यामधिकाभ्यां स्वराडनुष्टुब् भवति । आद्याया ऋचस्त्रिरावृत्तिविधिमभिप्रेत्य तत्सहितानाम-
1.२७-२६ मनुष्टुभां संख्यामाह—**ताः–द्वे** । ता वस्तुतस्तिस्रः सत्योऽनुष्टुभः संशंसने सति पञ्चसंख्या अनुष्टुभो भवन्ति । आद्यायास्त्रिवारं पठ्यमानत्वात् । तासां चानुष्टुभामूर्ध्वं दशाक्षराण्यतिरिक्तानि भवन्ति । चतुस्त्रिंशदक्षरा ह्येताः प्रत्येकमृचः । द्वात्रिंशदक्षरा चानुष्टुप् । तेनैकस्यां द्वात्रिंशद्भिरक्षरैरनुष्टुब्निष्पत्तौ द्वे अक्षरे शिष्टे भवतः । एवमितरासु चतसृष्वपि । इत्थं पञ्चस्वपि द्वयोर्द्वयोरक्षरयोरतिरेके सति तानि मिलित्वा दशसंख्यानि भवन्ति । तेन स्तोत्रियतृचे दशाक्षराधिकाः पञ्चानुष्टुभः सिद्धाः ॥

इति प्रथमः खण्डः

स्तोत्रियतृचपठनानन्तरं 'त्वावत'[b] इत्येकामृचं पठेदित्याह—**त्वावतः–**
२.१,२ **संपदे** । एतेषामतिरिक्तानामुक्तानां दशाक्षराणां संपदे संपूर्णत्वाय 'त्वावतः'[b] इत्येतां पठेत् । दश खल्वक्षराणि पूर्वेभ्यः पञ्चभ्योऽनुष्टुब्भ्यः उद्रिक्तानि स्थितानि । तानि द्वाविंशत्यक्षरया 'त्वावतः'[b] इत्यनया संपन्नानि क्रियन्ते । दशाक्षराणां द्वाविंशत्यक्षराणां च मेलने सति द्वात्रिंशदक्षराया एकस्या अनुष्टुभो निष्पत्तेः । तेन दशाक्षराणामसंपन्नतानया[1] गायत्र्या निराकृता भवति ।

२.३,४ स्तोत्रियतृचस्यानुष्टुप्संपत्तिहेतुरपि गायत्रीशंसनमित्याह—**अथो–संपदे** । एतया 'त्वावतः'[b] इत्यनया गायत्र्या सह स्तोत्रियतृचः षट्संख्याका अनुष्टुभो भवन्ति । तत्प्रकारश्च दर्शित एव । स्तोत्रियतृचानन्तरप्राप्तमनुरूपतृचमिह
२.५ प्रतिषेद्धुकामः पूर्वपक्षमाह—**एतत्–कुर्वन्ति** । एके शाखिन इह षोळशिनि शस्त्रे

a. SA. 3. 4-5.
b. RV. 8. 46. 1.

1. T. असंपन्नता न for असंपन्नतानया

एतेन शाखान्तरीयेण 'इन्द्र जुषस्व'[a] इत्यादिना स्तोत्रियतृचेन प्रतिरूपं सदृशं शाखान्तरीयमेव 'श्रुधीहवं न इन्द्र'[b] इत्यादिकमनुरूपाख्यं तृचं स्तोत्रियादनन्तरं कुर्वन्तीति तथैवाङ्गीक्रियतामिति। नेति स्वमतमाह—**तदु-नाद्रियेत**। तत् तत्रा- 2.६-१०
नुरूपकरणाकरणसन्देहविषये विद्वांस आहुः। किमिति चेत्, योऽयं षोळशी सोऽयं जगत्प्रकाशक आदित्य एव। तच्चोक्तं प्रागपि। एतस्यादित्यस्य सर्व-भूतान्तरात्मनो महत आत्मनो देवस्य सदृशोऽन्यो न कश्चिदस्ति। सत्त्वे सर्व-भूतान्तरात्मत्वाद्यनुपपत्तिप्रसक्तेः। तच्च 'सूर्य आत्मा जगतस्तस्थुषश्च'[c] इत्यादिमन्त्रेषु प्रसिद्धम्।

एवं स्थिते यः कश्चिदभिज्ञाग्रणीः सदसि स्थितः षोळशिशस्त्रे शस्त्रान्तर इव स्तोत्रियतृचपठनानन्तरमनुरूपतृचं[1] पठन्तं होतारं पश्यंस्तमधिकृत्य 'हे सदस्याः अयं होतानुरूपरहिते शस्त्रेऽनुरूपतृचं पठति। तमेनमभितो द्वेषविषयोऽस्त एव द्वेष्टा भ्रातृव्यः सपत्नः पराभविष्यति। अद्वितीयस्य सद्वितीयत्वसंपादना-पराधाच्छस्त्राधीशितुः सूर्यस्यापध्यानेन शत्रुभिः पराभूतः[2] अशक्यानुष्ठान-प्रतिक्रियश्च दुःखी नितरां भविष्यति' इति ईदृशं वचनं यदि ब्रूयात् तर्हि तत् तथा यथार्थमेव स्यात्। यस्मादनुरूपकरणे कथितदोषापत्तिः, तस्मादत्र षोळशि-शस्त्रे अनुरूपं न कुर्यात्।

स्तोत्रियतृचं विधाय तदनन्तरम् 'आ त्वा वहन्तु हरयः'[d] इत्यादीनां गायत्र्यादिच्छन्दस्कानामृचां विहरणेन पठनं विधत्ते—**अथ-निर्वान्ति**। विह- २.११-१४
रणं व्यत्यासः आम्नातक्रमातिक्रमेणान्योन्यं पादानां व्यतिषञ्जनम्। विहरणं स्तौति—प्राणा वै इति। गतमेतत्। विधान्तरेण विहरणं स्तौति—**अथो-अभि-संपादयति**। षोळशिन आनुष्टुभत्वादस्मिञ्छस्त्रे शंसनीयानि सर्वाणि गायत्र्या- २.१५,१६
दीनि छन्दांस्यनुष्टुप्संपन्नानि कर्तव्यानि च। अनुष्टुप्संपत्तिर्वक्ष्यमाणप्रकारेण विहरणं विना न सिध्यति। अतोऽपि विहरणं कर्तव्यम्।

तत्र तावद् गायत्र्याः पङ्क्तेश्च विहरणं विधत्ते—**गायत्रीश्च-दधाति**। 2.१७-२०

a. ŚS. 9. 5. 2.
b. AŚ. 6. 3. 1.
c. RV. 1. 115. 1.
d. RV. 1. 16. 1.

1. T. पाठानन्तरम् for पठनानन्तरम्
2. T. प्रतिभूतः

गायत्रीछन्दस्काः 'आ त्वा वहन्तु हरयः'[a] इत्याद्यास्तिस्रः। पङ्क्तिछन्दस्का 'स्वादोरित्था विषूवतः'[b] इत्याद्यास्तिस्रः। ता व्यत्यस्य पठेत्। सूत्र्यते हि— 'आ त्वा वहन्तु हरयः स्वादोरित्था विषूवत इति गायत्रं तृचं पाङ्क्तं च'[c] इति। विहरणप्रकारश्च सूत्रकृता दर्शितः—'प्रथमेन गायत्रेण पादेन प्रथमं पाङ्क्तं पादं संधायावस्यति। द्वितीयेन गायत्रेण पादेन द्वितीयं संधाय प्रणौति। तृतीयेन गायत्रेण पादेन तृतीयं संधायावस्यति। द्वौ पङ्क्तेः शिष्टौ ताभ्यां प्रणुयाद्'[d] इति। तद् यथा 'आ त्वा वहन्तु हरयः स्वादोरित्था विषूवतः। वृषणं सोमपीतये मध्वः पिबन्ति गौर्यो। इन्द्र त्वा सूर चक्षसो या इन्द्रेण सयावरीः। वृष्णा मदन्ति शोभसे वस्वीरनुस्वराज्यो' इति। एवमुत्तरत्रापि द्रष्टव्यम्। येयं पङ्क्तिर्नाम छन्दोऽस्ति सा यजमानच्छन्दसं भवति। यजमानसंबन्धि छन्दो यजमानच्छन्दसम्। पङ्क्तेः पञ्चसंख्यान्वयवत् पुरुषस्य पञ्चसंख्यान्वयित्वेन पाङ्क्तत्वश्रवणात्— 'पाङ्क्तोऽयं पुरुषः पञ्चधा विहितो लोमानि त्वङ्मांसमस्थि मज्जा'[e] इति। तेजो दीप्तिमात्रम्। वृत्तस्वाध्यायाध्ययनजनितो दीप्तिविशेषो ब्रह्मवर्चसम्। तदुभयं गायत्री; तद्धेतुत्वात्। तेन गायत्रीणां पङ्क्तीनां च विहरणेन यजमाने तेजो ब्रह्मवर्चसं च स्थापयति।

'इन्द्राय साम गायत'[f] 'आ मन्द्रैरिन्द्र हरिभिः'[g] इत्युष्णिक्छन्दस्कस्य
२.२१-२४ बृहतीछन्दस्कस्य च तृचस्य विहरणं विधत्ते—**उष्णिहश्च-दधाति**। सूत्र्यते च—'[1]-इन्द्राय साम गायता मन्द्रैरिन्द्र हरिभिरित्यौष्णिहं तृचं बार्हतं च विहरति। प्रथमेनौष्णिहेन पादेन प्रथमं बार्हतं पादं संधायावस्यति। द्वितीयेनौष्णिहेन द्वितीयं संधाय प्रणौति। तृतीयस्यौष्णिहस्याष्टावक्षराणि अष्टौ बार्हतस्य संधायावस्यति। तस्य-[1] चतुरक्षरे शिष्टे ते समस्योत्तमेन बार्हतस्य प्रणौति'[h] इति। तद् यथा—'इन्द्राय साम गायतामन्द्रैरिन्द्र हरिभिः। विप्राय बृहते बृहद् याहि मयूररोम भो धर्मकृते विपश्चिते

a. RV. 1. 16. 1.
b. RV. 1. 84. 10.
c. ŚŚ 9. 5. 4.
d. ŚŚ. 9. 5. 5–8. ( variations )
e. AB. 2. 14. 7.
f. RV. 8. 98. 1.
g. RV. 3. 45. 1.
h. ŚŚ. 9. 5. 9–13. ( variations )

1–1. MSS. omit with gap.

मा त्वा के चिन्नि यमन्वि पनस्यवे न पशिनोऽति धन्वेव ताँ इहो' इति । एव-मुत्तरत्रापि ।

यदेतदुष्णिगाख्यं छन्दोऽस्ति तद् यजमानसंबन्धि छन्दो भवति । 'औष्णिहो वै पुरुषः'[a] इति श्रुत्यन्तरात् । आजिधावनेन पशूनां जितत्वाद् बार्हतत्वम् । तच्च—'छन्दांसि पशुष्वाजिमीयुः । तान् बृहत्युदजयत् । तस्माद् बार्हताः पशव उच्यन्ते'[b] इति श्रुत्यन्तरे श्रुतम् । तेनोष्णिग्बृहत्योर्विहरणेन बार्हतान् पशून् यजमानस्वामिकान् करोत्येव । 'आ धूर्ष्वस्मै'[c] इति द्विपदायाः 'उरुं नो लोकम्'[d] इति त्रिष्टुभश्च[1] विहरणं विधत्ते—**द्विपदाम्-दधाति** । द्विपदाया 2.२५-२८
विशेषणं विंशत्यक्षरामिति । सूत्रितं हि—'आ धूर्षूरुं नो लोकमिति द्विपदां च त्रिष्टुभं च । प्रथमेन द्वैपदेन पञ्चाक्षरेण पादेन प्रथमं त्रैष्टुभं पादं संधायावस्यति । द्वितीयेन पञ्चाक्षरेण द्वितीयं सन्धाय प्रणौति । तृतीयेन पञ्चाक्षरेण तृतीयं सन्धायावस्यति । चतुर्थेन पञ्चाक्षरेण चतुर्थं संधाय प्रणौति'[e] इति । तद् यथा 'आ धूर्ष्वस्मा उरुं नो लोकमनु नेषि विद्वान् । दधाताश्वान्त्स्वर्ज्योतिरभयं स्वस्तो । इन्द्रो न वज्र्यृष्वा त इन्द्र स्थविरस्य बाहू । हिरण्यबाहुरुप स्थेयाम शरणा बृहन्तो' इति । द्विपदाया यजमानसंबन्धित्वं पादद्वयोपेतत्वसाम्यात् । गतमन्यत् ।

द्वैपदतृचस्य जागततृचस्य च विहरणं विधत्ते—**द्विपदाश्च-दधाति** । 2.२९-३२
द्विपदा सूत्रकृता शाखान्तरीया दर्शिता—'एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे । विस्रुतयो यथा पथ इन्द्र त्वद्यन्ति रातयः । त्वामिच्छवसस्पते यन्ति गिरो नः संयतः'[f] इति । 'प्र ते महे'[g] इत्याद्यास्तिस्रो जगत्यः । सूत्र्यते खलु द्विपदाः पठित्वा—'प्र ते मह इति द्वैपदं तृचं जागतं च विहरति प्रथमेन द्वैपदेन चतुरक्षरेण प्रथमं जागतं पादं संधायावस्यति । द्वितीयेन

a. AB. 4. 3. 2.
b. TS. 5. 3. 2. 3-4.
c. RV. 7. 34. 4.
d. RV. 6. 47. 8.
e. ŚŚ. 9. 6. 1-5.
f. ŚŚ. 9. 6. 6.
g. RV. 10. 96. 1.

1. T. बृहत्याश्च

चतुरक्षरेण द्वितीयं संधाय प्रणौति । तृतीयेन चतुरक्षरेण तृतीयं संधायावस्यति । चतुर्थेन चतुरक्षरेण चतुर्थं संधाय प्रणौति'[a] इति । तद् यथा—

'एष ब्रह्मा प्र ते महे विदथे शंसिषं हरी ।
य ऋत्वियः प्र ते वन्वे वनुषो हर्यतं मदो ।।
इन्द्रो नाम घृतं नयो हरिभिश्चारु सेचते ।
श्रुतो गृण आ त्वा विशन्तु हरिवर्पसं गिरो ।।' इति ।

एवमुत्तरास्वपि द्रष्टव्यम् । यजमानच्छन्दसमेवेत्यादि गतम् ।।

इति द्वितीयः खण्डः

अथ 'इन्द्रो दधीचो अस्थभिः'[b] इत्याद्यास्तिस्र ऋचो विधत्ते—**गायत्रीः-**
3.१-३ **धत्ते** । गायत्र्याः प्राणरक्षकत्वात् प्राणरूपत्वम् । तथा च वाजसनेयिनः समामनन्ति—'प्राणा वै गयाः । तत्प्राणांस्तत्रे । तद् यद् गयांस्तत्रे तस्माद् गायत्री नाम'[c] इति । गायत्र्याः पठनेनात्मनि प्राणं स्थापयत्येव । 'प्रो ष्वस्मै पुरो
३.४-६ रथम्'[d] इत्यस्याः शंसनं विधत्ते—**सप्तपदां-आप्त्यै** । सप्तसंख्यानि पदानि पादा यस्याः सा तथोक्ता । गायत्र्यादीनि सप्त छन्दांसि प्रसिद्धानि । तेन सप्तपदायाः शंसनं कृत्स्नच्छन्दःप्राप्त्यै संपद्यते । सूत्र्यते च—'इन्द्रो दधीच इति तिसृणां गायत्रीणां द्वाभ्यामवसाय पादाभ्यां द्वाभ्यां प्रणौति । द्वाभ्यामवसाय द्वाभ्याम् । उत्तमेन पादेन प्रोष्वस्मै पुरोरथमित्येतस्याः पादं संधायावस्यति । द्वाभ्यां प्रणौति । द्वाभ्यामवसाय द्वाभ्याम्'[e] इति ।

3.७,८ गायत्रीणामनुष्टुप्संपत्तिहेतुत्वेनापि सप्तपदां स्तौति—**अथो-संपदे** । अपि चैतया सप्तपदयर्चा सहितास्त्रिसंख्याका गायत्र्यश्चतुःसंख्याका अनुष्टुभो भवन्ति । यस्मादेवमनयानुष्टुप्संपत्तिः तस्माद्धेतोरनुष्टुप्संपत्त्यर्थमप्येतां सप्तपदां शंसेत् । तथा हि—

a. ŚS. 9. 6. 6–10.
b. RV. 1. 84. 13.
c. BṛhU. 5.14.4.
d. RV. 10. 133. 1.
e. ŚS. 9. 6. 11–13.

तिसृणां गायत्रीणां द्वासप्ततिरक्षराणि मिलितानाम् ।
सप्तपदायास्त्वस्याः षट्पञ्चाशत्तदक्षराणि शतम् ॥
अष्टाविंशत्यधिकं संपद्यन्ते तथा च सति ।
द्वात्रिंशदक्षरमितास्तैरत्रानुष्टुभश्चतस्रः स्युः ॥

इदानीं 'प्रप्र वस्त्रिष्टुभम्'[a] इत्याद्यास्तिस्रः 'आ यत् पतन्ति'[b] इत्येकाम्
'यो व्यतीन्'[c] इति तिस्रश्चर्चो विधत्ते—**अथ–समर्धयति**। नित्या असंपादिताः। 3.९-११
परिधानीयासहितानामनुष्टुभां नित्यानां संख्यां स्तौति—**ता–अश्नुते**। व्याख्या- 3.१२-१४
तमेतत् ।

परिधानीयायास्त्रिरावृत्तिविधिमभिप्रेत्य तत्सहितां संख्यां स्तौति—
**त्रिः–उपाप्त्यै**। त्रिवारं पठितया परिधानीयया सहितास्ता ऋचो दशसंख्याः 3.१५-१८
संपन्ना भवन्ति । गतमन्यत् ।

अथ परिधानीयामृचं विधत्ते—**उद्यद्–दधाति**। यत्र यस्मिन् स्थाने 3.१९-२१
असावादित्यस्तपति तदेव ब्रध्नस्य विष्टपमित्युच्यते। ततश्च तत् तस्मिन्नेव
स्थाने यजमानं स्थापयति ।

अथास्मिन् शस्त्रे त्रिषु स्थलेष्वाहावं विधत्ते—**त्रिः–हन्ति**। षोडशि- 3.२२-२४
शस्त्रसंबन्धितया त्रिवारमाहावो वक्तव्यः। प्रतिपदः पूर्वमाहावस्तावद् वक्तव्यः।
अथ निवित्पदपठनात् पूर्वम्। अथ परिधानीयातः पुरस्तात् । एवं त्रिषु
स्थानेष्वाहावः पठनीयः। त्रिसंख्या चैषा युक्ता। षोळशिनो वज्ररूपत्वेन त्रिवृ-
त्वात् । गतमन्यत् ।

अथोक्थवीर्याख्यान् शस्त्रानन्तरपठनीयान् मन्त्रान् प्रशंसति—**त–वीर्याणि**। 3.२५,२६
येऽमी उक्थवीर्याख्या मन्त्राः सन्ति त एत उक्थानां शस्त्राणां श्लोका यशांसि।
यथा गुणातिशयजनितेन यशसा दिक्षु प्रसृतेन कश्चित् पुरुष उत्कर्षं प्राप्नोति,
एवमनेन शस्त्रमुत्कृष्टं भवति। तथैते शस्त्राणां घोषा भवन्ति। यथा लोके
राजादिश्चतुरङ्गबलसमुदितेन बहुलेन ध्वनिविशेषेण समुपजातप्रकर्षो भवति,
तथैवैतैः शस्त्रं प्रकृष्टं भवति। तथा एते मन्त्रा उक्थानां वीर्याणि भवन्ति।

a. RV. 8. 69. 1.
b. RV. 8. 69. 10.
c. RV. 8. 69. 13.

एतद्विरहे शस्त्रं निर्वीर्यं सत् न फलाय पर्याप्नुयात् । इतिशब्दः प्रदर्शनार्थः । योऽयं पुरुषस्योत्कर्षहेतुर्गुणोऽस्ति स सर्वोऽपि शस्त्रपुरुषस्यैत उक्थवीर्याख्या मन्त्रा भवन्ति । यः पुमानेवमुक्तश्लोकादिरूपतयोक्थवीर्याख्यान् मन्त्रान् जानाति स यशआद्युक्तगुणशाली भवति । विद्याजनिता प्रसिद्धिर्यशः, तदेव श्लोकः । धनदानादिक्रियाजन्या कीर्तिः ।

अथैतच्छस्त्रपठनीयानां कृत्रिमाणामकृत्रिमाणां चानुष्टुभां मिलितानां संख्यां
3.२७-३० स्तौति—**ताः-प्रतिष्ठापयति** । कथमिति तदुच्यते-संशस्तेन 'त्वावतः'[a] **इति** गायत्रीसहितेन 'इन्द्र जुषस्व'[b] इति स्तोत्रियतृचेन षडनुष्टुभस्तावत् संपद्यन्ते । [1-]गायत्रपाङ्क्ततृचयोः क्रमेण द्वासप्ततिर्विंशत्यधिकशतं चाक्षराणि । ताभ्यां[-1] प्रागुक्तप्रकारेण विहृताभ्यां षडनुष्टुभः । पूर्वैः सह द्वादश । औष्णिहबार्हततृचाभ्यामपि विहृताभ्यां षडनुष्टुभः । पूर्वैः सहाष्टादश । विंशत्यक्षरद्विपदात्रिष्टुब्भ्यां विहृताभ्यां द्वे अनुष्टुभाविति पूर्वैः सह विंशतिः । द्वैपदजागततृचाभ्यां च विहृताभ्यां षळनुष्टुभ इति पूर्वैः सह षड्विंशतिः । गायत्रतृचसप्तपदाभ्यां चतस्र उक्ता इति पूर्वैः संभूय त्रिंशत् । 'प्रप्र वस्त्रिष्टुभम्'[c] इत्याद्या दश च स्वयमेव दर्शिता इति कृत्रिमाकृत्रिमाः संभूय चत्वारिंशदनुष्टुभोऽस्मिन् शस्त्रे शंसनीयाः सिद्धाः । तथा च सूत्रम्—'एतस्मिन् स्तोत्रिये चत्वारिंशत् संपदानुष्टुभः'[d] इति । चत्वारिंशदक्षरेत्यादि गतम् ।

इदानीम् 'अपाः पूर्वेषाम्'[d] इत्येतां याज्यां विधित्सुः शाखान्तरिणां मत-
3.३१ माह—**विहृतया-आहुः** । 'एवाह्येव'[e] इत्यादिपदैर्व्यतिषक्ताम् 'अपाः पूर्वेषाम्'[d] इति त्रिष्टुप्छन्दस्कामृचं षोळशिग्रहहोमे याज्यां कुर्यादिति केचिच्छाखिन
3.३२,३३ आहुः । तामेव याज्यां प्रदर्शयति—**एवा-इति** ॥

इति तृतीयः खण्डः

a. RV. 8. 46. 1.
b. ŚS. 9. 5. 2.
c. RV. 8. 69. 1.
d. ŚS. 9. 6. 18.
e. TA. 1. 20. 1.

1-1. T. गायत्रपाङ्क्ततृचस्य द्वासप्रतिरक्षराणि याभ्यां

अथ स्वपक्षमाह—**अविहृतया-स्थितम्**। पूर्वोक्तप्रकारविहरणविरहितया 4.१
आम्नायसिद्धरूपयैव 'अपाः पूर्वेषाम्'[a] इत्यनया त्रिष्टुभा यजेदित्येव निश्चि-
तोऽर्थः। अत्र हेतुः—**संसिद्धानि-प्रयच्छति**। याज्या इति यदस्ति तानि[1] संसिद्धानि 4.२,३
सम्यङ्निष्पन्नरूपाणि देवानां हविर्दानयोग्यानि[2] पात्राण्येव भवन्ति। यथा लोके अतिथिभोजनादिकर्मोचितानि गृहमेधिभिः प्रयुक्तैः परिवेष्टृभिः पुरुषैः प्रागेव निष्पन्नरूपाणि पात्राण्युपादीयन्ते, एवं यजनीयदेवतासंप्रदानकहविर्दानोचित-पात्रस्थानीया एता याज्या भवन्ति। अतो हेतोर्होता याज्यारूपेण पात्रेण सम्यङ्निष्पन्नरूपेण, न तु विहरणनिष्पाद्यरूपेण[3]—तदानीं निष्पादनप्रयत्न-जनितविलम्बकरणस्यानौचित्यात्—देवेभ्यो हविषां दानं करोति। अतो विह-रणं विनाम्नायप्रसिद्धरूपामेव याज्यां कुर्यादिति सिद्धान्तः।

एवं तावद् 'आनुष्टुभो वा एष वज्रः'[b] इत्यादिना 'देवेभ्यो हविः प्रय-च्छति'[c] इत्यन्तेन षोळशिनं विधाय, अधुनावसरायातमतिरात्रं विधित्सुरति-
रात्रे षोळशिशस्त्रशंसनं सिद्धान्तयिष्यन् पूर्वपक्षमाह—**तन्न-उपेयात्**। तं षोळ- 4.४
शिनं रात्र्यामतिरात्रे क्रतौ नोपेयात्, न कुर्यादिति। एतस्मिन् प्रतिज्ञातेऽर्थे हेतु-
माह—**इन्द्रो-अस्ति**। षोळशिन इन्द्ररूपत्वं प्रागुक्तम्। न चेन्द्रात् परमेश्वरात् 4.५,६
सर्वजगन्नियन्तुरन्यद् उत्तरमुत्कृष्टतरं वस्तु विद्यते। विद्यमानत्वे परमैश्वर्य-वाचीन्द्रशब्दविरोधप्रसंगात्। न चापेक्षिकमिन्द्रत्वमिति मन्तव्यम्। मुख्यस्यान्य-स्याभावात्। भावे चावयोरविवादात्। मन्त्रवर्णश्चामुमेवार्थमनुजानाति 'विश्वस्मादिन्द्र उत्तरः'[d] इति। अतः षोळशिन इन्द्ररूपत्वात् तस्य सर्वोत्तरत्वेन स्वस्मादुत्तरसद्भावासहिष्णुत्वात्[4] षोळशिन ऊर्ध्वं शस्त्रान्तरशंसनं न युक्तम्। अतिरात्रस्य शस्त्रस्य चाश्विनशस्त्रान्तत्वात् षोळशिन ऊर्ध्वं शस्त्रान्तराणां शंसनीयत्वान्न तत्र षोळशिशस्त्रं पठनीयम्।

**बहुरात्र्याम्-आश्विनम्**। रात्र्यामतिरात्रे क्रतौ। षोळशिन ऊर्ध्वं बहु शस्त्रं 4.७,८

a. RV. 10. 96. 13.
b. KB. XVII. 1. १.
c. KB. XVII. 4. ३.
d. RV. 10. 46. 1-23.

1. T. एतानि
2. T. adds द्रव्याणि
3. T. विहरणेन for विहरण
4. T. असहिष्णूनां for असहिष्णुत्वात्

शस्यते । पर्यायाख्यानि तावद् द्वादश शस्त्राणि । आश्विनाख्यं च त्रयोदशम् । त्वच्छब्दोऽयं समुच्चयार्थः । पर्याया आश्विनं चेत्यर्थः । तथा च भगवान् यास्कः—'अथापि समुच्चयार्थे भवति । पर्याया इव त्वदाश्विनम् । आश्विनं च पर्यायाश्च'[a] इति । तस्मादतिरात्रे षोळशी नोपेयः । कुत्र तर्ह्यसावुपेय
4.९-११ इत्यत्राह—**तत-संतिष्ठते** । यतः षोळशिनं ऊर्ध्वं शस्त्रान्तरं न पठनीयम्, तस्मादेव हेतोरेनं षोळशिनं पृष्ठषळहःसंबन्धिनि चतुर्थेऽहन्येव कुर्यात् । तत-स्तस्मादुपरि शस्त्रान्तरस्याशंसनात् । किंच तच्चतुर्थमहः षोळशिन आयतनं स्थानं भवति । अग्निष्टोमाद्यपेक्षया षोळशिनश्चतुर्थत्वात् । अतोऽपि चतुर्थेऽहन्येव षोळशी कर्तव्यः । यस्मात् तत्र षोळशिशस्त्रं शस्यते, तस्माच्चतुर्थमहः षोळशिशस्त्रान्तमेव सत्[1] संस्थां समाप्तिं गच्छति । तस्मादतिरात्रे षोळशी नोपेय इति प्राप्तम् ।

4.१२-१५ एवं प्राप्ते सिद्धान्तमाह—**तदु-कृत्स्नतायै** । अतिरात्रे क्रतौ षोळशि-शस्त्रं शंसेदेव । कुत इति चेत्, षोळशीति यदस्ति तदहोरात्रे कृत्स्ने भवतः । अह्नो राज्याश्चान्तराले षोळशिनः कालो विहितः । 'समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति'[b] इति । तत्राह्नि विहितै रात्रिविहितैर्वा शस्त्रैरन्तरा-लकालो न परिगृहीतो भवति । अनेनैव तु परिगृह्यते । अतः षोळशिनं विना कार्त्स्न्येनाह्नो राज्याश्चापरिग्रहात् तत् षोळशिशस्त्रशंसनमहोरात्रयोः कृत्स्न-त्वाय संपद्यते । तस्मादतिरात्रे षोळशिनमुपेयादिति स्थितम् ।

4.१६-१९ इदानीमतिरात्राख्यं क्रतुं प्रशंसति—**अथ-आप्त्यै** । अहोरात्रे इति यदस्ति एतावान् एतत्परिमाण एव संवत्सरो भवति । संवत्सराख्यस्य कालस्य षष्ट्युत्तरशतत्रयसंख्याहोरात्रसंघातरूपत्वात् । तत्राहोरात्रकालव्यापिनमति-रात्रमनुतिष्ठतीति यदस्ति, तदहोरात्रप्राप्तिद्वारा तदवयविनः संवत्सरस्य
4.२०-२३ प्राप्त्यै संपद्यते । प्रकारान्तरेण स्तौति—**अथो-आप्त्यै** । इदं दृश्यमानं सर्वं वस्तुजातं द्विप्रकारं भवति । कथं ? स्नेहः स्निग्धमनुल्बणरूपं तेज उल्बणरूपं च । तदेतद् द्वयमहोरात्राभ्यां प्राप्तं भवति । तत्राह्नोल्बणरूपप्राप्तिः । तस्य

a. N. 1. 9. 2. b. TS. 6. 6. 11. 6.

1. A. V. omit

सौर्यतेजोव्याप्तत्वेन तीव्रगुणत्वात् । रात्र्यानुल्बणरूपप्राप्तिः । तस्यास्तमोव्याप्तत्वेन स्निग्धगुणत्वात् । तत्रातिरात्रक्रतुनाहोरात्रोपाप्तौ तद्द्वारा तयोर्द्वयोरपि रूपयोरुपाप्तेरखिलोपाप्तव्योपाप्तिहेतुत्वाद् अयमतिरात्राख्यः क्रतुः प्रशस्त इति सिद्धं भवति ॥

इति चतुर्थः खण्डः

एवमतिरात्रं प्रशस्य होतुर्होत्रिकाणां च त्रिषु पर्यायेषु पठनीयान् स्तोत्रियानुरूपान् विधत्ते—**गायत्रान्-तरन्ति** । तत्र तावद्धोतुः प्रथमं शस्त्रम् । अन- 5. १-४
न्तरं मैत्रावरुणस्य । तदनन्तरं ब्राह्मणाच्छंसिनः । तदनन्तरं चाच्छावाकस्य । एवं क्रमेण चतुर्णां चत्वारि शस्त्राणि । अयमेकः पर्यायः । एवं द्वितीयस्तृतीयश्च भवतः । एवं चतुःशस्त्रेषु त्रिषु पर्यायेषु संभूय द्वादश शस्त्राणि भवन्ति । एतेषु द्वादशसु शस्त्रेषु गायत्रीछन्दस्काः स्तोत्रियानुरूपाः कर्तव्याः होतृहोत्रकैः । तत्र यद्यपि होतुः प्रथमपर्यायगते स्तोत्रियतृचे 'पान्तमा वो अन्धसः'[a] इत्येषानुष्टुप्, तृतीयेऽच्छावाकस्य 'इन्द्रः सुतेषु'[b] इत्यादिकोष्णिक्, तथापि तद्व्यतिरिक्तानां सर्वासामपि गायत्रीच्छन्दस्कत्वात् गायत्रानिति व्यपदेशो न विरुध्यते । भूयसा हि व्यपदेशो लोके दृष्टः ।

तत्र तावत् प्रथमे पर्याये होतुः 'पान्तमा वो अन्धसः'[a] इति तृचः स्तोत्रियः 'अपादु शिप्र्यन्धसः'[c] इत्यनुरूपः । मैत्रावरुणस्य 'प्र व इन्द्राय मादनम्'[d] इति स्तोत्रियः । 'प्र कृतानि'[e] इत्ययमनुरूपः । ब्राह्मणाच्छंसिनो 'वयमु त्वा तदिदर्था'[f] इति स्तोत्रियः । 'वयमु त्वा दिवा सुते'[g] इत्यनुरूपः । अच्छावाकस्य 'इन्द्राय मद्वने'[h] इति स्तोत्रियः । 'इन्द्रमिद् गाथिनः'[i] इत्यनुरूप इति । द्वितीये 'अयं त इन्द्र'[j] इति स्तोत्रियो होतुः । 'अयं ते मानुषे'[k] इत्यनुरूपः । मैत्रा-

a. RV. 8. 92. 1.
b. RV. 8. 13. 1.
c. RV. 8. 92. 4.
d. RV. 7. 31. 1.
e. RV. 8. 32. 1.
f. RV. 8. 2. 16.
g. RV. 8. 64. 6.
h. RV. 8. 92. 19.
i. RV. 1. 7. 1.
j. RV. 8. 17. 11.
k. RV. 8. 64. 10.

वरुणस्य 'आ तू न इन्द्र क्षुमन्तम्'[a] इति स्तोत्रियः। 'आ तू न इन्द्र वृत्रहन्'[b] इत्यनुरूपः। ब्राह्मणाच्छंसिनः 'अभि त्वा वृषभ'[c] इति स्तोत्रियः। 'अभि प्र गोपतिम्'[d] इत्यनुरूपः। अच्छावाकस्य 'इदं वसो'[e] इति स्तोत्रियः। 'इन्द्रेहि'[f] इत्यनुरूप इति। तृतीये होतुः 'इदं ह्यन्वोजसा'[g] इति स्तोत्रियः। 'महाँ इन्द्रो य'[h] इत्यनुरूपः। मैत्रावरुणस्य 'आ त्वेता नि'[i] इति स्तोत्रियः। 'आ त्वा शुक्रा'[j] इत्यनुरूपः। ब्राह्मणाच्छंसिनो 'योगेयोगे'[k] इति स्तोत्रियः। 'युञ्जन्ति ब्रध्नम्'[l] इत्यनुरूपः। अच्छावाकस्य 'इन्द्रः सुतेषु'[m] इति स्तोत्रियः। 'इन्द्रं वर्धन्तु'[n] इत्यनुरूप इति। गायत्र्या ज्योतीरूपत्वं तद्धेतुत्वात्। रात्रिस्तमोरूपा। तद्रूपत्वस्य[1] प्रत्यक्षसिद्धत्वात्। अत एव पाप्मरूपा। तमसः पाप्महेतुत्वात्। 'पाप्मा वै तमः'[o] इति श्रुतेः। तेनादौ गायत्रस्तोत्रियानुरूपशंसनेन होतृहोत्रकास्तमोरूपं पाप्मानं तरन्ति लङ्घयन्ति।

5. ५-७ शंसने प्रकारविशेषं विधत्ते—**पुनरादायम्-इति**। पठितमेव पादं पुनः पठित्वेत्यर्थः। यस्मात् पुनरादायमेवात्र सामगाः स्तुतिं कुर्वन्ति। तस्मात् स्तुत्यनतिक्रमणेनैव शस्त्रं पठितं भवतीत्यभिप्रायेण पुनरादायं शंसेयुः। अन्यथा 'स्तुतमनुशंसति'[p] इति न्यायव्याकोपप्रसक्तेः।

यथास्तुति शस्त्रशंसनमित्युक्तम्। तत्प्रसंगात् स्तोत्रशस्त्रसंबन्धमधिकृत्य
5. ८ किञ्चिच्चोद्यमुद्भावयति—**तद्-इति**। तत् तत्र स्तुतिशस्त्रसंबन्धविषये। केचिज्जिज्ञासवः चोद्यमाहुः। किमिति चेत्? उत्तमादन्त्यात्। प्रतिहर्तृकर्मण उत्तरकालमाहावं कृत्वा शस्त्रं स्तोत्रेण संबद्धं कुर्वन्ति तावद्धोतृहोत्रकाः तदेतत् केन कारणेन? एवं नियमेनानुष्ठानोपलम्भात् सामान्येनास्ति किंचित् कारण-

a. RV. 8. 81. 1.
b. RV. 4. 32. 1.
c. RV. 8. 45. 22.
d. RV. 8. 69. 4.
e. RV. 8. 2. 1.
f. RV. 1. 9. 1.
g. RV. 3. 51. 10.
h. RV. 8. 6. 1.
i. RV. 1. 5. 1.
j. RV. 8. 95. 2.
k. RV. 1. 30. 7.
l. RV. 1. 6. 1.
m. RV. 8. 13. 1.
n. RV. 8. 13. 16.
o. ŚB. 12. 9. 2. 8.
p. PB. 9. 8. 10.

1. T. तद्रूपस्य

मित्यवगम्यते। स तु विशेषतो नावधार्यते। तस्मात् स हेतुविशेषो वक्तव्य इति।

शस्त्रस्य सामसन्तानकरणे हेतुं वक्तुं प्रथमं यज्ञस्य पुरुषविधत्वं संपा-
दयति—**पुरुषो-इति।** योऽयं यज्ञः स पुरुष एवेति ज्ञातव्यम्। कथमिति चेत्, 5. ९-१३
यदेतद्धविर्धानाख्यं मण्टपमस्ति तद् यज्ञपुरुषस्य शिर इति विद्यात्। अग्रभागवर्तित्वात्। य आहवनीयाग्निरौत्तरवेदिकः स तस्य मुखम्। तस्मिन् हविषां प्रक्षेपात्। मुखे ह्यन्नं प्रक्षिप्यते। यः सदोदेशः स उदरम्। मध्यभागवर्तित्वात्। प्रक्षिप्तस्य हविषस्तत्र प्रतिष्ठानाच्च। उक्थानि शस्त्राणि तस्यान्नं भवति। सदोदेशे तेषां प्रयोगात्। अन्नस्योदरप्रतिष्ठत्वात्। मार्जालीयो दक्षिणाग्निः, आग्नीध्रीय उत्तराग्निः; तौ बाहू। उभयपार्श्वभागवर्तित्वात्। या इमाः प्रसिद्धाश्चक्षुराद्यधिष्ठात्र्योऽग्न्याद्या देवताः प्रसिद्धपुरुषप्रतिष्ठिता इह यज्ञपुरुषे संपिपादयिषिताः, ते तस्य सदोमण्टपस्यान्तः स्थिता धिष्ण्यस्था अग्नय एव। ज्योतिष्मत्त्वादिसामान्यात्। प्रतितिष्ठत्यनयेति प्रतिष्ठा पादः। एकवचनमत्रातन्त्रम्। सा गार्हपत्याग्निः व्रतश्रपणोऽन्वाहार्यश्चाग्निर्भवति। अन्तभाक्त्वसाम्यात्[1]। इतिशब्दः स्थूलदेहपिण्डसंपादनसमाप्त्यर्थः।

**अथ-होत्राशंसिनः।** अथ स्थूलदेहपिण्डसंपादनानन्तरमपरं सूक्ष्मशरीरं 5.१४-१६
मनआदिलक्षणमुच्यत इति शेषः। तस्य यज्ञपुरुषस्य ब्रह्मा एतन्नामको य ऋत्विग्विशेषोऽस्ति स एव मनः अन्तःस्थं सुखादिग्रहणेऽसाधारणं कारणं सकलेन्द्रियार्थग्राहकं भवति। ब्रह्मणो वेदत्रयविहितसकलकर्मवैकल्यसमाधातृत्वेन साधारणत्वात्। तथा च मन्त्रः—'ब्रह्मा त्वो वदति जातविद्याम्'[a] इति। 'ब्रह्मैको जाते जाते विद्यां वदति'[b] इति। अत एव श्रुत्यन्तरम्—'ब्रह्मार्धभाक्'[c] इति। मनसश्च सर्वेन्द्रियसाधारण्यं प्रसिद्धम्।

'एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ॥'[d]

a. RV. 10. 71. 11. b. N. 1. 8.
c. AB. 5. 34. 3. d. Manu. 2. 92.

1. T. अन्तभाक्त्वात् for अन्तभाक्त्व

इति स्मरणाच्च। अनेन साधर्म्येण ब्रह्मणो मनोरूपत्वम्। अथवा मनः-कार्यत्वाच्चन्द्रमसस्तदधिदैवतस्य ब्रह्मणो मनोरूपत्वम्। कार्यकारणाभेदस्य प्रसिद्धत्वात्। 'चन्द्रमा मनसो जातः'[a] 'मनश्चन्द्रमाः'[b] इत्यादिमन्त्रब्राह्मणवाक्यैश्चन्द्रमसो मनःकार्यत्वम्। 'चन्द्रमा देवो दैवो ब्रह्मा'[c] इति चन्द्रमसो ब्रह्मरूपत्वम्। तस्माद् ब्रह्मैव मनस्तस्य यज्ञपुरुषस्येति युक्तम्। तथोद्गातृप्रस्तोतृप्रतिहर्तॄणां क्रमेण प्राणापानव्यानरूपत्वं वेदितव्यम्। तत्रोद्गातॄणां सर्वेषां प्राणरूपत्वं समानम्। साम्नः प्राणनिष्पाद्यत्वात्। अत एव 'प्राणः साम'[d] इति छन्दोगानामाम्नानम्। नासिकाच्छिद्रद्वारा बहिर्निःसरणवृत्तिः प्राणः। तेनैवान्तश्चरन्नपानः। प्राणापानयोरन्तराले वर्तमानो व्यानः। वाचा हौत्रस्य कर्मणो निर्वर्तनाद्धोतुर्वाग्रूपत्वम्। 'वाग् वै होता'[e] इति प्रागप्याम्नातम्। 'वागेवर्क्'[f] इति च छन्दोगश्रुतिः। अथवा होतुरग्न्यधिष्ठानत्वादग्नेर्वाग्रूपत्वस्य च 'अग्निर्वाग्भूत्वा मुखं प्राविशत्'[g] इति श्रुत्यन्तरे श्रुतत्वादग्नेर्वाग्रूपत्वम्। यथा चक्षुः स्पष्टतरमर्थप्रकाशनपूर्वकं सर्वकर्मसु प्रवृत्तिं पुरुषस्योत्पादयति, तथाध्वर्योः प्रैषवचनेन सर्वप्रवर्तकत्वाच्चक्षूरूपत्वम्।

यद्वा आदित्यस्याध्यात्मं चक्षूरूपत्वस्य श्रुतत्वाद् 'आदित्यो देवो दैवोऽध्वर्युः'[h] इत्यध्वर्योरादित्यात्मकत्वस्य च श्रूयमाणत्वाद् आदित्यद्वाराध्वर्योश्च चक्षूरूपत्वम्। प्रजातिः पुत्रपौत्रादिप्रजोत्पत्तिः। तद्रूपता च सदस्यस्य तस्य[1] प्रजापतिरूपत्वश्रुतेः। यजमान आत्मा भोक्ता प्रधानत्वात्। तदर्थत्वादन्येषाम्। होत्राशंसिनो मैत्रावरुणादयो होत्रकाः तेऽङ्गानि; गुणभूतत्वसाम्यात्।

अत्र स्तोत्रशस्त्रसंबन्धनियमहेतुविषये प्रश्ने तदुत्तरदानौपयिकतया उद्गातॄणां यज्ञपुरुषप्राणरूपत्वं होतुर्होत्रकाणां च वागङ्गरूपत्वं चोपपादयितुं प्रथमं यज्ञस्य हविर्धानादेः शिरआदिरूपत्वमपि प्रदर्शितम्। न च सशिरस्कदेहपिण्डविशेषवतोऽपि मनआदिविरहेण केवलं प्राणवागङ्गसाहित्य-

a. RV. 10. 90. 13.
b. JUB. 3. 2. 6.
c. BŚ. 2. 2. 2.; 2. 3. 4.
d. ChU. 1. 1. 5.
e. KB. XIII. 7. २१.
f. ChU. 1. 1. 5.
g. AU. 2. 4.
h. BŚ. 2. 2. 2.; 2. 3. 4.

1. T. omits

मुच्यमानं समञ्जसं भवतीति ब्रह्मादेर्मनआदिरूपत्वमपि प्रदर्शितम्। अतो हेतोरपृष्टोऽपि स्तोत्रोपाकरणादेः स्तोत्रसंबन्धहेतुः प्रसङ्गादभिधीयते। तुल्य-न्यायतया दृष्टान्तत्वेन वा तत्प्रदर्शनम्।

**तद्-संदधाति**। तत् तत्र एवं स्थिते सतीत्यर्थः। अध्वर्युः स्तोत्रमुपा- 5.१७,१८
करोति प्रारभत इति यदस्ति तत् तेन यज्ञपुरुषस्य चक्षुर्यत्तस्य प्राणैः संधानमेव करोति। अध्वर्योश्चक्षूरूपत्वस्योद्गातॄणां प्राणरूपत्वस्य चोक्तत्वात्। नहि चक्षुषः प्राणसंबन्धविरहे स्वविषयव्यापारः संभवति। उत्क्रान्तप्राणस्य रूप-दर्शनसामर्थ्याभावात्। एतच्च प्राणसंवादे प्रसिद्धम्। अत एव हि 'सप्त शीर्षण्याः प्राणाः'[a] इत्यादौ प्राणशब्दवाच्यत्वम्। 'न वै वाचो न चक्षूंषि न श्रोत्राणीत्याचक्षते। प्राणा इत्येवाचक्षते प्राणो वै तानि सर्वाणि भवन्ति'[b] इति च छन्दोगानामाम्नानम्। अनेनाध्वर्यस्य स्तोत्रोपाकरणकर्मणः स्तोत्रेणोद्गातृ-कर्मणां संबन्धे हेतुरुक्तः।

ब्रह्मकर्मणः उद्गातृकर्मसंबन्धोपपादनप्रसंगं कुर्वन् तत्पूर्वभाविप्रस्तोतृ-
कर्मणो ब्रह्मणा संबन्धं प्रसंगादुपपादयति—**अथ-संतनोति**। आमन्त्रयते हे 5.१९-२२
ब्रह्मन्निति संबुद्धिपूर्वकं स्तोत्रमनुज्ञापयतीत्यर्थः। यस्मादेषां चक्षुरादीनां प्राण-प्रवर्त्यत्वात् प्राणशब्दवाच्यानां मध्ये मनोऽन्तःकरणमग्रणीः प्रधानो भवति। मनोऽवधानविधुरस्य चक्षुरादेरकिंचित्करत्वात्। 'अन्यमना अभूवमतो नाह-मद्राक्षम्' इति समनस्केन्द्रियसन्निकृष्टे विशिष्टालोकमध्यमध्यासीनेऽपि करि-तुरगादिपदार्थे लोकस्यान्यमनस्कतया अग्रहणव्यवहारदर्शनात्। अतो मनसा कर्तॄणा प्रसूता अनुज्ञाताः सन्त एव वयं स्तोमेन स्तुतिं करिष्याम इत्यभिप्रायेण प्रस्तोतुर्ब्रह्मामन्त्रणं भवति। किंचानेनापानस्य मनसा संबन्धसंपादनं च कृतं भवति। ब्रह्मणो मनोरूपत्वस्य प्रस्तोतुरपानरूपत्वस्य च प्रागुक्तत्वात्। यद्यपि चक्षुरादीनां प्राणैः संबन्ध एव प्रतिपाद्यः, तथापि चक्षुरादीनामिवापानस्यापि[1] प्राधान्यमस्तीत्येतदभिधातुमेवापानस्य मनःसंबन्धप्रतिपादनमिति मन्तव्यम्।

a. JuB. 2. 2. 3. 9–10. b. ChU. 5. 1. 15. ( Pr. edn. varies )

1. T. चक्षुरादीनाम्

अथवेहापि मनसोऽपानप्रतिष्ठितत्वतात्पर्यवशात् पर्यवसानविषयः । राज्ञोऽमात्यप्राप्तावपि नैसर्गिकगुणप्रधानभावानपायात् ॥

इति पञ्चमः खण्डः

6.१,२ अथ ब्रह्मकर्मणोऽप्युद्गातृकर्मसंबन्धमुपपादयति—**अथ–संदधाति** । अनुमन्यते अनुज्ञानं करोति । अन्यत् पूर्ववत् । यद् ब्रह्मणः स्तोत्रानुज्ञानं तन्मनसः प्राणेन सह संबन्धार्थमित्यर्थः ।

प्रस्तोतृप्रतिहर्त्रुद्गातृकर्मणामप्यन्योन्यसंबन्धितां प्रसंगादेव प्रतिपादयति—
6.३-८ **अथ–दधाति** । प्रस्तौति प्रस्तावलक्षणां सामभक्तिं करोति । एवमुत्तरत्रापि योज्यम् । किमिति मनआदीनां प्राणसंबन्धोपपादनम् ? असंबन्धो वा विपरीत-
6.९ संबन्धो वा कस्मान्न स्यादित्याशङ्क्य प्राणस्य प्राधान्यमाह—**ता–प्रतिष्ठिताः** । देवताश्चक्षुराद्यनुग्राहिण्यो देवताः । प्राणो मुख्यः । तस्य देहादुत्क्रमणवेलायां देहस्य काष्ठलोष्टसमानयोगक्षेमत्वदर्शनात् चक्षुराद्यन्यतमोत्क्रान्तौ शरीरस्य व्याप्रियमाणत्वदर्शनाच्च अन्वयव्यतिरेकाभ्यां तस्य स्वामिवत् प्राधान्यम् , चक्षुरादीनां भृत्यादिवत् गुणत्वं चावसीयते । अतो मनआदेः प्राणप्रतिष्ठितत्वमावश्यकमित्यर्थः ।

होतृहोत्राशंसिकर्मणः स्तोत्रसंबन्धिनियमहेतुं पूर्वं पृष्टं तावद् दर्शयति—
6.१०-१४ **अथ–संदधति** । होत्रका मैत्रावरुणादयो होत्राशंसिनः । योऽयं साम्ना शस्त्रस्योपसंतानः स यज्ञपुरुषसंबन्धिवागिन्द्रियस्याङ्गानां च प्राणाधिष्ठितत्वमित्यर्थः । तेन नाकस्मिकोऽयं स्तोत्रशस्त्रसंबन्धः । नहि प्राणानधिष्ठितं वागिन्द्रियमङ्गानि वा स्वकार्याय पर्याप्नुवन्ति । शवशरीरे तददर्शनात् ।

6.१५-१७ यजमानस्य स्तोत्रसंबन्धमुपपादयति—**अथ–धत्ते** । उपगाति उपगानं करोति । आत्मन्नात्मनि । उक्तं हि—'आत्मा यजमानः'[a] इति । अमुमर्थमुपजीव्य प्रसंगाद् यजमानसंबन्धिनः कांश्चिन्नियमविशेषान् विधत्ते—**तस्मात्–**
6.१८-२२ **इति** । यस्मान्मनआदयः प्राणप्रतिष्ठास्ते च प्राणा यज्ञपुरुषस्यात्मभूते

a. KB. XVII. 5. १५.

यजमाने स्थिताः तस्माद्धेतोर्वेद्या बहिःप्रदेशे वर्तमानमेनं यजमानमभिलक्ष्यादित्य उदयास्तमयौ न कुर्यात्। आदित्योदयास्तमयवेलायां यजमानेन बहिर्वेद्यवस्थानं न कर्तव्यम्। अन्तर्वेद्येव तदानीमवस्थातव्यम्। आदित्यस्य नियोज्यत्वाभावेन विपरिणामेन विधेयंजमाने वर्तनात्। 'मा त्वान्यत्र दीक्षितविमितात् सूर्योऽभ्युदगान्माभिनिम्रुक्त'[a] इत्यस्य व्याख्याने वृत्तिकृद्भिस्तथा व्याकृतत्वात्। तथा अभ्याश्रावणं धिष्ण्यादन्यत्राग्नीन्धनं स्तोत्रोपाकरणं च यजमाने वेद्या बहिः स्थिते सति न कुर्यात्। कुतो हेतोरिति चेद् अहमेतदेव कुर्वन् आत्मानं प्राणसकाशादपगमय्यान्यत्र स्थापयानि; अतो नायं यजमानः प्राणान् धारयिष्यतीति परिभयं द्योतयन्नेव न कुर्यात्।

इत्थं प्रसंगागतं प्रश्नं प्रबन्धेन परिहृत्य पूर्वं यत् पुनरादायं शंसनं विहितं तस्य त्रिषु पर्यायेषु स्थानभेदकृतं विशेषमाह– **अथ-इति**। प्रथम- 6.२३-३१
पर्यायवर्तिषु चतुर्षु शस्त्रेषु प्रथमानि पदानि पुनः पुनः पठितव्यानि। निनर्तयन्ति पुनः पुनः पठन्तीत्यर्थः। तेन रात्र्यास्त्रेधा विभक्तायाः सत्याः प्रथमो यो भागस्तत्सकाशादसुरान् निर्गमय्य हिंसन्ति होतृहोत्रकाः। एवमेव क्रमेण मध्यमोत्तमपर्यायगतेषु शस्त्रेषु मध्यमानामुत्तमानां च पुनरादायं शंसनेन रात्रिमध्यमान्तिमभागभाजामसुराणां[1] निबर्हणमेव क्रियते। अभ्यागारमभिनिनर्तमिति णमुलन्तं पदद्वयम्। क्रियासमभिहारेण पापनिर्हननं कृत्वेत्यर्थः।

नहि महीयसा पाप्मना सकृद् द्विवारं वा तन्निर्हरणस्य कर्मणोऽनुष्ठानान्निवृत्तिः। अथवा पाप्मवत् पाप्मानं वस्त्रलग्नमलादि। यथा लोके। एवमेवैतदिति क्रियाविशेषणम्। अहर्ग्रहणं निदर्शनार्थम्। यथाह्नो निर्हृता एव रात्र्या अपोति। अहोरात्रनिर्वर्त्यत्वादतिरात्रकर्मणः। अह्नि रात्र्यां वा यथासुरान् हिंसितुं शक्यते तथा स्तोत्रियानुरूपै रात्र्याः सकाशादसुरा निर्हृता भवन्ति। न केवलमसुरनिबर्हणार्थमेव पुनरादायं शंसनम्, **किंतु** स्तुत्यनतिलङ्घनेन तदानुरूप्येणैव शंसनमस्माभिर्निर्वर्तितं भवतीति कृत्वापि पुनरादायं शंसनं कुर्यात्। **इह** सामगाः स्तोत्रकर्मणि प्रथमपर्याये प्रथमानि पदानि

a. BS. 6. 6. 1.

1. T. मध्य for मध्यम

पुनः पठन्तः स्तुतिं कुर्वन्ति। मध्यमोत्तमयोर्मध्यमोत्तमानि पदानि। तत्र शस्त्रेऽनभ्यासेन पठने क्रियमाणे यथास्तुति शस्त्रं न पठितं स्यात्। तथा च 'स्तुतमनुशंसेद्'[a] इति विधिरवधीरितः स्यात्। तस्मादुक्तप्रकारेणैव शस्त्रपाठः समञ्जसः नान्यथेति ॥

इति षष्ठः खण्डः

स्तोत्रियानुरूपानन्तरपठनीयमुक्थमुखाख्यं शस्त्रभागं विधत्ते—**गाय-**
7.१-३ **त्राणि-दधति**। स्तोत्रियानुरूपानन्तरं होतृहोत्रका गायत्रीछन्दस्कान्युक्थमुखानि शंसेयुः। उक्थमुखमिति शस्त्रभागस्यान्वर्था संज्ञा। तत्र प्रथमे पर्याये स्तोत्रियानुरूपपठनानन्तरं होता 'त्यमु वः सत्रासाहम्'[b] इत्यादिकं सूक्तशेषं पठेत्। अच्छावाकः 'इन्द्र वाजेषु नोऽव'[c] इति। 'शेषः सूक्तस्योक्थमुखम्'[d] इति सूत्रणात्। मध्यमे पर्याये होत्रादीनां क्रमेण 'उद्घेदभि'[e] 'एन्द्र सानसिम्'[f] 'आ तू न इन्द्र मद्र्यग्'[g] 'असृग्रमिन्द्र ते गिरः'[h] इत्युक्थमुखानि। तथा सूत्रकृता दर्शितत्वात्। उत्तमे होतुः 'समस्य मन्यवे विशः'[i] इति सूक्तशेषः। मैत्रावरुणस्य 'यस्य संस्थे'[j] इति सप्तर्चम्। ब्राह्मणाच्छंसिनः 'आदह स्वधाम्'[k] इति सूक्तशेषः। अच्छावाकस्य 'उप नः सुतमा गहि सोममिन्द्र'[l] इति। एतानि च सर्वाणि गायत्रीछन्दस्कान्येव। गायत्रत्वं च प्रशस्तम्। तेजो दीप्तिमात्रम्। वृत्तस्वाध्यायजनितो दीप्तिविशेषो ब्रह्मवर्चसम्। तद्धेतुत्वात्ताच्छब्द्यम्। तेन गायत्रीछन्दस्कानामुक्थमुखानां शंसनेन तेजोब्रह्मवर्चसे कर्मणी यजमाने स्थापयन्ति।

उक्थमुखानन्तरपठनीयानि होत्रादीनां सूक्तानि क्रमेण विधत्ते—**गायत्रीः-**

a. Cf. PB. 4. 9. 13.
b. RV. 8. 92. 7.
c. RV. 1. 7. 4.
d. ŚŚ. 9. 17. 2.
e. RV. 8. 93. 1.
f. RV. 1. 8. 1.
g. RV. 3. 41. 1.
h. RV. 1. 9. 4.
i. RV. 8. 6. 4.
j. RV. 1. 5. 4.
k. RV. 1. 6. 4.
l. RV. 3. 42. 1.

**कुर्वन्ति** । जगतीछन्दस्का 'अभि त्यं मेषम्'[a] इत्याद्याः शंसेयुः । किंच एते 7.४-६
होत्रादयः व्याह्वयन्ते । अपिशब्दो नानार्थः । पृथक् पृथगाहावं पठेयुः । तत्र प्रथमे पर्याये क्रमेण होत्रादीनाम् 'अभि त्यम्'[a] 'त्यं सु मेषम्'[b] 'न्यू षु'[c] 'मा नो अस्मिन्'[d] इति सूक्तानि । 'त्यं सु मेषम्'[b] इत्यत्र तु नवम्यन्तयोरुद्धारः त्रयोदश्याः प्राक् चतुर्दश्याः पाठश्च कर्तव्यः । मध्यमे क्रमात् 'अहं भुवम्'[e] 'प्र वः सताम्'[f] 'तदस्मै नव्यम्'[g] 'अजातशत्रुम्'[h] इत्येतानि । 'अजातशत्रुम्' इत्यत्र त्वन्त्याया उद्धारः । उत्तमे 'विश्वजिते'[i] 'अहं दां'[j] 'इमां ते धियम्'[k] 'प्र ते महे'[l] इत्येतानि । 'इमां ते' इत्यत्र तु अन्त्याया उद्धारः । एतदिति क्रियाविशेषणम् । गायत्रीशंसनानन्तरं जगतीशंसनेन पृथक् पृथगाहावपठनेन चाद्यन्तभूतगायत्रीजगतीछन्दोद्वयमध्यपतितानि छन्दोन्तराणि संदंशन्यायेन परिगृह्य तेषां नानावीर्यत्वं संपादयन्ति होतृहोत्रकाः । परिधानीया ऋचो विधत्ते—
**जगतीः-प्रतितिष्ठन्ति** । त्रिष्टुप्छन्दस्काभिर्ऋग्भिः शस्त्रं समापयेयुः । तत्र 7.७-१०
प्रायेण जागतानां सूक्तानामन्त्या ऋचः परिधानीयाः । 'त्यं सु'[b] इत्यत्र तु त्रयोदश्येव । मध्यमेऽच्छावाकस्य 'उद्यत् सहः'[m] इत्येषा परिधानीया । उत्तमे ब्राह्मणाच्छंसिनः 'तदस्येदम्'[n] इति । बलं वै वीर्यमित्यादि गतम् ।

अथ क्रमेण याज्या विधत्ते—**अन्धस्वत्यो-रूपम्** । तत्र 'अध्वर्यवो भरत'[o] 7.११,१२
'पाता सुतमिन्द्रो अस्तु सोमं हन्ता'[p] 'वृषा मद'[q] 'इदं त्यत् पात्रम्'[r] इति प्रथमे पर्याये । 'अपाय्यस्य'[s] 'अस्य मदे पुरु वर्पांसि'[t] 'यस्ते रथो'[u] 'इदं ते पात्रम्'[v]

a. RV. 1. 51. 1.
b. RV. 1. 52. 1.
c. RV. 1. 53. 1.
d. RV. 1. 54. 1.
e. RV. 10. 48. 1.
f. RV. 2. 16. 1.
g. RV. 2. 17. 1.
h. RV. 5. 34. 1.
i. RV. 2. 21. 1.
j. RV. 10. 49. 1.
k. RV. 1. 102. 1.
l. RV. 10. 96. 1.
m. RV. 5. 31. 3.
n. RV. 1. 103. 5.
o. RV. 2. 14. 1.
p. RV. 6. 44. 15.
q. RV. 6. 24. 1.
r. RV. 6. 44. 16.
s. RV. 2. 19. 1.
t. RV. 6. 44. 14.
u. RV. 10. 112. 2.
v. RV. 10. 112. 6.

इति मध्यमे। 'तिष्ठा हरी'[a] 'प्र घा न्वस्य'[b] 'प्रो द्रोणे'[c] 'प्रोग्राम्'[d] इत्युत्तमे। 'मद्यमन्ध' इत्यन्धश्शब्दवत्यः। 'मद्यम्' इति मदिधातुमत्यः। 'अस्य पीतिम्' इति पानार्थधातुमत्यः। एवं यथासंभवमन्यास्वपि द्रष्टव्यम्। त्रिलक्षणा उक्तप्रकारेण त्रिरूपाः। अत एव समृद्धा वीर्यवत्यः। कुतः समृद्धत्वमिति चेत्, यस्मादेतद् रात्रे रूपं भवति। रात्र्या भागत्रयभावत्वेन त्रिरूपत्वस्य प्रसिद्धत्वात्। अतो रात्रिकालीनेषु शस्त्रेषु त्रिरूपत्वमभिरूपम्।

एवं तावद् रात्रिपर्यायिनाम्नां शस्त्राणां क्लृप्तिं विधाय होत्रादीनां कांश्चि-
7.१३-१६ न्नियमविशेषान् विधत्ते—**जागृयू–तरन्ति**। रात्रिमित्यत्यन्तसंयोगे द्वितीया। यस्यां रात्रौ शस्त्राणि पठ्यन्ते तस्यां रात्रौ कात्स्न्येन जागरणं निद्रात्यागं कुर्युः। तत्र यदेतज्जागरितं जाग्रदवस्था नामास्ति, तज्ज्योतिरेव प्रकाशलक्षणत्वात्। 'इन्द्रियैरर्थोपलब्धिर्जागरितम्'[e] इति तल्लक्षणात्। उपलब्धेः प्रकाशरूपत्वात्। तमः पाप्मेत्यादि गतम्।

7.१७-२० आहवनीयाद्यग्नीनां ज्वलनं विधत्ते—**यावद्—स्यात्**। असुराणां रक्षसां च स्वभूतो हि रात्रिकालः। 'रात्रिरसुराणाम्'[f] इति श्रुतेः। तेषां पुनः स्तोत्रशस्त्रैरपाकरणमन्यदा[1]। तच्चोक्तं प्रागेव। अतो यस्मिन् काले किमपिस्तोत्रं शस्त्रं वा न वर्तते[2], तस्मिन् काले असुरा रक्षांसि च यज्ञमास्कन्दितुं पर्याप्तान्येव भवन्ति। यदि नेत्यसंदेहे संदेहवचनम्। तस्माद्धेतोरसुराद्यपाकरणार्थमाहवनीयाद्यग्नीन् धिष्ण्याग्नींश्च प्रज्वलितान् कुरुतेति परिकर्मिणः प्रति होत्रादये नियोजयेयुः। ते च तथैव तानग्नीन् प्रज्वलितान् कुर्युः। तथा क्रियमाणे च देवयजनस्थानं प्रकाशरूपमेव स्यात्। तथाह्नीव प्रकाशरूपत्वाविशेषात् रात्रावपि असुरा नापतितुं प्रभवेयुः।

अथात्यन्तापरिहार्यतया हठात् स्वापापत्तौ सत्यां कंचिन्नियमं विधत्ते—
7.२१-२४ **आलेभन्तः–अपघ्नते**। स्वापं कुर्वाणास्ते परस्परं स्पृशन्त एव स्वापं कुर्युः। एवं

a. RV. 3. 35. 1.
b. RV. 2. 15. 1.
c. RV. 6. 37. 2.
d. RV. 10. 104. 3.
e.
f. TS. 1. 5. 9. 2.

1. T. अन्यथा
2. T. विवर्तते for वा न वर्तते

स्वापं कुर्वाणांस्तानमी चेष्टां कर्म कुर्वन्त्येव न तु निवृत्तव्यापारा वर्तन्त इत्यतो हेतोरासुरः पाप्मा पराभवितुं न प्रभवति। ते होत्रादयः एवं नियमयुक्ताः सन्त आसुरं पाप्मानमपहतं कुर्वन्त्येव। अत एवानेवंभावे पाप्मनाभिभवः तेषामवश्यं-भावीत्यर्थात् सिध्यति। अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति सप्तमः खण्डः

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे।
हृद्व्योमगं नुदन् ध्वान्तं संतुष्यतु पुमान् परः ॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
अध्यायोऽन्तमियाय सप्तदशकः कौषीतकिब्राह्मण-
व्याख्याने परिक्लृप्तषोळशिनिशापर्यायशस्त्रक्रमः ॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**द्वितीयदशके सप्तमोऽध्यायः**

अथ

## अष्टादशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
इह खल्वखिलाः सोमयागा यस्य विभूतयः ।
तं ज्योतिष्टोममाश्रित्य वाग् दीक्षेत्यादिका श्रुतिः ।
प्रवृत्ता द्वादशाध्याय्या सैषा सत्राधिकारतः ।
ज्योतिश्शब्दो ज्योतिरात्मन्यग्नौ वृत्तः स यत्र तु ।
स्तूयते स्तुतिभिः सोऽयं ज्योतिष्टोम उदाहृतः ।
त्रिवृत् [1-]पञ्चदशोऽप्येकविंशः सप्तदशस्तथा[-1] ।
ज्योतींष्येतानि साध्यस्य स्वःफलस्य प्रकाशनात् ।
एते स्तोमा यस्य सोऽयं ज्योतिष्टोम इतीर्यते ।
संस्थायाः सप्तधा भेदात् सप्तधा स तु भिद्यते ।
अग्निष्टोमस्तथात्यग्निष्टोम उक्थ्यश्च षोळशी ।
वाजपेयोऽतिरात्रोऽप्तोर्यामः संस्थास्तु सप्त ताः ।
आज्यप्रभृत्याग्निमारुतान्तोऽग्निष्टोम उच्यते[2] ।
अत्यग्निष्टोम इष्टस्तु षोळश्येवोक्थ्यवर्जितः ।
त्रयाणामागमादूर्ध्वं द्वादशादुक्थ्य इष्यते ।
ऊर्ध्वं पञ्चदशादेकस्यागमे षोळशी मतः ।
अतिरात्रः परं तस्मात् त्रयोदशभिरागतैः ।
वाजपेयः षोळशिनः परमेकागमान्मतः ।
चतुर्णामागमादूर्ध्वमप्तोर्यामस्तथाश्विनात् ।

1–1. T. omits

2. T. omits अग्निष्टोम उच्यते ( with gap )

एतासां सप्तसंस्थानामपि प्रकृतिरिष्यते ।
अग्निष्टोमोऽपरास्तिस्रः षोळश्युक्थ्यातिरात्रकाः ।
विकृतिः प्रकृतिश्चेष्टास्तिस्रोऽन्या विकृतिः परम् ।
केवलं या विकृतयस्तासामप्रकृतित्वतः ।
सत्राद्यनुपयोगित्वात् क्लृप्तिर्नात्र श्रुतौ कृता ।
अग्निष्टोमो हि सर्वेषां मूलप्रकृतिरीरितः ।
सर्वोऽपि यज्ञ एतावानग्निष्टोमो हि यादृशः ।
अस्यैव भूमा क्रियत ऊर्ध्ववर्तिभिरध्वरैः ।
मूलप्रकृतितामस्य श्रुतिः श्रावयति स्फुटम् ।
इहापि 'यो ह वा एतेनानिष्ट्वे'त्यादितः क्रियाम् ।
वदन्त्यस्य प्रधानत्वात् प्रकृतित्वमसूसुचत् ।
अतोऽग्निष्टोम उदितः पूर्वमुक्थ्यस्ततः परम् ।
षोळश्यथातिरात्रोऽथ प्रकृतित्वे क्रमाश्रयात् ।
प्रकृतित्वाच्चतुःसंस्थो ज्योतिष्टोमो द्वयोत्तरैः ।
उक्तो दशभिरध्यायैरित्थं क्रमसमाश्रयात् ।
इदानीं सर्वसंस्थानां साधारणतया स्थितम् ।
विधातुं यज्ञपुच्छाख्यं कर्मजातं प्रचक्रमे ॥

तत्र तावद्धारियोजनग्रहयागं[1] विधत्ते—**अथ-भवन्ति**। अथेत्यानन्तर्यार्थः। 5. १-३
हरिनामानावश्वौ युज्येते रथे यस्य स इन्द्रो हारियोजनः। स देवता यस्य तेन हारियोजननाम्ना प्रसिद्धेन ग्रहेण चरन्त्यध्वर्युप्रभृतयः। तथा च सूत्रम्—'अप्सु सोमान् सादयित्वा अनुयाजादि शंय्वन्तं पशुकर्म कृत्वा हारियोजनेन चरन्ति'[a] इति। तत् तेन हरियोजनचरणेन इन्द्रसंबन्धिनाविन्द्रस्य यज्ञभूमिप्राप्तिसाधनभूते रथे युक्तावश्वावेव प्रीतौ कुर्वन्ति। तत्प्रीतिसाधनमेतत् कर्म भवति।

ननु कथंकारं तयोरेवंविधेन कर्मणा प्रीतिः संपादयितुं शक्यते? नहि

a. ŚŚ. 8. 7. 21.

1. V. होमं for यागं

लौकिकरथाश्वानां प्रीतिं संपादयितुं शक्नुवन्ति पुरुषा अन्तरेण घासादिसमर्पणं नैयोगिकफलेन कर्मणैव। पशुत्वाद् आत्मविषये परकर्तृकसमुदाचारविशेषानभिज्ञत्वाच्च। अनीश्वरत्वाच्च तत्प्रीतेरकिंचित्करत्वात्। अदेवतारूपत्वाच्चादृष्टफलकर्मणा प्रीत्यनुपपत्तेः। अतो हरिप्रीतिवचनमसमीचीनमिवेति चेत्, उच्यते—न हरिशब्दवाच्यत्वेन रथवाहनादिना वा केवलेन लौकिकाश्वसमानस्वभावत्वमिन्द्ररथाश्वयोरध्यवसातुं शक्यम्। लिङ्गस्य केवलस्य **लौकिकसाम्या**वगतौ प्रमाणत्वाभावात्। अतिप्रसङ्गाच्च। इन्द्रादेरपि देवताया हविर्भोक्तृत्वाल्लौकिकसामान्यव्यापारदर्शनेन अस्मदादिसमानयोगक्षेमत्वापत्त्या देवतारूपत्वानुपपत्तिप्रसंगात्। अतो यक्षबलिन्यायेन[a] यादृशो रथी तादृश एव रथः। यदीयाश्वा देवतारूपा एव भवितुमर्हन्ति। रथाश्वयोरनीश्वरत्वादिकं नाशङ्कनीयम्[1]। श्रूयते च—'ऋक्सामे वा इन्द्रस्य हरी'[b] इति। अत्र चर्क्सामशब्दौ देवतावाचकौ द्रष्टव्यौ। 'ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने'[c] इति चेतनव्यापारोपबन्धनात्। ईशितृत्वादेव प्रीतिमत्त्वम्। प्रीणयितृत्वतर्पयितृत्वादिवत् समञ्जसमेव। अत उक्तं साधूक्तं 'हरी एव तत् प्रीणन्ति' इति। न केवलमिन्द्राश्वप्रीतिकारणमेतत् कर्म किं तर्हि अत्र हारियोजनकर्मणि सर्वेऽपि देवा अश्वसहिताः प्रीता भवन्ति।

5. ४-७ अत्र ग्रहहोमे याज्यापुरोनुवाक्ये विधत्ते—**त्रिष्टुभं–प्रतितिष्ठति**। 'तिष्ठा सु कम्'[d] इत्येषा त्रिष्टुप् एकादशाक्षरत्वात् पुरोनुवाक्या। जगतीछन्दस्का 'युनज्मि ते'[e] इत्येषा याज्या। 'तिष्ठा सु कमिति पुरोनुवाक्या युनज्मि त इति याज्या'[f] इति सूत्रात्।

याज्याया 'अमन्दिषुः' इति मदिधातुमत्तां स्तौति—**मद्वती–तृतीय**-
5. ८ **सवनम्**। गतम्। 'धानाः सोमानामग्ने वीहि'[g] इत्यनुवषट्कारं[2] विधत्ते—
5. ९,१० **अनुवषट्करोति–प्रतिष्ठित्यै**। गतम्।

a. यादृशो हि यक्षस्तादृशो हि बलिः Bhāmatī on *Śāṁkara-bhāṣya* on BS. 4. 1. 15.
b. AB. 2. 24. 6.
c. TS. 6. 1. 3. 1.
d. RV. 3. 53. 2.
e. RV. 1. 82. 6.
f. ŚŚ. 8. 8. 1; 3.
g. ŚŚ. 8. 8. 4.

1. T. omits न
2. T. इत्यनुत्रिष्टुबेकां वषट्कारं

अत्र हारियोजनग्रहे धानाभिश्रयणं कुर्वन्त्यध्वर्यवः । तथा च बौधायनः—'बर्हिषी अन्तर्धाय धानाभिः श्रीणाति'[a] इति । तत्र पात्रगतानां धानानामादानं विधत्ते—**तासाम्–धत्ते।** तासां धानानां पात्रगतानां मध्ये होता भूयिष्ठा 5.११-१३
बहुतरा धाना गृह्णीयात् । तत्र या एता धाना नाम सन्ति ता पशव एव । भक्ष्यत्वेन पश्वभिवृद्धिहेतुत्वात् । तेन बहुतरधानादानकर्मणा पशूनां भूमानं संघातमात्मनि स्थापयत्येव भोगसाधनीकरोति । मैत्रावरुणादयोऽपि धाना आददीरन् । 'धाना व्याददते । भूयिष्ठा होता लिप्सेत'[b] इति सूत्रणात् । अथ 'यथाह त्यद् वसवः'[c] इति मन्त्रस्य जपं विधत्ते—**अथ–कुर्वते।** अस्य 5. १४
मन्त्रस्य धिष्ण्यावेक्षणे विनियोगः सूत्रकृतोक्तः । 'यथा ह त्यद् वसव इति धिष्ण्यान् समीक्ष्याग्नीध्रीयमुत्तरेणाहवनीयमायन्ति'[d] इति ।

आत्तानां धानानामाहवनीयभस्मान्ते[1] प्रक्षेपं[2] विधत्ते—**ता–दधति।** 5.१५-१७
यद्यपि 'अन्तराग्नी पशूनाम्'[e] इति गार्हपत्याहवनीयान्तरालप्रदेशः पशूनामायतनत्वेनान्यत्र श्रुतः, तथापि यस्याहवनीयसंबन्धाद् वा 'शंस्य पशून् मे पाहि'[f] इति मन्त्र आहवनीयं प्रति पशुपालनाशंसादर्शनाद् रक्षकत्वेन वा श्रुत्यन्तरप्रसिद्धिबलाद् वा पशुयोनित्वमाहवनीयस्य गमयितव्यम् । तेन निवपनकर्मणा पशून् स्व आत्मीये । गावस्तिष्ठन्त्यस्मिन्निति गोष्ठं तस्मिन् नावक्रामन्ति । चोरादिबलाद् वा अकालमरणादिभिर्वा गच्छन्ति न[3] पशवोऽस्मादित्यनपक्रमम् । तादृशे गोष्ठ आहवनीयात्मके स्थापयन्त्येव । सूत्रितं हि—'आपुरस्ता मा प्रजया पशुभिः पूरयतेत्याहवनीयस्य भस्मान्ते धाना न्युप्य पञ्च पञ्च शकलानादधति'[g] इति ।

अथ पञ्च पञ्च शकलानां होमं विधत्ते—**अथ–संप्रमुच्यन्ते।** शकला 5.१८-२१
एव शाकलाः । तानाहवनीये जुहुयुः 'आत्मकृतस्यैनसः'[h] इत्यादिभिर्मन्त्रैः । ते च

a. BŚ. 8. 16. 9.
b. ŚŚ. 8. 8. 6–7.
c. RV. 4 .12. 6.
d. ŚŚ 8. 8. 9.
e. TS. 1. 6. 7. 1.
f. VS. 3. 37.
g. ŚŚ. 8. 8. 11. ( Pr. edn. आदधते )
h. ŚŚ. 8. 9. 1.

1. T. भस्मान्तप्रदेशे for भस्मान्ते
2. T. omits
3. T. omits

सूत्रे द्रष्टव्याः। तत् तत्र लोके यथा भुजङ्गा जीर्णायाः परिणतायास्त्वचो निर्मोकापरपर्यायान्निर्मोक्षं प्राप्नुयात्। इषीका च सूच्याकाराग्रस्तृणविशेषो[1] मुञ्जात् कुलायान्निर्मुक्तो भवेत्। तेन प्रकारेण गन्धमात्रावृत्तेरपि राहित्येन एते होत्रादयः सर्वस्मात् पूर्वपूर्वजन्मपरंपरार्जितात् पाप्मनः सकाशान्निर्मुक्ता भवन्ति।

5.२२-२७ **अथ-सोमः**। शाकलहोमानन्तरं सव्यं बाहुमन्वावृत्ताः सन्तोऽप्सु सोमांश्चमसगतान्रूपान्[2] उपलक्ष्यागच्छन्ति। तानप्सु सोमानिहास्मिन् स्थाने साभिनयोऽयं निर्देशः। वेद्या अन्तर्भागे आसादयन्ति परिकर्मिणः। किमर्थमिति चेत्? यस्मिन् काले अपामोषधीनां च सोमेन संगमो भवति तदा सोमः कृत्स्नो भवति। न केवलाभिरद्भिरोषधीभिर्वा संगमे संपूर्णता[3] भवति। अपामोषधीनां च सोमविशेषरूपत्वात्। तस्माद् दर्भपिञ्जूलस्थापनं सोमसंपूर्तिहेतुत्वात् प्रशस्तम्[4]। दर्भपिञ्जूलैरान्दोलनं कर्तव्यम्। तथा च सूत्रम्—'सव्यावृत्तोऽप्सु सोमान् सन्नान् यथा चमसं पवित्राण्यवधाय चेष्टयन्ति। समापो अद्भिरग्मत समोषधयो रसेन। सं रेवतीर्जगतीभिः पृच्यन्तां सं मधुमतीर्मधुमतीभिः पृच्यन्ताम्'[a] इति। चमसस्थानामपां प्रक्षारणं विधत्ते—**ता-प्रतिष्ठा-**

5.२८-३० **पयन्ति**। ता आपो विष्णुदेवत्यया 'अच्छायं वो'[b] इत्यनयर्चा स्रावयेयुः। सूत्रितं हि 'अच्छायं वो ययोरोजसेति प्राचीर्निनीयोदीचीर्वा'[c] इति। 'ययोरोजसा'[d] इति शाखान्तरेण सूत्रितम्। योऽयं विष्णुः स यज्ञ एव, विष्णोर्यज्ञशरीरत्वात्। नहि यज्ञादन्यद् विष्णोरूपमस्ति। तस्माद्वैष्णव्यर्चा निनयनकर्मणा एना आपो यज्ञ एवान्ततोऽवसाने प्रतिष्ठिताः कुर्वन्ति॥

इति पञ्चमः खण्डः

6.१,२ **अथ-भिषज्यन्ति**। एतद् ब्रह्मप्रकरणे प्रागेव व्याख्यातम् इह कर्तृबहुत्वं विशेषः।

a. ŚS. 8. 9. 2. (Pr. edn. varies.) b. RV. 7. 36. 9.
c. ŚS. 8. 9. 5. d. VS. 8. 59.

1. T. adds वा
2. T. adds सोमान्
3. V. पूर्णता
4. T. adds अत्र चमसस्थानामपां प्रक्षारणं विधत्ते

दधिद्रप्सभक्षणं विधत्ते—**भक्षपरिधीन्-अन्तर्दधते**। येऽमी दधिभक्षाः सन्ति 6.३,४
ते प्राचीनानां सोमभक्षाणामस्कन्दनार्थं क्रियमाणाः परिधय एव। यथा हुतस्य हविषः स्कन्दनपरिहारप्रयोजनतया परिधयः क्रियन्ते। एवं सोमभक्षाणां परिधिस्थानीया एवैते दधिभक्षाः तान् होत्रादयः कुर्युः तेन मनुष्यसंबन्धिना दधिविषयेण भक्षणेन देवसंबन्धिनं सोमभक्षमन्तर्हितं कुर्वन्त्येव। मानुषत्वं चास्येतरवद्धुतावशेषविषयत्वविरहात् देवसंबन्धित्वादेवान्तर्हितत्वं युक्तम्। 'अन्तर्हितो हि देवलोको मनुष्यलोकाद्'[a] इति न्यायानुसारात्।

इदानीं क्रमप्राप्तमवभृतकर्म विधित्सुः प्रस्तौति—**अवभृथः**। विधास्यत 6.५
इति शेषः। अवभ्रियते समाप्यतेऽनेन यागकर्मेति व्युत्पत्त्यावभृथशब्दवाच्यमेतत् कर्म भवति।

तत्र वरुणदेवत्यामिष्टिं विधित्सुराह— **अमुम्-तृतीयसवनेन**। एतदिति 6.६-९
क्रियाविशेषणम्। अमुं दिवि दृश्यमानं जगदखिलं स्वेन तेजसा प्रकाशयन्तमादित्यमेव सवनैर्यष्टारः प्राप्तुमिच्छन्ति प्राप्नुवन्तीत्यर्थः। तथाहि—उदयाद्रेरूर्ध्वं गच्छन्तं सन्तं प्रातःसवनेन प्राप्नुवन्ति। नभसो दिवसस्य मध्ये वर्तमानं सन्तं माध्यंदिनेन सवनेन प्राप्नुवन्ति। अस्ताचलं गच्छन्तमादित्यं तृतीयसवनेन प्राप्नुवन्ति। एवं कालत्रयवर्तिभिः सवनैः कालत्रयवर्तिन आदित्यस्य प्राप्तिरेव ऋत्विग्यजमानैः क्रियते।

ततः किमित्याकाङ्क्षायामवभृथेष्टिं विदधान आह—**स-भवति**। स एष 6.१०
आदित्योऽस्तं गत्वापः प्रविशति। प्रविष्टश्च वरुणशब्दवाच्यो भवति। अद्भिरावृतात्मकत्वात्। अन्धतमसेन जगत आवारकत्वाद् वा। 'अनन्तमन्यद् रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति'[b] इति 'तिरोधायैत्यसितं वसानः शुक्रमा दत्ते अनुहाय जार्यै'[c] इति च मन्त्रवर्णात्॥

इति षष्ठः खण्डः

a. TB. 1. 6. 8. 6.
b. RV. 1. 115. 5.
c. TS. 3. 2. 2. 2.

7.१-४ **तस्माद्–प्रतितिष्ठन्ति ।** यस्मादेष एवादित्यस्तस्मिन् काले वरुणो नाम काचिद्देवता भवति, तस्माद्धेतोरादित्यस्यैव यजनीयत्वाद् वरुणशब्दवाच्यवेषेणादित्यदेवत्या काचिदिष्टिः कर्तव्या । स च पुरोळाश एकस्मिन् कपाल एव श्रप्यत इत्येककपालो भवति । तदेतदेककपालत्वमत्र युक्तम् । यस्माल्लोके क्वचिद् ग्रामादौ प्रायेण बहूनां मध्ये श्रीरेकस्था भवति । एकस्मिन्नेव पुरुषे तिष्ठति । न तु सर्वेषु । इतरे तदुपजीविवृत्तय एव वर्तन्ते । 'तस्मादेको बहूनां भद्रो भवति'[a] इति च लोकगत्यनुरोधि ब्राह्मणम् । वरुणः श्रीरेव; तदधिपतित्वात् । आदित्यादिज्योतिषां तस्मिन्नेव श्रितत्वाच्च । तत् तेनैककपालपुरोळाशनिर्वापकर्मणा यज्ञस्यान्ते श्रियामेव फलभूतायां प्रतिष्ठिता भवन्ति ऋत्विग्यजमानाः ।

अवभृथकर्मणोऽप्यमन्ते कर्तव्यत्वात् तदर्थं देवयजनदेशान्निष्क्रमणे मार्ग-
7.५-११ विशेषमाह—**ते–आप्नोति** । ते यष्टारम् अन्तरेण योगाद् द्वितीया । चात्वालोत्करान्तरालप्रदेशेन निष्क्रमणं कुर्युः । तदेतदन्तरालस्थानमाप्नानमिति प्रसिद्धं यज्ञसंबन्धि तीर्थं भवति । हिशब्दो याज्ञिकप्रसिद्ध्यर्थः । तरणे यज्ञदेशगमने साधनत्वात् तीर्थशब्दवाच्यत्वम् । तथा चाश्वलायनः—'प्रपद्यते पूर्वेणोत्करमपरेण प्रणीताः चात्वालं चात्वालवत्सु' इत्युक्त्वा ब्रवीति 'एतत् तीर्थमित्याचक्षते'[b] इति; कथमस्याप्नानतीर्थशब्दवाच्यत्वम्? प्रमाणाभावात् । प्रसिद्धेश्च केवलाया एवासाधकत्वादिति चेद् उच्यते । न केवलं प्रसिद्धिरेव । कयाचिदृचाप्येतदुक्तम् । अस्या ऋच एषोऽर्थः । अस्य प्रकृतस्य यज्ञस्यान्ये वैदिकप्रसिद्धाश्चतुर्दशसंख्या महिमानो विभूतयो गायत्र्याद्यतिधृतिपर्यन्तानि चतुर्दशच्छन्दांसि सन्ति । तं यज्ञं धीरा मेधाविनः सप्त वषट्कर्तारः वाचा याज्यावषट्काररूपया निष्पादयन्ति । किंच येन मार्गेण देवा यज्ञमागत्य सोमं पिबन्ति तादृशं देवानाप्नुवानम् इह यज्ञे । तरन्ति गच्छन्ति यज्ञमनेनेति व्युत्पत्त्या तीर्थशब्दवाच्यमतिविशिष्टं चात्वालोत्करान्तराललक्षितं स्थानं को ब्रवीति । न कश्चिदपि वक्तुं शक्नोति । अपरिच्छेद्यमाहात्म्यत्वात् । एतेन वै देवा इत्यादितीर्थ-

a. TS. 6. 5. 1. 4. b. AŚ. 1. 1. 4–7.

प्रशंसा। पुरा देवा एतेन तीर्थेन यज्ञं प्राप्यानुष्ठितयज्ञाः सन्तः सर्वानैहिकामुष्मिकत्वभेदभिन्नान् कामान् काम्यान् पशुपुत्रवित्तस्वर्गादीन् प्राप्तवन्तः। तथैवाद्य यजमानः सर्वान् कामानाप्नोति।

तीर्थप्रदेशात् प्रयातानां प्रवृत्तिमाह—**ते-चरन्ति**। आपो यस्यां दिशि 7.१२
भवन्ति। तां दिशमभिलक्ष्य गत्वा तत्रावस्थिताः सन्तस्तेऽवभृथकर्म कुर्युः। न तु प्राचीं दिशमभ्यावृत्येति नियमः। नन्वेतदचतुरश्रमिव प्रतिभाति। प्रागाभिमुख्येनैव कृत्स्नस्य कर्मणः कर्तव्यत्वात्। 'प्राङ् यज्ञस्तायते'[a] इत्यादि श्रवणात्। दैवकर्मणां च प्रागभिमुख्यस्य न्याय्यत्वात्। तस्यामेवाधिष्ठितत्वात्। 'प्राचीं देवाः'[b] इति श्रुतेः। अतोऽयुक्तमिदमुक्तमित्याशङ्कां शमय-
न्नाह—**सा-देवताः**। यस्यां दिशि यजनीया देवता वर्तन्ते सैव दिक् प्राची 7.१३
भवति। नहि प्राच्याः स्वरूपेण देवकर्मसम्बन्धित्वम्, अपि तु देवताधिष्ठितत्वेन रूपेणेत्यत इहापां यजनीयत्वात् तदधिष्ठिताः सर्वा अपि दिशः प्राचीधुरं दधति। अथ वारुण्या इष्टेः पौर्णमासीविकारत्वात् प्रकृतितः प्राप्तेषु पञ्चसु प्रयाजेषु बर्हिर्यागव्यतिरिक्तानां चतुर्णां प्रयाजानां कर्तव्यत्वमाह—**चतुरः-**
**बर्हिष्कम्**। बर्हिर्यागव्यतिरिक्तांश्चतुरः प्रयाजानेव अत्र कुर्यादित्यर्थः। ऋते 7.१४
बर्हिष्कम् इत्येतत् स्फुटयति—**बर्हिष्मन्तमुत्सृजति**। बर्हिर्नामयुक्तं प्रयाजं 7.१५
त्यजेदित्यर्थः। कुत इत्यत आह—**न-भवति**। गतम्। 7.१६-१८

पक्षान्तरमाह—**अप्सुमन्तौ-कुर्वन्ति**। 'अप्स्वग्ने'[c] 'अप्सु मे सोमो'[d] 7.१९
इत्येतावप्सुशब्दयुक्तावाज्यभागौ केचिच्छाखिनः कुर्वन्ति। स्वमतमाह—
**वार्त्रघ्नौ-स्थितौ**। 7.२०

वरुणदेवत्यामिष्टिं विधत्ते—**अथ-प्रीणाति**। तत् तेन स्वीय एव स्थाने। 7.२१,२२
वरुणस्य ह्यापः स्थानम्, 'समुद्रे ह्यन्तर्वरुणः'[e] इति श्रुतेः। प्रकृतितः प्राप्त-
स्विष्टकृद्देवतापवादेन देवतान्तरं विधत्ते—**अथ-भवति**। स्विष्टकृद्यागे अग्ने- 7.२३,२४
र्यागेऽग्निः सर्वहविर्भागवान् भवति। वरुणयागेऽप्यग्नेर्भागवत्ता सेत्स्यति। स्विष्टकृतः सर्वयागार्थत्वादित्यर्थः।

a. KB. VII. 7. १२.
b. TS. 6. 1. 1. 1.
c. RV. 8. 43. 9.
d. RV. 1. 23. 20.
e. TS. 6. 6. 3. 4.

7.२५-२८ **द्वौ-प्रवृणजानीति** । उक्तार्थमेतत् । प्रजाहेतुत्वाद् बर्हिर्यागस्य प्रजारूपत्वम् । तच्च 'बर्हिषा वै प्रजापतिः प्रजा असृजत'[a] इति श्रवणात् । नेत् परिभये । प्रजां पुत्रपौत्रादिलक्षणाम् अप्सु विषये विनाशयानीति एवं परिभयेन बर्हिर्यागं न कुर्यात् । करणे सति प्रजानामब्निबन्धनो विनाशो भवेत् ।

प्रयाजानामनुयाजयोश्च मेलने सति संख्याया स्तुतिः [1-]'ते वै षड् भवन्ति, षड् वा ऋतवः, ऋतूनेव तत् प्रीणाति'[-1] इति । चत्वारः प्रयाजाः द्वावनुयाजौ संभूय षड् भवन्तीति । व्यक्तमन्यत् ॥

इति सप्तमः खण्डः

अथानेनैव प्रयाजानुयाजसंख्याप्रशंसाप्रसंगेन सोमयागनिविष्टानां सर्वेषा-
8.१ मेव प्रयाजानुयाजानां समुदितां संख्यां स्तौति—**त-भवन्ति** । ते सोमयागनिवेशिनः तदङ्गभूतदीक्षणीयादिवर्तिनः प्रयाजाश्चानुयाजाश्च मिलिताः सन्तः एकाधिकशतसंख्या भवन्ति । कथं पुनर्मिलितानामेषामेकशतसंख्यत्वमिति जिज्ञासमानेभ्यो ब्रूमः—

पत्नीज्याशंय्विळान्तेष्टिषु तिसृषु गता विंशतिस्त्वेकयुक्ता
दीक्षासुत्यानुबन्ध्यापशुषु च समुदायेन षट्षष्टिरिष्टाः ।
षड् वारुण्यामथात्रावभृथ उदयनीयेष्टिभाजोऽपि चाष्टा-
वित्थं संहृत्य सैकं शतमिति गणिताः सानुयाजाः प्रयाजाः ॥

तथा हि—दीक्षणीयेष्टौ तावद् यथाप्रकृति पञ्च प्रयाजास्त्रयोऽनुयाजा इति संभूयाष्टौ प्रयाजानुयाजाः सन्ति । पत्नीसंयाजान्तत्वात् । प्रायणीयायां शंयुवाकान्तायामपि तथैव । शंयुवाकस्यानुयाजोत्तरकालीनत्वात् । आतिथ्यानां तु प्रयाजा एव नानुयाजा इळान्तत्वात् । तस्यानुयाजार्वाचीनत्वात् । तेन पञ्च प्रयाजा एव । इत्थमिष्टित्रये मिलित्वैकविंशतिः । अग्नीषोमीयपशौ द्वाविंशतिः । प्रयाजानामनुयाजानां च क्रमेण प्रकृतिसकाशायातयोः पञ्च-

a. TS. 1. 7. 4. 1.

1-1. This is the additional text according to C.

त्रिसंख्ययोरपवादेन प्रत्येकमेकादशसंख्यत्वविधानात् । एवं सति पूर्वैः सह त्रिचत्वारिंशत् । सवनीयेऽपि द्वाविंशतिरिति पञ्चषष्टिर्भवति । वारुण्यामिष्टौ षट् । पूर्वैः सहैकसप्ततिः । उदयनीयायां प्रायणीयायामिवाष्टावित्येकोनाशीतिः । अनूबन्ध्यायां द्वाविंशतिरित्येकाधिकं शतं प्रयाजानुयाजाः संपद्यन्त
इति । तत्र शतसंख्यामेकसंख्यां चावयुत्य स्तौति—**शतायुः-आत्मा** । पुरुषः ४.२,३
कार्यकरणसंघातविशिष्टो भोक्ता । पुरि देहे शेत इति व्युत्पत्तेः । 'पुरिशयं पुरुषम्'[a] इति श्रुतेः । तस्यैव शतायुष्ट्वादिसंभवाच्च । शतायुरिति प्रायेण प्राप्तस्यानुवादः । आयुर्जीवनावस्था । वीर्यं बलम् । इन्द्रियं शुक्लम् । शतशब्दोऽयं बहुनामसु 'उरु तुवि पुरु'[b] इत्यत्र पठितः । अतो बहुवीर्येन्द्रियत्वमितरप्राण्यपेक्षयोक्तम् । यस्तु शतसंख्यामुपगत एकशततमोऽनुयाजः स आत्मा यजमान इति द्रष्टव्यम् । ततश्चानेनैकशतसंख्यकप्रयाजानुयाजसमुदायेनैनं यजमानरूपमात्मानं शतसंख्यायुर्वीर्येन्द्रियसमृद्धं करोतीत्यर्थवादार्थशेषोऽर्थात् सिद्धो भवति ।

अथाल्पे कर्मणि महाकर्मसंपत्तेर्महाफलतां मन्यमानः कथितसंख्यप्रयाजानुयाजकर्मसमुदाये अङ्गिरसामयननाम्नः कस्यचिद् गवामयनविकृतिभूतस्य
संवत्सरसत्रस्य संपादनं करोति—**तद्-आप्नोति** । अल्पे कर्मणि महाकर्म- ४.४,५
संपत्तिश्च 'एष वै हविर्धानी यो दर्शपूर्णमासयाजी'[c] 'घर्मो वा एष प्रवृज्यते यदग्निहोत्रम्'[d] इत्यादि वेदेषु बहुलमुपलभ्यते । तदेतदुक्तसंख्यं कर्मजातमङ्गिरसामयनाख्यं सत्रकर्मेति प्रतिपत्तव्यम् । तत्स्वरूपं च सूत्रकारेणोक्तम्—'अङ्गिरसामयने त्रिवृदभिप्लवः पृष्ठ्यारम्भणान् मासानुपयन्ति । पृष्ठ्योदयानुत्तरस्मिन् आयुर्गौ समानमन्यदादित्यानामयनेन'[e] इति । स यजमान एतेनाङ्गिरसामयनेन प्रतिपद्य । तृतीयाद्वयं द्वितीयार्थे । अङ्गिरसामयनं नाम सत्रमनुष्ठाय अङ्गिरोनाम्नां देवानां सालोक्यं समानभोगभूमितां सायुज्यं समानदेहतां चाप्नोति ।

अथावभृथेष्टिगतवषट्कारसमुदायम् आदित्यानामयनात्मतां संपाद्य

a. PraśU., 5. 5.
b. *Nighanṭu*. 3. 1.
c. TS. 2. 5. 6. 3.
d. KB. II. 1. १.
e. ŚŚ. 13.22.1-6. ( varies from Pr. edn. )

४.६-८ स्तौति—**अथ-आप्नोति**। वारुण्यामिष्टौ वषट्काराः षट्संख्या अष्टसंख्या वा भवन्ति। तथा हि—वारुण्यामिष्टौ चत्वारः प्रयाजा द्वावाज्यभागौ वारुणं हविः स्विष्टकृद्यागोऽनुयाजाविति दश यागाः पूर्वं विहिताः। तत्पक्षानुरोधेनैव चैकशतं प्रयाजानुयाजा इति संख्यास्तुतिः प्रवृत्ता। तत्राज्यभागानुयाजवर्जितेयमिष्टिः कर्तव्येति कंचित् पक्षं वेदोऽभिप्रेत्य। तत्र पक्षे षड् वषट्कारा भवन्ति। चत्वारः प्रयाजाः हविः स्विष्टकृदिति। अथवा स्विष्टकृदन्ता इयमिष्टिः। अत्राज्यभागयोरनिवृत्तिः। अनुयाजयोस्तु निवृत्तिः। अमुं पक्षं हृदये निधायाष्टौ वषट्कृतय इत्युक्तम्। एवमनेन द्वौ पक्षौ ध्वनितौ। इतरस्तु कण्ठत एव प्रदर्शितः इत्यस्यामिष्टौ त्रयः पक्षा इह प्रसिद्धा भवन्ति। अत एव भगवान् सुयज्ञाचार्योऽसूत्रयत्—'प्रयाजादिर्वानुयाजान्ता स्विष्टकृदन्ता वा आज्यभागौ वा परिहाप्यानुयाजौ च'[a] इति। आदित्यानामयनं गवामयनप्रकृतिकः कश्चित् सत्रविशेषः। तत्स्वरूपं दर्शितं सूत्रकृता—'आदित्यानामयने। त्रिवृत्पञ्चदशावभिप्लवस्तोमौ पूर्वस्मिन् पटले। पञ्चदशत्रिवृता उत्तरस्मिन्। मध्येपृष्ठ्याश्च मासाः। षष्ठे मासि पृष्ठ्यचतुर्थाविभिप्लवावुपेत्य नवरात्रम् अभिजितः स्थाने बृहस्पतिसवम्। इन्द्रस्तोमं विश्वजितः। पृष्ठ्यमुपेत्याभिप्लवं च पृष्ठ्यानन्तरं व्यूळ्हच्छन्दसं दशरात्रम्। त्रिवृत्स्तोममग्निष्टोमसंस्थम्। उद्भिद्बलभिदौ च। मध्येपृष्ठ्यांश्चतुरो मासानुपेत्य द्वादशे मासे मध्येपृष्ठ्यावभिप्लवावुपयन्ति। गोआयुषी। छन्दोमदशाहं च'[b] इति। गतमन्यत्।

यद्यप्यवभृथकर्मविध्यनन्तरम् अनुष्ठानक्रमानुरोधेन उदयनीयेष्टिर्विधातुमुचिता, तथापि तस्याः प्रायणीयासमानविध्यन्तत्वेन तत्प्रकरण एव विहितत्वात् पुनर्विधानस्य च प्रयासमात्रफलत्वात् तदनन्तरकरणीयमनूबन्ध्यापशु-
४.९ कर्म विधित्सुः प्रस्तौति—**अनूबन्ध्या**। विध्यादिभिर्वक्ष्यत इति शेषः। कर्त-
४.१०-११ व्येति वा। स्तौति—**चतुर्थम्-भवति**। अनूबन्ध्येति यदस्ति तदेतच्चतुर्थं किंचित् सवनमेव भवति। त्रीणि हि सवनानि प्रसिद्धानि। इदं तत्र चतुर्थम्। अनेन तत्तुल्यानुभावित्वं दर्शितम्। यथा द्वितीयोऽयं भास्कर इत्युक्ते भास्करसदृशोऽयमिति प्रतीतिर्भवति। यस्मादस्य सवनतुल्यकक्ष्यत्वं तस्मादयं पशु-

a. ŚS. 8. 11. 10-12.　　b. ŚS. 13. 21. 1-13. (Pr. edn. varies.)

रच्युतो नित्यो भवति । प्रातःसवनादिवत् । अथवा इयमनूबन्ध्या अच्युता उ एव भवतीति । अच्युता भवतीति पाठे तु न क्लेशः । **चतुर्थम्-सवनानाम्** । ४. १२
यस्मादेतच्चतुर्थं सवनं तस्मादिति पूर्वेणान्वयः ।

अस्या द्विदेवत्यतामाह—**सा-सभारतायै** । सानूबन्ध्या । मित्रावरुणदेवत्या ४.१३-१६
भवति । यस्माद् यज्ञस्य सौत्यस्य कर्मणः पूर्वमौपवसथ्येऽहनि कृतः पशुरग्नीषोमदेवत्यो भवति, तस्माद्धेतोः परस्तात् क्रियमाणानूबन्ध्या मित्रावरुणदेवत्येत्येतद् युज्यते । द्वयोरपि द्विदेवत्यत्वसिद्धेः कुतो वा तयोस्तौल्यनियम इति चेत् , यज्ञस्यादौ ह्यग्नीषोमीयो द्विदेवत्यः पशुः । इयमनूबन्ध्यान्ते क्रियमाणा यद्येकदेवत्या क्रियेत तदा यज्ञस्यैकस्मिन् भागे भारोऽधिको भवेत् । ततश्चातुल्यभारभागद्वयस्येव वीवधदण्डस्य यज्ञस्य भ्रेषः प्रसज्येत । तत्परिहारार्थं समानभारता एतेन द्विदेवत्यतासंपादनेन क्रियते । तस्मादस्या द्विदेवत्यत्वमुपपन्नम् ।

इतोऽपि मित्रावरुणदेवत्यत्वं युक्तमित्याह—**अथ-अनुलब्ध्यै** । अत्रेति ४.१७-२०
सप्तम्यन्तशब्देनावभृथेष्टिः परामृश्यते । अत्र वारुणे यागे मित्रो देवता हीनश्च्युतो भवति । केवलवरुणदेवत्यत्वात् । यस्मात् सर्वत्र सहचारिणोर्मित्रावरुणयोर्मध्ये तत्र वरुणस्यैव स्वीकारः तस्मादत्रानूबन्ध्या मित्रावरुणोभयदेवत्या युक्ता । तथा सति हि मित्रस्य देवताया अपि भागभाक्त्वकरणेन पूर्वं जातो मित्रपरित्यागदोषः परिहृतो भवति । अत्र केचित्—'अथ यदप्सु वरुणं यजति । अत्र मित्रो हीनो भवति । तस्मान्मैत्रावरुणी भवति । मित्रस्यैवानुलब्ध्यै' इति पठन्ति । तत्र सुगम एवायमुक्तोऽर्थः ।

प्रसंगात् पशुसामान्यविषये मरणनिमित्तसद्भावे कर्तव्यविशेषमाह—**अथ-कारयेत्** । आवीत उपाकरणार्थमानीतः न चोपाकृतः । अस्मिन्नन्तराले मृतिं ४.२१-२२
प्राणवियोगं प्राप्नुयात् । तर्हि तं पशुमनुपाकृतत्वादेवर्त्विगर्थं कारयेत् । न तेन प्रचरेत् । अपि तु अन्यं तद्रूपं पशुमालभ्य तेन प्रचरेत् । तथा च सूत्रितम्—'आनीते पशौ मृतेऽनुपाकृतेऽन्यमालभेतर्त्विग्भ्यस्तं कारयेद्'[a] इति । उपाकृतपशुमरणे निमित्ते कर्तव्यमाह—**अथ-आलभेरन्** । अथोपाकृत्यनन्तरं मृते सति । ४.२३

a. ŚŚ. 13. 2. 1.

अन्यं तद्रूपम् । यद्रूपो यद्देवत्यः पशुः पूर्वस्तद्रूपं तद्देवत्यम् । यद्वर्णः पूर्वस्तद्वर्णं पशुमालभेत ।

८.२४,२५ **तम्–कर्षयेयुः** । तं यूपे बद्धं पशुमाप्रीसंज्ञाभिः ऋग्भिः संस्तुतं पर्यग्निकरणसंस्कृतं च संज्ञपनार्थमुदग्दिगभिमुखं संज्ञपनदेशं नयेयुः । तस्य नीयमानस्य पशोरनुगन्तृत्वेन इतरमुपाकृत्यनन्तरमृतं पशुमप्याहरेयुः । अनुपाकृतमृतपशोः ऋत्विगर्थतया विनियोगात् । तथा च वृत्तिकृद्वचनम्—'उपाकृतस्य चायं विनियोगो वचनाद्'[a] इति ।

८.२६-२९ **तयोः–जाघन्यौ** । संज्ञप्तस्य स्वयं मृतस्य च पशोः पृथक् पृगग्वपोद्धरण-
श्रपणावदानानि कृत्वैकस्मिन्नेव वषट्कारे द्वे वपे जुहुयुः । पशुपुरोळाश-
योरपि पृथक् पृथक् श्रपणावदाने एकस्मिन्नेव वषट्कारे होमः । तथा
हविषोऽपि । एवमेव तृतीयगुदसाध्यस्विष्टकृद्यागेऽनयोः[1] श्रपणावदाने पृथक्
पृथक् भवतः । होमस्तु सह भवति । जाघनीसाध्येषूपयाजेष्वप्ययं विधिर्द्र-
ष्टव्यः । एवं तावदनुपाकृत उपाकृते च पशौ मृते विधिरुक्तः । इदानीमुपा-
८.३०-३३ कृतमृतपशुविषये क्वचन स्थले प्रतिप्रसवमाह—**यदि–दधाति** । तुशब्दो विशे-
षार्थः । यद्युपाकृतो मृतः पशुर्मरणात् पूर्वं दैवगत्या आप्रीसूक्तगतयैकया-
प्याप्र्या ऋचा प्रीतोऽभवत् , तदनन्तरं मृतश्च स्यात् न तर्हि प्रागुक्तो विधिः ।
किंतु तेनैव मृतपशुना कर्म कुर्यात् । कुत इति चेत् , यस्मादाप्रचः प्राणा एव
तस्मात् ताभिराप्रीतत्वे सति प्राणवत्त्वान्मृतत्वमेव पशोर्न भवति । कुतोऽन्या-
लम्भनमित्यर्थः ॥

इत्यष्टमः खण्डः

इत्थं पशुसामान्यमुपसंक्रम्य नैमित्तिककर्मविधिरुपदर्शितः । इदानीं प्रकृतामेव मैत्रावरुणीमनूबन्ध्यामधिकृत्य किंचिन्नैमित्तिकं कर्म चोद्यपूर्वकं दर्शयति—

a. *Bhāṣya* on ŚŚ. 13. 2. 8. ( Vol. II, p. 177. )

1. T. तयोः अनयोः

**अथ-अरक्षोहतम्।** यद्युपाकृतानूबन्ध्या अष्टापदी गर्भिणी वस्तुतः स्यात् तदा 9. १-५
कथं प्रचार इति चोद्यम्। इत्थं स्यात्। गर्भसंबन्धिनी या त्वक् तस्या वपाकारमंशं फलीकरणान् मध्यमांस्तण्डुलान् गर्भं च। इति शब्दः चकारार्थे। एवं वपापुरोळाशहवींषि शामित्राग्नौ शृतानि कृत्वा वपाप्रधानस्विष्टकृदादेराहुतिजातस्य वषट्कारेषु शामित्राग्नावेवोपजुहुयुः। वषट्कारेष्वित्येव केषांचिदाम्नायः। तस्मिन् पक्षे न विभक्तिवचनव्यत्ययकल्पनाक्लेशः। किमर्थमेवं क्रियत इति चेत्, एतदेतस्मिन् अष्टापदीत्वलक्षणे निमित्ते सति यज्ञं रक्षांसि प्राप्तानि भवन्ति। छिद्रान्वेषीणि हि रक्षांसि। तथा चान्यत्र श्रूयते—'रक्षांसि वा एतत् पशुं[1] सचन्ते। यदेकदेवत्य आलब्धो भूयान् भवति'[a] इति। एवं सति यदत्रास्मिन् अष्टापदीत्वनिमित्ते सत्येतादृगुक्तप्रकारं कर्म भवति, तेन कर्मणा तानि यज्ञास्कन्दीनि रक्षांस्यपहन्ति। तथा च तत् पशुकर्मारक्षोहतं भवतीति शेषः। विपक्षे रक्षोहतत्वापत्तिरर्थात् सिद्धा।

एवं नैमित्तिकं प्रायश्चित्तरूपं कर्म विधाय पशुकर्मोपसंहारपूर्वकं विकल्पेन
पशोः स्थाने पयस्यां विधत्ते—**एवं-पयस्या।** यद्यनूबन्ध्या पशुर्भवति तदा 9.६,७
तावदेवं भवति। यथा चतुर्थमेवैतदित्यादिना प्रागुक्तम्।

अथ पुनरनूबन्ध्या न पशुः किं तु पयस्या तदाप्येवमेव। न विशेषः
कश्चित्। पयस्यायां मित्रावरुणदेवत्यतां स्तौति—**एतद्-स्थिता।** पयस्येति 9. ८,९
यदस्ति तदेतन्मित्रावरुणयोरात्मीयमसाधारणं हविर्भवति। यस्मात् स्तुतौ प्रैषे 'मित्रावरुणयोः पयस्या'[b] इति श्रूयते। 'मित्रावरुणयोः पयस्येति ह स्थित' इति केचित् पठन्ति। सिंहावलोकितन्यायेन पुनरनूबन्ध्यापशुपक्षमुपसंक्रम्य
वपाया गोजातीयतां स्तौति—**अथ-भवति।** गोजातीयः पशुर्गोपशुः। गवो- 9.१०-१२
पलक्षितौ सन्तौ संस्तूयते इति गोसंस्तवौ। तथा च तैत्तिरीये मित्रावरुणयोर्गोप्रतीश्वरत्वमाम्नायते—'मनुः पृथिव्या यज्ञियमैच्छत्। स घृतं निषिक्तमविन्दत्। सोऽब्रवीत् कोऽस्येश्वरो यज्ञेऽपि कर्तोरिति। तावब्रूतां मित्रावरुणौ।

a. TS. 3. 4. 1. 1. b. MS. 3. 10. 6.

1. MSS. यज्ञं

गौरेवावमीश्वरौ कर्तोः स्व इति। तौ ततो गां समैरयताम्'[a] इति। **अथ-**
9.१३-१५ **दधाति**। गतमेतत्।

9.१६,१७ तत्र वपायागे याज्यां विधत्ते—**युवं-रूपम्**। अत्र पीवसेति पदस्यैकदेश भूतो वसाशब्दो वपायागावद्योतक इति तत्कृतमाभिरूप्यमस्याः सिध्यति।

9.१८,१९ पुरोळाशयागे याज्यां विधत्ते—**यद्-पुरोळाशः**। अत्र बंहिष्ठमिति तावत् पदमस्ति तच्च क्रियमाणकर्मावद्योतकम्। यस्मात् पुरोळाशो बहुल एव भवति। बंहिष्ठशब्दश्चातिशयितबहुत्ववाची। अतः पुरोळाशगतबहुरूपत्वाव-
9-२०,२१ द्योतकत्वादाभिरूप्यं सिद्धम्। अथ हविषो याज्यां विधत्ते—**प्र-रूपम्।** अत्र। बाहवेति शब्दस्याङ्गरूपहविरवद्योतकत्वादाभिरूप्यमस्याः सिद्धयति। एवं वपापुरोळाशहविर्यागेषु याज्याः क्रमाद् विहिताः। पुरोनुवाक्यास्त्विह सिद्ध-वत्कृताः सूत्रतो द्रष्टव्याः। तथा च सूत्रम्—'आ वां मित्रावरुणा तत् सु वां मित्रावरुणा नो मित्रावरुणेति पुरोनुवाक्याः'[b] इति।

9.२२,२३ अथ देवयजनदेशादुदगेत्यावस्थानं विधत्ते—**उदङ्-जीवलोकः**। यस्मा-दुदीच्यामेव दिशि प्रायेण जीवलोको भवति। बाहुल्याभिप्रायमेतत्। तस्मा-दुदीच्यां दिश्यवस्थानमुपपद्यत इति। तत्र विष्णुदेवत्यां कांचित् पूर्णाहुतिं
9.२४-२६ **विधत्ते—उदङ्-आरभते**। विष्णोर्यज्ञरूपत्वमुक्तम्। तेन पूर्णाहुतिकर्मणा यज्ञस्यान्ते पुनर्द्वितीयं यज्ञमारभत एव।

9.२७-२९ अथोदवसानीयाख्यामिष्टिं विधत्ते—**पञ्चकपालः-आप्त्यै**। गतमेतत्। पञ्चकपालपक्षे पौनराधेयिकं तन्त्रं भवति। तथा च सूत्रम्—'पञ्चकपाले
9.३०,३१ पौनराधेयिकीष्टिः'[c] इति। पक्षान्तरे त्वाह—**यद्यु-एव**। अत्र वार्त्रघ्नावे-वाज्यभागौ भवतः। पञ्चकपालपक्षे यथा पौनराधेयिकं तन्त्रं न तथाष्टाकपाल-पक्ष इत्येवकारः। एतच्च प्रतिष्ठाफलाय संपद्यते। यस्मात् पौर्णमासः प्रतिष्ठा-रूपः तत्र मासानां समाप्तत्वात्।

9.३२,३३ एनामुदवसानीयेष्टिं पुनराधेयसंपादनेन स्तौति—**इदं-व्यतिषक्ताः**।

a. TS. 2. 6. 7. 1.
b. ŚS. 8. 12. 7.
c. ŚS. 8. 13. 5.

'अग्ने तमद्य'[a] इत्याद्याः पदपङ्क्तिच्छन्दस्काः पुनराधेयवद् व्यतिषक्ताश्च भवन्तीति यदेतत् प्रत्यक्षं साक्षात् प्रत्यक्षतया स्फुटं दृश्यं रूपं भवति ।

उदवसानीयेष्ठ्यनन्तरमेव सायंतनहोमविधानाय यजमानस्याग्निहोत्र-
9.३४-३६ होमं विधत्ते—**तस्यां-इति** । तस्यामुदवसानीयेष्टौ संस्थितायां सत्याम् अनन्तरमेव । 'अथ यदेवैषोदवसानीयेष्टिः संतिष्ठते । अथ सायमाहुतिं जुहोति । काल एव प्रातराहुतिम्'[b] इति शतपथब्राह्मणे दर्शनात् । यजमानः, न पूर्ववदध्वर्युः । सूत्र्यते हि—'संस्थितायां सायमग्निहोत्रं जुहोति'[c] इति । एतदप्यग्न्याधेयरूपम् । यस्मादग्न्याधेयकर्मण्यपि समाप्तेऽग्निहोत्रहोमः, तस्मात् कारणात् तस्यामुदवसानीयेष्टौ समाप्तायां यजमानेनाग्निहोत्रहोमः कर्तव्य इति । इति शब्दोऽयं 'वाग्दीक्षा'[d] इत्यादिनोपक्रान्तस्य चतुःसंस्थस्य ज्योतिष्टोमस्य समाप्तिं द्योतयति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति नवमः खण्डः

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायो विहिताश्विनोक्थविततिः कौषीतकिब्राह्मण-
व्याख्याने कथयन् मखावधिविधिं प्रातिष्ठताष्टादशः ॥

## इति कौषीतकिब्राह्मणव्याख्याने द्वितीयदशके अष्टमोऽध्यायः

a. RV. 4. 10. 1.
b. ŚB 4. 5. 1. 16.
c. ŚS. 8. 13. 6.
d. KB. VII. 1. १.

अथ

## एकोनविंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

या सोमयागोदितयात्ममूर्त्या
विभात्यहीनादिभिरुल्लसन्ती ।
विशुद्धगोपृष्ठविशेषसंस्था
ज्योतिर्मयी सास्तु कला श्रिये वः ॥

कारुण्यजह्नुकन्यावारिण्यवगाह्य संप्रति गुरूणाम् ।
मोहं विधूय पङ्कं सोऽहं सत्रादिगोचरेऽपि यते ॥

एवं तावदनुष्ठानपौर्वापर्यानुरोधतः ।
अग्निद्वाराग्निहोत्राद्यैरशेषैः श्रुतिचोदितैः ।
कर्मभेदैरपेक्ष्यत्वात् प्रथमोपनिपाति यत् ।
तदग्न्याधेयकर्मानुगता होतृविधिस्पृशः ।
पवमानेष्टयस्तावदादावध्याय आदिमे ।
विहितास्तत्प्रसंगात्तु तत्रैव पुनराहितिः ।
अग्निहोत्रं दर्शपूर्णमासेष्टीष्टचयनान्यथ ।
चातुर्मास्यान्यथो शूलगव इत्येवमुत्तरैः ।
द्वितीयादिभिरध्यायैः षष्ठान्तैर्विहिताः क्रमात् ।
द्वितीयादिकया पञ्चाध्याय्यादावित्थमीरिताः ।
हविर्यज्ञाः सप्तविंशत्यध्याय्योत्तरया पुनः ।
विधीयन्ते सोमयज्ञा अनुष्ठानक्रमाश्रयात् ।

सप्तमादिभिरध्यायैः[1] तत्राप्यष्टादशान्तिमैः ।
निःशेषसोमयागानामेकाहादिभिदाजुषाम् ।
प्रकृतिः स चतुःसंस्थो ज्योतिष्टोमः प्रदर्शितः ।
प्रकृत्यवगतावेव विकृतिः सुग्रहा यतः ।
नाज्ञातहेम्नः सुज्ञानं कटकादि स्वलक्षणम् ।
न चाज्ञातपलाशादेः पुरुषस्य हि यूपधीः ।
विना न चाग्नौ यतनं धूमे यत्नस्तदर्थिनः ।
प्राथम्यं तद्विधेस्तस्मात् प्रकृतित्वादिहाश्रितम् ।
इष्टचाद्यपेक्षया यद्वत् पौर्णमासादिकर्मणः ।
चतस्र एव संस्थाः स्युः प्रकृतिर्नेतरा इति ।
तासां प्रकृत्यधिकृतावनुक्तिरिति वर्णितम् ॥

अग्निष्टोमो हि मूलप्रकृतिरविकृतिश्चैष तिस्रोऽथ संस्थाः
षोळश्युक्थ्यातिरात्राः प्रकृतिविकृतयः संमता वेदविद्भिः ।
अप्तोर्यामादिसंस्थास्त्वथ[2] विकृतय एवापरास्तिस्र इष्टाः
प्राकृत्यां प्रक्रियायामितरवदत एवेह ता नोपदिष्टाः ॥

विहिता द्वादशाध्याय्या वाग् दीक्षेत्याद्यया पुरा ।
प्रकृतिर्विकृतिं वक्तुं ते वा इत्यादिका श्रुतिः ।
विकृत्यात्मा सोमयागस्त्रिविधस्तावदिष्यते ।
एकाहाहीनसत्रात्मभेदाद् वेदानुसारिभिः ।
तत्रैकाहा एकसुत्यापवर्गा उद्भिदादयः ।
अहीना द्वादशाहान्ता द्वचहाद्या ये त्वहर्गणाः ।
सत्राणि द्वादशाहादीन्युभयात्मा त्वसौ मतः ।
अहर्गणानां कृत्स्नानां सत्राहीनभिदायुजाम्[3] ।
अहर्गणो द्वादशाहसंज्ञः प्रकृतिरिष्यते ।
आसीरन्निति वोपेयुरिति वा यत्र चोदना ।
बहुयष्टृत्वनियम ऋत्विजां यजमानता ।

1. T. ···ष्विष्ठान्तैर्विहिताः क्रमात् 2. T. संज्ञा for संस्था

3. V. अहीनादि for सत्राहीन

सत्रत्वगमकान्येतान्युदितानि मनीषिभिः ।
यजमानबहुत्वस्थो विकल्पो यजतिश्रुतिः ।
यजमानर्त्विजां भेद इत्यहीनत्वलक्षणम् ।
द्विविधानि च सत्राणि रात्रिनामानि कानिचित् ।
सांवत्सराणि कतिचित् द्वादशाहात् पराणि तु ।
शतातिरात्रादर्वाक्चि रात्रिसत्राणि तानि हि ।
तेषां तावद् द्वादशाहः प्रकृतिः स्यादहर्मितेः ।
गवामयनसंज्ञं तु सत्रं[1] सांवत्सरं तु यत् ।
तस्यापि द्वादशाहः स्याद् दीक्षाद्वादशतादितः ॥
गवामयनमेव स्यादादित्याद्यङ्कितायने ।
सांवत्सरिकसत्रत्वसामान्यादिति निर्णयः ।
द्वादशाहप्रकृतयः सत्राहीनास्तु यद्यपि ।
तथापि मूलप्रकृतिर्ज्योतिष्टोमश्चतुर्गतिः ।
एकाहानां पुनः साक्षात् स एव प्रकृतिर्मतः ।
तथा हि प्रायणीयादिरहःसंघो व्रतावधिः ।
ज्योतिष्टोमस्य विकृतिश्चतुःसंस्थस्य संमतः ।
प्रायणीयोऽतिरात्रः स्यादुक्थ्योऽग्निष्टोम एव वा ।
चतुर्विंशं तु षळहे प्रथमान्त्यावभिप्लवौ ।
अग्निष्टोमावुक्थ्यसंस्थाश्चत्वारस्त्वान्तरालिकाः ।
पृष्ठ्योऽग्निष्टोम आद्यः स्याच्चतुर्थः षोळशी परे ।
उक्थ्या भवेयुरभिजिदग्निष्टोमस्तथोक्थ्यकाः ।
स्वरसामान उदिता अग्निष्टोमान्त इष्यते ।
विषुवान् विश्वजिच्चोक्थ्याश्छन्दोमा दशमं त्वहः ।
महाव्रतं चाग्निष्टोमावित्येवं पञ्चविंशतिः ।
एतान्यहानि विकृतिर्ज्योतिष्टोमस्य तैः खलु ।
एकाहाहीनसत्राणां निष्पत्तिस्तेन युज्यते ।
ज्योतिष्टोमविकारः स्यात् सत्रादिरिति भाषितम् ।

1. T. omits

दिङ्मात्रमेतदुदितं ग्रन्थविस्तरतो भयात् ।
मन्दानां प्रतिबोधाय विषयस्य विशुद्धये ।
तत्र तावद् विधेयेषु सत्रादिष्वखिलेष्वपि ।
गवामयनसंज्ञं यत् पञ्चविंशत्यहोमितम् ।
सांवत्सरिकसत्रं तदत्र तावद् विधीयते ।
मध्ये च द्वादशाहस्य विधानमिह कल्पितम् ।
अस्मादेवान्यसंसिद्धिमभिप्रेतवती श्रुतिः ।
लोकवल्लाघवन्यायो वेदेनापि हि गृह्यते ।
पञ्चविंशत्यहोभिर्हि कृत्स्नाहर्गणकल्पना ।
शृङ्गग्राहितया नापि निर्देश इह शक्यते ।
आनन्त्यात् कर्तुमेकस्यां शाखायामत एव च ।
सर्वशाखाप्रत्ययत्वमिष्टमेकस्य कर्मणः ।
एकस्यामेव शाखायामशेषाङ्गोपसंहृतिः[1] ।
नैव कल्पयितुं शक्या ह्येकस्यापीह कर्मणः ।
सत्येवं किमु वक्तव्यं विधाने सर्वकर्मणाम् ।
ते वा इत्यादिका तस्माद् गवामयननामकम् ।
सत्रं सांवत्सरं वक्तुमत्र प्रववृते श्रुतिः ॥

तत्र तावद् गवामयनाख्यं संवत्सरसत्रं पञ्चविंशत्यहर्विधानमुखेन विधित्सुरादौ तदङ्गभूतमग्निचित्यासंयुक्तदीक्षातः पूर्वमग्निहोत्रशालाप्रयोज्यं तदुपरितनदीक्षोपसदुपवसथाहःसु प्रयोज्यं च वैशेषिकं कर्म क्रमेण विधत्ते— 'ते वै दीक्षिष्यमाणा' इत्यारभ्य 'मुखं वा एतत् संवत्सरस्य यच्चतुर्विंशः'[a] इत्यतः प्राक्तनेन वाक्यसन्दर्भेण । तत्र सत्रिणां सत्राङ्गभूतदीक्षाहात् पूर्वं
प्रातिस्विकानामग्निहोत्राग्नीनामेकीभावेन विधानं विधत्ते—**ते-संनिवपन्ते** । 1. १
सत्राख्यं कर्म कर्तुं प्रथमं तदङ्गभूतां दीक्षां करिष्यन्तस्ते सत्रिणो यजमानाः स्वान् स्वानग्नीन् पृथक् पृथक् स्थितानेकीभावेन निदध्युः । वैशब्दोऽयं प्रक-

a. KB. XIX. 5. ९.

1. T. अंश for अङ्ग

रणान्तरत्वात् तुशब्दावद्योत्ये विशेषे वर्तते। सत्रार्थमग्नीनां संनिवाप इत्येतत् कुतोऽवगम्यत इति चेत्, प्रकरणाद् दीक्षिष्यमाणा इति बहुवचनलिङ्गाच्च। नहि दीक्षितबहुत्वं सत्रादन्यत्रावकल्पते। तत्र दीक्षितयजमानानामेवार्त्विज्य-पदार्थकर्तृत्वं[1] श्रूयते—'ये यजमानास्त ऋत्विजः'[a] इति। श्रुत्यन्तरे च विस्पष्ट-मेव सत्रार्थत्वमग्निसंनिवापस्य श्रूयते—'सत्रमु चेत् संन्युप्याग्नीन् यजेरन्'[b] इति।

1. २ स्तौति—**एकधैव-दधते**। तेनाग्निसंनिवपनकर्मणा यजमाना बलं वीर्यं च सांवत्सरिकसत्रनिर्वहणोपयोगितया एकप्रकारप्रवृत्ततया आत्मन्नात्मनि स्था-पयन्त्येव। एकीभूतबलवीर्यास्ते निष्प्रतिबन्धमेव संवत्सरप्राप्तये पर्याप्नुवन्ति। अग्नेरन्नाधिपतित्वात् तद्वारा बलवीर्यहेतुत्वात् तदेकीकरणेन बलवीर्यैकीकरणं द्रष्टव्यम्।

अग्निसंनिवपनप्रयोजनां कांचित् त्रिहविष्कामिष्टिं विधत्ते—**अथ-**
1. ३-८ **तरन्ति**। त्रिहविष्कैषा संनिवपनप्रयोजनेष्टिः। तत्र प्रथमस्याष्टाकपालस्य पुरोळाशस्य हविषो ब्रह्मण्वद्गुणोऽग्निर्देवता। द्वितीयस्यैकादशकपालस्य क्षत्र-वद्गुणः। तृतीयस्य द्वादशकपालस्य क्षत्रभृद्गुणः। तेन ब्रह्मण्वत्क्षत्रवत्-क्षत्रभृद्गुणकाग्निदेवस्येष्टिकर्मणा ब्रह्मक्षत्रे तदभिमानिदेवते कर्मभूते समारूढा भवन्ति। समारूढाश्च ते यजमाना यथा रथं नावं वा समारुह्य महान्तमध्वानं महतीं वा नदीं सुखेन जनास्तीर्णा भवन्ति, तथा ताभ्यां रथादिस्थानीया-भ्यामारूढपुरुषप्राप्यदेशप्रापणसमर्थाभ्यां ब्रह्मक्षत्रवर्णाभिमानिदेवताभ्यामेव वि-नाशरहितं यथा तथा संवत्सरं संवत्सरकालनिर्वर्त्यमत एव दुस्तरं समुद्र-सदृशं सत्रकर्म तरन्ति प्राप्नुवन्ति। ब्रह्मक्षत्राभिमान्यग्न्यादिदेवतानुग्रहादेव सत्रकर्मणः संस्थां गच्छन्तीत्यर्थः।

अग्निहोत्रशालायामेव प्रयोज्यं प्रजापतिदेवत्यं पशुयागं विधत्ते—**त-**
1. ९,१० **इति**। ते सत्राय दीक्षां करिष्यन्तः सर्वदेवतासमष्ट्यात्मकेन प्रजापतिना प्रसूता अनुज्ञाताः सन्तो वयमिमं करिष्यमाणं सवत्सरकालनिर्वर्त्यं सत्रकर्म

a. Quoted by Śabara on JS. 3. 7. 37; 5. 1. 1; 6. 6. 19, etc.

b. AB. 4. 26. 13.

1. T. आर्त्विज for आर्त्विज्य

विनाशरहितं यथा तथा प्राप्ता भवेमेत्यभिप्रायेण प्रजापतिदेवत्येन पशुना यागं कुर्युः ।

अस्मिन्नेव पशुयागे देवताविषये शाखान्तरिणां मतभेदमाह—**तं-प्रीत्यै** । 1.११-१५
एके शाखिनस्तं पशुं वायुदेवत्यं कुर्वन्ति । तत्र वायव्यत्वेऽपि प्राजापत्यत्वान्न प्रच्युतिः । वायोः प्रजापतेरव्यतिरिक्तत्वात् । यस्माद् वायुरिति यदस्ति तदेतत् प्रजापतेः संबन्धि सर्वलोकप्रत्यक्षमेकं रूपं भवति । प्रजापतेः सर्वदेवतात्मकत्वात् । 'प्रजापतिः सर्वा देवताः'[a] इति श्रुतेः । अत एव च मन्त्रवर्णः 'पवमानः प्रजापतिः'[b] इति । तस्माद् वायव्यत्वेऽपि न प्राजापत्यत्वक्षतिः । केषांचिच्छाखिनां कामगुणाग्निदेवत्योऽयं पशुरिष्टः । तत्रापि कामगुणस्याग्नेरखिलदेवताधिपतित्वादयं पशुः सर्वदेवताप्रीतिहेतुत्वादतिप्रशस्तः ।

एवं विकल्पेन देवतात्रयं दर्शितम् । कामगुणाग्निदेवत्यत्वपक्षे पशुपुरोळाशयागदेवताविषये शाखान्तरिणां मतभेदमाह—**तस्य-प्रीणन्ति** । तस्य प्रकृ- 1.१६-१८
तस्य कामगुणाग्निदेवत्यस्य पशोः पशुपुरोळाशं वैश्वानरदेवत्यमेके शाखिनः कुर्वन्ति । तत्र वैश्वानरो नामायं जगत्प्रकाशको दिवि द्योतमान आदित्य एव नान्यः । अतोऽनेन पशुपुरोळाशयागेन तमेवादित्यं प्रीणयन्ति सत्रिणः ।

ननु वैश्वानरशब्देनाग्निरेवाभिधीयते । विश्वेषां नराणां लोकान्तरं प्रति नेतृतया संबन्धी वैश्वानर इति तन्निर्वचनात् । तथा चाम्नायः—'वैश्वानरः पुत्रः पित्रे लोककृज्जातवेदो वहेमं सुकृतां यत्र लोकाः'[c] इति । विश्वे नरा ऋत्विग्यजमाना एनं यज्ञादौ प्रणयन्तीति तत्संबन्धाद् वा वैश्वानरः । एतत् सर्वं भगवता यास्केन देवताकाण्डे 'वैश्वानरः कस्माद्'[d] इत्यारभ्य बहुधा प्रपञ्चितम् । यदत्रानुक्तं तत् तत एवानुसंधेयम् । एवं नामनिर्वचनानुरोधेन वैश्वानरशब्दस्याग्निवाचकत्वावधारणात् कथमादित्यवाचकत्वमिति । अत्रोच्यते—बाढम् , अग्निरेव वैश्वानरशब्दवाच्यः । तथाप्यग्नेरेव प्रातःकाले सूर्यसंगमश्रवणाद् अग्न्यादित्ययोरभेदाभिप्रायेणैवमभिधानोपपत्तिः । तथा च मन्त्रः—'वैश्वानरो यतते सूर्येण'[e] इति । 'मूर्धा भुवो भवति नक्तमग्निस्ततः

a. TB. 3. 3. 7. 3.
b. RV. 9. 5. 9.
c. TA. 6. 1. 4.
d. N. 7. 21. 1.
e. RV. 1. 98. 1.

सूर्यो जायते प्रातरुद्यन्'[a] इति । ब्राह्मणं च—'उद्यन्तं वावादित्यमग्निरनुसमारोहति'[b] इति । 'पृष्टो दिवि'[c] इति च द्युलोकसम्बन्धः श्रूयमाणस्तस्यादित्यात्मनावस्थानं गमयति ।

केचित् तद्द्युःस्थानः सूर्य एव वैश्वानर इत्याहुः । तत्र युक्तिश्च–प्रातःसवनादीनि त्रीणि सवनानि लोकत्रयात्मकानि, अधरोत्तरभावेनावस्थानसाम्यात् । तत्र तृतीयसवनप्राप्तौ यजमानः स्वर्ग प्राप्त इति पृथिव्याः प्रच्युतो भवेत् । तत्प्रच्युतिपरिहारार्थमाग्निमारुतेऽन्त्ये शस्त्रे होता स्वर्गाद् भूमिमवरोहति । कथमिति तदुच्यते । इतरशस्त्रवत् स्तोत्रियतृचेन यज्ञायज्ञेत्यनेन प्रारम्भं मुक्त्वा द्युस्थानसंबन्धिवैश्वानरदेवत्येन सूक्तेन प्रारभते । ततो मध्यमस्थानसंबन्धिनं रुद्रं मरुतश्च प्रति तद्देवत्यसूक्तपाठेनावरोहति । ततश्च पृथिवीस्थानमग्निम् । एवं स्थिते यद्यत्र वैश्वानरः सूर्यो न स्यात् तदानीमवरोहो नोपपद्येत । तदेतदनुसमञ्जसमित्याचार्याः । सर्वथापि वैश्वानरस्यादित्यात्मकत्वसंकीर्तनं नानुपपन्नमिति सिद्धमस्मदभिलषितमिति ।

सत्रव्यतिरिक्तविषये अग्निचित्यासंयुक्ते अहीनादौ संनिवपनीयेष्टिस्थाने तामेवेष्टिम् उखासंभरणप्रयोजनतया उखासंभरणीयाख्यां विधत्ते—**अथ–**
1. १९ **भवति** । अर्थान्तरोपन्यासेऽथशब्दः । येयमिष्टिर्बहूनां सत्रिणामग्निं चेष्यमाणानां संनिवपनप्रयोजनत्वेन विहिता सैवैकस्य दीक्षिष्यमाणस्य साग्निचित्येऽहीनादिविषये उखासंभरणीया नाम भवति । संनिवपनीयायां या देवता ये चाष्टाकपालादयः त एवोखासंभरणीयायामपीत्यर्थः । सूत्र्यते हि—'बहूनां चेष्यमाणानां संनिवपनीया । एकस्योखासंभरणीया'[d] इति ।

अथ प्रकृतमेव सत्रविधिमुपसंक्रम्य क्रमेण दीक्षोपसदुपवसथाहःसु कर्तव्यं
1. २० विधित्सुरादौ दीक्षारम्भकालं सुत्याकालं च दर्शयितुमाह—**ते–कल्पयन्ते ।** पुरस्तादेव सत्रकर्माध्यवसायादनन्तरमेवादौ तावत् ते सत्रिणो दीक्षाकालान् सुत्याकालांश्च विकल्पितान् अयमस्माकं दीक्षाकालः सुत्याकालश्चेति परस्परमैकमत्येन निर्धारयेयुः । कस्तर्हि दीक्षाकाल इत्याकाङ्क्षायां पक्षद्वयमुपक्षि-
1.२१,२२ पति—**तैषस्य–आहुः ।** तैषः पौषो मासः । तत्सम्बन्धिनी या अमावास्यास्ति

a. RV. 10. 88. 6. b. TB. 2. 1. 2. 10.
c. RV.1. 98. 2. d. ŚS. 9. 22. 6–7.

यद्यपि सा अमावास्या मार्गशीर्षमाससम्बन्धिन्येव भवति, तथापि कृष्ण-पक्षादिमासाङ्गीकारेण सा तैषसम्बन्धिन्येव । ज्योतिषामयने क्वचित् कृष्ण-पक्षादिमासाङ्गीकरणदर्शनात् । तस्या अमावास्याया उपरिष्टादेकस्मिन्न-हन्यतीते सति द्वितीयायां तिथौ दीक्षां कुर्युः । माघस्य वा अमावास्याया इत्याद्यनुषङ्गः । एतदपि कृष्णपक्षादिमासाङ्गीकारेणैवेति द्रष्टव्यम् । इत्येव-मभिज्ञा आहुः ।

अनयोरुभयोरपि पक्षयोरादरणीयत्वमाह—**तद्-विदितम्** । तदेतन्मत- 1.२३
द्वयं विदितं विज्ञातं अभिलषितं विद्वद्भिः । तस्मात् समञ्जसमित्यर्थः ।
किमविशेष एव उभयोरपि पक्षयोरित्यत आह—**तैषस्य-इव** । तुशब्दो 1.२४
विशेषार्थः । तैषस्यामावास्याया इत्येतत् कालविधानमेवोदिततरमतिशयोदित-मुद्गतं बहुतरमतमित्यर्थः । आतिशायनिकतरप्प्रत्ययप्रयोगाद् इतरविधानस्या-प्युदितत्वमस्तीत्यवगम्यते । यथा विद्यादिसहितं कर्म वीर्यवत्तरमित्युक्तौ तद्रहितं वीर्यवदिति । अनेन प्रसवकालोऽपि दर्शितो वेदितव्यः । पौषशुक्लप्रवृत्तानां माघस्यामावास्यायां प्रसवः । माघशुक्लप्रवृत्तानां फाल्गुनस्यामावास्यायाम् । तदुक्तं सूत्रकृता—'तेषां माघस्यामावास्यायां प्रसवः फाल्गुनस्य वा'[a] इति ।
**त-भवति** । ते सत्रिणोऽभिहिते काले दीक्षां कुर्वाणाः सन्तः एतं ज्योतिःशास्त्र- 1.२५-२७
वित्प्रसिद्धं चैत्रादिद्वादशमासापेक्षया त्रयोदशसंख्यापूरकं चैत्रादीनामुपरि वर्त-मानमधिमासाख्यं मासं प्राप्ता भवन्ति । तत्र य एष त्रयोदशो मासोऽस्ति एतत्परिमाण एव संवत्सरो भवति । तत् तथा सति अस्य त्रयोदशस्य मासस्य प्राप्तावेव कृत्स्नसंवत्सरावाप्तिः सत्रिणां संपन्ना भवति । संवत्सरावाप्तिदर्शन-प्रसंगेन प्रकृतमेव संवत्सरसत्रं त्रिषु पर्वस्वादित्यप्राप्तिद्वारा संवत्सरप्राप्तिहेतु-
त्वेन स्तौति—**स-वसन्ति** । संवत्सरात्मक आदित्य उद्गतो भूत्वा वृत्तिं करि- 1.२८,२९
ष्यन् माघमाससंबन्धिन्याममावास्यायां उप समीपे वसति। तत ऊर्ध्वमेव ह्युदगयनं भवति । तेन तस्यां वर्तने सति सामीप्यलाभादुपवसतीत्युच्यते । इमे च सत्रिणः संवत्सरसत्रस्य आद्यमहः प्रायणीयातिरात्राख्यं श्व उपयन्तो माघस्यामावास्या-यामुप[1] वसन्ति । 'माघस्य वेत्याहुः'[b] इति तस्या दीक्षाकालत्वेन प्रागुक्तत्वात् ।

a. ŚŚ. 13. 19. 4. b. KB. XIX. 1. २२.

1. T. माघ्यामावास्यायाम् for माघस्यामावास्यायाम्

वाक्यान्ते प्रायशः क्वापि वाक्यमध्ये च दृश्यते ।
खण्डविच्छित्तिरच्छिन्नसंप्रदायक्रमागता ॥

इति प्रथमः खण्डः

2.१,२ **प्रायणीयेन-आप्नुवन्ति** । तत् तेन माघामावास्यायामुपवासकर्मणा ते सत्रिण एनमादित्यं प्राप्ता भवन्ति । सैषा सत्रिणां प्राथमिक्यादित्यप्राप्तिः । यथा लोके परेद्युः सह गमिष्यतां सार्थानां पूर्वेद्युरेकस्मिन् प्रदेशे संघातापत्तिः तद्वत् सत्रिणामादित्यस्य चायं समवायो भवति ।

अथ द्वितीयामादित्यप्राप्तिं वक्तुं प्रायणीयाख्यं प्रथममहरनुवादवचन-
2.३,४ सामर्थ्याद् विहितं मत्वा द्वितीयमहश्चतुर्विंशाख्यं विधत्ते—**तं-आरम्भणीय-त्वम्**। तम् आदित्यात्मकं संवत्सरं चतुर्विंशेनाह्ना प्रारभन्ते सत्रिणः । चतुर्विंशस्याह्नः संवत्सरसत्रस्यादिवर्तित्वात् । यदेतदस्य संवत्सरारम्भरूप-त्वमस्ति तदेतदारम्भणीयसंज्ञया यज्ञेषु प्रसिद्धस्यास्याह्न आरम्भणीयशब्दाभि-धेयत्वे निमित्तम् । आरभ्यते सत्रं प्रवर्ततेऽनेनेत्यारम्भणीयशब्दाभिधेयमहरि-त्यर्थः । विषुवदहरुपवसथाहन्यादित्यप्राप्तिं विवक्षुस्ततः प्राचीनमासषट्कवर्ति-
2.५,६ पृष्ठ्यपञ्चमचतुरभिप्लवानुष्ठानस्य तदनुगमनरूपत्वमाह—**स-अनुयन्ति** । स आदित्यः षट्संख्यानुत्तरायणशब्दवाच्यान् मासानुदङ्मुखो गच्छति । तमुदग-यनभाजमादित्यमावृत्तिरहितैः पृष्ठ्यपञ्चमैश्चतुर्भिरभिप्लवषळहैरनुगच्छन्ति अहःसंघातप्राप्त्यनुवृत्तिक्रमेण । मासषट्कानुक्रमणसाम्याद् वैषुवताहरुप-
2.७-९ वसथाहन्यादित्यप्राप्तिमाह—**स-आप्नुवन्ति** । तिष्ठते तिष्ठति । दक्षिणस्यां दिश्यावृत्तिं करिष्यन् । इमे च सत्रिणः वैषुवतमहरुपेष्यन्तः पूर्वेद्युरुप-वसन्ति । सेयं द्वितीयादित्यप्राप्तिः । स षण्मासानित्यादि गतम् । **स-**
2.१०-१४ **आप्नुवन्ति** । आवृत्तैः प्रातिलोम्येनाहःशो मासशश्चावृत्त्यानुष्ठितैः पृष्ठ्य-षळहमुखैश्चतुर्भिरभिप्लवषळहैरित्वा गत्वा तिष्ठति । उपसंहरति—**तम्-**
2.१५-१७ **आप्त्यै** । तमादित्यं सत्रिणस्त्रिवारमाप्नुवन्तीति यदस्ति तत् संवत्सर-

प्राप्तये संपद्यते। यस्मात् त्रेधा त्रिप्रकारेण विहितः संवत्सरः। आदिमध्याव-
सानभेदेन त्रिरूपत्वात्। तेषु च प्रत्येकं संवत्सरप्राप्तावेव संवत्सरप्राप्तिः
समग्रा संपद्येतेति।

आदित्यस्यैव संवत्सरात्मकत्वे तस्य दक्षिणोत्तरायणगतिसद्भावे च
प्रमाणमाह—**तद्-इति**। तत् तत्रास्मिन्नभिहितेऽर्थे काचिद् वक्ष्यमाणलक्षणा 2.१८-२०
शाखान्तरीयऋगभिधीयते ब्रह्मवादिभिः। न केवलं प्रसिद्धिरेवात्रार्थे प्रमाणम्,
मन्त्रवर्णोऽपि कश्चिदस्तीत्युतेत्यस्यार्थः। यथोर्णनाभिः स्वस्मादेव शरीरादुपा-
दानकारणभूतादूर्णाकाः सूत्राणि विधत्ते एवमयमादित्योऽप्यहानि रात्रीश्च पर्या-
येण विदधाति। तत्राप्यूर्णनाभिर्यथा किंचित् सूत्रजातं कदाचित् प्रसार्य पुनः
स्वात्मनि क्षणेनैवोपसंहृत्य तदैव रूपान्तरापन्नं तदेव प्रसारयति, एवमादित्योऽ
पि स्वात्मन एव क्रमादहर्निर्माय पुनस्तदेवोपसंहृत्य पश्चाद् रात्रिं प्रसारयति।
पुनस्तां संहृत्याहः प्रसारयति। आदित्योदयास्तमयाभिव्यङ्ग्यत्वादहोरात्रा-
णाम्। एवमहोरात्राणि विदधदादित्यः षट्संख्यान् मासान् दक्षिणस्यां दिशि
गच्छति। ततः षट्संख्यान् मासानुदीच्यां दिशि गच्छति। तदनयर्चादित्यस्य
संवत्सरात्मकत्वं दक्षिणोत्तरगतिमत्त्वं च प्रदर्शितम्। एतामृचं किंचिद् व्या-
चष्टे—**षड्-दक्षिणा**। तदेतत् पुराणे विस्तरेणोक्तम्— 2.२१,२२

'कुलालचक्रपर्यन्तो भ्रमन्नेष दिवाकरः।
करोत्यहस्तथा रात्रिं विमुञ्चन् मेदिनीं द्विज।
अयनस्योत्तरस्यादौ मकरं याति भास्करः।
ततः कुम्भं च मीनं च राशे राश्यन्तरं द्विज।
त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम्।
प्रयाति सविता कुर्वन्नहोरात्रं ततः समम्।
ततो रात्रिः क्षयं याति वर्धतेऽनुदिनं दिनम्।
ततः स मिथुनस्यान्ते परां काष्ठामुपागतः।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्।
कुलालचक्रपर्यन्तो यथा शीघ्रं प्रवर्तते।
अतिवेगितया कालवायुवेगबलाच्चरन्।

तस्मात् प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति ॥'[a] इति ।

प्रसंगागतं सत्रस्य संवत्सरावाप्तिहेतुत्वप्रशंसनं विधाय प्रकृतमेव दीक्षा-
विधिमुपसंक्रम्य दीक्षणीयेष्टेः पञ्चहविष्टामेकीयमतोक्त्या विधत्ते—**अथ–**
2.२३,२४ **आप्त्यै** । अग्निचित्याग्निचयनकर्म । तस्यामिति निमित्तसप्तमी । एके शाखिनः
पञ्चहविषं कुर्वन्ति । अन्ये शाखिनस्त्रिहविषमित्यर्थाद् गम्यते । 'त्रिहविस्तु
दीक्षणीया । पञ्चहविर्वा'[b] इति सूत्रणात् । आग्नावैष्णववैश्वानरीयादित्यचर-
वस्त्रिहविष्टायाम्[1] । चतुर्थोऽदितये पञ्चमः सरस्वत्या इति पञ्चहविष्टायाम्[1] ।
पाङ्क्तो वै यज्ञ इत्यादि गतम् । आतिथ्येष्टिविषये कंचिद् विशेषं विधत्ते—
2.२५,२६ **अथ–आप्त्यै** । एवकारः पौनर्वचनिकः । पञ्चहविषम्—आग्नेय ऐन्द्रो
वैश्वदेवो बार्हस्पत्यो वैष्णव इति पञ्चसंख्यानि हवींषि यस्याः सा तथोक्ता ।
एक इति वचनादन्य एकहविषमिति गम्यते ।

अग्निचयनार्थमिष्टकासु नीयमानासु 'चितिभ्यः प्रणीयमानाभ्योऽनुब्रूहि'[c]
इति प्रैषानन्तरं पठनीयाः 'पुरीष्यासो अग्नयः'[d] इत्याद्याश्चतस्र ऋचो विधत्ते—
2.२७-२९ **अथ–अन्वाह** । बहवोऽग्नय इष्टकात्मका अभिधेया यासां ताः । 'पुरीष्यासः',[d]
'प्रो त्ये अग्नयो',[e] 'विश्वेभिरग्ने',[f] 'अग्ने विश्वेभिः'[g] इत्येता ऋचो बह्वग्न्यः ।
यस्मादत्र बहूनग्नीनिष्टकारूपान् होताभिलक्ष्य स्तौति तस्माद्धेतोर्बह्वग्न्यभि-
धायिका एता ऋचोऽभिरूपाः । अग्निशब्दात् परं बहुवचनश्रवणादिह बह्वग्न्य-
2.३०-३६ भिधानप्रतीतेः । **ता–प्रणयन्ति** । ऋक्संख्यास्तुत्यर्थवादः ता वै चतस्र
इत्यादिरुक्तार्थः । त्रिःप्रथमयेत्यादिराद्यन्तयोरावृत्तिसहितसंख्यास्तुत्यर्थ-
वादोऽपि ।

2.३७-४१ अथासामुपांशुपठनीयतामाह—**ता–समृद्ध्यै** । यथा रेतःसिक्तिः प्रजो-

a. *Viṣṇu-purāṇa,* 2. 8. 29–34.
b. ŚS. 9. 24. 1; 4.
c. ŚS. 9. 24. 9.
d. RV. 3. 22. 4.
e. RV. 5. 6. 6.
f. RV. 1. 26. 10.
g. RV. 3. 24. 4.

1. V. हविष्कायां for हविष्टायां

त्पत्त्यर्था एवमग्निचयनस्य करिष्यमाणकर्मार्थत्वाद् रेतःसिक्तिरूपत्वम् । गत-
मन्यत् । आध्वर्यवमग्निचयनकर्म प्रसंगाद् विधत्ते—**अथ-परिष्टुवन्ति** । यावन्त्य- 2.४२,४३
हानि त्र्यहादीनि चयनं कर्तुमिच्छन्ति, तावन्त्यहानि चयनकर्माध्वर्यवः
कुर्वन्ति । आध्वर्यवस्य कर्मणोऽयमनुवादः क्रमापरित्यागार्थः । सामगानां कर्म-
विशेषमनुवदति—अथैनमिति । परितः स्तुवन्ति । सामगा इति शेषः ॥

इति द्वितीयः खण्डः

अथाध्वर्युकर्तृकं होतृविषयं प्रैषवचनमनुवदति—**अथ-इति** । हे होतस्त्वं 3. १
संचितस्य परिष्टुतस्य अस्याग्नेश्चितेष्टकासमुदायात्मकस्य उक्थं वचः एतद्रूपं
स्तुतिरूपं वचनं पठेति होतारं प्रत्यध्वर्युर्वदति । प्रेषितश्च होता आज्यशस्त्र-
गतेन तूष्णींशंसेन 'पिता मातरिश्वा'[a] इत्यादिजपसहितेनानुशंसेदित्यर्थात्
सिद्ध्यति । तथा च सूत्रम्—'संचिते परिष्टुतेऽग्न्युक्थमनुशंसेत्युक्तश्चित्यस्य
पश्चादुपविश्याज्यं यस्तूष्णींशंसस्तेनानाहूय सजपेनानुशंसति'[b] इति । स्तौति—
**रुद्रो-शमयन्ति** । योऽयं संचितोऽग्निरिष्टकासंघातरूपः, स एष देवानां मध्ये 3. २,३
रुद्रनामा क्रूररूपो देव एव भवति । ततः स रुद्ररूपोऽग्निरशान्तः क्षुरपविवद्
यजमानस्यर्त्विजां चातिदायी भवति । तमेतमशान्तरूपमग्निमेतेनाग्न्यनुशंसन-
कर्मणा शान्तं करोति ।

इत्थमुपसद्दिनेषु कर्तव्यं होतृकर्म विधायोपवसथ्येऽहनि कर्तव्यं विधित्सु-
स्तावत् तत्रत्ये वैश्वानरीययागे होतृकर्म विधत्ते—**निरुक्तं-प्रणयन्ति** । निरुक्त- 3. ४,५
त्वमुच्चैष्ट्वम् । तथा चान्यत्र श्रूयते—'उच्चैर्वैश्वानरस्य'[c] इति । वैश्वान-
रीययागे सपुरोनुवाक्यां याज्यामुच्चैः पठेत् । सूत्र्यते हि—'वैश्वानरीयेत्युक्तः
पुरोनुवाक्यामनूच्य याज्यया यजति'[d] इति । निरुक्तत्वं स्तौति—निरुक्तो
होति । यस्मादेषोऽग्निस्तस्मिन् काले निरुक्तो भवति यस्मिन् कालेऽग्निप्रणयन-

a. TS. 5. 6. 8. 6.
b. SS. 9. 25. 1.
c. TS. 5. 4. 7. 7.
d. SS. 9. 25. 2.

कर्म भवति । यथा लोके वक्त्रा कश्चिदर्थ उच्चैः स्पष्टतरमभिधीयमानः परिस्फुटो भवति, एवमयमग्निस्तस्मिन् कालेऽतिस्पष्टदृश्यमूर्तिर्भवति । तस्मात् तस्योच्चैष्ट्वमभिरूपम् ।

अनन्तरकर्तव्यानि हविर्धानप्रवर्तनादीनि कर्माणि प्रकृतावुपदिष्टान्यति-
3. ६,७ दिशति—**अथ-ब्राह्मणम् ।** कर्म[1] कर्तव्यमिति शेषः । एकाहे प्रकृतिभूतेऽग्निष्टोम उत्पन्नमैकाहिकं हविर्धानप्रवर्तनादिकं कर्म यथा प्रकृतावग्निष्टोमे यदितिकर्तव्यताकं कर्तव्यं तथैव तदितिकर्तव्यताकमेवात्रापि कर्तव्यम् । न तु तत्र विशेषः कश्चित् । तस्य हविर्धानप्रवर्तनादेरुक्तमेव 'वाक् च वै मनश्च'[a] इत्यादिकम्, 'ब्रह्म वा अग्निः'[b] 'क्षत्रं सोमः'[c] इत्यादिकम्, 'अग्नीषोमयोर्वा एष'[d] इत्यादिकं च ब्राह्मणं द्रष्टव्यम् । न तु ब्राह्मणान्तरमन्वेषणीयम् ।

अग्नीषोमीयपशुपुरोळाशयागानन्तरं वैशेषिकीमष्टहविष्कां कांचिदिष्टिं
3. ८-१२ विधत्ते—**अथ-देवस्वः ।** अग्नीषोमीयपशुसंबन्धी यः पशुपुरोळाशयागः तस्मिन्नतीते तस्यान्वञ्चि अन्वग्भावीन्यनन्तरभावीनि देवसूनाम्नीभ्यो देवताभ्यो गृहपत्यादिगुणकाग्न्यादिरूपाभ्यो निर्वपेयुः । सूत्र्यते हि—'अग्नीषोमीयस्य पशुपुरोळाशमन्वञ्चि देवसूभ्यो हवींषि निर्वपन्ति । अग्नये गृहपतये सोमाय वनस्पतये सवित्रे सत्यप्रसवाय[2] रुद्राय पशुपतये बृहस्पतये वाचस्पतय इन्द्राय ज्येष्ठाय मित्राय सत्याय वरुणाय धर्मपतये'[e] इति । स्तौति—एता ह वा इत्यादि । एता गृहपत्यादिगुणका अग्न्यादिदेवताः सवनानामीशित्र्यो भवन्ति । ता देवता अत्रास्मिन् कर्मणि यजमानाः प्रीणयन्ति । ता देवताः प्रीताः सत्य एभ्यो यजमानेभ्यः सवान् प्रसुवन्त्यनुजानन्ति । यस्मादासां देवतानां सवप्रसवकर्तृत्वं तस्माद्धेतोर्देवसूशब्दाभिधेयत्वं संपन्नम् । देवतानां मध्ये आसां देवतानां प्रसावकत्वाद् वा । प्रसावकत्वविशिष्टदेवताविशेषत्वाद् वा । देवतानां संख्यां
3.१३-१५ स्तौति । **ता-अश्नुवते ।** गतमेतत् ।

a. KB. IX. 3. १.
b. KB. XII. 10. ५.
c. KB. VII. 12. २२, etc.
d. KB. X. 5. १.
e. ŚS. 9. 26. 1–2.

1. V. omits
2. T. सत्याय

अस्या इष्टेः स्थाने विकल्पेन कांचित् सर्वपृष्ठाख्यामिष्टिं विधत्ते—**अत्र–उपाप्त्यै।** रथन्तरादीनि रैवतान्तानि षट् पृष्ठानि तद्विशेषणा अग्न्याद्या देवता 3.१६-२२
यस्याः सा। सर्वपृष्ठाख्याया इष्टेः संबन्धीनि हवींष्येके शाखिनो निर्वपन्ति। केनाभिप्रायेणेति चेत्, येयमग्निचित्या अग्निचयनकर्मास्ति सा सर्वमेव सर्वकर्मफलप्राप्तिहेतुत्वात्। इदमपि कर्म सर्वमेव सर्वपृष्ठविशेषणत्वात्। अतः सर्वेणानेन कर्मणा सर्वरूपमग्निचयनकर्म प्राप्ता भवेमेति मन्वाना एके सर्वपृष्ठाहविर्निर्वापं कुर्वन्ति। हविःसंख्यास्तुत्यर्थवादो गतः।

एवमौपवसथ्यं कर्म विधाय सुत्याहनि विधेयं कर्मजातं विधित्सुराह—
**अथ–कामयन्ते।** सोमाभिषवं यावत्स्वहःसु द्व्यहादिसहस्रसंवत्सरपर्यन्तकर्म- 3. २३
वर्तिषु यजमानाः कर्तुमिच्छन्ति तावत्स्वहःसु सोमाभिषवं कुर्युः। सुत्यासु वक्तव्यं पुनर्वक्ष्यामीत्यभिप्रेत्य यज्ञपुच्छमुपसंक्रम्यानूबन्ध्यापशुवपाहोमानन्तरं
त्वष्टृदेवत्यं पशुयागं विधत्ते—**अथ–त्वाष्ट्रः।** योऽयं त्वष्टृदेवत्यः पशुः स 3.२४,२५
रेतःसिक्तिरेव। त्वष्टुः सिक्तस्य रेतसो रूपविशेषानापत्तौ रेतःसेचनकर्म न फलाय कल्पते। अतो रूपविशेषसंपादनद्वारा त्वष्टैव रेतःसेकपरिपालयिता। रूपकर्तृत्वं च 'त्वष्टा रूपाणि पिंशतु'[a] इत्यादिमन्त्रवर्णात्, 'त्वष्टा वै रेतसः सिक्तस्य रूपाणि वि करोति'[b] इत्यादिब्राह्मणाच्च प्रसिद्धम्। अतो रेतःसिक्तिरूपस्त्वाष्ट्रः पशुः। तस्येतरपशुवदुत्तरवेद्यामेव प्रसक्तं प्रचरणं प्रतिषेधन् स्थाना-
न्तरमुपदिशति—**पत्नीशाले–सिच्यते।** यस्माद् रेतःसेकस्य पत्न्य एव स्थान- 3.२६-३०
मिति प्रसिद्धम्, तस्मात् पत्नीशालाख्ये स्थाने तच्चरणमनुरूपम्। त्वाष्ट्रस्य रेतःसेकरूपत्वोक्तेः। उपांशु चरन्तीत्यादिगतम्। पर्यग्निकरणानन्तरं पशो-
रुत्सर्गं विधत्ते—**पर्यग्निकृतम्–इति।** कुतो न संस्थापनमित्यत उक्तं रेतः- 3.३१-३३
सिक्तिरिति। यस्मात् त्वाष्ट्रः पशू रेतःसिक्तिरेव तस्मात् तस्य पशोः संस्थापने सति सिक्तं रेतः सद्य एव कालाच्छतसंवत्सरलक्षणात् पूर्वमेव विनाशयामेति परिभयं द्योतयन् संस्थापनं न कुर्यात्॥

इति तृतीयः खण्डः

a. RV. 10. 184. 1. b. TS. 6. 6. 6. 2.

पर्यग्निकरणकर्मपर्यन्तमेव त्वाष्ट्रपशुप्रचरणमित्युक्तम् । तत्र जिज्ञासूनां
4. १ चोद्यमुद्भावयति—**तद्-इति** । तत् तत्र पर्यग्निकृतमुत्सृजन्ति, न संस्थापयन्तीत्युक्तेऽर्थे विषये केचिज्जिज्ञासवः प्रश्नवाक्यमाहुः—किमिति चेद् एते देवते त्वष्टारं पशुदेवतां तदविनाभूतं च वनस्पतिं देवतां होता तावदावाहयति–'त्वष्टारमा वह' 'वनस्पतिमा वह'[a] इति । यस्माद् देवतयोरनयोरावाहनं कृतम् , तस्मादस्यानेन होत्रा एते देवते कस्मिन् प्रदेशे इष्टे कृतयागे भवतः ? आवाहितायास्तावद् देवताया अवश्यं यागः कर्तव्यः । आवाहनं चानयोः कृतम् । अतोऽनयोः क्वचिद् यागेन भवितव्यम् । पर्यग्निकरणानन्तरं पशोरुत्सर्गश्चोक्तः । अतः पर्यग्निकरणात् प्राग् यागो वक्तव्यः । तत्र वयं जिज्ञासामहे
4.२,३ कुत्र स्थलेऽनयोर्याग इति । अस्य चोद्यस्योत्तरम्—**प्रयाजेषु-इति** । अस्ति तावदेकादशसंख्यानां प्रयाजानां मध्येऽनयोर्यागः । अतो न कृतावाहनयोर्न यागः किंतु कृतयागे एव ते इति द्रष्टव्यम् ।

4.४ अथ देविकायागं विधत्ते—**अथ-निर्वपन्ति** । ताश्च अनुमतिः कुहूः राका
4.५-८ सिनीवाली धाता इति । स्तौति—**यातयामानि-भवन्ति** । यो यजमानः सोमद्रव्यगुणकं यागं करोति तस्य यजमानस्य गायत्र्यादीनि छन्दांसि यातयामानि भवन्ति । भुक्तोज्झितादिवत् पूर्वकर्मोपयुक्तत्वात् कर्मान्तरोपयोगायोग्यत्वं यातयामत्वम्।तत्र देविकाभ्यो हवींषि निर्वपन्तीति यदस्ति तेन छन्दसां यातयामत्वं परिहृत्य अयातयामत्वमेव संपाद्यते । देविकानां छन्दोरूपत्वात् । तच्च 'गायत्री वा अनुमतिः त्रिष्टुब्राका जगती सिनीवाली'[b] इत्यादि तैत्तिरीयब्राह्मणादवगन्तव्यम् ।

4.९-१२ प्रकारान्तरेण स्तौति—**अथो-सरसतायै** । धीतः पीतः गतो रसो वीर्यं येषां तानि तथोक्तानि । यथा भारवहनपरिश्रान्तस्य अश्वतरादेर्घासकबलादिसमर्पणेन पुनर्बलवत्ता संपाद्यते, तद्वदेतदपि देविकाहविर्निर्वापकर्म भवति।देविका-
4.१३-१५ शब्दनिर्वचनेनापि स्तौति—**ताः-देविकाः** । देविकाशब्दे योऽयं देवीशब्दोऽस्ति तेन ता एताश्चतस्रोऽनुमत्याद्या देवस्त्रिय उच्यन्ते । यस्त्वयं कशब्दस्तेन पञ्चमः

a. KB. XII. 9. ३. b. TS. 3. 4. 9. 6.

प्रजापतिरूपो धातैवोच्यते। प्रजापतेः करूपत्वात्। 'को वै नाम प्रजापतिः'[a] इति श्रुत्यन्तरात्। तासां देवीनामनुमत्यादीनां कस्य धातुश्च समुदितानां वाचकोऽयं देविकाशब्दः। देव्यश्च कश्च देविका इति। न तु देविकाशब्दसंघातवाच्या अन्याः काश्चिद्देवताः। **तानि-आप्त्यै**। इति गतम्। 4.१६-१८

अथैकीयमतोपन्यासमुखेन देवीशब्दनिगद्यानामबाद्यानां देवतानां यागं **विधत्ते—अत्र-उपाप्त्यै**। ताश्चाप ओषधयोऽहान्युषा रात्रिः सूर्यो द्यौः पृथिवी 4.१९-२५
वाग् गौरित्येताः। देवीनां सर्वरूपत्वं दशसंख्यत्वात्। 'दशेति वै सर्वम्'[b] इति श्रुतेः। एतासु सर्वान्तिर्भावाद् वा सर्वरूपत्वम्। अग्निचित्या सर्वफलप्राप्तिहेतुत्वात् सर्वरूपा। गतमन्यत्। तानि वै दशहवींषीत्याद्युक्तार्थम्। दिग्देवत्यं कंचिद् यागं विधत्ते—**अत्र-प्राप्त्यै**। दिशां दशसंख्यत्वात् सर्वव्याप्तत्वाद् वा 4.२६-३१
सर्वरूपत्वम्। **गतमन्यत्**।

प्रकृतितोऽतिदेशतः प्राप्तामुदयनीयां सिद्धवत्कृत्य तदनन्तरं प्रागग्निहोत्रहोमात् पयस्यायागं विधत्ते—**अथ-ब्राह्मणम्**। तस्याः पयस्याया 'यद्यु वै 4. ३२
पयस्या'[c] इत्याद्युक्तमेव ब्राह्मणं द्रष्टव्यम्। प्राजापत्यपशुयागादारभ्य कंचिन्नियमं विधत्ते—**न-इति**। अग्निचिदेतया पयस्यया यागमकृत्वा मैथुनं 4. ३३
ग्राम्यधर्मं न चरेत् कुर्यात्। प्राजापत्यपशुयागादारभ्येति द्रष्टव्यम्। तथा हि प्राजापत्यपशुप्रकरणे शतपथश्रुतिः—'तदाहुर्नैतेन पशुनेष्ट्वा नोपरि शेते न मांसमश्नीयात् न मैथुनमुपेयात्। पूर्वदीक्षा वा पशुः। अनवक्लृप्तं वै तद् यद् दीक्षित उपरि शयीत यन्मांसमश्नीयाद् यन्मिथुनमुपेयादिति। नेत्त्वेवैषा दीक्षा न हि मेखलाऽस्ति न कृष्णाजिनमिष्टकां वा तां कुरुते। तस्मादु काममेवोपरि शेते तदु सर्वमन्नं यदेते पशवः तदस्यात्राप्तमारूढमूर्ध्वं भवति। तद् यानि कानि चामधुनोऽशनानि तेषामस्य सर्वेषां कामाशनं यदि लभेत। मिथुनं तु नोपेयात् पुरा मैत्रावरुण्याः पयस्यायाः'[d] इति। इतिशब्दोऽग्निचयनप्रकरणसमाप्त्यर्थः॥

इति चतुर्थः खण्डः

a. AB. 3. 21. 1.
b. AA. 2. 3. 4.
c. KB. XVIII. 9. ७.
d. ŚB. 6. 2. 2. 39. ( varies from the printed editions )

एवं तावद् गवामयनाख्यं संवत्सरसत्रमधिकृत्य दीक्षोपसदुपवसथयज्ञपुच्छगतान्यग्निचयनसंबद्धानि कर्माणि वैशेषिकानि क्रमेण विधाय संप्रति सात्रिकानि सौत्यानि पञ्चविंशतिसंख्यान्यहानि विधातुमारभमाणः प्रथमस्य प्रायणीयातिरात्राख्यस्याह्नः पूर्वं विहितत्वादिहाविधेयतां मन्वानः तदनन्तरानुष्ठेयं चतुर्विंशाख्यमहरुपरितनया त्रिखण्ड्या विधत्ते । तत्र तावच्चतुर्विंशस्याह्नः चतुःसंस्थज्योतिष्टोमविकृतित्वे स्थिते किंसंस्थमेतदित्याकाङ्क्षां शमयन् प्रशंसति—

5. १-४ **मुखं-प्रीणन्ति ।** यदेतच्चतुर्विंशाख्यं प्रायणीयातिरात्रादनन्तरानुष्ठेयं सात्रिकमहरस्ति तदेतत् संवत्सरस्य संवत्सरकालनिर्वर्त्यस्य सत्राख्यस्य यागविशेषस्य शरीरितया कल्पितस्य मुखस्थानीयं भवति । अत्र संवत्सरकालनिर्वर्त्यस्य कर्मण आरभ्यमाणत्वात् । अत एवास्याह्न आरम्भणीयसंज्ञा प्रतायते । उक्तं हि[1] प्राक्—'तं चतुर्विंशेनारभन्ते । तदारम्भणीयस्यारम्भणीयत्वम्'[a] इति । 'एतेन वै संवत्सरमारभन्ते । एतेन स्तोमान् छन्दांसि च एतेन सर्वा देवताः । अनारब्धं वै तच्छन्दोऽनारब्धा सा देवता यदेतस्मिन्नहनि नारभन्ते । तस्माद् आरम्भणीयस्यारम्भणीयत्वम्'[b] इति श्रुत्यन्तराच्च । यस्माद् एतदहर्मुखं तस्माद् अग्निष्टोमसंस्थमेवैतद् भवितुमर्हति । कुतः ? यस्माद् यज्ञानां सोमयागानामग्निष्टोमो मुखस्थानीयं भवति । तस्य प्रथमानुष्ठेयत्वात् । तच्च प्रपञ्चितम् 'यो ह वा एतेनानिष्ट्वा'[c] इत्यत्र । तत् तेन चतुर्विंशाहरनुष्ठानेन संवत्सरं संवत्सरकालाभिमानिदेवतामारम्भ एव सत्रिणः प्रीणयन्ति ।

5. ५,६ अथ विकल्पेनास्योक्थ्यसंस्थतामाह—**तद्-सभारतायै ।** तच्चतुर्विंशाख्यमहरेके शाखिन उक्थ्यसंस्थं कुर्वन्ति, नाग्निष्टोमसंस्थम् । किमर्थमिति चेत्, यज्ञस्य भारसाहित्यार्थमेव । उक्थ्यसंस्थताभ्युपगमे हि पञ्चदशस्तोत्रशस्त्रत्वसंपत्त्या द्वादशस्तोत्रशस्त्राग्निष्टोमसंस्थत्वाभ्युपगमे यद् गौरवं तदधिकं गौरवं यज्ञस्य सिध्यति । स्तुतिशंसनाभ्यां यज्ञो गौरवसहितो भवति । अत उक्थ्यान्तमिदं चतुर्विंशमहरित्येके शाखिन आहुः । ततो विकल्पेनेदमग्निष्टोम-

a. KB. XIX. 2. ३-४.
b. AB. 4. 12. 2.
c. KB. XVI. 9. १२.

1. T. च

संस्थमुक्थ्यसंस्थं वा कर्तव्यमित्येतत् सिद्धम् ।

अथास्य स्तोमविशेषमाह—**तस्य–आप्त्यै ।** चैत्रादिद्वादशमासात्मकस्यैकस्य तावत् संवत्सरस्यार्धमासाश्चतुर्विंशतिसंख्याका भवन्ति । एकैकस्य मासस्य मध्ये विभागे सति पञ्चदशाहःसंघातरूपाणामर्धमासानां चतुर्विंशतिसंख्यत्वसिद्धेः । 'पञ्चदश वा अर्धमासस्य रात्रयः'[a] इति श्रुत्यन्तरात् । अतश्चतुर्विंशः स्तोमसंख्याद्वारा संवत्सरप्राप्तिहेतुतां भजते । 5. ७-९

अथ द्वादशसु पञ्चदशसु वैतदहर्वर्तिषु स्तोत्रेषु स्तोत्रियतृचसमुदायनिवेशिनीनां स्तोत्रियाणामृचां समुदितां संख्यां प्रदर्श्य स्तौति—**तस्य–आप्नुवन्ति ।** तस्य चतुर्विंशाख्यस्याग्निष्टोमसंस्थस्योक्थ्यसंस्थस्य वा सतोऽह्नः संबन्धिन्यः स्तोत्रिया ऋचः षष्ट्युत्तरं शतत्रयं संपद्यन्ते । तत्राग्निष्टोमसंस्थत्वे सवनत्रयवर्तिनस्त्रयः पवमाना अष्टाचत्वारिंशा भवन्ति । इतराणि तु नव चतुर्विंशानि । तत्राष्टाचत्वारिंशेषु त्रिषु पवमानेषु संभूय चतुश्चत्वारिंशच्छतमृचः संपद्यन्ते । इतरेषु पुनर्नवसु मेलने द्वे शते षोडश च संपन्ना भवन्ति । पूर्वाभिः समुच्चये सति षष्ट्युत्तरशतत्रयसंख्यासिद्धिः । उक्थ्यपक्षेऽपि पञ्चदशानां सर्वेषामपि स्तोत्रियाणां[1] साक्षादेव चतुर्विंशत्वात् संभूय गणनायां क्रियमाणायामुक्तसंख्याविशेषसिद्धिः । गतमन्यत् । 5.१०-१२

अथास्य सामविशेषमाह—**तस्य–भवति ।** कुतः पृष्ठान्तरानादरः इत्यत्र हेतुमाह—द्वितीयं वा इति । यस्मादेतच्चतुर्विंशमहरह्नां सात्रिकाणां मध्ये द्वितीयं भवति । प्रायणीयाख्यं प्रथममहश्चतुर्विंशाख्यं तदनन्तरमित्यादि । एतच्च बृहदाख्यं पृष्ठं रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यानां षण्णां पृष्ठानां मध्ये द्वितीयं भवति । अतो द्वितीयत्वसाम्यादस्ति बृहतोऽत्राभिरूप्यम् । 5.१३-१५

इतश्चात्र बृहत्पृष्ठमनुरूपमित्याह—**अथ–इति ।** प्रकृतादर्थादर्थान्तरेऽथशब्दः । यत्र यस्मिन् कर्मणि सत्रादौ विषये चतुर्विंशाख्यमहरनुतिष्ठन्त्यनुष्ठातारः, तत्र महाव्रताख्यमहरवधृतं परिनिष्ठितमेव भवति । महाव्रतस्य 5.१६-१९

a. ŚB. 1. 3. 5. 8.

1. T. स्तोत्राणां

चतुर्विंशविकृतित्वात्। तथा च श्रुत्यन्तरे ब्राह्मणम्—'यद् वै चतुर्विंशं तन्महाव्रतम्'[a] इति। तस्य च महाव्रतस्यायतनतः स्थानतो बृहदाख्यमेव पृष्ठं भवति। अत्र तावन्न विमतिः। ततः तद्वदेव चतुर्विंशस्यापि बृहदाख्यमेव पृष्ठं भवेत्। तदेतत् सर्वं सूत्रकृता दर्शितम्—'चतुर्विंशस्तोमं बृहत्पृष्ठमुभयसामाग्निष्टोम उक्थ्यं वाहश्चतुर्विंशमित्याचक्षते'[b] इति।

इदानीं शस्त्रक्लृप्तिं चिकीर्षुः शंसनीयानामृचां सामान्येन समुपसर्गवत्तया
5. २० रूपसमृद्धिमाह—**तस्य-छन्दोरूपाणि।** तस्य प्रकृतस्य चतुर्विंशस्याह्नः संवत् समुपसर्गवत् पदं तदेकदेशरूपं वा छन्दोरूपाणि भवन्ति। छन्दःसु प्रतिपाद्यतया प्रतीयमानमह्नो रूपं छन्दसां रूपम्। यस्मात् संवत्सरमभिलक्ष्य परिवदनमभिधानं तद्युक्तानि। समुपसर्गेण तावत् संवत्सरः प्रतीयते। चतुर्विंशं च संवत्सरारम्भरूपत्वेन तदवयवत्वादारम्भरूपत्वेनैव च प्राधान्यात् संवत्सररूपम्। अतोऽह्नो रूपं समुपसर्गवत्तया छन्दसां सिध्यति। यथा 'समान्या मरुतः सं मिमिक्षुः'[c] इत्यत्र समित्यनेनोपसर्गेण संवत्सरप्रतीतेस्तत्सूक्तस्यैव रूपसमृद्धिः। एवमन्यत्रापि। अथ क्रमानुरोधेन प्रकृतितश्चोदकेन प्रापितं
5.२१-२३ 'प्र वो देवाय'[d] इति सूक्तमपवदन् सूक्तान्तरं विधत्ते—**होता-संपद्यते।** अष्टसंख्याका ऋचो यस्य तदष्टर्चम्। तच्च गायत्रीमात्रं भवति। अष्टसंख्यान्वयसाम्यात्। 'अष्टाक्षरा गायत्री'[e] इति गायत्र्या अष्टसंख्यान्वयित्वात्। तस्मादस्य चतुर्विंशस्याह्नः स्तोमो गायत्रीमात्रो भवति। चतुर्विंशतिसंख्यान्वयात्। 'चतुर्विंशत्यक्षरा गायत्री'[f] इति गायत्र्याश्चतुर्विंशतिसंख्यायोगात्। तथापि किमायातमिति चेत्, तदेव शस्त्रं समृद्धं समग्रावयवं भवति, यच्छस्त्रं स्तोमेन संपन्नम्। 'स्तुतमनुशंसति'[g] इति स्तोत्रानुविधायित्वस्थितेः। इह च स्तोमस्य चतुर्विंशत्वाद्[1] गायत्रीसंमितत्वमस्ति। शस्त्रस्याप्यष्टसंख्या-

a. AB. 4. 14. 1.
b. ŚŚ. 11. 2. 1.
c. RV. 1. 165. 1.
d. RV. 3. 13.
e. PB. 6. 3. 13.
f. TS. 7. 4. 1. 3.
g. PB. 9. 8. 10.

1. V. चतुर्विंशतित्वात्

योगित्वाद् गायत्रीसंमितत्वमित्युभयोरप्येकात्मकत्वप्राप्तौ शस्त्रस्य स्तोमेन संपत्तिः स्पष्टैव ।

अथैकाहिकमेव प्रउगशस्त्रमतिदिशति—**माधुच्छन्दसः-इति।** मधुच्छन्दो- 5.२४-२६
नाम्ना महर्षिणा दृष्टो 'वायवा याहि'[a] इत्यादितृचसप्तकात्मा प्रउगो माधुच्छन्दसः ।

ननु गार्त्समदाद्यन्यतम एवात्र प्रउगः किं न स्यादित्यत्राह—स वै समृद्ध इति । कुतो वा तस्यैव समृद्धत्वमित्यत उक्तं तस्य रूपेणेति । अन्ये गार्त्समदादयः प्रउगाः सर्वेऽपि तस्य माधुच्छन्दसप्रउगस्य रूपेण धर्मेण क्लृप्ता भवन्ति । तत्प्रकृतित्वात् । प्रकृतौ हि कृत्स्नस्यानुष्ठेयस्य साक्षादुपदिष्टत्वादप्रतिबन्धेन सर्वमनुष्ठातुं शक्यम् , न विकृतौ । तस्यां प्रकृत्यपेक्षत्वेन विलम्बितानुष्ठानत्वात् । अतः प्रकृतित्वात् स एव समृद्धः । ततश्च मे ममैतत् प्रथमं प्रारम्भ एव कृतं सत्राख्यं कर्म समृद्धं भवेदिति बुद्धचा माधुच्छन्दसं प्रउगं कुर्यात् । आदितः समृद्धं हि कर्म सर्वमेव समृद्धं भवति; नान्यथा ।

प्रातःसवनिके आज्यप्रउगशस्त्रे विधाय मरुत्वतीयशस्त्रे प्राकृतावेव प्रति-
पदनुचरावतिदिशति—**आ-ब्राह्मणम्** । एकाहे प्रकृतिभूतेऽग्निष्टोमे य आतानः 5.२७-२९
स एष नित्य एव न सूक्तवदपवादविषयो भवति । तस्य च 'आ त्वा रथं यथोतय इत्यनुष्टुभा मरुत्वतीयं प्रतिपद्यते'[b] इत्यादि प्रागुक्तमेव ब्राह्मणं द्रष्टव्यम् । इह केचिदध्येतार एतत्प्रतिपदनुचरविषयं ब्राह्मणं न पठन्ति ॥

इति पञ्चमः खण्डः

अथ प्राकृतसूक्तापवादेन सूक्तान्तरं विधत्ते—**कया-परिदधाति** । अत्र 6.१-६
चतुर्विंशेऽहनि 'कया शुभा'[c] इत्येतन्मरुत्वतीयं सूक्तं पठेत् । तेन प्राकृतस्य 'जनिष्ठा उग्रः'[d] इत्यस्य निवृत्तिः । सूत्र्यते हि—'कयाशुभीयं मरुत्वतीयम्'[e] इति ।

a. RV. 5. 51. 5.
b. KB. XV. 2. ६.
c. RV. 1. 165.
d. RV. 10. 73.
e. ŚS. 11. 2. 4.

'कया पञ्चोना'[a] इत्युक्तत्वादेतत् सूक्तं पञ्चदशर्चं भवति। तत्रास्य सूक्तस्य प्रकृतिवत् संहिताक्रमानतिक्रमेण शंसने सति 'एष वः स्तोमो मरुत'[b] इत्येषान्त्या परिधानीया प्रसज्येत। तत्प्रतिषेधार्थमेतत् सूक्तगतां नवमीमृचं परिधानीयां विधत्ते—तस्यानुत्तमेति। तस्य कयाशुभीयसूक्तस्य या 'अनुत्तमा ते'[c] इत्येषा नवम्यृगस्ति, तया शस्त्रसमाप्तिं कुर्यात्। तत् किमिदानीमेतदन्तं नवर्चमेव मरुत्वतीयसूक्तं स्यादिति शङ्कां छिनत्ति—उत्तराः पूर्वाः शस्त्वेति। नवम्या ऋच उत्तरा दशम्याद्या 'एकस्य चिन्मे'[d] इत्याद्याः षळृचः पूर्वाः कृत्वा शंसेत्। अष्टमीनवम्योरन्तराले षळृचः शंसेत्। 'सुगा अपश्चकर वज्रबाहो एकस्य चिन्म' इत्यादि। 'विद्यामेषं वृजनं जीरदानो शोंसावो अनुत्तमात' इत्यादि। कुतोऽध्ययनक्रमभञ्जनप्रयास इत्यत आह—मारुत्य इति। मरुद्देवत्या निष्केवल्या केवलेन्द्रदेवत्या। प्राधान्येनेन्द्रदेवत्यं हीदं शस्त्रम्। अतः केवलेन्द्रदेवत्ययैव परिधानमुचितम्। ऐन्द्रस्येन्द्र एव प्रतिष्ठापनस्य युक्ततरत्वात्।

6.७-९ अथास्याभिरूप्यमाह—**तस्मिन्-रूपम्**। तस्मिन् 'कया शुभा'[e] इत्येतस्मिन् सूक्ते। वैशब्दोऽध्येतृप्रसिद्धिद्योतकः। सम् इति पदमस्तीत्यन्वयः। तच्च संवत् सं मिमिक्षुरिति समुपसर्गयुक्तं भवति। यस्मादेवं तस्मात् तत् पदं संवत्सरमभिधत्ते। पदैकदेशस्य कृत्स्नपदार्थद्योतकत्वात्। इह च संवत्सरपदगतस्य समित्यस्य पदांशस्य विद्यमानत्वात्। यदेतत् संवत्सराभिधायकं समित्युपसर्गवत् पदमस्ति, तदेतस्य चतुर्विंशस्याह्नो रूपं भवति। चतुर्विंशस्य संवत्सरावयवरूपत्वेन संवत्सररूपत्वात्। संवत्सरस्य च समित्यनेनात्र प्रतीयमानत्वाच्च। एवमुपरितनमपि रूपसंपत्त्यभिधायकं वाक्यजातं व्याख्येयम्।

6.१०-१३ निष्केवल्यसूक्तं प्राकृतापवादाय विधत्ते—**तदिदास-जायते**। अथर्वणोऽपत्यं बृहद्दिवो नामर्षिस्तदिदासेति सूक्तं प्राग् दृष्टवान्। तथा चानुक्रम्यते—'तदिदं नवाथर्वणो बृहद्दिवः'[f] इति। तद्दृष्टत्वाच्च ताच्छब्द्यं वेदेषु बहुलमुपलभामहे। तदेतद् बृहद्दिवदृष्टं तदिदासेति सूक्तं निष्केवल्यं सूक्तं भवति। अत्र चतुर्विंशेऽहनि बृहद्दिवेन तदिदासेति सूक्तेन होता रेतःसेकमेव करोति प्राथ-

a. SA. I. 165. b. RV. 1. 165. 15.
c. RV. 1. 165. 9. d. RV. 1. 165. 10.
e. RV. 1. 165. f. SA. X. 120.

म्यात् । तदेतत् सिक्तं रेतः संवत्सरसत्रान्त्यावयवेन महाव्रतसंबन्धिनाह्ना संवत्सरे संपूर्णे प्रजातं करचरणादिसमग्राङ्गसंयुक्तं सप्राणं प्रादुर्भूतं करोति । यस्मात् सिक्तं रेतः स्त्रिया गर्भाशये कललबुद्बुदाद्यवस्थापत्तिप्रक्रमेण प्रवर्धमानं संवत्सरे संपूर्णे सति जायते प्रादुर्भवति । स्त्रीयोनिरन्ध्रद्वारा निष्क्रान्तं सज्जातो देवदत्त इति व्यवहारगोचरीभवति । चतुर्विंशे महाव्रतीये चाहनि तदिदासेति सूक्तस्यैव निष्केवल्ये शंसनात् तयोः संवत्सराद्यन्तवर्तित्वाच्चतुर्विंशशंसनस्य रेतःसेकरूपत्वं महाव्रते तच्छंशनस्य सिक्तरेतःप्रजननरूपत्वं चात्र संपादितम् । **तस्मिन्–रूपम्** । इति गतम् । 6.१४-१६

**तत्–रूपम्** । तद् देवस्येत्यादिः खण्डशेषोऽतिरोहितार्थः । तत् प्रत्यक्षं 6.१७-४५
संवत्सरमभिवदतीति । समितिपदैकदेशस्योपसर्गस्य साक्षादर्थान्तरप्रतीतिजनकत्वेन पर्यवसितव्यापारस्यापि विमर्शावस्थायां संवत्सरपदावयविस्मृत्युपस्थापनमुखेन संवत्सरार्थविषये परोक्षप्रतीतिजनकत्वमेव । [1]इह तु साक्षादेव संवत्सरपदश्रवणात् तस्य च रूढिवृत्त्यैव संवत्सराभिधायकत्वादस्त्यत्राञ्जसमाभिरूप्यमित्यर्थः । स्पष्टमन्यत् ॥

इति षष्ठः खण्डः

एवं चतुर्विंशाहःशस्त्रक्लृप्तिं विधाय शस्त्रक्लृप्ते स्तोमक्लृप्त्यनुरोधित्वस्थितेः सामगानां स्तोमक्लृप्तिप्रकारान्यथात्वे शस्त्रक्लृप्तिप्रकारान्यथात्वं शाखान्तरिभिरिष्टं निराकर्तुं सामगानां केषांचित् स्तोमक्लृप्तिप्रकारं दर्शयति—
**तद्–वदन्तः** । त्रिवृदादयस्त्रयस्त्रिंशान्ताः पृष्ठ्याः षळहक्लृप्ताः सर्वे स्तोमा 7.१-५
अस्येति सर्वस्तोमः । उक्तं हि प्राक् 'तस्य चतुर्विंशः स्तोमो भवति'[a] इति । न तथा केचिच्छन्दोगा इच्छन्ति । किंतु सर्वस्तोमं चतुर्विंशं भवितुमर्हतीति । कुतो हेतोः ते तथा कुर्वन्तीत्यत उक्तम्—अनेनाह्नेति । अनेन चतुर्विंशेनैकेनैवाह्ना पृष्ठ्यं षळहं प्राप्ता भवामः । षळहे हि षट्संख्येष्वहःसु क्रमेण त्रिवृदादयः

a. KB. XIX. 5. ७.

1. MSS. add स

स्तोमाः क्रियन्ते। तेषां सर्वेषामिह क्रमेण होतृशस्त्रषट्कार्थमुपादाने सति स्तोम-जीवितत्वादह्नां षळह आप्यते। षळहस्याप्तौ च संवत्सरस्य तद्गतानां च कामानां प्राप्तिः। न च षळहाप्तौ कथं संवत्सरस्याप्तिरिति शङ्क्यम्। यतः षळह एव कृत्स्नः संवत्सरो भवति। षळहावृत्तिपूरणीयत्वात् संवत्सरस्य। तच्च वक्ष्यति—'तदाहुः कति षळहाः संवत्सर इति। षष्टिः षळहाः षळहशः'[a] इति। इत्येवं वदन्तस्ते सर्वस्तोमं कुर्वन्तीत्यन्वयः।

अथ शाखान्तरिणामस्मिन् विषये शस्त्रक्लृप्तिविशेषमाह—**ते-आग्नि-**
7.६-१३ **मारुतम्**। यदि ते छन्दोगाः तथा चतुर्विंशं सर्वस्तोमं कुर्युः तर्हि होता षळह-क्लृप्तं पृष्ठ्यषळहे क्लृप्तं शस्त्रमिह चतुर्विंशे कुर्यात्। शस्त्रस्य स्तोत्रानुसारित्वस्थितेः। केचिदध्येतारः षळहेन संवत्सरमित्यादि तथा कुर्युरित्यन्तं न पठन्ति। क्लृप्तिप्रकारमेव दर्शयति—यत् प्रथमस्याह्न इत्यादिना। पृष्ठ्यषळह-संबन्धिनः प्रथमस्याह्नो यदाज्यशस्त्रं क्लृप्तं तदेवाज्यशस्त्रमिह चतुर्विंशे कुर्यात्। एवमन्यदपि योज्यम्।

7.१४-१८ अपरमपि शस्त्रगतं विशेषं तदभिमतमाह—**तत्र-कामाः**। उक्त-प्रकारेण षळहशस्त्रशंसने क्रियमाणे सति निष्केवल्ये वा पृष्ठ्यषळहसंबन्धिनो नानादेशवर्तिनो ये स्तोत्रियतृचाः सन्ति तान् सर्वान् समुच्चित्य निष्केवल्यसंबन्धिनः प्रगाथस्योपरिष्टात् प्रगाथधर्मवत्तया शंसेत्। किमर्थं पुनरित्थं शस्त्रक्लृप्तिप्रयास इति चेत्, तत् तत्र एवं सति छन्दोगाः सर्वस्तोमीकरणेनानेन चतुर्विंशेनैवाह्ना यथा षळहं तद्द्वारा संवत्सरं तद्गतांश्च कामान् प्राप्नुवन्ति। होता एवं शस्त्रक्लृप्तिप्रकाराश्रयणे सत्येतेनैवाह्ना षळहं तद्द्वारा संवत्सरं तद्गतांश्च कामान् प्राप्नोति। केचिदत्र 'षळहो वा उ सर्वः संवत्सर इति वदन्त' इति वाक्यं पठन्ति।

तामेतां शस्त्रक्लृप्तिमनादृत्य 'होताजनिष्ट चेतन इत्यष्टर्चमाज्यम्'[b] इत्यादिप्रागुक्तशस्त्रक्लृप्तिरेव सर्वस्तोमीकरणपक्षेऽपि स्वीकर्तव्येति सिद्धान्तयति—
7.१९-२३ **तद्ध-नेयात्**। तदेतत् षळहक्लृप्तशस्त्रक्लृप्तिरूपं मतं प्रदिश्याभिधाय विषयीकृत्य निराकृत्य वा कौषीतकिराह स्म। किमिति चेत्, सैषा शस्त्रान्तरक्लृप्तिः

a. KB. XXVI. 1. १५-१६. b. KB. XIX. 5. २१.

मुग्धिर्मोह एव । तन्निबन्धनेति यावत् । न तु सम्यग्ज्ञाननिमित्ता । पूर्वोक्तशस्त्रमाहात्म्यापरिज्ञानात् शस्त्रस्य स्तोत्रानुसारित्वश्रद्धाजडानामयं कल्पनाविशेष इत्यर्थः । तस्मान्नेयं तत्त्वविद्भिरादरणीया । कथं तर्हि सर्वस्तोमीकरणे सत्यस्माभिरनुष्ठेयमित्यत आह—यं कंचेति । छन्दोगास्त्रिवृदादिषु यं कमपि स्तोममुपपन्नाः प्राप्ता भवेयुः । का क्षतिः ? तथापि होत्रा तदादरणाय न कर्तव्यम् । किंतु यदेव चतुर्विंशस्याह्न एतच्छस्त्रं समनन्तरमेव वयमुक्तवन्तः ततस्तस्मादेव शस्त्रान्नेयात् न गच्छेत् । तदेव शस्त्रं कर्तव्यम् , न शस्त्रान्तरमभ्युपेयम् ।

ननु प्राक् परिकल्पितं शस्त्रं छन्दोगैः कल्पितं परिकल्पितस्य न पर्याप्तम् । न च मास्तु पर्याप्तिरिति वाच्यम् , स्तोमविवृद्धौ शस्त्रविवृद्धेरभ्युपेतत्वात् । अतः षळहक्लृप्तमेव शस्त्रं चतुर्विंशे कल्पनीयमित्याशङ्क्याह—एते
**इति** । ये एते माध्यंदिनसवनशस्त्रवर्तिनी[1] सूक्ते स्तः । 'कया शुभा'[a] इत्येत- 7.२४,२५
देकं सूक्तं मरुत्वतीयशस्त्रगतम् । अपरं 'तदिदास'[b] इत्येतत् सूक्तं निष्केवल्यशस्त्रगतम् । ते एते द्वे सूक्ते स्तोमसाहे छन्दोगपरिकल्पितान् स्तोमान् सहेते इति स्तोमसाहे भवत इति शेषः । अतः शस्त्रस्यास्य स्तोमापर्याप्तत्वचिन्तया न मनः खेदनीयम् । अनयोरेव सूक्तयोर्महानुभावयोस्तत्तादृशसामर्थ्यसंभवात् । यस्मादनयोः स्तोमसाहत्वं तस्मादित्युपसंहरति—ताभ्यामेव इति । ताभ्यां कयाशुभीयतदिदासीयाभ्यामेव सूक्ताभ्यां निश्च्यवनं व्यवच्छित्ति तत्प्रहाण्या सूक्तान्तरोपादानलक्षणां होता न कुर्यात् । अपि तु ते सूक्ते शंसेदिति । स्थितिरिति शेषः । अथवा इतिः चतुर्विंशाहःशस्त्रक्लृप्तिसमाप्त्यर्थः । अभ्यासोऽध्यायसमाप्तिद्योतनार्थः ।

चतुर्विंशस्तोमं विदधति चतुर्विंशमिह ये
तथा सर्वस्तोमं कतिचिदपरे सामनिपुणाः ।
सहैतैः कुर्वद्भिः सपदि विहिताच्छस्त्रमपरम्
न कार्यं तत्स्तोमास्थितिरिति हि कौषीतकिमुनेः ॥

इति सप्तमः खण्डः

a. RV. 1. 165. b. RV. 10. 120.

1. B. V. omit शस्त्र

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
संक्षालयन् मनःपङ्कं पङ्कजाक्षः प्रसीदतु ॥
इत्याचन्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायोऽग्निवेश्यभिप्लवविधेः कौषीतकिब्राह्मण-
व्याख्याने कथयन् गवामयनकर्मैकोनविंशो गतः ॥

## इति कौषीतकिब्राह्मणव्याख्याने
## द्वितीयदशके नवमोऽध्यायः

अथ

# विंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

दीक्षादावाग्निचित्यान्वयकृतमुपदिश्यादितः कर्मसत्रे
पूर्वोक्तत्वादनुक्त्वा प्रथममहरिह प्रायणीयातिरात्रम् ।
द्वैतीयीकं चतुर्विंशकमथ मुखमित्याद्ययोक्तं त्रिखण्ड्या
द्व्यध्याय्याभिप्लवाख्यं षळहमवसरप्राप्तमूर्ध्वं विधत्ते ॥

पूर्वोत्तरविभेदेन स्यातां द्वौ षळहे त्र्यहौ ।
विंशैकविंशयोरेतावुक्तावध्याययोः क्रमात् ॥

तत्र प्रथमं तावत् संवत्सरतद्गताखिलान्नाद्य ।
प्राप्तिनिमित्तत्वोक्त्या स्तुत्या प्रस्तौत्यभिप्लवं षळहम् ॥

तत्र संवत्सरसंज्ञितस्य कालविशेषस्य लोकसिद्धचक्ररूपेण वर्णना क्रियते सुखप्रतिपत्त्यर्थम् । यथा लोके विविधाक्षाद्यवयवोपेतं प्रसिद्धचक्रमारुह्य तद्गत-मुच्चावचं भोग्यजातं प्राप्नुवन्ति, एवमभिप्लवषळहानुष्ठानेन संवत्सरचक्रं प्राप्य तत्प्रतिष्ठितं ग्राम्याद्यन्नाद्यं प्राप्नुवन्ति । लोकप्रसिद्धदृष्टान्तोपप्रदर्शन-मुखेन हि प्रत्युपस्थाप्यमानोऽत्यन्तपरोक्षोऽर्थः प्रतिपित्सूनां सुखप्रतिपत्तियोग्यो भवति । तथा च 'अस्य वामस्य'[a] इत्यत्र सूक्ते 'द्वादश प्रधयः'[b] इति मन्त्रेण संवत्सरस्य चक्ररूपेण वर्णनं कृतम् । तथा चानुक्रमणी—'द्वादशेति संवत्सर-संस्थं कालचक्रवर्णनम्'[c] इति ।

अस्य मन्त्रस्यायमर्थः—एकमद्वितीयं चक्रम् । चकनाच्चरणात् क्रमणाद्

a. RV. 1. 164.
b. RV. 1. 164. 48.
c. SA. I. 164.

वा चक्रमस्ति । तच्चक्रं द्वादशमासात्मकाः प्रधयश्चक्रावयवविशेषाः । श्रिता इति शेषः । तथा त्रीणि नभ्यानि नाभिस्थानीयानि **ग्रीष्मवर्षहेमन्ताख्यान्या**-श्रितानीति शेषः । क उक्तोपमं तच्चक्रं जानाति ज्ञातुं समर्थः । तस्मिंश्चक्रे साकं सह रथचक्रस्य शङ्कव इव त्रीणि शतानि षष्टयश्च–नश्चार्थः–अर्पिताः । कीदृशाः ? चलाचलासः । चलाचलाश्चलनस्वभावाः । 'षष्टिश्च ह वै त्रीणि च
1. १-४ शतानि संवत्सरस्याहानि इति हि ब्राह्मणम्'[a] इति । **देवचक्रम्–च** । यदेतत् संवत्सर इति कालस्वरूपमस्ति तद् देवचक्रमेव । देवानां चक्रं देवचक्रम् । यथा लोके विविधावयवविशिष्टमभिमतप्राप्तिसमर्थं मनुष्याणां चक्रम्, एवमेतद् देवानां संबन्धि चक्रं भवति । कीदृशं तत् ? परिप्लवं पुनः पुनः परिभ्रमत् । तत्[1] संवत्सरचक्रं न लौकिकचक्रवद् विनाशि । किंतु अमृतमविनाशि । 'त्रिनाभि चक्रमजरमनर्वम्'[b] इत्यादिमन्त्रवर्णात् । न च कालस्य विनाश उपपत्तिमान् । विनाशस्यैव कालायत्तत्वात् । 'कालः संहरति प्रजाः'[c] 'अनादिनिधनः कालः'[d] इत्यादिदर्शनात् । अस्तु संवत्सरस्य देवचक्रत्वम् ; ततः किमिति चेत्, तस्मिन् संवत्सरात्मके देवचक्रे एतद् वक्ष्यमाणं षट्संख्यावयवोपेतमन्नाद्यं प्रतिष्ठितमिति सप्तमीनिर्दिष्टाधाराद् वाक्यशेषः सिध्यति । किं तदिति चेत्, ग्रामे भवा ग्राम्या गवादयः । अरण्ये भवा वराहादयः । ओषधयः फलपाकान्ता व्रीह्यादयः । वनस्पतयः सहकारपनसादयः । अप्सुचरं सलिलचारिप्राणिजातं मीनादि । यद् वा अन्तरिक्षचरं श्येनादि । 'अप्सुक्षितो महिना'[e] इत्यादावप्छब्दस्यान्तरिक्षाभिधायित्वदर्शनात् । परिप्लवं गगनचारि पूर्वस्मिन् पक्षे । उत्तरस्मिन् भूमौ परिवर्तमानं क्षुद्रप्राणिजातम् । भूतभौतिकात्मकस्याखिलस्य प्रपञ्चस्यात्र विवक्षितत्वाद् यथाशक्ति योज्यम् । सर्वस्यापि जगतः कालप्रतिष्ठत्वात् । तथा च मन्त्रः—'तस्मिन्ना तस्थुर्भुवनानि विश्वा'[f] इति ।

a. N. 4. 27. b. RV. 1. 164. 2.
c. MBh. 1. 1. 188. d.
e. RV. 1. 139. 11. f. RV. 1. 164. 13.

1. B. V. omit

अथास्य देवचक्रत्वमुपपादयन् देवानां सर्वलोकप्राप्तिहेतुत्वमाह—**तद्-लोकानाम्**। तत् संवत्सरचक्रं समारुह्य देवा अग्न्यादयः, यद्वा कर्मदेवाः 1. ५-१३
सर्वान् लोकान् वक्ष्यमाणान् लक्षीकृत्य गच्छन्ति। के ते लोका इत्यत्राह—देवलोकमित्यादि। देवानामग्न्यादीनां लोकः स्थानं देवलोकः तम्। पितॄणामग्निष्वात्तादीनां लोकः। जीवानां मनुष्याणां लोको जीवलोकः तम्। अग्नेर्लोक उपोदकाख्यस्तम्। अग्नेरबायतनत्वात्। वायोर्लोकः ऋतधामाख्यः तम्। इन्द्रस्य लोकोऽपराजिताख्यस्तम्। वरुणस्य लोकोऽधिदिवाख्यस्तम्। मृत्योर्लोकः प्रतिदिवाख्यस्तम्। ब्रह्मणो लोको रोचनाख्यस्तम्। ब्रह्मलोकस्यैव विशेषणं नाकं सत्तमं लोकानामिति। कमिति सुखनाम। 'अथो सुखस्यैवैतन्नामधेयं कमिति'[a] इति प्रागप्याम्नातत्वात्। तस्य प्रतिषेधोऽकमिति दुःखमित्यर्थः। नञो विरोध्यर्थत्वात्। अकं दुःखं यत्र न भवति स नाकः। तत एव लोकानां सर्वेषां मध्ये सत्तमः अतिशयेन साधुः। अन्येषु दुःखसंभेदस्य विद्यमानत्वात्। कर्मतारतम्यकृतस्य सुखतारतम्यस्य दुर्निवारत्वात्। ब्रह्मलोकस्य मुक्तियौवराज्यस्थानत्वेन तदभावात्। तस्य च मुक्तिपूर्वरङ्गत्वं स्मर्यते—

> 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।
> परस्यान्ते यतात्मानः प्रविशन्ति परं पदम्॥'[b] इति।

प्रतिसञ्चरो महाप्रलयः। अथवा नाकशब्दोऽपि लोकान्तरवाचकः। स च विष्णोर्लोकः। 'ते ह नाकं महिमानः सचन्ते'[c] इत्यत्र भाष्यकृद्भिस्तथा व्याकृतत्वात्। तस्य च लोकानां मध्ये[1] सत्तमत्वं प्रसिद्धम्। भवतु तत्तादृशानुभावत्वं संवत्सरस्य ततः किं लभ्यत[2] इत्यत आह—**तद्-च**। उपयन्त्यनु- 1.१४-१६
तिष्ठन्ति। सत्रिणो यजमानाः। समारोहन्ति सम्यगारूढा भवन्ति। आरुह्य तस्मिन् संश्रितं षट्तयमन्नाद्यं प्राप्ता भवन्ति।

सामान्येनोक्तमन्नाद्यषट्कप्राप्तिहेतुत्वं विभज्य दर्शयति—**द्विर्-च**। 1.१७-२२

a. KB. V. 5. १७.
b. *Kurma-purāṇa*. 1. 12. 269.
c. RV. 1. 164. 50.

1. V. omits
2. B. V. लक्ष्यत

अभिप्लवे हि षळहे ज्योतिर्गवायुर्गवायुर्ज्योतिःसंज्ञितानि षट्संख्यान्यहानि। तत्र ज्योतिःसंज्ञयोर्द्वयोरह्नोरनुष्ठानाद् विविधपशुलक्षणान्नाद्यद्वयप्राप्तिः। एवमन्यदपि योज्यम्। अत्र खण्डे च ज्योतिराद्येकशब्दवाच्यत्वाकारेण एकत्वमाश्रित्य-एकस्यैवावृत्तिवाचको द्विःशब्दप्रयोगः। वस्तुतो हि भेद एव। अभेदे षळह्शब्दवाच्यत्वानुपपत्तिप्रसक्तेरिति द्रष्टव्यम्॥

इति प्रथमः खण्डः

अतिक्रान्ते खण्डे कर्मस्वरूपप्रशंसा प्रबन्धेन कृता। इदानीं षाळहिकानां
2, १ षण्णामह्नां शस्त्रक्लृप्तिं क्रमेण कर्तुकामः प्रस्तौति—**ज्योतिः–उपयन्ति।** प्रायणीयातिरात्रं चतुर्विंशं क्रमेणाहनी उपेत्याभिप्लवषळहवर्ति ज्योतिःसंज्ञं प्रथममहः सत्रिणोऽनुतिष्ठेयुः। अथात्र शंसनीयानामृचामहःसंबन्धिरूपसंपत्त्या समृद्धताभिमुख्येन[1] शस्त्रवक्लृप्तिं करिष्यन्नभिप्लवषळहस्यास्य पृष्ठ्यविकारत्वं क्रमेण प्रथमाद्यहर्विकृतित्वं च हृदि कृत्वा पार्ष्ठिकप्रथमाहःसंबन्धीन्येव रूपाण्यत्रातिदिशति—
2, २ **तस्य–अह्नः।** यानि पृष्ठ्यप्रथमाह्नः संबन्धीनि रूपाणि वक्ष्यमाणानि तान्येव तस्याभिप्लवप्रथमाह्नः संबन्धीनि छन्दसां रूपाणि भवन्तीत्यवगन्तव्यम्। न त्वन्यान्यत्र रूपाणि, तद्विकृतित्वात्। अनेनाभिप्लवस्य पृष्ठ्यविकारत्वं सूचितम्। तथा च सूत्रितम्—'अभिप्लवः षळहः[2] पृष्ठ्यविकारः'[a] इति। वक्ष्यति च पार्ष्ठिकप्रथमाहश्छन्दोरूपाणि—'करिष्यत् प्रथमे पदे सदेवम्। यद् वै भविष्यत् तत् करिष्यत्। आवत् प्रवदेषवदर्षवदद्यवद् युक्तवद् युञ्जानवज्ज्योतिष्मदिति'[b] इति। रूपयति निरूपयति इतरेभ्यो व्यावृत्त्या प्रदर्शयतीति रूपमसाधारणधर्मः। तच्च क्वचिदर्थरूपं भविष्यत्तादि। क्वचिच्छब्दरूपं प्रपदादि। एतच्च द्रष्टव्यम्।

तत्र तावत् प्रकृतेश्चोदकेन प्राप्तमाज्यशस्त्रं रूपसमृद्ध्यभिधानेन स्तौति–

a. ŚŚ. 11. 4. 1. b. KB. XXII. 1. ५–७.

1. T. समृद्धताभिधानमुखेन 2. T. omits

**प्र-रूपम्**। आज्यं प्रवदिति। तथा च सूत्रकृता 'अभिप्लवः षळहः पृष्ठ्य- 2. ३,४
विकारः। यानि त्र्यहस्य प्रथमस्याज्यस्य समूळ्हे तानि पूर्वेषामाभिप्लवि-
कानाम्'[a] इति समूळ्हाद्द्शरात्रादभिप्लवपूर्वत्र्यहाज्यान्यतिदिष्टानि। तत्र च
'प्र वो देवायाग्नये'[b] इत्यैकाहिकमेवाज्यम्। सूत्रितं च—'प्र वो देवायाग्नय इति
समूळ्हे'[c] इति। तच्च प्रवत् प्रेत्युपसर्गयुक्तं भवति। आद्यायामृचि प्रथमतः
प्रेत्युपसर्गश्रवणात्। हे ऋत्विजः यूयमग्नये बर्हिष्ठमतिशयेन वृद्धं स्तोत्रं प्रार्चत
प्रकर्षेणोच्चारयत। एतच्च प्रवत्त्वं युक्तम्। यस्मात् प्रोपसर्गयुक्तं शब्दरूपं
प्रथमस्याह्नो रूपं व्यावर्तकम्। प्रशब्दस्य प्राथम्यद्योतकत्वात्। 'प्रयाजा'
इत्यादौ तथा दर्शनात्।

ऐकाहिकमेव प्रउगशस्त्रं विधत्ते—**माधुच्छन्दसः-रूपसमृद्धम्**। मधु- 2. ५-८
च्छन्दोनाम्ना महर्षिणा दृष्टो 'वायवा याहि'[d] इत्यादि सप्ततृचात्मात्र प्रउगो
द्रष्टव्यः। स चात्र युक्तः। यस्मात् पुरा प्रजापतिना यज्ञं सृजता तत्साधनम्
'अभि त्वा शूर नोनुमः'[e] इत्यस्यामृच्युत्पन्नं रथंतराख्यं साम सृष्टम्। सृज्यमानं
च तदनु पश्चादयं माधुच्छन्दसः प्रउगः सृष्टोऽभूत्। तथा सत्येष माधुच्छन्दसः
प्रउगो राथंतरत्वरूपेण राथंतरमेतत् कर्म समृद्धं करोति। रूपसमृद्धौ कोऽ
तिशय इति चेत्, यत् कर्म रूपसमृद्धं मन्त्रपदप्रतिपादितेन रूपेण समृद्धं तदे-
वर्द्धिशीलं भवति। तस्माद् रूपसमृद्धिः श्लाघ्या।

मरुत्वतीयं विधत्ते—**इन्द्रो-रूपम्**। अत्र प्रवतमिति प्रशब्दश्रवणात् 2. ९,१०
प्रवत्त्वम्। निष्केवल्यं विधत्ते—**आ-रूपम्**। एत्युपसर्गस्यारम्भद्योतकत्वात् 2.११,१२
प्रथमाहोरूपत्वम्। वैश्वदेवशस्त्रे सावित्रसूक्तं विधत्ते—**युञ्जते-रूपम्**। प्रथमा- 2.१३,१४
हन्येव यज्ञो युज्यते। तत्रारभ्यमाणत्वात्। अतो युजिधातुमत्त्वं प्रथमस्याह्नो
रूपम्।

सूक्तान्तरं विधत्ते—**प्र-रूपम्**। गतमेतत्। सूक्तान्तरं विधत्ते—**इहेह-** 2.१५,१६
**रूपम्**। 'उशिजो जग्मुरभि तानि'[f] इत्यस्मिन् पादेऽभिशब्दश्रवणात् एत- 2.१७-१९
दार्भवं सूक्तमभिवदभीत्युपसर्गयुक्तं भवति। तच्चैतदभिवत्त्वं रथंतरसाम्नः

a. ŚŚ. 11. 4. 1–2. b. RV. 3. 13. 1.
c. ŚŚ. 10. 2. 2. d. RV. 1. 2. 1.
e. RV. 7. 32. 22. f. RV. 3. 60. 1.

संबन्धि रूपं भवति। 'अभि त्वा शूर नोनुमः'[a] इत्यस्यां रथंतरसाम्नो योनिभूतायामृचि अभिशब्दश्रवणात्। प्रथमस्याह्नो राथंतरत्वात्।

2.२०-३२ **कथा-दधते**। इमं लोकमित्यतः प्राक्तनवाक्यजातं गतम्। आग्निमारुतान्तशस्त्रक्लृप्ति विधाय सर्वशस्त्रसहितं ज्योतिस्संज्ञमहः पृथिवीलोकादिप्राप्तिहेतुत्वेन स्तौति—इमं लोकमिति। प्रथमेन ज्योतिःसंज्ञितेन अनेनाह्ना अनुष्ठितेन सता अनुष्ठातारः सत्रिणः पृथिवीलोकं लोकानां मध्ये प्राप्ता भवन्ति। प्राथम्यसाम्यात्। तथा देवतानां मध्येऽग्निं देवतां प्राप्नुवन्ति। अग्नेः पृथिव्यायतनत्वेन प्राथम्यस्याविशिष्टत्वात्। अधिभूतं भूतमात्रा अधिकृत्य नाम संज्ञां शब्दरूपं प्राप्नुवन्ति। तस्य वागिन्द्रियगोचरत्वम्। आत्मन्नात्मनि शरीरे वाचमिन्द्रियं स्थापयन्ति। 'अग्निर्वाग् भूत्वा मुखं प्राविशद्'[b] इत्यग्नेर्वाग्भावश्रवणात्। अग्नेः प्राप्तौ वाच आत्मनि धारणोपपत्तेः। वाचो धारणे तद्विषयनामप्राप्त्युपपत्तिः। लोकादिसर्वप्राप्तिहेतुत्वान्महानुभावमेतदहरिति ॥

इति द्वितीयः खण्डः

अभिप्लवस्याद्यमहर्ज्योतिःसंज्ञमितीरितम्।
गोसंज्ञितं द्वितीयं तु क्रमायातमथोच्यते ॥

3. १ **गाम्-उपयन्ति**। गौरित्याभिप्लविकद्वितीयाहःसंज्ञा। पृष्ठ्यद्वितीयाह-
3. २ र्विकृतित्वमस्य सूचयंस्तदीयानि छन्दोरूपाण्यतिदिशति—**तस्य-अह्नः**। कुर्वदादीनि इति शेषः। स्पष्टमन्यत्। प्रकृतेः प्राप्तमाज्यशस्त्रम् आभिरूप्यकथनेन
3. ३-६ स्तौति—**त्वं-अन्तरिक्षम्**। 'त्वं विचर्षणे'[c] इत्यत्र विशब्दश्रवणादेतद् विवत्। तद् विवत्त्वमस्य दृश्यमानस्यान्तरिक्षस्य तावद् रूपम्। यस्मादेतदन्तरिक्षं विवृतमिवोद्घाटितमिव दृश्यते, छिद्रात्मकत्वात्। विशब्दस्य च विवरणलक्षणार्थद्योतकत्वात्। इदं चाहरन्तरिक्षरूपम्, द्वितीयत्वसाम्यात्। तस्मादेतदह्नो रूपं भवति।

a. RV. 7. 32. 22. b. AU. 2. 4.
c. RV. 6. 2. 1.

अथ प्रउगं विधत्ते—**गार्त्समदः–रूपसमृद्धम्।** गृत्समदनाम्ना महर्षिणा 3. ७-१०
दृष्टत्वाद् गार्त्समदः प्रउगः। 'वायो ये ते सहस्रिणः'[a] इति द्वे। 'तीव्राः सोमास आ गहि'[b] इत्येका। 'शुक्रस्याद्य'[c] इत्येका। 'उभा देवा दिविस्पृशा'[d] इति द्वे। 'अयं वां मित्रावरुणा'[e] इति चत्वारि तृचानि। 'उत स्या नः सरस्वती जुषाणा'[f] इति प्रउगतृचानीति। अस्याह्नो बृहत्पृष्ठतामुपजीव्य स्तौति—बृहद् वा इति। माधुच्छन्दसप्रउगार्थवादवद् व्याख्येयम्।

मरुत्वतीयशस्त्रस्य प्रतिपदं विधत्ते—**विश्वानरस्य–ब्राह्मणम्।** विशब्द- 3. ११
श्रवणादियं विवती। तस्या विवत्याः प्रतिपदः 'तदस्यान्तरिक्षस्य रूपम्'[g]
इत्याद्युक्तमेव ब्राह्मणं द्रष्टव्यम्। अनुचरतृचं विधत्ते—**इन्द्र–ब्राह्मणम्।** 3.१२,१३
'विश्वायुः' इति विशब्दश्रवणादयं तृचो विवान्। गतमन्यत्। सूत्र्यते च—'विश्वानरस्य इन्द्र इत् सोमपा इति मरुत्वतीयस्य प्रतिपदनुचरौ'[h] इति।
ब्राह्मणस्पत्यं प्रगाथं विधत्ते—**उत्तिष्ठ–अह्नः।** उद्वानुच्छब्दवान्। द्वितीयमहश्चो- 3.१४-१६
च्छब्दवदिति प्रसिद्धम्।

मरुत्वतीयसूक्तं विधत्ते—**इमा–ब्राह्मणम्।** सूत्र्यते च—'इमा उ त्वेति मरुत्व- 3. १७
तीयम्'[i] इति। अत्रोकारस्योच्छब्दैकदेशस्य श्रवणाद् भीमादिपदैकदेशवत् कृत्स्नपदद्योतकत्वात् तद्द्वारोच्छब्दरूपत्वमभिप्रेत्य उद्वत्त्वमस्योक्तम्। एवमन्यत्राप्येवं-
विधे विषये द्रष्टव्यम्। निष्केवल्यशस्त्रं विधत्ते—**सुत–ब्राह्मणम्।** अत्रोक्थ 3.१८,१९
इत्युकारश्रवणादुद्वत्त्वम्। सूत्र्यते च—'सुत इत्त्वं निमिश्ल इति निष्केवल्यम्'[j]
इति। **विश्वो–ब्राह्मणम्।** वैश्वदेवशस्त्रस्य प्रतिपदि 'विश्वे देवस्य नेतुः'[k] 3.२०,२१
इत्यस्यां विश्व इति विशब्दश्रवणाद् विवत्त्वम्। तथा तस्यैवानुचर 'आ विश्वदेवम्'[l] इत्यस्मिन्नपि। **द्वे–प्राणसंस्कृतेः॥** 3.२२-३१

इति तृतीयः खण्डः

a. RV. 2. 41. 1.
b. RV. 1. 23. 1.
c. RV. 2. 41. 3.
d. RV. 1. 23. 2.
e. RV. 2. 41. 4.
f. RV. 7. 95. 4.
g. KB. XX. 3. ५.
h. ŚŚ. 10. 3. 6.
i. ŚŚ. 11. 5. 1.
j. ŚŚ. 11. 5. 2.
k. TS. 1. 2. 2. 1.
l. RV. 5. 82. 7.

4. १ इदानीं वैश्वदेवशस्त्रे सावित्रसूक्तं विधत्ते—**अभूद्-ब्राह्मणम्**। सूत्र्यते हि—'एकाहात् सावित्रम्'[a] इति। अत्र 'नु' इति नकारस्योकारस्य च पृथक्करणेनोद्वत्त्वम्। तस्योक्तमेव 'उद्वद्वै द्वितीयमहः'[b] इति ब्राह्मणं द्रष्टव्यम्।
4. २ द्यावापृथिवीयं विधत्ते—**ते-ब्राह्मणम्**। 'विश्वशंभुवा' इत्यत्र विशब्दश्रवणाद्
4. ३ विवत्त्वम्। आर्भवं विधत्ते—**ततं-ब्राह्मणम्**। सूत्रितं हि—'ततं म इत्यार्भवम्'[c] इति। 'तदु तायते' इत्युकारश्रवणादुद्वत्त्वम्। तस्योक्तम् 'उद्वद्वै द्वितीयमहः'[b] इति ब्राह्मणं द्रष्टव्यम्।

4. ४ वैश्वदेवं विधत्ते—**देवान्-ब्राह्मणम्**। अत्र 'हुव' इत्यत्र हकारस्य व्यञ्जनस्योकारस्य स्वरस्य च पृथक्करणेनोद्वत्त्वमुक्तमवगन्तव्यम्। अन्यद् गतम्। वैश्वा-
4. ५-८ नरीयं विधत्ते—**पृक्षस्य-वृषण्वत्**। वृषण्वच्छब्दवत्त्वमाभिरूप्यदर्शनेन स्तौति—वृषा वा इति। इन्द्रो वृषेति तावत् प्रसिद्धम्। अपां कामानां वा वर्षितृत्वात्। त्रिष्टुबपि वृषा ऐन्द्रत्वात्। एतच्च द्वितीयमहरैन्द्रं त्रैष्टुभं च। तस्माद् वृष-
4. ९ ण्वदिदं सूक्तमभिरूपम्। मारुतं विधत्ते—**वृष्णे-ब्राह्मणम्**। तस्योक्तमिति 'वृषा वा इन्द्रः'[d] इत्यादिकम्।

4.१०,११ अथ जातवेदसीयं विधत्ते—**यज्ञेन-ब्राह्मणम्**। 'सुप्रयसम्' इति सकारस्योकारस्य च पृथक्करणादुद्वत्त्वमवगन्तव्यम्। पूर्ववदेव लोकादिप्राप्तिहेतुत्वेन
4.१२-१४ द्वितीयमहः स्तौति—**अन्तरिक्षलोकम्-दधते**। द्वितीयत्वसाम्याद् द्वितीयेनाह्ना अन्तरिक्षलोकप्राप्तिः। तत्स्थानत्वाद् वायोः। अध्यात्मं प्राणतया स्थितस्य वायोरायुर्निमित्तत्वादायुःप्राप्तिः। 'यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः'[e] इत्यारण्यके वक्ष्यमाणत्वात्। देहपरिच्छिन्नस्य वायोरेव प्राणत्वात् तत्प्राप्तिः। 'यः प्राणः स वायुः'[f] इति श्रुतेः। न चायुषोऽध्यात्मकत्वादधिभूतग्रहणविरोधः। तस्य शब्दादिविषयोपभोगलक्षणत्वेन भूतसंसर्गस्यापि विद्यमानत्वात्। अतो न दोषः॥

इति चतुर्थः खण्डः

a. ŚS. 11. 5. 3. b. KB. XX. 3. १६.
c. ŚS. 11. 5. 4. d. KB. XX. 4. ६.
e. KBU. 3. 2. f. Cf. ŚB. 10. 3. 3. 7.

खण्डद्वयेनेत्थमभिप्लवस्य विधाय गोसंज्ञमहर्द्वितीयम् ।
अथानुपूर्व्यापतितं तृतीयमायुःसमाख्याविदितं विधत्ते ।।

**आयुः–उपयन्ति**। आयुस्तृतीयमिति पूर्ववद् योज्यम्। अस्य पृष्ठ्यतृतीया- 5.१
हर्विकृतित्वं सूचयंस्तदीयानि चक्रवदादीन्येव छन्दोरूपाण्यतिदिशति—**तस्य–
अह्नः**। तान्येवेति समूळ्हतृतीयाहनि यदाज्यं तदेवाज्यशस्त्रमत्र दर्शयति— 5.२
**त्वम्–रूपम्**। यच्छन्दोऽह्नः[1] संबन्धिना केनचिद् रूपेण संपन्नं भवति तत् स्वयं 5.३-६
संभृतम्। ब्राह्मणविनियोगरूपवचनानपेक्षयैव स्वसामर्थ्येनैव तस्मिन्नहनि
संयुक्तं भवतीति सामान्यविषयमेतद् वचनम्। अथवैतत् 'त्वमग्ने वसून्'[a] इत्यादि
तच्छन्दः स्वयंसंभृतं भवति, यस्मात् तृतीयस्याह्नो रूपेण संपन्नं भवति। कथं
रूपसंपत्तिरिति चेत्। यस्मात् त्रयस्त्रिंशतमिति तृतीयाहर्गततृतीयत्वरूपस्य
स्पष्टमेव प्रत्यायकेन त्रिशब्देन युक्तं भवति। तेन तदभिहितं त्रित्वं तृतीयस्या-
ह्नो रूपमत्र प्रतीयते। तस्मान्मन्त्रवर्णसामर्थ्यादेव तृतीयाहःसंयोगावगतेः स्वयं-
संभृतत्वमुपपन्नम्।

अथ प्रउगशस्त्रं विधत्ते—**औष्णिहो–रूपसमृद्धम्**। उष्णिक्छन्दस्को विश्व- 5.७-१०
मनसा महर्षिणा दृष्टश्च। तत्र 'वायो याहि शिवा दिवः'[b] इति तृचो वायव्यः।
'आ वां सहस्रं हरयः'[c] इत्यैन्द्रवायवः। 'ता वां विश्वस्य'[d] इति मैत्रावरुणः।
'आ वां वाहिष्ठो अश्विना'[e] इत्याश्विनः। 'सखाय आ शिषामहि'[f] इत्यैन्द्रः।
'उत नो देव्यदितिः'[g] इति वैश्वदेवः। 'उत नः प्रिया'[h] इति सारस्वतः। अत्रो-
ष्णिक्छन्दस्त्वं तावत् प्रसिद्धम्। अष्टाविंशत्यक्षरत्वात्। विश्वमनसा दृष्टत्वं
च। 'ईळिष्व'[i] इत्यादेः 'अग्निरुक्थे'[j] इत्यतः प्राक्तनस्य विश्वमनोदृष्टत्वात्।
बाहुल्येन चाभिधानसंबन्धः प्रसिद्धो लोके। रथंतरमित्यादि पूर्ववत्।

a. RV. 1. 45. 1. b. RV. 8. 26. 23.
c. RV. 4. 46. 3. d. RV. 8. 25. 1.
e. RV. 8. 26. 4. f. RV. 8. 24. 1.
g. RV. 8. 25. 10. h. RV. 6. 61. 10.
i. RV. 8. 23. 1. j. RV. 8. 27. 1.

1. B. T. अग्नेः for अह्नः

5.११-१५ अथ मरुत्वतीयशस्त्रे प्रथमपठनीयं तृचं विधत्ते—**तंतम्-इयात्**। निन-
र्तिरिव निनर्तिः अभ्यास इति यावत्। तमिति पदस्य पुनः पठनात्। सैषा
निनर्तिरन्तरूपप्रतीतिहेतुत्वेन तृतीयाह्नो रूपमित्याह—नीव वा इति। लोके
प्रकान्तस्य कर्मणो गम्यभूमेर्वान्तमवसानं गत्वा नृत्तं करोतीव, हा हन्त एतत्
प्राप्तमिदानीं मयेति मनोरथपरिपूर्तिसंपत्तौ यस्मात्; ततस्तस्मादवसानभूमेः
सकाशादयं गन्ता पुरुषः कव्यङ् इयात्? क्व गच्छतीति कव्यङ्। अवसानस्य
प्राप्तत्वान्न ततोऽन्यद् गन्तव्यमवशिष्यते। तेनास्य चरितार्थत्वसंपत्तौ हर्षसंपत्ति-
रुपपन्ना।

5.१६,१७ स्तोत्रियानन्तरपठनीयं तृचं विधत्ते—**त्रय-रूपम्**। अस्मिंस्तृचे त्रय इति
पदमस्ति। तत् त्रिसंख्यावाचित्वात् तृतीयस्याह्नो व्यावर्तकं भवति। एतौ च
तृचौ पार्ष्ठिकतृतीयाह्नश्चोदकप्राप्तौ द्रष्टव्यौ। तथोपरि विधास्यमानत्वात्।
5.१८-२२ प्रकृतितः प्राप्तं ब्राह्मणस्पत्यं स्तौति—**प्रैतु-इयात्**। प्रवान् प्रेत्युपसर्गेण
तद्वान्। अत्र प्रशब्दस्याभ्यस्यमानत्वान्निनृत्तिर्विद्यते। गतमन्यत्।

अथ षळहगतानां मरुत्वतीयशस्त्रप्रतिपदनुचरब्राह्मणस्पत्यानां समुदितां
5.२३-२५ संख्यामनूद्य लोकत्रयावाप्तिहेतुत्वेन स्तौति—**तिस्रो-आप्नुवन्ति**। 'आ त्वा
रथं यथोतये'[a] 'विश्वानरस्य वस्पतिम्'[b] 'तंतमिद् राधसे महे'[c] इति तिस्रः
प्रतिपदः। 'इदं वसो सुतमन्ध'[d] 'इन्द्र इत् सोमपा एकः'[e] 'त्रय इन्द्रस्य
सोमाः'[f] इति त्रयोऽनुचराः। 'प्र नूनं ब्रह्मणस्पतिः'[g] 'उत्तिष्ठ ब्रह्मणस्पते',[h]
'प्रैतु ब्रह्मणस्पतिः'[i] इति त्रयो ब्राह्मणस्पत्याः। त्रित्वसंख्यासामान्याल्लोकत्रया-
वाप्तिहेतुत्वम्।

प्रकृतितः प्राप्तस्य 'त्र्यर्यमा मनुषो'[j] इति सूक्तस्यापवादेन सूक्तान्तरं
5.२६-३१ विधत्ते—**तिष्ठा-इयात्**। तिष्ठेति पदश्रवणादिदं सूक्तं गतिनिवृत्त्यर्थेन स्थाति-
धातुना युक्तं भवति। तच्च स्थितिरूपमन्तस्यावसानस्य प्रत्यायकम्। एतत्

a. RV. 8. 68. 1. b. RV. 8. 68. 4.
c. RV. 8. 68. 7. d. RV. 8. 2. 1.
e. RV. 8. 2. 4. f. RV. 8. 2. 7.
g. RV. 1. 40. 5. h. RV. 1. 40. 1.
i. RV. 1. 40. 3. j. RV. 5. 29.

तृतीयमहश्च पूर्वर्त्र्यहावसानत्वादन्तरूपम् । कुतो वा स्थितेरन्तरूपत्वमिति चेत्, यस्माल्लोके पुरुषो बुद्धिपूर्वकारी अन्तमवसानं गत्वा तिष्ठति । उपरतव्यापार उदासीनो भवति । यस्मात् ततोऽवसानदेशाद् गच्छन् कां दिशमुद्दिश्य गच्छेत् ? प्राप्तव्यस्य प्राप्तत्वात् । ततः परतो गन्तव्यभूमेरभावात् । भावे वा प्राप्तावसानभूमित्वस्यैव व्याघातापातात् । तेन गतिनिवृत्तेरन्तप्राप्तिहेतुत्वादन्तरूपत्वं युक्तम् ।

ऐकाहिकमेव निष्केवल्यसूक्तं विधत्ते—**इन्द्रस्य-अभि** । भूतमतिवृत्त- 5.३२-३४
**मर्थमनुवदितुमभिधातुं** शीलमिति [1-]भूतानुवादि पदं भूतार्थाभिधायकप्रत्यययुक्तं पदं चकृवत् । 'यद् वै भूतानुवादि तच्चकृवद्'[a] इति वक्ष्यमाणत्वात् । तदेवास्य सूक्तस्यान्तप्रत्यायकं रूपम् । अतिवृत्तत्वप्रतीतेरवसानप्रतीत्यात्मकत्वात् । किं तद् भूतानुवादि पदमिति चेत्[-1], यदेतदध्ययनप्रसिद्धम् 'अहन्' 'ततर्द', 'अभिनद्' इत्यादि भूतमतिक्रान्तं वस्तु वृत्रहननादिरूपमभिवदत् पदमस्ति । एतच्च प्रत्यृचमा सूक्तसमाप्तेरुपलभ्यते । अतोऽन्तरूपत्वप्रतिपत्तेः सूक्तमेतदत्राभिरूपमित्यर्थः ॥

इति पञ्चमः खण्डः

अथैकाहिकमेव सावित्रसूक्तं विधत्ते—**उदु-घृतवत्** । बह्वयो देवता 6. १-५
अस्येति बहुदेवत्यम् । आज्यस्य सर्वदेवतायागसाधारणद्रव्यत्वात् । 'सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यम्'[b] इति वचनात् । 'एतद् वै मधु दैव्यं यदाज्यम्'[c] इति श्रुतेश्च । तृतीयस्याह्नो विश्वैर्देवैर्निरूढत्वाद् बहुदेवत्यत्वम् । यस्माद् देवतासाम्यं घृतस्याह्नश्च भवति तस्मादत्र 'घृतेन पाणी'[d] इति पादेन घृतपदयुक्तमेतत् सावित्रं युक्तम् । द्यावापृथिवीयं विधत्ते—**घृतेन-**

a. KB. XXII. 5. ६.
b. TB. 3. 3. 5. 5.
c. AB. 2. 2. 4.
d. RV. 6. 71. 1.

1–1. B. omits

6. ६ **ब्राह्मणम्** । तस्योक्तमिति 'बहुदेवत्यम्'[a] इत्यादिकमित्यर्थः ।

6. ७-११ ऐकाहिकमार्भवं विधत्ते—**तक्षन्-इयात्**। पादादिषु प्रत्येकं तक्षन्निति पदस्याभ्यासादिह निनर्तिः । अन्यद् गतम्। ऐकाहिकमेव वैश्वदेवसूक्तं विधत्ते-
6.१२-१६ **आ-इयात्** । तृतीयस्याह्नो द्युलोकायतनत्वात्, अत्र च 'दिवेदिवे' इति[1] द्युलोकस्याभिधानाद् रूपसंपन्नमिदं सूक्तम्।

6.१७,१८ ऐकाहिकं वैश्वानरीयं सूक्तं विधत्ते—**वैश्वानराय-ब्राह्मणम्** । अथ वैकृतं
6.१९-२१ मारुतं विधत्ते—**आ-रूपम्** । पूर्ववत् । प्राकृतस्यापवादेन जातवेदसीयं
6.२२-२४ विधत्ते—**त्वाम्-अन्तरूपम्** । अत्र त्वामिति पदस्य प्रत्यृचमादौ पठ्यमानत्वादिदं[2] सप्रभृति समानादिर्भवति । ततः किमिति चेत् , सोदर्कं समानावसानं सूक्तं यथान्तरूपं प्रसिद्धम् एवं समानाद्यपि । आद्यवसानयोर्द्वयोरप्यन्तत्वस्याविशिष्टत्वात् । अतोऽत्राप्यन्तरूपत्वप्रतिपत्तेः अहःसम्बन्धिरूपवत्ता सिद्धा । इत्थं शस्त्रक्लृप्तिं विधाय पूर्ववदेव द्युलोकादिप्राप्तिहेतुत्वेन तृतीयमहः
6.२५-२७ स्तौति—**अमुम्-दधते** । द्युलोकम् । द्युस्थानत्वादादित्यस्य तदाप्तिहेतुत्वम् । रूपस्य चक्षुर्गोचरत्वात् तद्वारा तदाप्तिः । 'आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्'[b] इति श्रुतेः । आदित्यद्वारा अध्यात्मं[3] चक्षुराप्तिः । अभ्यासोऽध्यायसमाप्तिसूचनार्थः ॥

इति षष्ठः खण्डः

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
हृद्वचोमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।

a. KB. XX. 6. 3. b. AU, 2. 4.

1. T. दिव इति पदेन for दिवे दिवे इति 2. V. अभ्यस्यमानत्वाद् for पठ्यमानत्वाद्
3. B. आदित्यद्वाराद्यध्यात्मं for आदित्यद्वारा अध्यात्मं

विंशः प्राथमिकं त्र्यहं प्रकटयन् कौषीतकिब्राह्मण-
व्याख्यानेऽयमभिप्लवस्य षळहस्याध्याय आसीद् गतः ॥
साविञ्यामजनिष्ट यः सुमनसो नारायणाद् यज्वनो
यस्यर्षिः परमेश्वरश्च सुमनःस्तव्यौ पितृव्यावुभौ ।
वेदान्ताब्जविकासवासरमणिर्विद्वान् कुमाराह्वयः
स्वैरोत्तीर्णगुरूक्तनीतिजलधिर्नारायणश्चाग्रजौ ॥
तेन ब्रह्मखलाख्यकेरलमहीभूषायमाणोत्तम-
ग्रामोद्भासिमुकुन्दमङ्गलगृहोद्भूतेन सद्बुद्धिना ।
ख्यातेनोदयसंज्ञया विरचिते कौषीतकिब्राह्मण-
व्याख्याने सुखदे सतामिह दशाध्यायी द्वितीया गता ॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**द्वितीयदशके दशमोऽध्यायः**

अथ

## एकविंशोऽध्यायः

सकलत्रा शैलजया
सकलत्राणाय जाग्रती कृपया ।
कमलासनखलनिलया
कलयतु कुशलानि काचन कला नः ॥

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

यदीयकरुणामयीं समधिरुह्य नावं दृढा-
मतीतरमहं चिरादनवबोधमम्भोनिधिम् ।
अतीतनुतिगोचरानथ गुरून् नमस्कृत्य तां-
स्तृतीयदशकेऽधुना विवरणं विधातुं यते ॥

एवं तावदभिप्लवस्य षळहस्यादौ निविष्टस्त्र्यहो
विंशेऽध्याय इह व्यधायि विषयो ज्योतिर्गवायुर्गिराम् ।
संप्रत्यत्र विधीयते स्फुटतरं तस्यैकविंशेऽन्तिमः
संप्राप्तोऽवसरं विधेरथ गवायुर्ज्योतिराख्यस्त्र्यहः ॥

तत्र क्रमप्राप्तमुत्तरं त्र्यहं क्रमेण विधित्सुः तत्प्रशंसां कर्तुं तत्पूर्वभूमि-
1.१-३ तया अभिप्लवषळहमेव प्रशंसति—**देवा—आप्नुवन्ति**। पुरा देवा अग्न्यादयो मृत्युं मरणधर्मकत्वं तन्निमित्तभूतं च पाप्मानमपहन्तुमिच्छां कुर्वन्तः; तथा न केवलं मृत्युपाप्मविमोक्षेच्छावन्त एव, ब्रह्मणः प्रथमशरीरिणः प्रजापतेर्हिरण्य-गर्भस्य समानलोकतां तस्य सायुज्यं च प्राप्तुमिच्छन्तः सन्तः तत्साधनविशेष-जिज्ञासाक्रान्तमानसा ईश्वरानुग्रहादेतमुक्तवक्ष्यमाणरूपमभिप्लवषळहाख्यं यागं दृष्टवन्तः। दृष्ट्वा च ते देवा एतेन विधिवदनुष्ठितेनाभिप्लवेन साधन-

विशेषेण अस्मात् पृथिवीलोकाद् ब्रह्मलोकमभिलक्ष्य गत्वा अपहतमृत्युपाप्मानो[1] ब्रह्मसायुज्यसालोक्ये च प्राप्तवन्तः । यथैव देवाः कथितं फलविशेषमनेन साधनेन प्राप्तवन्तः तथैवाधुनिका यजमाना अपि कथितेन साधनेन कथितं फलविशेषं प्राप्नुवन्त्येव । नहि साधनविशेषस्य साध्यविशेषोत्पादनशक्तिः स्वारसिकी सती कालदेशविशेषादिसंबन्धवशात्[2] कदाचिदपह्नूयेत इति कस्यचित् सचेतसः संभावना संभवेत् । मा हि भूदिदानीं दृष्टापि तिलादीनां तैलाद्युत्पादनशक्तिः कालान्तरे किं न विहनिष्यत इति तैलाद्युत्पादनाप्रवृत्तिः तिलादिषु तैलाद्यर्थिनाम् । तस्मादुक्तफलसाधनत्वात् प्रशस्तोऽयं यागविशेषः ।

इदानीं विधित्सितमुत्तरं त्र्यहमेव तावत् स्तौति—**ते-अन्ववायनाय** । 1.४-६
यदुक्तं प्रागभिप्लवषळहेन मृत्युपाप्मविमोचनेन ब्रह्मसालोक्यादि प्राप्ता देवा इति तत्रैवाय कश्चिद् विशेषोऽभिधीयते । अभिप्लवषळहे हि पूर्वोत्तरविभेदेन द्वौ त्र्यहौ भवतः । तत्र पूर्वत्र्यहेणाभिप्लवेन ब्रह्मलोकमभिलक्ष्यास्मात् पृथिवीलोकात् प्रच्यवनलक्षणं पतनं कृतवन्तः । अथ पूर्वत्र्यहस्यान्ते चतुर्थेऽहनि गोसंज्ञितेन चतुर्थेऽहनि कर्तव्येन यागविशेषेण गमनाय ब्रह्मलोकप्राप्त्यर्थं यत्नं कृतवन्तः । ब्रह्मलोकप्राप्तिसाधनं चतुर्थमहरित्यर्थः । अथ प्राप्तब्रह्मलोकाः सर्वायुत्वाय मर्त्यत्ववैलक्षण्येनामृतत्वस्य सिद्ध्यर्थमायुःसंज्ञितं पञ्चममहरनुष्ठितवन्तः । षष्ठमहर्मृत्युपाप्मास्पर्शनिदानमिति । ऐककर्म्याच्च षळहः कथितफलसाधनमिति ।

ननु अमृतत्वप्राप्तिसाधनत्वात् पञ्चमस्य तेनैव मृत्युपाप्मास्पर्शसंभवात् कथं षष्ठस्याह्नः तत्साधनत्वम् ? 'निष्पादितक्रिये कर्मण्यविशेषाभिधायिनः साधनन्यायातिपातः'[a] इति न्यायाद् इति चेद्—उच्यते । यथा लोके धातुवैषम्यजनितस्य रोगविशेषस्य चिकित्सया शान्तिं संपाद्य पुनस्तदनुत्पत्तये पुनः कश्चित् सिद्धौषधविशेष आसेव्यते, तद्वज्ज्योतीरूपषष्ठाहरनुष्ठानं पुनर्मृत्युपाप्मास्पर्शाय संपद्यते । अतः षष्ठस्याह्नो मृत्युपाप्मापघातकत्वमुपपन्नम्[3] । अनेन च

a. Quoted by Ānandabodha in his *Nyāyamakaranda*, p. 259.

1. M. V. अपगत for अपहत

2. V. omits देश

3. V. अपनोदकत्वम् for अपघातकत्वम्

गवायुर्ज्योतिःशब्दानामर्थादर्थानुगतिः सूचिता । गच्छन्त्यनेनेति करणव्युत्पन्नो गोशब्दः । आयुःसाधनत्वादौपचारिक आयुःशब्दः । अप्रकाशरूपस्य पाप्मतमसो निबर्हकत्वाज्ज्योतिरिति ।

इत्थमुत्तरं त्र्यहं प्रशस्य क्रमेण त्रीण्यहानि विधित्सुश्चतुर्थं तावदहर्विधत्ते—
1.७ **गां-उपयन्ति ।** गतम् । अस्य पार्ष्ठिकचतुर्थाहर्विकृतित्वं हृदि कृत्वा तदीयानि
1.८ जातवदादीन्येवातिदिशति—**तस्य-अह्नः ।** प्राकृतस्य वैराजस्य आज्यस्याप-
1.९,१० वादेन[1] सूक्तान्तरं विधत्ते—**होता-रूपम् ।** सूत्र्यते च—'होताजनिष्टेत्याज्यं चतुर्थस्य'[a] इति । अजनिष्टेति जनिधातुश्रवणादिदं जातवत् । प्रउगं
1.११-१४ विधत्ते—**मैधातिथः-रूपसमृद्धम् ।** मेधातिथिना महर्षिणा दृष्टत्वान्मैधातिथः प्रउगः । 'ये गार्त्समदे ते वायव्यैन्द्रवायवे मैधातिथ्यस्तु पूर्वाः । मित्रं वयं हवामहे प्रातर्युजा त्वावहन्त्वैभिरग्ने इति तृचानि । यानि त्र्यहस्योत्तरस्य सारस्वतानि समूळ्हे तान्युत्तरेषामाभिप्लविकानाम्'[b] इति । बृहद् वै सामेत्यादि
1.१५,१६ पूर्ववत् । ऐकाहिकमेव मरुत्वतीयं विधत्ते—**जनिष्ठा-रूपम् ।** जनिष्ठा इति
1.१७,१८ जनिधातुमदित्यर्थः । अथ निष्केवल्यं विधत्ते—**उग्रो-रूपम् ।** जज्ञ इति जनिधातुमदित्यर्थः ॥

इति प्रथमः खण्डः

2. १-३ अथ वैश्वदेवभक्तिविशेषं सावित्रं विधत्ते—**तद्-रूपम् ।** अजीजनदिति
2. ४-६ जनिधातुश्रवणादेतज्जातवत् । द्यावापृथिवीयं विधत्ते—**ते-रूपम् ।** सुजन्मनी
2. ७,८ इति जनिधातुमदेतत् । आर्भवं विधत्ते—**अनश्वो-रूपम् ।** अत्र जात इति
2. ९-११ जनिधातुः । वैश्वदेवं विधत्ते—**अग्निः-रूपम् ।** अत्र[2] जनित्वेति जनिधातुः ।

एवं वैश्वदेवभक्तिविशेषान् विधायाग्निमारुतभक्तिविशेषं वैश्वानरीयं
2.१२-१७ विधत्ते—**वैश्वानराय-रूपम् ।** चतुर्थस्य तावदस्याह्नो द्वे रूपे भवतः, प्रायणीयात्मकत्वं चतुःसंख्यापूरकत्वलक्षणं च । तत्राद्यमाश्रित्य रूपसंपत्तिमाह—

a. ŚŚ. 11. 7. 1. b. ŚŚ. 11. 7. 3-5.

1. T. V. omit आज्यस्य 2. V. omits

तस्मिन्त्सुम्नानीति । 'आ चक' इत्यत्र आ इत्युपसर्गस्तावच्छ्रूयते । तेनैतदहरावद् भवति । तेन किमिति चेत्, अस्य चतुर्थस्याह्नः प्रायणीयत्वप्रयुक्तं रूपमेतदावत् पदं भवति । यद्यपि चतुर्थस्याकारेण[1] नैतद्रूपं भवितुमर्हति, तथाप्यस्याह्नः चतुर्थत्ववत् प्रायणीयत्वरूपस्यापि विद्यमानत्वात् तन्निरूपणमुखेन तदुपस्थापकमेतद् रूपं भवत्येव । प्रयन्ति प्रारभन्ते अनेन इति हि प्रायणीयपदव्युत्पत्तिः । आ इत्युपसर्गश्चारम्भद्योतक इत्युक्तम् । अत आवत्पदस्य प्रायणीयरूपत्वं सिद्धम्[2] । कथं पुनः चतुर्थस्याह्नः प्रायणीयरूपत्वमिति तदुच्यते । यस्मादेतच्चतुर्थमहर्यज्ञस्य पुनः प्रारम्भकरणं भवति । प्रथमेनाह्ना प्रारब्धो हि यज्ञस्तृतीयेऽहनि संस्थितो भवति । पूर्वत्र्यहस्य समाप्तत्वात् । अथोत्तरत्र्यहरूपो यज्ञो अनेनाह्ना प्रारभ्यते । तथा च वक्ष्यति—'पुनरारम्भ्यो वै चतुर्थेऽहन् यज्ञः'[a] इति । अतोऽस्य प्रायणीयरूपत्वं सिद्धम् । अथ चतुर्थत्वप्रयुक्तरूपविशेषसंपत्तिमाह—जात आपृण इति । इह जात इति जनिधातुः ।

मारुतं विधत्ते—**प्र–रूपम्** । अत्र जनय इति जनिधातुः । जातवेद- 2.१८,१९
सीयं विधत्ते—**जनस्य–रूपम्** । अत्र अजनिष्टेति जनिधातुः । इदानीमेत- 2.२०,२१
दहर्विधेयं कर्मसमुदायम् अन्नादिप्राप्तिहेतुत्वेन स्तौति—**अन्नं–दधते** । अन्न- 2.२२-२४
रूपविराट्छन्दोद्वारा चतुर्थस्याह्नोऽन्नप्राप्तिहेतुत्वम् । 'सोमो वा ओषधीनां राजा'[b] 'ओषधयो वा सोमस्य विशः'[c] इत्यादिश्रुतेः चन्द्रमसो व्रीह्याद्यन्नाधिपतित्वात् । तत्प्राप्तिश्चन्द्रमसो दिक्संबन्धात् । 'श्रोत्रेण सृष्टा दिशश्चन्द्रमाश्च'[d] इत्येकप्रभवत्वश्रुतेर्वा । तद्द्वारा तत्प्राप्तिः । 'दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्'[e] इति श्रुतेः दिग्द्वारा श्रोत्रप्राप्तिः । एवमन्नादिश्रोत्रान्तफलप्राप्तिहेतुरिदमहरिति ॥

इति द्वितीयः खण्डः

a. KB. XXIII. 2. २.
b. TS. 6. 1. 9. 1.
c. TS. 3. 1. 8. 2.
d. AA. 2. 1. 7.
e. AU. 2. 4.

1. T. V. चतुर्थत्वाकारेण
2. B. omits

3. १,२ क्रमप्राप्तमाभिप्लविकं पञ्चममहर्विधत्ते—**आयुः-अह्नः**। गोसञ्ज्ञं चतुर्थमहरुपेत्य आयुःसंज्ञं पञ्चममहः सत्रिण उपेयुः। अस्य पाष्ठिकपञ्चमाहर्विकृतित्वमभिप्रेत्य तत्रत्यानि[1] पशुमदादीनि रूपाण्यतिदिशति—तस्य तान्येवेति।

3. ३-६ तत्राज्यशस्त्रं तावद् विधत्ते—**अग्न-रूपम्**। सूत्र्यते हि—'अग्न ओजिष्ठमित्याज्यं पञ्चमस्य सर्वत्रोत्तमां परिहाप्य'[a] इति। रूपसमृद्धिं वक्तुं तृतीयपादं पठति—प्र नो इति। 'प्र नो रायापरीणसा' इति पादोऽस्तीति शेषः। अस्मिंश्च पादे रायेति तृतीयान्तस्य पदस्य श्रवणाद् रयिशब्दवदेतत् सूक्तम्। पञ्चमस्याह्नो रयिमच्छब्दरूपं रूपं भवति। तेनाभिरूप्यमित्यर्थः।

3. ७-१० अथ प्रउगशस्त्रं विधत्ते—**संहार्यः-रूपसमृद्धम्**। संहार्य इति[2] संज्ञा। निर्ज्ञातनामधेयस्यैव शंसनीयत्वार्थं भिन्नार्थत्वेन भिन्नप्रदेशत्वेन च इतस्ततः समाहृत्यैकसंघातीकृतत्वादयं संहार्यः। न गात्सर्मदादिवदेकार्षत्वेन पूर्वमेव संघाततामापद्य स्थितः। तथा च सूत्रम्—'संहार्यः प्रउगः। अग्रं पिब तव वायो स त्वं नो देवेति शतेना न आ नो मित्रावरुणा नो गोमन्तमतश्चिदिन्द्र णो विश्वे देवा ऋतावृध इति तृचानि'[b] इति। मरुत्वतीयं विधत्ते—

3.११-१३ **क्व-रूपम्**। सूत्र्यते हि—'क्व स्य वीर इति मरुत्वतीयम्'[c] इति। गतमेतत्।

3.१४-१६ निष्केवल्यं विधत्ते—**एतायामोप-रूपम्**। गव्यन्त इति पदेन पशुमदेतत् सूक्तम्। गा आत्मन इच्छन्तो वयमिति तस्यार्थः। तथा सति इच्छाकर्मार्पकतया गोपदस्य निर्देशात्। गवां च पशुविशेषत्वात् पशुमत्त्वम्। पशुमत्पदं च पञ्चमस्याह्नो रूपं प्रसिद्धम्। ततोऽस्त्याभिरूप्यम्। वैश्वदेवशस्त्रे सावित्रं

3. १७-१९ विधत्ते—**उदु-रूपम्**। अत्र 'घृतेन पाणी' इति पादे घृतेनेति पदस्य विद्यमानत्वादेतत् पशुमद् भवति। घृतस्य गोपशुविकारत्वात्। प्रकृतिविकृत्योरभेदात्। यथा 'गोभिः श्रीणीत मत्सरम्'[d] इति गोविकारे पयसि गोशब्दः।

a. ŚŚ. 11. 8. 1. b. ŚŚ. 11. 8. 2-3.
c. ŚŚ. 11. 8. 4. d. RV. 9. 46. 4.

1. T. तत्रत्यादीनि 2. T. omits

द्यावापृथिवीयं विधत्ते—**घृतवती-ब्राह्मणम्** । तस्योक्तमिति 'घृतेनेति पशुमद्'[a] 3. २०
इत्यादि । आर्भवमाह—**ततं-ब्राह्मणम्** । 3. २१,२२

वैश्वदेवं विधत्ते—**कथा-रूपम्** । अत्र 'ते नो अर्वन्तः'[b] इत्यस्यां 3. २३-२५
षष्ठयामृचि तृतीये पादे सहस्रसः इति पदमस्ति । अत्र यद्यपि सहस्रसंख्यस्य संख्येयस्य दातार इति विश्वेषां देवानां विशेषणे संख्येयविशेषो नावगम्यते, तथापि गवां संख्येयत्वविवक्षामङ्गीकृत्य पशुमदित्युक्तम् । दृष्टश्च गोविषयत्वेन सहस्रसंख्याया वेदभागेषु बहुलं प्रयोगः 'सोमो वै सहस्रमविन्दद्'[c] इत्यादिषु । अतः संख्याद्वारेण संख्येयानां गवामभिधानादेतत् पशुमद् भवति ।

वैश्वानरीयं विधत्ते—**पृक्षस्य-रूपम्** । अत्र 'आ वामुपस्थ' इति पादे 3. २६-२८
'महिषा' इति पदेन महिषरूपपशुजातीयाभिधानादेतत् पशुमत् । मारुतं
विधत्ते—**प्र-रूपम्** । गवामिवेति गोपश्वभिधानादस्य पशुमत्त्वम् । जातवेद- 3. २९-३१
सीयं विधत्ते—**चित्र-रूपम्** । वाजिपदेनाश्वजातीयपश्वभिधानादस्य पशुमत्त्वम् । 3. ३२-३५
किंचैतत् सूक्तमध्यासवद् भवति । अध्यासो नाम प्राक् पठितस्य पदस्योपरि तस्यैव पदस्य पुनः प्रक्षेपः[1] पाठः । यथा—'ऊर्ध्वासो अनक्षन् नमो नम इत्यूर्ध्वासो अनक्षन्' इति । तदेतदध्यसनं[2] पङ्क्ते रूपं भवति । तस्याः पञ्चपदत्वात् । इह च पादचतुष्टयस्योपरिष्टात् पादस्यैकस्याभ्यासेन पठने पञ्चपदत्वसम्पत्तेः । पञ्चमस्य चाह्नः[3] पाङ्क्तत्वात् पङ्क्तिद्वारा अह्नो रूपसिद्धिः ।
अथैतत्कर्मसमुदायं पश्वादिप्राप्तिहेतुत्वेन स्तुवन्नुपसंहरति—**पशून्-दधते** । 3. ३६-३८
'पशवः पञ्चममहः'[d] इति वक्ष्यमाणत्वात् । पङ्क्तिद्वारा पञ्चमस्याह्नः पशुप्राप्तिहेतुत्वम् । 'रुद्रः पशूनामधिपतिः'[e] इति श्रुते रुद्रस्य पश्वधिपतित्वात् । तत्सिद्धयर्थं तस्यानेन प्राप्तिः । पशुमतः पुरुषस्य दानभोगयागविद्यादिसौकर्यसंपत्त्या तज्जन्ययशःप्राप्तिहेतुत्वम् । वीर्यवत एव पशुमत्त्वं दृष्टम् । वाक्पारुष्यदण्डादिमत एव पुरुषान् पशव उपतिष्ठन्ते यतः । अत आत्मनि

a. KB. XXI. 3. १८.
b. RV. 10. 64. 6.
c. TS. 7. 1. 6. 1.
d. KB. XXIII. 7. १.
e. TS. 3. 4. 5. 1.

1. T. V. प्रक्षेपा
2. B. अभ्यासनं for अध्यसनं
3. M. V. omit च

वीर्याधानकत्वमप्यस्य[1]। यद्वा यशसो वीर्यहेतुकत्वाद्[2] वीर्यहेतुत्वमस्याह्न इति। पश्वादिप्राप्तिहेतुत्वात् प्रशस्तमिदमहरिति ॥

इति तृतीयः खण्डः

विधाय पञ्चममहराभिप्लविकमित्यथ ।
विधानावसरायातं षष्ठं तु विदधात्यहः ॥

4.१,२ **ज्योतिः-अह्नः**। पूर्ववदेतद् योज्यम्। तत्राज्यशस्त्रं तावद् विधत्ते—

4.३-६ **सखायः-अभिवदति**। हे सखायः समानख्याना ऋत्विज इति संबुद्ध्यन्तमेतत् पदम्। तदेतत् सर्वरूपम्। सर्वाभिधायकत्वात्। 'सर्वे सखाय' इति तदभिधानविश्रान्तेः। षष्ठमहः सर्वरूपम्। सर्वात्मकप्रजापतिदेवत्यत्वात्। यस्मात् षष्ठमहः सर्वरूपं सखाय इति च पदस्य तदभिधानसामर्थ्यसद्भावः, तस्माद्धेतोः सखाय इति पदस्य सर्वाभिधायकत्वमिह युक्तम्। आभिरूप्यसंपत्तेः। **संहार्यः-**

4.७-१० **रूपसमृद्धम्**। पूर्ववद् योज्यम्। तत्र 'वायवा याहि दर्शत'[a] इति वायव्यम्। 'रथेन पृथुपाजसा'[b] इत्यैन्द्रवायवम्। 'यदद्य सूर उदिते'[c] 'प्रति वां सूर उदिते'[d] इति वा मैत्रावरुणम्। 'पुरुप्रिया ण ऊतये'[e] इति आश्विनम्। 'उप नो हरिभिः सुतम्'[f] इत्यैन्द्रम्। 'विश्वे देवास आ गत'[g] इति भारद्वाजं वैश्वदेवम्। 'उत नः प्रिया'[h] इति सारस्वतम्। इति प्रउगतृचानि।

4.११-१५ अथ मरुत्वतीयं विधत्ते—**महाँ-इयात्**। अत्र 'उरुः पृथुः' इति शब्दौ श्रुतौ। तौ चैकार्थत्वेन पर्यायत्वं 'हस्तः करः' इतिवन्नातिक्रामतः। यद्यप्यत्र शब्दावेतौ स्वरूपतो भिन्नावेव तथाप्यर्थैकत्वात्तदभिधायकत्वोपाधौ अभिन्नावित्याशयेन निवृत्तिरित्युक्तम्। यस्माद् द्वयोरप्यनयोः शब्दयोरुकारोदयत्वात् स्वराभ्यासस्य

a. RV. 1. 2. 1. b. RV. 4. 46. 5.
c. RV. 7. 66. 4. d. RV. 7. 66. 7.
e. RV. 8. 5. 4. f. RV. 8. 93. 31.
g. RV. 6. 52. 7. h. RV. 6. 61. 10.

1. T. वीर्यधारकत्वम् for वीर्याधानकत्वम् 2. V. वीर्यहेतुत्वात्

विद्यमानत्वान्निनर्तिः। षष्ठमहश्चान्तरूपम् अभिप्लवावसानवर्तित्वात्। लोके च गन्ता जनोऽन्तंगम्य[1] भूम्यवसानं गत्वा नृत्यतीव। प्राप्तव्यस्य प्राप्तत्वात् कृतार्थोऽस्मीति हृष्यति। तस्मादन्यस्य गन्तव्यस्याभावात्। न हि गन्तव्यायां भूमौ[2] प्राप्तायां गमनसामर्थ्ये जाग्रत्यपि गन्ता पुरुषः ततोऽन्यत्र गन्तुं पारयते। गच्छन् वायमबुद्धिपूर्वकारीति प्रेक्षावद्भिर्बालोन्मत्तादितुल्योऽयं हताश इत्युपेक्षणीयतापक्षमवलम्बेत।

निष्केवल्यसूक्तं विधत्ते—**यो-अन्तरूपम्**। य इन्द्रो वारयितारं दासा- 4.१६-१९
ख्यमसुरमधरं सन्तं गुहायां चकार इत्यर्थेऽस्मिन् द्वितीयपादे अकरिति भूतमतीतं दासस्य गुहाकरणलक्षणमर्थमनुवदितुमभिधातुं शीलं पदं यदस्ति, तदन्तस्यावसानस्य द्योतकत्वादन्तरूपं भवति। किंच न केवलभूतानुवादिपदसद्भावप्रयुक्तमेवान्तरूपत्वमत्र विद्यते। किं तर्हि? एतत् सूक्तं यस्मात् सोदर्कं समानावसानम्। 'स जनास इन्द्रः' इति सर्वासां ऋचामवसानदर्शनात्। तस्मात्तद् द्वितीयं भूतानुवादात् तथान्तस्यावसानस्य द्योतकत्वादन्तरूपम्। अतो द्विप्रकारेणान्तरूपसद्भावाद् अभिरूपतरमेतदित्यर्थः॥

इति चतुर्थः खण्डः

वैश्वदेवशस्त्रे सावित्रं विधत्ते—**तद्-रूपम्**। अत्र दिव इति षष्ठ्यन्तेन 5.१-३
शब्देन द्युलोकोऽभिधीयते। द्युलोकस्य धारयिता सवितेत्यर्थः। द्युलोकरूपं चैतत् स्थानवशेन षष्ठमहर्भवति। अतोऽहःसंबन्धिरूपोपेतत्वादभिरूपमेतत्।
द्यावापृथिवीयं विधत्ते—**घृतेन-घृतवत्**। घृतस्य सर्वदेवत्यत्वमुक्तम्। षष्ठस्या- 5.४-७
ह्नस्तु प्राजापत्यत्वात् सर्वदेवत्यत्वम्। 'प्रजापतिः सर्वा देवताः'[a] इति श्रुतेः।

आर्भवं विधत्ते—**किमु-इयात्**। अत्रेष्ठन्प्रत्ययाभ्यासात् निनृत्तिः। वैश्व- 5.८-१२
देवं विधत्ते—**अबुध्रम्-सोदर्कम्**। अत्र सर्वासामृचां 'स्वस्त्यग्निं समिधानमी- 5.१३,१४
महे' इत्यस्यैव पादस्य चतुर्थपादत्वात् सोदर्कत्वम्। वैश्वानरीयं विधत्ते—

a. TB. 3. 3. 7. 3.

1. V. गत्वा for गम्य
2. B. T. भुवि

5.१५,१६ **वैश्वानराय-ब्राह्मणम्** । 'सर्वदेवत्यं वै घृतम्'[a] इत्याद्युक्तमेव ब्राह्मणम् ।
5.१७-२१ मारुतं विधत्ते—**धारावरा-इयात्** । अत्र दीर्घान्तिस्य रेफस्य पदैकदेशस्याभ्यस्य-
5.२२-२४ मानत्वान्निनर्तिः । गतमन्यत् । जातवेदसीयं विधत्ते—**त्वम्-अन्तरूपम्** । त्वंत्व-
मित्यादि पूर्ववद् योज्यम् ।

5.२५-२७ अथ कर्मसमुदायं स्तौति—**अपः-दधते** । द्युलोकसंबन्धसाम्यादपां प्राप्ति-हेतुत्वम् । प्राजापत्यत्वात् प्रजापतिप्राप्तिहेतुत्वम् । भूतानां मध्ये तेजो-लक्षणं भूतमाप्नुवन्ति, ज्योतीरूपत्वात् । अमृतममृतत्वमविनाशित्वम् आभूत-संप्लवावस्थायित्वलक्षणं मुख्यं वा । तदात्मनि कारयन्ति सत्रिणः । ननु मुख्या-मृतत्वहेतुत्वमस्यानुपपन्नम् । तस्याविद्यामात्रव्यवहितस्य तदपनोदिसहस्रकिर-णोदयमात्रापेक्षितकर्मासाध्यत्वस्यौपनिषदतन्त्ररहस्यविद्भिः स्थापितत्वात् । सत्यम् । पारम्पर्येण हेतुतामात्राभिप्रायत्वादेतदभिधानस्य न[1] दोषः । आत्मवि-विदिषोत्पादनद्वारेण कर्मणां विद्याहेतुत्वं तावत्तैरप्यभिमतमेव। तदाहुस्तद्विदः[2]—

'प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥'[b] इति ।

नन्वेतत् तावत् सर्वकर्मणामविशिष्टम् । तथा च पारमर्षं सूत्रम्—'सर्वा-पेक्षा च यज्ञादिश्रुतेरश्ववद्'[c] इति । कथं तद्विशेषः षष्ठस्याह्नः ? उच्यते । सत्यम् । स्तुत्यभिप्रायत्वात् । ईदृशमेतन्महानुभावमिदमहर्यत् समानेऽपि सर्व-कर्मणां मोक्षं प्रत्युपायत्वे सतीदमेव मुख्यं मुक्तिद्वारमिति । अलं वा विवादेन । आभूतसंप्लवावस्थायित्वमेवामृतशब्देनात्र विवक्षितम् । अतो न कश्चिद् दोषः ।

पूर्वोत्तरविभिन्नाभ्यां त्र्यहाभ्यां पूर्णविग्रहे ।
अभिप्लवाख्ये षळहे शस्त्रक्लृप्तिरिति स्थिता ॥

इति पञ्चमः खण्डः

a. KB. XXI. ५. ५.
b. *Naiṣkarmya-siddhi*, 1. 49.
c. BS. 3. 4. 26.

1. T. omits
2. V. ° द्वरात्मविदः

उक्तस्तावदभिप्लवोऽत्र षळहोऽस्यावृत्तितोऽनुष्ठितिः
सत्रे प्राक् परतस्तथा विषुवतो या वर्ण्यतेऽनन्तरम् ।
सूक्तं तत्र तु विश्वदेवविषयं नानैव षष्ठेऽहनि
प्रत्यावृत्ति भवेदिति प्रकटयन्त्याढौकतेऽद्धा[1] श्रुतिः ।।
सूक्तान्तरवैधर्म्यादावृत्तिषु वैश्वदेवसूक्तानाम् ।
अपरापरताकरणं कारणकथनेन गदितुमुद्युङ्क्ते ।।

**तद्–इति** । कस्मादिति । तत् तत्र । कस्मिन् विषय इति चेत् तदुच्यते । गवामयननाम्नि संवत्सरकालनिर्वर्त्ये सकलेतरसंवत्सरसत्रप्रकृतिभूते सत्रविशेषे विषुवत्संज्ञकस्य पूर्वोत्तरपटलद्वयमध्ये त्रिशङ्कुन्यायेन वर्तमानस्याह्नः प्रागूर्ध्वं च 'पृष्ठ्यान्तान् वा'[a] इत्यादिवक्ष्यमाणप्रकारेण पृष्ठ्यावसानतया पृष्ठ्यारम्भणतया चायमभिप्लवषळहो मासपरिपूर्त्यर्थमावृत्त्यानुष्ठेयः । तत्र प्रतिमासं पञ्चमपर्यन्तं चतस्रोऽभिप्लवावृत्तयो भवन्ति । षष्ठसप्तमयोस्तिस्रः । अष्टमनवमदशमैकादशद्वादशेषु पूर्ववच्चतस्रः । एवमभिप्लवस्यावृत्त्या प्रयोगे क्रियमाणे प्रत्यावृत्ति यानि षष्ठान्यहानि सन्ति तान्यस्य वैश्वदेवसूक्तान्यान्यीकरणविधेर्विषयः[2] । तेन तद्विषयमिदं चोद्यमुद्भावितम् । तत्राभिप्लवसंबन्धिषु प्रत्यावृत्तिषष्ठेष्वहःसु वैश्वदेवसूक्तान्वायातनं विषयीकृत्य केचिज्जिज्ञासवः चोद्यवाक्यमाहुः । किं तदित्याह । कस्मात् कारणात् वैश्वदेवानामेव सूक्तानामन्वायातनमन्येषां प्रक्षेपलक्षणं क्रियते ? नैकदेवत्यानां सावित्रादीनाम् ? न द्विदेवत्यादीनां च ? आर्भवादीनां चैकदैवत्यत्वमेव । ऋभुशब्दवाच्यत्वाकारस्य प्रत्येकं परिसमाप्तत्वात् । समाने सूक्तरूपत्वे सति विशेषे हेतुर्वाच्य इति चोद्यम् । अस्योत्तरम्—नैकदेवत्येनेति । वैश्वदेवसूक्तस्यानन्वायातने शस्त्रं नीरसं भवेत् । नैकदेवत्यानां द्विदेवत्यानां वा । अतस्तत्परिहारार्थं वैश्वदेवान्वायातनं कर्तव्यम् । नेतरेषाम् । न हि व्यसनितयेदमन्वायातनं वयं ब्रूमः । कुत इयं हेतुसिद्धिरिति चेद्, इदं हि सूक्तमेतच्छस्त्रप्रतिपाद्यसर्वदेवताविषयत्वेन प्रधानम् । इतरत्तु पुनरेकैकदेवतामात्रविषयत्वाद् गुणभूतम् । 'अथो 6. १-७

a. KB. XXI. 6. २३.

1. T. आढौकतोर्ध्वा for आढौकतेऽद्धा

2. V. वैश्वदेवन्यायीकरणविधेर्विषयः

वैश्वदेवं वै शस्त्रम्। देवतानामपरिहाणाय वैश्वदेवं शंसति'[a] इति प्रागाम्नातत्वात्[1]। अतः पठितस्यैव पुनः पठने शस्त्रमेतन्नीरसं भवति। इतरेषामनन्वायातनेऽपि अस्यान्वायातने शस्त्रस्य सारस्यसंपत्तिसंभवात्। वैपरीत्ये चास्य न्यायस्यानवक्लृप्तेः। तस्मादित्युपसंहरति। न केवलं शस्त्रस्य यातयामत्वसिद्धिरेतत्फलम्, तद्द्वाराह्नोऽपि तस्य सवीर्यत्वसंपत्तिरपि। शस्त्रस्य निर्वीर्यत्वे सति तदहरपि नीरसं संभवन्न निवारयितुं शक्यम्। अपि च एतेषामावृत्तिभेदभिन्नानामभिप्लवानां पृथक् पृथग् विशिष्टवीर्यसिद्ध्यर्थमपि तत् संपद्यते। कानि तानि वैश्वदेवसूक्तानि? कुत्र वा तत्प्रक्षेपः? इति चेत्, तद् यथासूत्रं प्रदर्शयिष्यामः। 'अबुद्ध्रमु त्य'[b] इति प्रथमायामावृत्तौ वैश्वदेवं भवति। द्वितीयायां तु तदुद्धृत्य 'इन्द्र दृह्य'[c] इति। तृतीयायाम् 'उषासानक्ता'[d] इति। चतुर्थ्याम् 'अग्निरिन्द्रो वरुणः'[e] इति। 'शं न इन्द्राग्नी भवताम्'[f] इति वा। व्यवस्थितोऽयं विकल्पः। विषुवतः प्राचीनायां चतुर्थ्यामावृत्तौ 'अग्निरिन्द्रः'[e] इति। विषुवत ऊर्ध्वं चतुर्थ्यामावृत्तौ 'शं न इन्द्राग्नी'[f] इति। क्वचित् पञ्चम्यभिप्लवावृत्तिर्भवति। तत्र 'परावतः'[g] इति सूक्तम्। तच्चाभिप्लवायने। तदुक्तं सूत्रकृता—'पृष्ठ्यस्याभिप्लवः स्थाने तदभिप्लवायनम्'[h] इति।

एवं तावदभिप्लवषळहःशस्त्रक्लृप्तिं क्रमेण विधाय तेषां ज्योतिरादि-
6.८-१४ नामकत्वं तन्निर्वचनद्वारा दर्शयन् प्रशंसति—**ज्योतिः–अनेन**। योऽयमुक्तोऽग्निष्टोमः प्रकृतिरूपः तस्यैव रूपेणासाधारणेन स्वरूपेण अग्निष्टोमनामधेयसामाश्रयभूतायामाग्नेय्यामृचि समाप्तिलक्षणेन सहितम् अत एव ज्योतिःशब्दवाच्यं प्रथममाभिप्लविकमहरुपयन्त्यनुतिष्ठन्ति सत्रिणः। अत्र ज्योतिरादिशब्दवाच्यत्वं विधेयमितरदुद्देश्यम्। ज्योतिःशब्दवाच्यैकाहरूपसंपत्तेः

a. KB. XVI. 3. ३३–३४.
b. RV. 10. 35. 1.
c. RV. 10. 100. 1.
d. RV. 10. 36. 1.
e. RV. 10. 65. 1.
f. RV. 7. 35. 1.
g. RV. 10. 63.
h. ŚŚ. 13. 19. 20.

1. B. प्रागाम्नातवत्

अस्यापि ज्योतिःशब्दवाच्यत्वमित्यर्थः । कुतो वैकाहस्यापि ज्योतिःशब्द-वाच्यत्वमिति चेत् , अयमग्निष्टोमरूप एकाह उत्तरेषामह्नां ज्योतिर्भवति । यथादित्यादिज्योतिरायत्ता लोकयात्रानिर्वृत्तिः एवमग्निष्टोमस्य प्रकृतित्वेनो-त्तरक्रतूनां तदधीनत्वात् तस्य ज्योतीरूपत्वम् । अग्निष्टोमस्योत्तरयज्ञप्रकृतित्वं तैत्तिरीयिण आमनन्ति—'एतावान् वै यज्ञो यावानग्निष्टोमो भूमा त्वा अस्यात ऊर्ध्वः क्रियते'[a] इति । अथ गोसंज्ञं द्वितीयमहः सत्रिण उपेयुः । तस्य च गोशब्द-वाच्यत्वं गच्छन्त्यनेनास्माल्लोकादमुं लोकमिति व्युत्पत्तेः । अथ तृतीयमह-रायुराख्यमुपयन्ति । तस्य चायुःशब्दवाच्यत्वं यन्ति प्राप्नुवन्ति अनेन स्वर्गं लोकं सत्रिण इति व्युत्पत्तेः ।

अथैतेषामह्नां षण्णां ज्योतिष्टोमविकृतित्वे अग्निष्टोमादिचतसृषु प्रकृ-
तिषु मध्ये अस्य का प्रकृतिरित्यपेक्षायामाह—**अग्निष्टोमौ-दधते** । षण्णामह्नां 6. १५-१६
मध्ये यत् प्रथमं ज्योतिराख्यमुत्तमं चाहरस्ति तदुभयमग्निष्टोमसंस्थं भवति । यानि द्वितीयादीनि पञ्चमान्तान्यहनि सन्ति तानि उक्थ्यसंस्थानि भवन्ति । तथा च सूत्रम्—'ज्योतिरग्निष्टोमः प्रथममुत्तमं च । चत्वार्युक्थ्यानि मध्ये'[b] इति । तत्र योऽयमग्निष्टोमः स ब्रह्म ब्राह्मणजातिरेव । अग्निष्टोमदेवतारूप-स्याग्नेरेव ब्राह्मणजात्यभिमानिदेवतात्वात् । उक्थ्यानां पशुरूपत्वं तद्धेतुत्वात् । तच्च 'पशुकाम उक्थ्यं गृह्णीयाद्'[c] इति श्रुतेः । तत् तेन पशुरूपाणां चतुर्णा-मुक्थ्यानां ब्राह्मणजात्यात्मकाग्निष्टोमपुटितत्वकरणेन पशून् गवादीन् ब्राह्मणाः संदंशन्यायेन द्वयोः पार्श्वयोः परिगृह्यात्मनि स्थापयन्ति ।

उक्थ्यचतुष्टयवर्तिस्तोत्रियसंख्यासमुदायं स्तौति—**तेषां-वेद** । तेषामा- 6. २०-२२
द्यान्ताहर्मध्यवर्तिनामेतेषां गवायुराख्यानामुक्थ्यसंस्थानां चतुर्णामह्नां बुद्धि-कौशलेन गणनायां क्रियमाणायां मिलित्वा सहस्रं स्तोत्रियाः संपद्यन्ते । तथा हि—गोसंज्ञितेऽहन्युक्थ्यसंस्थे ह्येकचत्वारिंशदधिकं शतद्वयं स्तोत्रिया भवन्ति । पञ्चदशो बहिष्पवमानः । त्रिवृन्त्याज्यानि चत्वारि[1] । मिलित्वैकपञ्चाशत् ।

a. TS. 5. 4. 10. 2.
b. ŚS. 11. 4. 4-5.
c. Quoted by Śabara on JS. 3. 6. 43.

1. V. omits

सर्वं सप्तदशं माध्यंदिनं सवनम् । तत्र पञ्चाशीतिः । सर्वमेकविंशं तृतीयसवनम् । तत्र पञ्चाधिकं शतम् । एताश्च मिलिताः सत्य एकचत्वारिंशच्छतद्वयं[1] भवन्ति । आयुःसंज्ञित उक्थ्यसंस्थेऽहन्येकोनषष्टिशतद्वयं भवन्ति । त्रिवृद् बहिष्पवमानः । पञ्चदशान्याज्यानि । सर्वं सप्तदशं माध्यंदिनं सवनम् । सर्वमेकविंशं तृतीयसवनम् । मिलित्वैकोनषष्ट्युत्तरं शतद्वयं भवन्ति । यत्रेदमाम्नायते—'एकया गौरतिरिक्त एकयायुरूनः'[a] इति । अथ द्वयवर्तिन्यः स्तोत्रिया मिलित्वा पञ्चशतं भवन्ति । तथोत्तराहर्द्वयवर्तिन्योऽपि पञ्चशतं भवन्ति[2] । तदेवं सर्वाः संभूय सहस्रसंख्याका भवन्ति । पशवश्च सहस्रसंख्याका भवन्ति । 'सोमो वै सहस्रमविन्दत्'[b] 'प्र सहस्रं पशूनाप्नोति'[c] इति पशूनां सहस्रसंख्यत्वस्य प्रसिद्धत्वात् । तत्र स्तोत्रियगतया सहस्रसंख्यया सहस्रसंख्यगवां पुष्टिं प्राप्नोति । तथा च तलवकारब्राह्मणे—'त एते चत्वारो मध्य उक्थ्या भवन्ति । पशवो वा उक्थ्यानि । तेषां सहस्रं स्तोत्रियाः । ब्रह्म वै ज्योतिरग्निष्टोमः । ता एतेनैव ब्राह्मणा ज्योतिषोभयतः परिगृह्योदाहरन् । ते य एवं विद्वांसोऽभिप्लवमुपयन्ति सहस्रसनयो हैवोत्थिता भवन्ति'[d] इति ।

इत्थं विहितस्याभिप्लवषळहस्य गवामयनाख्ये संवत्सरसत्रे विषुवतः प्रागूर्ध्वं चावृत्त्या अनुष्ठानं विधित्सुः प्राक् तदावृत्तिं विधत्ते—**पृष्ठ्यान्तान्-**
6.२३-२५ **दधते** । गवामयने संवत्सरसत्रे हि द्वादशमासात्मकत्वात् संवत्सरस्य प्रायणीयाद्यहोभिर्मासानां परिपूरणं कर्तव्यम् । तत्र प्रथमे मासे तावत् प्रायणीयाख्यं प्रथममहः । द्वितीयं चतुर्विंशाख्यम् । अथ पृष्ठ्यपञ्चमांश्चतुरोऽभिप्लवषळहाननुतिष्ठेयुः । तत्र पञ्चानां त्रिंशदहानि भवन्ति । आद्ये द्वे इति स द्वात्रिंशी प्रथमो मासः संपद्यते । अथैवमेव पृष्ठ्यपञ्चमैश्चतुर्भिरभिप्लवैर्द्वितीयतृतीयचतुर्थपञ्चमान् मासान् परिपूरयित्वा षष्ठे मासे त्रीनभिप्लवानेकं पृष्ठ्यमिति चतुर्विंशतिरहानि कृत्वा पञ्चविंशमभिजिन्नामकं त्रीणि स्वरसामसंज्ञान्यहानि च कुर्यात् । आद्याभ्यां प्रायणीयचतुर्विंशाभ्यां स मासः पूर्यत इति

a. TB. 1. 2. 2. 2.
b. TS. 7. 1. 6. 1.
c. TS. 7. 1. 10. 2.
d. JB. 2. 442.

1. V. एकचत्वारिंशदधिकं शतद्वयं
2. T. भवति

मासषट्कपरिपूर्तिः। अस्य च मासषट्कस्य पूर्वं[1] पटलमिति संज्ञा। तदेत-
दुक्तं पृष्ठ्यान्तानिति। पृष्ठ्यः षळहोऽन्ते अन्तो वा येषां ते तथोक्ताः।
अत्राभिप्लवानां पशुरूपत्वं तद्धेतुत्वात्। तच्च 'देवचक्रं वा एतद्'[a] इति
खण्डे प्रपञ्चितम्। पृष्ठ्यानां श्रीरूपत्वं प्रकृतित्वेन प्राधान्यात्। 'श्रीर्वै
पृष्ठ्यानि'[b] इति श्रवणाच्च। श्रीमत एव पशुमत्त्वात् श्रिया पशूनां परि-
ग्रहोपपत्तिः। अथ पूर्वपटलशब्दवाच्यस्य पूर्वमासषट्कस्योर्ध्वमुत्तरपटलशब्द-
वाच्यस्योत्तरमासषट्कस्याधस्तात् संवत्सरमध्ये विषुवन्नामकमेकमहरनुष्ठेयम्।
यत् पूर्वस्मिन् उत्तरे वा पटले नान्तर्भवति। किंतु त्रिशङ्कुन्यायेन तदुभया-
नन्तर्भूतमेव सत् स्वयमेव मासपरिपूरकतया विनैव मासषट्कद्वयावधीभूत-
मवतिष्ठते। विषुवतोऽनन्तरमावृत्तान् स्वरसाम्नो विश्वजितं चोपेत्य पृष्ठ्यं
षळहं त्रीनभिप्लवानहःशो मासशश्चावृत्तान् कुर्युः। एवं सप्तमोऽपि मासोऽष्टा-
विंशी भवति। अष्टमनवमदशमैकादशान् पृष्ठ्यमुखैरावृत्तैश्चतुर्भिरभिप्लवैः
संपाद्य द्वात्रिंशिनं द्वादशं मासं त्रिभिरभिप्लवैः गोआयुर्भ्यां दशरात्रेण महा-
व्रतोदयनीयाभ्यां च संपादयेयुः। सप्तमस्याष्टाविंशिनो मासस्य द्वात्रिंशि-
मासगतमहाव्रतोदयनीयाभ्यां परिपूर्तौ सत्यामुत्तरमासषट्कपूर्तिरप्रत्यूहं
सिध्यतीति। एवमुत्तरपटले अहःक्लृप्तिः। तदेतदाह—**पृष्ठ्यारम्भणान्-**
**दधते**। विषुवत ऊर्ध्वमावृत्तस्वरसाम्नो विश्वजितं चानुष्ठाय पृष्ठ्योपक्रमान्, 6.२६-२८
न पूर्ववत् पृष्ठ्यान्तान्, प्रतिमासं चतुरश्चतुरोऽभिप्लवानुपेयुः। शिष्टं गतम्।

अथास्य व्यूळ्हसमूळ्हभेदभिन्नात् पृष्ठ्यषळहाद् विशेषमाह—**क्लृप्तो-**
**क्लृप्तच्छन्दाः**। अयमभिप्लवः क्लृप्तो भवति, न पृष्ठ्यवदक्लृप्तोऽपि। कुतः 6. २९
क्लृप्तत्वमत उक्तम्[2] क्लृप्तच्छन्दा इति। क्लृप्तानि प्रतिसवनं छन्दांसि
यस्य। प्रातःसवनं गायत्रमेव, माध्यंदिनं त्रैष्टुभमेव, तृतीयसवनं जागतमेवेति
प्रकृताविव व्यवस्थितानि छन्दांसि; न तु पृष्ठ्य इवानवक्लृप्तानि। अस्तु
क्लृप्तच्छन्दस्त्वं ततः किमित्यत आह—**यो-भवति**॥ 6. ३०

इति षष्ठः खण्डः

a. KB. XX. 1. १.   b. KB. XXI. 6. २४.

1. B. पूर्वं   2. V. आह

7. १ **सर्वजागतानि–तृतीयसवने**। निवित्पदानि धीयन्ते क्षिप्यन्ते येषु तानि निविद्धानानि सूक्तानि। तृतीयसवनवर्तीनि सर्वाणि जगतीछन्दस्कानि सर्वजागतानि तथाविधानि भवन्ति। क्लृप्तच्छन्दस्त्वादेव। अक्लृप्तच्छन्दस्तु नैवम्। छन्दोऽन्तरस्यापि तृतीयसवनप्राप्तिसंभवात्। तथापि किमित्यत आह—

7. २,३ **तथा–दधति**। तथा सति निवित्पदानां स्वोचितस्थाने प्रक्षेपणं सिद्धयति। तृतीयसवने हि निविदां प्रक्षेपो जागतेषु सूक्तेषु युक्तः। जागतत्वात् तृतीयसवनस्य। ता इत्थं स्वस्वस्थाने निवेश्यमाना निविदः एतान् सत्रिणो लोकेषु काम्यफलभोगभूमिषु तद्गतेषु काम्येषु वस्तुष्वपि प्रतिस्वमिच्छानुरोधेन निवेशयन्ति। सर्वलोककामानां स्वच्छन्दत उपभोगफलप्रदत्वात् प्रशस्तोऽयं निवित्पदप्रक्षेप इत्यर्थः।

क्लृप्तच्छन्दस एव यज्ञस्याभिप्लवस्याक्लृप्तच्छन्दस्कयज्ञोचितफलप्रदत्वं

7. ४-६ प्रतिपादयन्नभिप्लवं स्तौति—**तद्–उपासः**। निविद्धानानां स्वतो विद्यमानेन सर्वजागतत्वेन सर्वजागततृतीयसवनगतकामावाप्तिस्तावत् सिद्धैव। सैव न केवलम्, सर्वत्रैष्टुभसर्वगायत्रतृतीयसवनकामाप्तिरप्यखण्डितैव सेत्स्यति। तथाहि—तन्त्रे नित्ये शस्त्रातान एव भवा अस्तभ्नाद्याः शस्त्रारम्भरूपास्त्रिष्टुभोऽत्र प्रत्यहं पठयन्ते। तथाविधत्रिष्टुप्संबन्धोपाधौ सर्वत्रैष्टुभत्वकल्पनया तद्गतबलवीर्यादिकामोपाप्तिः। एवं सुरूपकृत्नुशंसनेऽपि सर्वगायत्रतृतीयसवनफलोपाप्तिर्द्रष्टव्या। अभिप्लवशब्दनिर्वचनेनापि स्तौति—**यद्–**

7.१०-१२ **यजमानाः**। एष षळहः सत्रकर्मणि भूयो भूयोऽभिमुखमागच्छति। आवर्त्यमानत्वात्। तथा यजमाना अनेन षळहेन स्वर्गं लोकं[1] प्रत्यभिगच्छन्ति यस्मात् तस्मान्निमित्तादभिप्लवशब्दवाच्यत्वं संपन्नम्। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति सप्तमः खण्डः

1. B. T. omit

ब्राह्मणार्थविमर्शेन यथाशक्ति[1] कृतेन मे ।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अन्त्याभिप्लविकत्र्यहप्रकटनः कौषीतकिब्राह्मण-
व्याख्याने स्फुटमेकविंश उदगादध्याय इद्धो गुणैः ॥

## इति कौषीतकिब्राह्मणव्याख्याने तृतीयदशके प्रथमोऽध्यायः

1. V. यथामति

अथ

# द्वाविंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
इत्थं ज्योतिर्गवायुर्गवायुर्ज्योतिरहर्गणः ।
योऽसावुभयतोज्योतिः षळहोऽभिप्लवाह्वयः ॥
सोऽयं विंशैकविंशाभ्यामध्यायाभ्यामिह क्रमात् ।
श्रुत्या निरूपितस्तावदनुष्ठानक्रमाश्रयात् ॥
द्वाविंशेन त्रयोविंशेनाध्यायाभ्यामथाधुना ।
विधानावसरायातः पृष्ठ्यः स्पष्टं विधास्यते ॥
नन्वेष[1] पृष्ठ्यषळहविकारोऽभिप्लवो मतः ।
यदाहाभिप्लवः पृष्ठ्यविकार[a] इति सूत्रकृत् ।
प्रकृतेरग्रहे नैव विकृतिः सुग्रहा भवेत् ।
न हि [illegible]नोऽनवधृतौ कटकाद्यवधारणा ।
प्रकृतित्वादतः पृष्ठ्य आदौ वक्तुमिहोचितः ।
पश्चादभिप्लवस्तस्य तद्विकारत्वहेतुतः ।
तस्मादेष विधानस्य क्रमोऽयुक्त इहान्वितः ।
अत्राभिधीयते पौरुषेयेषु वचनेष्विव ।
वेदवाक्येष्वपि कथंकारं प्रश्नः प्रवर्तताम् ।
अथापि चेत् क्रियेतासौ कार्यः स्यात् पूर्वमेव ते ।

a. ŚŚ. 11. 4. 1.

1. B. नन्वेक

पत्रमानादीष्टयो हि प्रथमं विहिताः पुरा।
प्राग्दर्शपूर्णमासेष्टिविधेस्तार्तीयगामिनः ।
इष्टीनां प्रकृतिर्दर्शपूर्णमासाविति स्थितेः।
दर्शादित्रिविधिरादौ न कस्मादिति कुतो न ते।
चोदना ननु तत्रापि चोद्यं तुल्यं ममेति चेत्।
उच्यते प्रकृतेः पूर्वं विकृतेः परतो विधिः।
किमर्थं क्रियते बुद्धिसौकर्यार्थतयेति चेत्।
अल्पमेतत् फलं किं न पाठक्रमविपर्ययात्।
अर्थक्रमाङ्गीकरणं क्वापि क्वाप्युपलभ्यते।
अनागतापेक्षणेन किं न धीः सुकरा भवेत्।
यद्यपि प्रतिपत्तेः स्यात् सुकरत्वं भवन्मते।
अनुष्ठानस्य सौकर्यं तथाप्यस्मन्मते भवेत्।
अनुष्ठानक्रमं तत्र समाश्रित्य श्रुतिस्त्वियम्।
प्रवृत्तादित एवासावनुष्ठातृहितैषिणी।
सत्रे चाभिप्लवस्य प्रागनुष्ठानं तु पृष्ठ्यतः।
चतुर्विंशाह्वयादह्न ऊर्ध्वं तस्य प्रयोगतः।
प्रायणीयचतुर्विंशावुपेत्याभिप्लवानथ ।
उपेयुश्चतुरः पृष्ठ्यपञ्चमानिति तद्विधेः[a]।
अतः पूर्वप्रयोज्यत्वाद् विहितोऽभिप्लवः पुरा।
पृष्ठ्यस्योर्ध्वं प्रयोज्यत्वादूर्ध्वं विधिरिति स्थितम्।
गवामयनमारभ्य दर्शितान्यत्र यद्यपि।
चतुर्विंशप्रभृतिकान्यहानि क्रमसंश्रयात्।
तथापि द्वादशाहस्य विधिर्मध्येऽत्र दर्शितः।
सत्राणामप्यहीनानां प्रकृतिः स हि संमतः।
प्रकृत्युक्तौ हि विकृतिः सर्वाप्युक्ता भवेदिति।
प्रकृत्यभेदाद्विकृतेः हेम्नेव कटकादिनः।

a. cf. ŚŚ. 13. 19. 7.

स चातिरात्रयोरह्नोराद्यन्तस्थितिशालिनोः ।
अन्तरालनिविष्टेन दशरात्रेण कल्पितः ।
अह्नां द्वादशसंख्यानामादिमं चान्त्यमप्यहः ।
अतिरात्रान्तमनयोर्दशरात्रोऽन्तरा स्थितः ।
स चापि पृष्ठ्यच्छन्दोमदशमाहर्गणात्मकः ।
अतिरात्रादादिभाजः पृष्ठ्यः षळह उत्तरः ।
छन्दोमाख्यास्तदुपरि त्रयस्तेषामनन्तरम् ।
अहर्दशममस्योर्ध्वमतिरात्रमिति क्रमः ।
तत्र व्यूळ्हः समूळ्हश्च दशरात्रो द्विधा स्थितः ।
तद्भेदाद् द्वादशाहोऽपि द्वैविध्यं प्रतिपद्यते ।
एतच्च सप्तमाध्यायपर्यन्ते स्पष्टयिष्यते[a] ।
ऊळ्हानि विविधं यस्य छन्दांसि स तथोच्यते ।
स्वदेशादन्यदेशस्य प्रापणं वहनं मतम् ।
अन्योन्यस्थानसंप्राप्तिः सर्वेषामपि छन्दसाम् ।
व्यूहनं तद्वैपरीत्यात् स्थितिस्तेषां समूहनम् ।
सोऽयं व्यूळ्हः समूळ्हश्च द्वादशाहो द्विधा स्थितः ।
द्वाविंशादिभिरध्यायैः सप्तमान्तैर्विधीयते ।
चतुर्थपञ्चमाध्यायौ वर्जयित्वेतरेषु तु ।
अध्यायेषु चतुर्ष्वेव द्वादशाहनिरूपणम्[1] ।
द्वाविंशश्च त्रयोविंशश्चाध्यायौ पृष्ठ्यगोचरौ ।
षष्ठश्छन्दोमविषयः सप्तमो दशमाश्रयः ।
इत्थं क्रमात् सात्रिकाणामह्नां क्लृप्तिं प्रदर्शयन् ।
आम्नायो द्वादशाहस्य विधिमभ्यन्तराभ्यधात् ।
स्वरूपभेदविरहाद् द्वादशाहाब्दसत्रयोः ।
पृष्ठ्यादीनां विधानस्याप्यभेदाद् युगपद् विधिः ।

a. KB. XXVII. 11. १७; १९.

1. T. °निरूपणा

तत्र पृष्ठ्यत्र्यहः पूर्वो द्वाविंशेऽत्र विधीयते ।
त्रयोविंशे क्रमात्तस्य त्र्यह उत्तर ईर्यते ।
पृष्ठ्यस्य षळहस्याद्यं दशरात्रस्य चाप्यहः ।
अभिप्लवाख्यषळहात् सत्रे कार्यमनन्तरम् ।
द्वादशाहेऽतिरात्रान्तादह्न आदिनिवेशिनः ।
अग्निष्टोमात्मकं खण्डद्वय्या कथयति श्रुतिः ।।

तत्र तावत् पार्ष्ठिकस्य प्रथमस्याह्नः पृथिवीलोकरूपत्वं तथा प्रति-
पत्त्या कर्तव्यत्वं द्योतयिष्यन्नाह—**प्रथमम्-आयतनेन** । यदेतत् पार्ष्ठिकं 1. १
प्रथममहरस्ति तदयं पृथिवीलक्षणो लोक एवेति मन्तव्यम् । न च गोरश्वा-
त्मत्वाभिधानवदह्नः पृथिव्यात्मकत्वसंकीर्तनमनुपपन्नमिति मन्तव्यम् । यतो
न मुख्यं तदात्मकत्वमिह विधित्सितम् । किं तर्हि आयतनेन स्थानेन
ताद्रूप्यम् । प्रथमस्याह्नो हि प्राथम्यादेवाधोदेशवर्तित्वं सिद्धम् । तथा
पृथिव्या अप्यन्तरिक्षाद्यपेक्षम् । अतः स्थानैकरूप्यनिरूपणया प्रथमस्याह्नः
पृथिवीरूपत्वं संपाद्य शस्त्रशंसनादिकं कर्तव्यम् । अथास्याग्न्यादिनिर्वर्त्य-
शरीरतामाह—**अग्निः-निदानम्**। देवतानां मध्येऽग्निः पृथिवीस्थानो देवः। 1.२,३
छन्दसां मध्ये गायत्री । स्तोमानां मध्ये त्रिवृत्स्तोमः । साम्नां मध्ये रथंतराख्यं
साम । एतदग्न्यादिकं यदस्ति तदेतदस्य वक्ष्यमाणस्य प्रथमस्याह्नो निदानं
कारणं निर्वाहकं भवति ।

अस्मिन् प्रथमेऽहनि शंसनीयानामृचामहःसंबन्धीनि रूपाणि दर्शयिष्य-
माणानि आदावेव सुग्रहत्वाय संकलय्य दर्शयति—**तस्य-करिष्यत्** । यदेतत् 1.४-६
प्रस्तुतं प्रथममहस्तस्य संबन्धीनि छन्दसां रूपाणि पदतदेकदेशाद्यात्मकान्येतानि
वक्ष्यमाणानि भवन्ति । तानि कानीत्यत्राह—करिष्यदिति । प्रथमे पदे पादे ।
सदेवं देवताभिधानसहितं पदम् । तदेकं रूपं भवति । करिष्यदिति श्रुतिः
स्वयमेव व्याचष्टे—यद्वा इति । भविष्यत्कालाभिधायि पदं करिष्यदित्यनेनो-
च्यत इति यावत् । **आवत्-इति** । आ इत्युपसर्गयुक्तम् आवत् । प्रेत्युपसर्गयुक्तं[1] 1.७
प्रवत् । एष इति पदेन युक्तम् । तथार्षतीत्यादिपदैर्युक्तम् । अद्येति पदेन युक्तम् ।

1. T. omits आवत् । प्रेत्युपसर्गयुक्तं

युजिधातुमत् । ज्योतिःशब्दयुक्तं च । तदेतत् सर्वं प्रथमाहःसंबन्धि रूपं द्रष्टव्यम् । एषां मध्ये कानिचिदेव रूपाणि प्रदर्श्यन्ते । कानिचिन्न । तत् तत्र तत्र स्वयमेवावगन्तव्यम् ।

तत्र तावदारम्भस्य व्यूळ्हसमूळ्हसाधारण्यात्[1] व्यूळ्हपक्षे प्राकृतापवादे-
1.८,९ नाज्यशस्त्रं विधत्ते—**उपप्रयन्तो-रूपम्** । प्रयन्त इति प्रोपसर्गश्रवणादिदं सूक्तं प्रवत् । एतच्च युक्तम् । यस्मात् प्रवत्पदं प्रथमस्याह्नो साधारणं रूपं प्रसिद्धम् ।
1.१० अस्य गायत्रीछन्दस्कत्वं स्तौति—**गायत्रम्-त्र्यहः** । आज्यमिति शेषः । एतदपि युक्तम् । यस्मादेष पृष्ठ्यस्य व्यूळ्हस्य प्रथमस्त्र्यहो गायत्रप्रातःसवनो भवति । गायत्रीछन्दस्कं प्रातःसवनं यस्य स तथा । सूत्रितं च—'उपप्रयन्तो अध्वरमित्याज्यं व्यूळ्हे'[a] इति । समूळ्हपक्षे सूक्तान्तरं विधित्सुः प्राग्-
1.११ विहितस्य व्यूळ्हमात्रविषयत्वमाह—**इति-व्यूळ्हे** । किं तर्हि समूळ्ह इति
1.१२ तदाह—**उद्धृत्य-ब्राह्मणम्** । एतद् 'उपप्रयन्त'[b] इति सूक्तमुद्धृत्य प्राकृतं 'प्र वो देवाय'[c] इत्येतदेव समूळ्हपक्षे कुर्यात् । सूत्रितं हि—'प्र वो देवायाग्नय इति समूळ्हे'[d] इति । तस्योक्तमिति 'प्रवद् वै'[e] इत्यादिकमित्यर्थः ।

अत ऊर्ध्वं व्यूळ्हसमूळ्हसाधारणो विधिः । प्रउगशस्त्रं विधत्ते—**माधुच्छ-**
1.१३ **न्दसः-ब्राह्मणम्** । तस्योक्तमिति 'रथंतरं वै साम'[f] इत्यादिकमित्यर्थः । मरुत्वतीयशस्त्रे प्रतिपदनुचरब्राह्मणस्पत्यान् प्राकृतानेव सिद्धवत्कृत्य सूक्तं विशेषतो
1.१४.१६ विधत्ते—**आ-मरुन्न्यङ्गः** । अत्रादौ आ इत्युपसर्गश्रवणादेतत् सूक्तमावद् भवति ।

ननु मरुत्वतीयं मरुत्वद्गुणकेन्द्रदेवत्यम् । तत् किमस्मिन् सूक्ते मरुतामभिधानमस्ति ? न चेत् कथमाञ्जसमाभिरूप्यं संगच्छेत ? इत्याशङ्क्य इन्द्रविशेषणतयैवैतस्मिन् पदे मरुतामभिहितत्वान्न मरुत्वद्गुणकेन्द्रदेवत्यत्वासिद्धिरित्याह—स्वर्णराडिति । न्यङ्गश्चिह्नमङ्क इत्यादिकमनर्थान्तरम् । अस्मिन् पादे यदिदं मरुत्वानिति पदमस्ति स एवात्र पादे मरुतां संबन्धी

a. ŚS. 10. 2. 2.
b. RV. 1. 74. 1.
c. RV. 3. 13. 1.
d. ŚS. 10. 2. 2.
e. KB. XXII. 1. ९.
f. KB. XX. 2. ६.

1. T. omits समूळ्ह

न्यङ्कश्चिह्नं भवति । इन्द्रविशेषणतयापि मरुतामभिधानात्[1] तत्प्रत्यायकोऽयं शब्द इत्यर्थः ।

प्राकृतापवादेन निष्केवल्यं विधत्ते—**आ–रूपम्**। गतम् । 'आ यात्विन्द्रः'[a] 1.१७,१८
'आ न इन्द्र'[b] इत्येते द्वे सूक्ते वैदिकप्रसिद्धसंपातशब्दवाच्यत्वनिमित्तप्रदर्शनपुरः-
सरं स्वर्गप्राप्तिहेतुत्वोक्त्या स्तौति—**संपातौ-इति**। पृष्ठ्यसंबन्धिनि प्रथमेऽ 1.१९-२३
हनि संपातसंज्ञया प्रसिद्धे एते द्वे सूक्ते निष्केवल्यमरुत्वतीयसूक्ते भवतः ।
अल्पाच्तरत्वान्निष्केवल्यशब्दस्य[2] प्रथमाभिधानम् । कुत इति चेत्, पुरा देवाः संपातसंज्ञैः सूक्तैर्हेतुभूतैः स्वर्गं लोकमप्रतिबन्धेन प्राप्तवन्तः । यस्मादेवं संपातानां स्वर्गसंपातहेतुत्वम्, अत एव तच्छब्दवाच्यत्वं च, तस्मात् स्वर्ग-प्राप्तिहेतुभूतावेतौ संपाताविति कृत्वा शंसितृभिरस्य पृष्ठ्यषळहस्य प्रथमेऽहनि प्रथमभूतौ शस्त्रे पठ्येते । तत् तत्र प्रथमेऽहनि संपातसूक्ते निष्केवल्यमरुत्वतीये भवत इत यदस्ति तत् स्वर्गस्य लोकस्य समष्ट्यै सम्यक् प्राप्त्यै स्यादेवेति कृत्वा, न तु यदृच्छया । तस्माद् विशिष्टफलत्वात् प्रशस्तमिदं सूक्तद्वयमिति ॥

इति प्रथमः खण्डः

**युञ्जते-आर्भवम्**। अथ तृतीयसवनगामिनि वैश्वदेवशस्त्रे प्राकृतापवा- 2. १
देन सावित्रमाह—युञ्जत इति । द्यावापृथिवीयमाह—प्र द्यावा इति । आर्भवं
विधत्ते—इह इति । आर्भवं स्तौति—**तेन-रूपम्**। तेन 'इहेह वः'[c] इति सूक्त- 2. २-५
पठनेन होता नियमनं पृथिवीलोकात् प्रच्युतानां यजमानानां पृथिवीलोक एव प्रतिष्ठापनरूपं करोति । तदेव विवृणोति—युक्तवन्तीत्यादि । प्रथमेऽहनि खलु युक्तवन्ति प्रवन्ति च सूक्तानि 'युञ्जते मन'[d] इत्यादीनि पठ्यन्ते । तत्र 'रथो युज्यताम्' इत्यादौ युजिधातुप्रयोगे योगस्य भाविप्रयाणाङ्गत्वाव-गमात् तद्धेतोः प्रयाणद्योतकस्यात्र प्रयोगादौचित्यानुसारेणास्मात् पृथिवीलोकाद्

a. RV. 10. 44. b. RV. 4. 20.
c. RV. 3. 60. d. RV. 5. 81.

1. T. अविधानात् for अभिधानात्
2. T. V. अल्पाक्षरत्वात् for अल्पाच्तरत्वात्

यजमानानां स्वर्गलोकं प्रति गमनारम्भोऽवसीयते । तथा प्रोपसर्गस्यापि प्रयाणद्योतकत्वमविशिष्टमेव । तथा सति पृथिवीलोकाद् यजमानानां प्रच्युतिः प्रचलनलक्षणा प्रसजेत् । तत् तत्रैवं प्रच्युतौ प्रसक्तायां सत्याम् 'इहेह वः'[a] इति सूक्तमार्भवं करोतीति यदस्ति तेन सा प्रच्युतिः परिह्रियते । यस्माद् 'इहेह' इति साभिनयेन निर्देशेन पृथिव्यामेवावस्थितिध्रौव्यं यजमानानां प्रतीयते । तेन 'इहेह वः'[a] इत्येतत् पृथिव्याः प्रच्युतिविरहस्य[1] नियमनलक्षणरूपं निरूपकं भवति ।

2. ६,७ वैश्वदेवसूक्तं विधत्ते—**हयो-रूपम्** । अयुजीति युजिधातोः श्रवणादेतत् सूक्तं युक्तवत् । अस्य सूक्तस्य शंसने शाखान्तरिभिरभिमतं विशेषमाह—

2. ८,९ **तस्य-इति** । तस्य 'हयो न विद्वाँ'[b] इति सूक्तस्य ये उत्तमे उपान्त्यान्त्ये 'देवानां पत्नीः'[c] 'उत ग्ना व्यन्तु'[d] इत्येते द्वे ऋचौ स्तः । ते उत्सृजति उद्धरेत् । न शंसेत् । कुत इति चेत् । यस्मादेते उत्तमे ऋचावाग्निमारुते शस्त्रे अवधृते । नित्यवदेव बहु शस्येते पठ्येते । 'देवानां पत्नीः शंसति'[e] इति आग्निमारुते विहितत्वात् । प्रकृतौ विहितस्यातिदेशतो विकृतौ प्राप्तस्य नित्यतया पठनीयत्वात् । द्वृचपरिहाणेऽपि कथंचित् सूक्तशंसनस्य संपादयितव्यत्वात् । तस्माद् यातयामत्वदोषपरिहारार्थमुत्तममृग्द्वयं विना 'हयो न विद्वाँ'[b] इति सूक्तं पठितव्यम् । अमुं पक्षं प्रत्याचक्षाणः स्वं पक्षमुपक्षिपति—

2.१०-१४ **तदु-अहन्** । उत्तममृग्द्वयमनादृत्य शंसने सूक्तं व्यवच्छिन्नं स्यात् । अष्टर्चं खल्वेतत् सूक्तम् । 'हयोऽष्टौ'[f] इति कात्यायनोक्तेः । तत्रोत्तमयोरशंसने सूक्तं न पठितं स्यात् । तच्च सति संभवे न युक्तम् । अतः सूक्तव्यवच्छेदपरिहारार्थमुत्तमे ऋचौ पठेदेवेति कुषीतकापत्यमुनिरुक्तवान् किल । ननु यातयामत्वप्रसक्तेरसंभव उक्त एवेति चेत् नेत्याह । शस्त्रावयवतया वा[2] अनुवचनरूपतया वा पूर्वं पठितत्वात् तस्यैव पुनः पाठे न यातयामत्वापत्तिः । किंतु वषट्कार-

a. RV. 3. 60.
b. RV. 5. 46.
c. RV. 5. 46. 7.
d. RV. 5. 46. 8.
e. Cf. KB. XVI. 8. १०.
f. SA. V. 46.

1. V. परिहारस्य for विरहस्य
2. T. omits

संबन्धादेव। स च याज्यात्वेन प्रयोग एव। तत्रैव वषट्कारस्य संभवात्। तत्राप्यस्ति विशेषः। समाने एकस्मिन्नेवाहनि प्राग्वषट्कारसंबन्धादेव नाहर्भेदे सति। उक्तं हि प्राक्—'यया वै प्रातर्यजति ऋक् सा तदहर्यातयामा भवति'[a] इति। इह च न वषट्कारसंबन्धोऽस्ति। तत्र कुतो यातयामत्वप्रसक्तिः? तस्माद् 'हयो न विद्वाँ'[b] इत्यष्टर्चं कृत्स्नमेव सूक्तं वैश्वदेवशस्त्रे पठनीयम्। यदिदं कौषीतकेर्मुनेर्मतं तदेवम्। अत्र श्रुत्या मतद्वयं प्रदर्शितम्। अत एव सूत्रितम्—'हयो न विद्वानित्युत्तमे वापरिहाप्य'[c] इति। **वैश्वानराय-रूपम्**। 2.१५-२१
वैश्वानरीयमारुतजातवेदसीयविध्यर्थवादवाक्यानि गतानि।

इत्थं होतृशस्त्रषट्कक्लृप्तिं विधाय[1] क्लृप्तकृत्स्नशस्त्रसहितं प्रथममहरेव पृथिव्यादिप्राप्तिहेतुत्वेन स्तौति—**इमं-अधिपतिम्**। पृष्ठ्यषळहस्य प्रथमेना- 2.२२-२५
ह्नानुष्ठितेन सता साधनेन सत्रिणः पृथिवीलोकं प्राप्ता भवन्ति। पृथिवीगतान् सर्वान् भोगान् प्राप्नुवन्ति[2]। अथवा पृथिव्यभिमानिदेवतासालोक्यादि प्राप्नुवन्ति। अत्र च हेतुः प्राथम्यम्। षण्णामह्नामिदमहः प्रथमम्। लोकानां च पृथिवीलोकः। अत एव 'प्रथममहरयमेव लोकः'[d] इत्याम्नातम्। छन्दसां मध्ये गायत्रीछन्दः प्रथमेनाह्नाप्नुवन्तीत्यनुवर्तनीयम्। एवमुत्तरत्रापि। स्तोमानां त्रिवृतं स्तोममाप्नुवन्ति। साम्नां रथन्तरं सामाप्नुवन्ति। दिशां मध्ये प्राचीं दिशम्। ऋतूनां वसन्तमृतुम्। देवगणानां मध्ये वसुशब्दवाच्यं देवजातं देवगणमाप्नुवन्ति। गणदेवानामधिपतिं स्वामिभूतमग्निनामानं[3] देवं चाप्नुवन्ति।

भूगायत्रीत्रिवृतां रथन्तरप्राग्दिशावसन्तानाम्।
सवसोश्चाग्नेराप्तिकृदाद्यमिदं पार्ष्ठिकं वरिष्ठमहः॥

इति द्वितीयः खण्डः

a. KB. XIII. 2. १.
b. RV. 5. 46.
c. ŚŚ. 10. 2. 7.
d. KB. XXII. 1. १.

1. T. omits क्लृप्तिं विधाय
2. V. प्राप्ता भवन्ति
3. V. स्वामिनम् for स्वामिभूतम्

पृष्ठ्यस्य प्रथममहः सुष्ठु व्याचष्ट खण्डिकाद्वया ।
श्रुतिरस्य द्वैतीयं कथयितुमत ऊर्ध्वमुद्युङ्क्ते ॥

3.१-७ **द्वितीयं-इति** । पृष्ठ्यस्य यद् द्वितीयमहरस्ति तदायतनेन स्थानवशादन्तरिक्षलोक एव भवति; मध्यवर्तित्वसामान्यात् । इन्द्रस्त्रिष्टुबित्यादि अग्निर्गायत्रीत्यादिवद् योज्यम् । करिष्यदितिवत् कुर्वदित्येतदपि व्याचष्टे—यद् वा इति । द्रष्टार ऋषयः शब्दार्थ[1] प्रत्यक्षतया वर्तमानतयाभिदधतीति यदस्ति नातीतत्वेनागमित्वेन वा, तदेतद्वर्तमानतया अभिधेयस्य स्पर्शनमभिधानं कुर्वदित्यनेनोच्यत इत्यर्थः । हतवत् हननार्थशब्दयुक्तम् । वज्रशब्दयुक्तम् । वृत्रहवच्छब्दयुक्तम्[2] । वृषण्वच्छब्दवत् । उदित्युपसर्गेण युक्तम् । वीत्युपसर्गेण युक्तम् । तिष्ठतिधातुनिष्पन्नशब्दयुक्तम् ।

3.८-१३ प्राकृतापवादेन आज्यशस्त्रं तावद् विधत्ते—**अग्निं-ब्राह्मणम्** । अत्र 'होतारं विश्ववेदसम्' इत्यत्र विशब्दश्रवणादेतद् विवद् भवति । तस्य 'तदस्यान्तरिक्षस्य'[a] इत्याद्युक्तमेव ब्राह्मणं द्रष्टव्यम् । सूत्रितं हि—'अग्निं दूतं वृणीमह इत्याज्यं व्यूळ्हे । त्वं हि क्षैतवद् यश इति समूळ्हे । सर्वत्रोत्तमां परि-
3.१४-१६ हाप्य'[b] इति । गायत्रमित्यादि गतम् । मरुत्वतीयं विधत्ते—**इन्द्र-रूपम्** ।
3.१७-१९ हस्तविशेषणीभूतेन वज्रशब्देन तद्वत् । निष्केवल्यं विधत्ते—**या-रूपम्** । 'वृत्रहत्य' इति वृत्रहननं प्रतीयते । तेन वृत्रहवद् भवति । वैश्वदेवशस्त्रप्रतिपदनु-
3.२० चरौ विधत्ते—**विश्वो-ब्राह्मणम्** । 'विश्वो देवस्य'[c] इति वैश्वदेवस्य प्रतिपद् भवति । 'अस्य हि स्वयशस्तरमित्युत्तरे । आ विश्वदेवं सत्पतिमित्यनुचरः'[d] इति । अत्र च सर्वत्रौपदेशिकेनातिदेशिकस्य निवृत्तिरवगन्तव्या । अन्यत् सर्वमातिदेशिकमिहापि समानं द्रष्टव्यम् ॥

इति तृतीयः खण्डः

a. KB. XX. 3. ५.
b. ŚŚ. 10. 3. 2–3.
c. RV. 5. 50. 1.
d. ŚŚ. 10. 3. 12–13.

1. B. अर्थ; T. शब्दावर्थं
2. T. V. omit

वैश्वदेवशस्त्रे सावित्रं विधत्ते—**तद्-ब्राह्मणम्।** अस्मिन् सूक्ते 'त्रिरन्त- 4.१-१२
रिक्षं सविता महित्वना'[a] इति कश्चित् पादोऽस्तीति शेषः। तत् तेन पादेन प्रत्यक्षं साक्षादेव, न पुनर्विपदादिवद्विवरणाद्यन्तरिक्षधर्मभूतच्छिद्रत्वाद्यभिधान-प्रणालिकया, अन्तरिक्षलोकमभिधत्ते। साक्षादेवान्तरिक्षपदाम्नानात्। अयं सविता देवो महित्वना स्वकीयेन महत्त्वेन त्रीण्यन्तरिक्षाणि व्याप्नोतीति यद्यपि सवितृमहानुभावत्वप्रतिपादनपरमिदं[1] तथापि तच्छेषत्वेनाप्यन्तरिक्षस्य स्व-शब्देनैवोपादानात्तदभिवदनमस्त्येव। तदेतदन्तरिक्षाभिवदनमस्य द्वितीयस्या-ह्नो रूपं भवति। द्वितीयस्याह्नोऽन्तरिक्षरूपत्वाभिधानात्। गतमन्यत्। अत्र सूत्रम्—'तद् देवस्य ते हि द्यावापृथिवी यज्ञस्य व इति वैश्वदेवे विकारः। पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुते'[b] इति।

जातवेदसीयस्यान्त्यामृचमुत्तराहरभिधायकत्वेन पूर्वोत्तराहस्सन्तानद्योत-
कत्वोक्त्या स्तौति—**तस्य-कौषीतकिः।** तस्य प्रकृतस्य 'नू चित् सहोजा'[c] 4.१३-१५
इति जातवेदसीयसूक्तस्य या 'उरुष्याग्ने'[d] इत्यादिका उत्तमा ऋगस्ति, अस्यां 'प्रातर्मक्षू धियावसुर्जगम्यात्' इति पादेन द्वितीयादह्नः परमुत्तरं तृतीयमहरे-वाभिधत्ते। कथमिति चेदुच्यते। अस्या ह्यृचोऽयमर्थः—हे विभावः विशिष्ट-प्रकाशयुक्त अग्ने। गृणते त्वां स्तुवते। वरूथमनिष्टवारकं गृहं भव। हे मघवन् धनयुक्ताग्ने मघवद्भ्यो हविर्लक्षणधनवद्भ्यो यजमानेभ्यः शर्म यथा भवति तथा भव। हे अग्ने गृणन्तं त्वां स्तुवन्तमंहसोऽनिष्टकारिणः शत्रो-रुरुष्य रक्ष। सोऽग्निः प्रातरिदानीमिव परेद्युरपि मक्षु शीघ्रमागच्छतु[2]। कीदृशः? धियावसुः धिया कर्मणा बुद्ध्या वा प्राप्तधन इति। अत्र प्रातर्मक्षु आगच्छतु इति वाक्येनोत्तराहरभिधानं स्फुटमेवेति। अस्त्वेवमतः किमिति चेत् एतेनोत्तराहरभिवदनेन सत्रिणो यजमानाः परमुत्तरं तृतीयमहरारभ्य स्पृष्ट्वावष्टभ्य वा वसन्ति तां निशां गमयन्ति। यज्ञसन्तानं कृत्वा कालं प्रतिपालयन्तो वर्तन्ते। अतः,

a. RV. 4. 53. 5.
b. ŚŚ. 10. 3. 14–15.
c. RV. 1. 58.
d. RV. 1. 58. 9.

1. B. महानुभावता for महानुभावत्व
2. B. T. आगच्छ for आगच्छतु

अहःसन्तानकरणात् प्रशस्तेयमृगुत्तमा ।
भवावरूथमित्याद्या जातवेदस्यसूक्तगा ।। इति ।

4.१६-१६ एवं कौषीतकिर्मुनिराह स्म । **अन्तरिक्षलोकं-अधिपतिम्**। अन्तरिक्षलोकमित्यादि पूर्ववद् व्याख्येयम् ।

लोकानामन्तरिक्षाह्वयविदितमथ च्छन्दसां त्रिष्टुबाख्यं
स्तोमानां चापि तं पञ्चदशमिह बृहत्साम चैवापि साम्नाम् ।
आशानां दक्षिणाख्यां दिशमृतुषु तथा ग्रीष्मसंज्ञं स्वरोको-
वर्गाणां रुद्रवर्गं सुरपमधिपतिं[1] सत्रिणः प्राप्नुवन्ति ।।

इति चतुर्थः खण्डः

पृष्ठ्यस्य षळहस्येत्थं द्वितीयमहरीरितम्[2] ।
तस्यैवाथ क्रमप्राप्तं तार्तीयमभिधीयते ।।

5. १-७ **तृतीयम्-इति** । असावेव लोक इति द्युलोक एवेत्यर्थः । गतमन्यत् । चक्रवच्छब्देन भूतकालाभिधानं विवक्षितमिति स्वयमेव व्याचष्टे—यद् वा इति । अश्वावदिति छान्दसो दीर्घः । समानस्तुल्य उदर्कोऽवसानं यस्य तत्
5. ८ तथा । अनिरुक्तमनिर्दिष्टदेवतापदम्[3] । सप्रभृति समानादि । **युक्ष्वा-आज्यम्।**

5. ६ वैकृतमाज्यमधिकृत्य चोद्यमुद्भावयति—**तद्-इति** । यस्मात् कारणात् तृतीयमहरन्तरवसानरूपं भवति प्रथमत्र्यहावसानवर्तित्वात् । अथ तथा सति कस्माद्धेतोरत्राज्यसूक्तं युजिधातुमद् भवति । युक्ष्वेति युजिधातुश्रवणाद् रथो युज्यतामित्यादौ गमनाद्यारम्भद्योतकत्वेन प्रथमाहरनुरूपस्य कथमुपसंहाररूपे
5.१०-१२ तृतीयेऽहन्याभिरूप्यमिति चोद्यार्थः । उत्तरम्—**एतेन-ब्रूयात्** । चोदकं प्रति इति इत्थंब्रुवं परिहारं ब्रूयात् । कथमिति चेत् , पुरा देवा एतेन तृतीयेनाह्ना स्वर्गं गतवन्तः । तत्र स्वर्गगमनकर्मणि युक्ताः सहिताः सपरिकरा वा सन्त एव ते गतवन्तः । न त्वन्योन्यवार्तानभिज्ञा एकाकिनोऽसंगृहीतपरिकरा वा;

1. T. सुरपतिमधिपतिं
2. B. V. ईड्शम् for ईरितम्
3. V. देवताकम् for देवतापदम्

तस्यौचित्यप्राप्तत्वात् । तेनावसानोचितगमनवर्तियोगस्यात्र विवक्षितत्वाद-
स्त्याभिरूप्यमित्यर्थः । द्वितीयपादे रूपसंपत्तिमाह—**अश्वाँ-ब्राह्मणम्** । हे अग्ने 5.१३-१७
यथा रथी रथीन्[1] सारथिरश्वान् रथे युनक्ति तत् तथा त्वं देवानामाह्वातृत-
मानश्वान् रथे योजय । युक्त्वा च पूर्व्यो मुख्यो होता सन् निषीद रथे स्थितो
भवेत्यर्थः । तदेतद् रथवच्छब्दरूपं तृतीयस्याह्नः संबन्धि रूपं भवति । अतोऽभि-
रूपम् । गायत्रमित्यादि गतम् । अत्र सूत्रम्—'युक्ष्वा हि देवहूतमानित्याज्यं
व्यूळ्हे । त्रिष्वप्यहःसु गायत्राण्याज्यानि त्वमग्ने वसूँरिहेति समूळ्हे[2] सर्वत्रोत्तमां
परिहाप्य'[a] इति ।

प्रउगशस्त्रं विधत्ते—**औष्णिह-भजते** । उष्णिकच्छन्दस्कः प्रायेणात्रिमहर्षि- 5.१८-२१
दृष्टश्च प्रउगो भवति । 'वायवा याहि वीतये'[b] इत्येका । 'वायो याहि शिवा'[c]
इति द्वे । अयं वायव्यस्तृचः । 'इन्द्रश्च वायवेषां सुतानाम्'[d] इति द्वे । 'अयं
सोमश्चमू सुतः'[e] इत्येका । स ऐन्द्रवायवः । 'आ मित्रे वरुणे वयम्'[f] इति
मैत्रावरुणः । 'अश्विनावेह गच्छतम्'[g] इत्याश्विनः । 'आ याह्यद्रिभिः सुतम्'[h]
इत्यैन्द्रः । 'सजूर्विश्वेभिर्देवेभिः'[i] इति वैश्वदेवः । 'उत नः प्रिया प्रियासु'[j]
इति सारस्वतः । अत्रोक्ते ऋषिच्छन्दसी । बहुत्वमात्रविवक्षया औष्णिहत्वं
स्तौति—जागतम् । जगत्यास्तृतीयाहर्निदानत्वोक्तेस्तस्य जागतत्वं प्रसिद्धम् ।
तत्र तृतीयस्याह्न उष्णिकच्छन्दस्कं प्रउगशस्त्रं भवतीति यदस्ति तेन गायत्र-
मेव सत् प्रातःसवनं जगतीच्छन्दः कर्तृ भजते सेवते प्राप्नोतीत्येतत् । तृतीय-
स्याह्नो जागतत्वस्थितेः प्रातःसवनेऽपि जगतीसंबन्धोऽभ्युपेयः । अन्यथा जाग-
तत्वस्य भागासिद्धत्वप्रसंगात् । तत्र च प्रथमस्य त्र्यहस्य गायत्रप्रातःसवन-
त्वादिह जागतत्वनिर्वाहाय एतदुष्णिकच्छन्दस्कं प्रउगशस्त्रं संपद्यते । उष्णिहः

a. ŚŚ. 10. 4. 2-3.
b. RV. 5. 51. 5.
c. RV. 8. 26. 23.
d. RV. 5. 51. 6.
e. RV. 5. 51. 4.
f. RV. 5. 72. 1.
g. RV. 5. 78. 1.
h. RV. 5. 40. 1.
i. RV. 5. 51. 8.
j. RV. 6. 61. 10.

1. B. omits
2. T. omits

तृतीयः[1] पादो द्वादशाक्षरः। 'उष्णिक् त्रिपदान्त्यो द्वादशकः'[a] इति कात्यायनवचनात्। अत्र उष्णिहो द्वादशकपादयुक्तत्वात् जगतीरूपत्वसंपादनेन प्रातःसवन उष्णिक्संबन्धो जगतीसंबन्ध एवेति कृत्वा जगतीभजनसंपत्तेः अभिरूपमिदमस्मिन्नहनि प्रउगशस्त्रम्।

5.२२,२३ अथ सूक्तं विधत्ते—**त्र्यर्यमा–रूपम्।** अत्र साक्षादेव तृतीयाहर्वर्तित्रिसंख्या-
वाचकस्य त्रिशब्दस्य श्रवणादाभिरूप्यम्। अत्र सूत्रम्—'त्र्यर्यमेति मरुत्व-
तीयम्'[b] इति। निष्केवल्ये शस्त्रे वैरूपनामकं साम भवति। तत्र तावत्
5.२४-३३ तस्य योनिभूतस्य प्रगाथस्य शंसनं विधत्ते—**यद्–इयात्।** अत्र दिवेदिव
इति पदं पुनः पठितमिति निवृत्तिः। तावेतौ प्रगाथौ द्वौ बृहतीकारं पठनीयौ।

उक्त्वादौ बृहतीममुष्य चरमं पादं द्विरुक्त्वावसा-
यार्धर्चे प्रणवं विधाय तु सतः पूर्वस्य तच्छन्दसः।
द्वैतीयं द्विरमुष्य पादमभिधायारभ्य चाथोत्तमे-
नार्धर्चेन समं पठेत् प्रणवमित्येवं विधिर्बार्हतः॥

5.३४,३५ प्रगाथान्तरं विधत्ते—**इन्द्र–रूपम्।** कुतस्त्रिशब्दवानयमित्यतः तद् दर्शयति—त्रिधात्विति। तृतीयाहर्वर्तित्रिसंख्यावाचिनस्त्रिशब्दस्य श्रवणात् तत् त्रिवत्त्वमेतस्य तृतीयस्याह्नो रूपं भवति।

5.३६-४० अथ सूक्तद्वयं विधित्सुरेकं तावद् विधत्ते—**अहं–समर्धयति।** शंसेदिति शेषः। इन्द्रस्य स्तोतृस्तोतव्योभयरूपस्य संबन्धि सूक्तमिन्द्रसूक्तम्। अत्रेत्थमाख्यायिका—

आसीत् कुले सुराणां कापि स्त्रीयां विदुर्विकुण्ठेति।
सा खल्वात्मजमिच्छन्त्याखण्डलसंमितं तपस्तेपे॥
तस्यास्तीव्रे तपसि स्थितिमत्या वृत्रहाथ सन्तुष्टः।
अस्या मत्सदृशोऽन्यो मा भूदिति पुत्रतां स्वयं भेजे॥
सप्तगुनाङ्गिरसेन स्तुत एष महर्षिणा स केनापि।
आत्मीयं माहात्म्यं बुद्ध्वा मध्येमहर्षि हर्षयुतः॥

a. SA.5.1. b. ŚS. 10. 4. 8.

1. B. T. द्वितीयः for तृतीयः

तुष्टावात्मानमहं भुवमित्येतन्मुखैस्त्रिभिः सूक्तैः ।
तेनात्र देवतात्वं सिद्धमृषित्वं च मिलितमिन्द्रस्य ॥

एतच्च सूक्तं प्रत्यृचमहमिति शब्देनोपक्रमात् समानादि भवति । समानस्तुल्य आदिर्यस्य तत् तथा । यथा वै सोदर्कमिति गतम् । छन्दोद्वारेणाभिरूप्यमाह—जागतमिति । एतत् सूक्तमिति शेषः । तृतीयस्याह्नो जागतत्वं प्रागुक्तम् । तेन जागतस्यास्य सूक्तस्य पठनेन हेतुनैनत् प्रकृतं तृतीयमहः स्वकीयेन जगत्या छन्दसा समृद्धं संपन्नवीर्यं करोति ।

अपरं सूक्तं विधत्ते—**यो-इन्द्रतनूसूक्तम्** । त्रैष्टुभं त्रिष्टुप्छन्दस्कं इन्द्रस्य 5.४१,४२
तनूं शरीरं स्वरूपं प्रतिपादयत् सूक्तमिन्द्रतनूसूक्तम् । यद्वा यथेन्द्रस्य स्वकीया तनूरतीव प्रिया तद्वत् प्रियमेतत् सूक्तम् । सूक्तान्तरेभ्यः सातिशयतयेन्द्रस्य गुणोत्कर्षप्रतिपादकत्वेन अतिप्रसादहेतुत्वात् । अत्र शौनकः—

'संयुज्य तपसात्मानमैन्द्रं बिभ्रन्महद्वपुः ।
अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥
तमिन्द्र इति मन्वानौ[1] दैत्यौ भीमपराक्रमौ ।
धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥
विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः ।
यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् ॥'[a] इति ।

अत्रेत्थं वाक्ययोजना—हे जनासो जना अतत्त्वविदो यूयमित्यर्थः । य इन्द्रो जायमान एव प्रथमो मनस्वी भवन् देवानितरानखिलानप्यग्न्यादीन् क्रतुना कर्मणा पर्यगृह्णात् पर्यरक्षत् । पर्यक्रामदिति वा इति यास्कः[b] । यस्य शोषकात्तेजसो द्यावापृथिव्यावप्यबिभीताम् । बलस्य च महत्त्वेन ईदृग्गुणैर्युक्तो यः स एवेन्द्रो नाहमिति ।

अथास्य निवित्पदप्रक्षेपस्थानतां स्तौति—**एतस्मिन्-अन्तरूपम्** । बभ्रो- 5.४३-४७
रपत्यं बाभ्रवः । गृत्समदो नामतः । स एतस्मिन् 'यो जात'[c] इति सूक्ते

a. Bṛh. D. IV. 66–68.
b. Cf. N. 10. 10. 1. (Pr. edn. अत्यक्रामत्)
c. RV. 2. 12.

1. B.T. मत्वानौ (Bṛh. D. Pr. edn. मत्वा तु)

पुरा कस्मिंश्चिद् यज्ञे प्रवृत्ते निविदं निहितवान्। स तेन हेतुनेन्द्रस्य प्रीतिविषयं परमं स्थानं प्राप्तवान्। यस्मादेवं तस्माद् यो होता 'यो जात' इति सूक्ते निविदं स्थापयति, स गृत्समदवदेव इन्द्रस्य प्रियं स्थानं प्राप्नोति। तथा परमुत्कृष्टं लोकं हैरण्यगर्भं जयति वशीकरोति प्राप्नोति। तस्य तदेवेत्यादि गतम्॥

इति पञ्चमः खण्डः

इत्थं द्विषूक्तं निष्केवल्यशस्त्रं विधाय संप्रति वैश्वदेवशस्त्रे प्रकृतितः
6.१,२ प्राप्तानुचरापवादेनानुचरतृचान्तरं विधत्ते—**अभि–नानात्वाय**। अभिवानभीत्युपसर्गवान्। अभिवत्त्वं किमर्थमित्यत्राह—पृष्ठानामिति। पृष्ठानां रथन्तरादीनां नानात्वाय अन्यत्वार्थम्। अभिवत्त्वमधिकृत्य किञ्चिच्चोद्यमुद्भावयति।
6.३-६ **तद्–ब्रूयात्**। तृतीयस्याह्नस्त्र्यहावसानवर्तित्वादन्तरूपत्वम्। तत्र कथमनुचरस्याभिशब्दवत्त्वमनुरूपं भवेत्? अभिशब्दस्याभिमुख्यार्थत्वेन प्रोपसर्गवदन्तविरोधिप्राथम्यार्थप्रत्यायकत्वात्। अस्योत्तरम्—एतेन वा इत्यादि। तत् तदा स्वर्गं लोकमभिलष्य अभिलक्ष्य वा प्राप्तुमिच्छन्त एव सन्तो देवाः स्वर्गं गतवन्तः। न ह्यस्ति संभवः प्रेक्षापूर्वकारी जनो न तदभिप्राप्तुमिच्छति तत्कर्मिकां गतिक्रियां करोति चेति। इष्यमाणाया अभिप्राप्तेः गमनस्य च समुचितोद्देशायाभिद्योतकोऽयमभिशब्द इति समवेतार्थत्वादभिरूप इति। यस्मादेवं तस्माद्धेतोस्तृतीयेऽह्न्यभिवाननुचरो युक्त इति। एवं चोदकान् प्रति ब्रूयात्।

6.७ एकप्रयत्नेन सावित्रद्यावापृथिवीये विधत्ते—**उदु–ब्राह्मणम्**। सावित्रे धृतेन पाणी इति घृतशब्दः। द्यावापृथिवीये त्वादित एवेति। उक्तमिति
6.८-१० 'बहुदेवत्यम्'[a] इत्यादि। आर्भवं विधत्ते—**अनश्वो–रूपम्**। रज इति पादोऽस्तीति शेषः। अत्र त्रिचक्र इति यत् पदमस्ति तत् तृतीयस्याह्नो रूपं भवति।

a. KB. XX. 6. ३.

त्रिसंख्यावाचित्रिपदश्रवणात् । वैश्वदेवं विधत्ते—**परावतो-दधाति**। परावत 6.११-१५
इति पदमस्तीति शेषः । परावत इति पदेनान्त एवोक्तः; दूरलक्षणार्थवाचि-
त्वात् परावच्छब्दस्य । अन्तप्राप्तेश्च दूरगमनसाध्यत्वात् । अतस्तृतीयसवने
अन्तरूपं अन्तमवसानलक्षणमर्थं[1] स्थापयति यत् तत् तृतीयस्याह्नोऽन्तरूप-
त्वम् । तदभिधायकत्वादभिरूपमेतदित्यर्थः ।

रूपान्तरसंपत्तिमाह—**अर्द्धर्चोदर्काणि-रूपम्**। इह दाशतय्यां कानिचित् 6.१६-२०
सूक्तानि अर्धर्चः समानोदर्काणि भवन्ति । ऋचामुत्तरोऽर्धर्चः प्रत्यृचमेक एव
भवतीत्यर्थः । यथा 'यं ते भागमधारयन्'[a] इत्यादि । कानिचित् सूक्तानि पादैः
समानोदर्काणि । अन्त्यः पादः प्रत्यृचमेक इत्यर्थः । यथा 'द्यावा रक्षतं पृथिवी
नो अभ्वात्'[b] इति । कानिचिदर्धपदैः । पादस्य द्वेधा विभक्तस्योत्तरमर्धं प्रत्यृ-
चमेकमित्यर्थः । यथा 'स जनास इन्द्रः'[c] इति । अथशब्दो विशेषार्थः । एतत्
प्रकृतं परावत इति सूक्तं पादस्य त्रेधा विभक्तस्य तृतीयभागे समानोदर्कं भवति ।
'स्वस्तये' इति पदस्यान्त्यपादतृतीयभागरूपस्य तृतीयाप्रभृति चतुर्दशीपर्यन्तं
प्रत्यृचमन्ते दर्शनात् । तदेतत् तृतीयपदोदर्कत्वं तृतीयस्याह्नो रूपं भवति ।
**वैश्वानराय-अन्तरूपम्**। वैश्वानरीयमारुतजातवेदसीयार्थवादवाक्यानि व्याख्या- 6.२१-३०
तानि—**अमुं-अधिपतिम्**। स्पष्टम् । 6.३१-३५

स्वर्लोकं जगतीं च सप्तदशवरूपं प्रतीचीं दिशं
वर्षाभिख्यमृतुं च देवगणमप्यादित्यनामोदितम् ।
राजानं वरुणं च सत्रिण इमे प्रत्याप्नुवन्त्यञ्जसा
तार्तीयं त्वहरस्य पृष्ठ्यषळहस्येहानुतिष्ठन्ति ये ॥

अभ्यासोऽध्यायपरिसमाप्त्यर्थः[2] ॥

इति षष्ठः खण्डः

a. RV. 8. 36. 1–6.
b. RV. 1. 185. 2–8.
c. RV. 2. 12. 1–14.

1. B. V. omit अर्थं
2. T. omits परि

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ।।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायो द्विपुरोगविंशतिमितः कौषीतकिब्राह्मण-
व्याख्याने प्रथमं त्र्यहं प्रकटयन् पृष्ठ्यस्य निष्ठां गतः ।।

## इति कौषीतकिब्राह्मणव्याख्याने तृतीयदशके द्वितीयोऽध्यायः

अथ

# त्रयोविंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
अध्याये द्वाविंशे प्रदर्शितः पार्ष्ठिकस्त्र्यहः प्रथमः ।
संप्रत्यवसरपतितः प्रतिपाद्यत उत्तरस्त्रयोविंशे ॥

तत्र तावच्चतुर्थमहर्विधित्सुः स्तौति—**अन्तः-वित्तवत्**। तृतीयस्याह्नोऽ १.१-५
न्तरूपत्वं पूर्वत्र्यहावसानरूपत्वात् । स एष उत्तरार्थोऽनुवादः । ते तृतीयमह-
रनुष्ठितवन्तो देवाः अन्तं यज्ञस्यावसानं गत्वा पुनरुत्तरं त्र्यहमनुष्ठास्यन्तः
चतुर्थमहरभिलषितवन्तः । तस्य उत्तरत्र्यहादिवर्तित्वात् । संजाताभिलाषाश्च
ते देवाश्चतुर्थमहरविन्दन् लब्धवन्तोऽनुष्ठितवन्तः । अतो देवैश्चिरेणाभिलष्य
यत्नात् प्राप्तत्वात् प्रशस्तमिदम् । यस्मादिच्छापुरःसरं लब्धत्वमेतस्य तस्मा-
द्धेतोरेतदहःशस्यानामृचाम् इच्छार्थधातुमत्त्वं लाभार्थधातुमत्त्वं च भवति ।

अथ प्रश्नोत्तराभ्यां चतुर्थेऽहनि न्यूङ्खं विधत्ते—**तद्-इति** । तत्र 1. ६
प्रकृते चतुर्थेऽहनि न्यूङ्खमधिकृत्य केचिज्जिज्ञासवः पृच्छन्ति । तृतीयमहर-
न्तरूपमिति तावदुक्तम् । अतस्त्र्यहरूपेण यज्ञः समाप्त एव । यद्यप्युत्तरत्र्य-
हात्मना अयमसमाप्त एव, तथापि पूर्वस्मिंस्त्र्यहे न्यूङ्खं वर्जयित्वा उत्तर-
त्र्यहादिभूते चतुर्थेऽहनि न्यूङ्खकरणे हेतुर्वचनीय इति चोद्यम् । उत्तरम्—
**वाचः-दधाति**। यदेतच्चतुर्थमहरस्ति तदेतद् विराळात्मिकाया वाच आयतनं 1. ७-९
स्थानं भवति। अनुष्टुभो वाग्रूपत्वाच्चतुर्थस्य चाह्न आनुष्टुभत्वाद् वागा-
यतनत्वम् । वाक् च विराळेव । 'विराळन्नम्'[a] इति श्रुतत्वाद् विराट्
चान्नरूपेत्युक्तम् । न्यूङ्खश्चान्नरूपस्तद्धेतुत्वात् । तत् तेन चतुर्थेऽहनि

a. AA. 1. 4. 1.

न्यूङ्खकरणेनान्नमेव यज्ञे यजमाने च स्थापयति। यज्ञस्यान्नहेतुत्वं तद्द्वारा यजमानस्यान्नवत्त्वं च न्यूङ्खस्य फलम्। इतश्च चतुर्थेऽहनि न्यूङ्खः कर्तव्य
1.१०-१३ इत्याह—**अथो-विभूत्यै**। यज्ञनिर्वर्तयित्री स्तोमच्छन्दोरूपा वाक् तृतीयेनाह्ना प्राप्तैव भवति। तथा चान्यत्र श्रुतम्—'आप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि तृतीयेऽहनि'[a] इति। तां तृतीयेऽहनि आप्तामेव वाचं स्तोमादिरूपां चतुर्थेऽहनि न्यूङ्खकरणेन विभूतां प्रवृद्धां करोति होता। न्यूङ्खने हि वाचोऽभिवृद्धिः स्फुटतरा। यथा लोके कश्चिदयस्कार आयसं भाजनं चिकीर्षुरग्नौ तप्तमयोधातुं कूटप्रहारादिना विनयेद्विस्तारं प्रापयेत्, एवमेव तत् न्यूङ्खनं वाचो विभूत्यै वृद्धये संपद्यते। तस्मात् चतुर्थेऽहनि न्यूङ्खनम् उपपन्नम्।

1.१४,१५ अथ शस्त्रक्लृप्तिं चिकीर्षुराह—**तस्य-इति**। तत्र तावदाज्यशस्त्रं
1.१६-१९ विधत्ते—**आग्निं-विमदन्ति**। वैमदं विमदाख्येन महर्षिणा दृष्टम्। 'सप्तोत्तराण्यैन्द्रौ विमदः'[b] इति कात्यायनानुक्रमण्याम् 'भद्रं नो अपि वातय मनो दक्षमुत क्रतुम्'[c] इत्यादिसप्तसूक्तानां विमदार्षत्वस्योक्तत्वात्। 'वि वो मदे' इति लिङ्गाच्च। विमदार्षत्वं स्तौति—विमदेन वा इति। विमदेन विमदर्षिदृष्टेनैतेन सूक्तेन। विमदन् मदरहितानकुर्वन्। व्यमदन्निति पाठान्तरम्। विमदः विमदर्षिदृष्टं सूक्तं चतुर्थेऽहनि प्रातःसवने मध्यतो माध्यंदिनसवने होत्रकशस्त्रेषु शस्यत इति यदस्ति तेन यजमाना अङ्गं हस्तपादादिकमाश्रित्य वर्तमानं पाप्मानं मदरहितं कुर्वन्ति। अपहन्तीत्येतत्।

अथ छन्दस्तो वैकृतप्रातःसवनाभिरूप्यप्रदर्शनेन[1] स्तौति—**अग्निः-**
1.२०-२६ **नापैति**। नन्वेतदष्टर्चं पङ्क्तिच्छन्दस्कं सूक्तम्। चत्वारिंशदक्षरा च पङ्क्तिर्भवति। जगती पुनरष्टाचत्वारिंशदक्षरा प्रसिद्धा। अतोऽष्टौ पङ्क्तयो दश जगत्यः संपद्यन्ते इत्युच्यमानं[2] केन प्रकारेणेति न ज्ञायते। उच्यते। अभिज्ञंमन्य, श्रूयमाणमपि न शृणोषि। श्रावितो हि तत्प्रकारोऽपि संशस्ता इति

a. AB. 5. 3. 1.

b. SA. X. 25.

c. RV. 10. 25.

1. T. सव for सवन

2. T. इत्येतदुच्यमानं

वदन्त्या श्रुत्या । तद् यथा—प्रथमोत्तमयोर्ऋचोस्त्रिवारं पाठे सति ह्येता द्वादश पङ्क्तयो भवन्ति । तत्र द्वयोः पङ्क्तयोः दशाष्टाक्षराः पादा भवेयुः । परिशिष्टासु चत्वारिंशदक्षरासु दशसु पङ्क्तिषु प्रत्येकमेकैकस्मिन्नष्टाक्षरे पादे प्रक्षिप्यमाणे सति ता दश पङ्क्तयोऽष्टाचत्वारिंशदक्षरा दश जगत्यः संपन्ना भवन्ति । सैषा पङ्क्तीनां जगतीसंपत्तिरभिरूपा । यस्मादेष मध्यमस्त्र्यहो जगत्प्रातःसवनो भवति । जगतीछन्दस्कं प्रातःसवनं यस्य स तथोक्तः । वक्ष्यति हि—'जगत्प्रातःसवनो द्वितीयस्त्र्यहः'[a] इति । प्राकृतप्रातःसवनाभिरूप्यदर्शनेनापि स्तौति—विंशतिर्गायत्रीरिति । गायत्र्य इति प्रथमार्थे द्वितीया । संपद्यत इति शेषः । तद् यथा चतुर्विंशत्यक्षरा गायत्री । अतो ये द्वे गायत्र्यौ स्तः सैका जगती । एकयाष्टाचत्वारिंशदक्षरया जगत्या द्वयोर्गायत्र्योर्निष्पत्तेः । ताः संपादिता दश जगत्यो विंशतिर्गायत्र्यो भवन्ति । अतस्ता द्वादशपङ्क्तयो विंशतिर्गायत्र्यः संपन्नाः । गायत्री च प्रातःसवनं वहतीति प्रसिद्धम् । तत् तेन गायत्रीसंपादनेनाज्यशस्त्रमेतत् प्राकृतप्रातःसवनरूपान्न गच्छति । किंत्वनुगच्छत्येव ।

विहितस्य वैमदस्याज्यस्य व्यूळ्हविशेषमात्रविषयत्वमाह—**इति-
व्यूळ्हे**। एवं प्रकारं व्यूळ्हे पृष्ठ्यषळहविषये[1] आज्यं शस्यमिति[2] शेषः । 1. २७
समूळ्हे किमित्यत्राह—**उद्धृत्य-सलोम**। व्यूळ्हे यद् वैमदमाज्यमुक्तं तदु- 1.२८-३१
द्धृत्य तस्य स्थाने विराट्छन्दस्कम् 'अग्निं नरः'[b] इति सूक्तमाज्यशस्त्रं कुर्यात् । एतच्च युक्तमेव । यस्मादत्र चतुर्थेऽहनि पृष्ठम् 'पिबा सोममिन्द्र मन्दतु त्वा'[c] इति विराट्छन्दस्कास्वृक्षु गानाद् वैराजाख्यं सामगानां[3] भवति । एवं सति च तदाज्यं पृष्ठं चोभयमपि सलोम सदृशं भवति । द्वयोरपि वैराजत्वात् । आर्षेयैक्यादाभिरूप्यमाह—वासिष्ठमिति । सप्तममण्डलस्य वसिष्ठदृष्टत्वात् 'अग्निं नरः'[b] इत्यस्य 'पिबा सोममिन्द्र'[c] इति तन्मण्डलवर्तित्वात् । **हस्तच्युती-
रूपम्**। गतम् । 1.३२,३३

a. KB. XXVII. 12. २.
b. RV. 7. 1. 1.
c. RV. 7. 22. I.

1. B. षळहे for षळह
2. T. शस्त्रमिति
3. B. M. सामगानं

1.३४-३६ अथ प्रउगं विधत्ते—**आनुष्टुभः-समर्धयति** । अनुष्टुब्बाहुल्याभिप्राय-मानुष्टुभत्वम् । 'वायो शुक्रो'[a] इत्येका 'वीतिहोत्रा'[b] इति द्वे । 'इन्द्रश्च वायवेषां सोमानाम्'[c] 'यश्चिकेत'[d] 'आ नो विश्वाभिरूतिभिः'[e] 'आ त्वा गिरः'[f] इति चत्वारि तृचानि । 'अप त्यं वृजिनम्'[g] इत्येषोष्णिक् । 'यूयं हि ष्ठा सुदानव इन्द्र ज्येष्ठा'[h] इति द्वे । 'इयमददाद्'[i] इति सारस्वतम् । 'प्र णो देवी'[j] इति गायत्री समूळ्हे भवति । चतुर्थमहश्चानुष्टुपुछन्दस्कमिति प्रसिद्धम् । तेनानुष्टुभप्रउगपठनेन एनच्चतुर्थमहः स्वीयेनानुष्टुभा छन्दसा समृद्धं करोति ।।

इति प्रथमः खण्डः

मरुत्वतीयशस्त्रस्य क्लृप्तिं कुर्वन् क्रमाश्रयात् ।
विधत्ते तावदेतस्य तृचं प्रतिपदाह्वयम् ।।

2.१-३ **तं-आरभते** । यज्ञवत्या यज्ञशब्दवत्या प्रतिपदेति शेषः । यस्माच्चतुर्थेऽहनि पृष्ठ्यषळहाख्यो[1] यज्ञस्तृतीयेऽहनि संस्थितः पश्चादारम्भविषयो[2] भवति तस्मात् समाप्तस्य यज्ञस्य पुनरारम्भद्योतकत्वादभिरूपं यज्ञवत्त्वम् ।

2.४-७ अथ सूक्तं विधत्ते—**श्रुधी-संपन्नाः** । ता एता 'श्रुधी हवम्'[k] इत्याद्या विराड्वर्णा नाम त्रिष्टुभो भवन्ति । विराज इव दशाक्षरपादयुक्तत्वात् । अतोऽत्र चतुर्थेऽहनि क्रियन्ते पठ्यन्ते । यस्मादेताश्चतुर्थस्याह्नो रूपेण वैराजत्व-

2.८-१३ लक्षणेन संपन्ना भवन्ति । तृचं विधत्ते—**इन्द्र-इति** । तृचं शंसेदिति

a. RV. 4. 47. 1.
b. RV. 8. 31. 9.
c. RV. 4. 47. 2.
d. RV. 5. 65. 1.
e. RV. 8. 8. 1.
f. RV. 8. 95. 1.
g. RV. 6. 51. 13.
h. RV. 6. 51. 15.
i. RV. 6. 61. 1.
j. RV. 6. 61. 4.
k. RV. 2. 11. 1.

1. B. पृष्ठ्यषळहाख्ये
2. M. पुनः for पश्चाद्

शेषः। तच्चैतत् तृचं विज्ञातत्रैष्टुभम्, न 'श्रुधी हवम्'[a] इत्यादिवत् प्रयत्नसंपाद्यं
त्रैष्टुभत्वम्। किंतु विज्ञातं स्वत एव प्रसिद्धं त्रैष्टुभम्। अतः सवनधरणम्।
एतस्य माध्यंदिनसवनस्य धारकं निर्वाहकम्। माध्यंदिनसवनस्य त्रैष्टुभत्वात्।
एतच्च त्रैष्टुभत्वमुपपन्नम्। यस्मादिन्द्रस्त्रैष्टुभः प्रसिद्धः। 'इन्द्रस्यैतच्छन्दो यत्
त्रिष्टुप्'[b] इति श्रवणात्। त्रिष्टुभा सहैकस्मात् कारणादुत्पन्नत्वात्। तथापि
कथमत्र शंसनीयत्वमिति चेत्, यत इन्द्रो मध्यंदिनायतनो भवति। माध्यंदिनं
सवनमायतनं स्थानं यस्य स तथा। माध्यंदिनसवनस्यैन्द्रत्वात्। अत ऐन्द्रत्वा-
न्माध्यंदिनसवनस्य इन्द्रस्य त्रैष्टुभत्वात् त्रैष्टुभत्वमुपपन्नम्। प्रसङ्गान्माध्यंदिन-
सवनशस्यानि त्रैष्टुभानि सर्वाण्यपि तृचानि साधारण्येन स्तौति—तानि वा
इति। तानि वा एतानि माध्यंदिनान्न च्यवन्त इति संबन्धः। ननु व्यूळ्हपक्षे
माध्यंदिनं सवनं व्यूळ्हच्छन्दो भवति। तथा सति न त्रैष्टुभत्वनैयत्यम्
इति कुतो न च्यवन्त इत्युक्तमित्यत्रोक्तम्। अपि व्यूळ्हच्छन्दस इति अपेरुप-
दिष्टादन्वयः व्यूळ्हच्छन्दसोऽपीति। कुत इत्यत उक्तं त्रैष्टुभ इति। रूप-
संपत्तिमाह—**जातं-रूपम्।** यज्ञस्य चतुर्थेऽहनि पुनर्जायमानत्वाभिद्योतकम्[1]। 2. १४,१५
एतज्जातशब्दवत्त्वं चतुर्थस्याह्नोऽभिरूपं[2] भवति। तृचान्तरं विधत्ते—**इमं-**
**ऽयहः।** यस्मादेष द्वितीयस्त्र्यहो गायत्रमाध्यंदिनो भवति तस्माद् गायत्रीछन्दस्क- 2. १६,१७
मेतत् तृचमभिरूपमित्यर्थः।

एवं मरुत्वतीयशस्त्रं विधाय निष्केवल्यशस्त्रं सन्यूङ्खं विधित्सुरादौ
न्यूङ्खस्य स्थानविशेषं निरूपयति—**अथ-इति।** अथ मरुत्वतीयशस्त्रानन्तरं 2.१८
यस्मात् न्यूङ्खस्थाननिर्धारणनिबन्धनमेव सन्यूङ्खनिष्केवल्यविधानम्, तस्मात्
कारणात् स्थानविशेषो निरूप्यत इत्यर्थः। विचारे प्लुतिः। कस्मात् पुनः
कारणाद् विचार इति तदुच्यते—शाखिनां स्थानविषये विप्रतिपत्तिर्दृश्यते।
केचित् प्रातरनुवाकं प्रतिपद्य 'आपो रेवतीः'[c] इत्यस्यां न्यूङ्खं कुर्वन्ति। तथा

a. RV. 2. 11. 1.
b. ŚĀ. 1. 2; 2. 16.
c. RV. 10. 30. 12.

1. T. ° जायमानत्वादभि °
2. T. रूपं for अभिरूपं

'आग्निं न स्ववृक्तिभिः'[a] इत्यस्मिन्नाज्ये अन्त्यामृचं वर्जयित्वा प्रत्यृचं तृतीयपादेषु[1] मरुत्वतीये 'श्रुधी हवम्'[b] इत्यत्राद्ये तृचे अर्धर्चादिषु निष्केवल्ये 'कुह श्रुतः'[c] इत्यत्रापि। एवं बहूनि स्थानानि न्यूङ्खस्य कल्पयन्ति। तदनादरणेन स्वपक्षप्रदर्शनार्थमयमारम्भः। तमेव स्वपक्षमाह— **स्तोत्रियानुरूपयोः-**
2.१९-२३ **दधाति**। निष्केवल्यशस्त्रे वैराजस्य पृष्ठसाम्नः संबन्धिनोः स्तोत्रियानुरूपयोः 'पिबा सोममिन्द्र मन्दतु त्वा'[d] 'श्रुधी हवं विपिपानस्य'[e] इत्येतयोः 'तुभ्येदिमा'[f] इति तृचे पूर्वयोर्ऋचोरुक्थमुखीयाख्ययोश्च न्यूङ्खः कर्तव्यः। अतोऽन्यत्र न्यूङ्खस्यादरणं शंसनं न कुर्यात्। तदेतत् स्तोत्रियानुरूपयोर्न्यूङ्खनमात्मनि प्रजायां चान्नस्थापनरूपत्वात् प्रशस्तम्। आत्मा वा इत्यादि गतम्।

2.२४-२६ अथ न्यूङ्खस्वरूपमधिकृत्य मतद्वयं दर्शयति—**आनुष्टुभम्-समर्धयति**। न्यूङ्खयेत् शंसेदित्यर्थः। आनुष्टुभमिति वैराजमिति च संज्ञाद्वयम्। आनुष्टुभन्यूङ्खस्य लक्षणमुक्तं सूत्रकृता—'पिबा सोममिन्द्र मन्दतु त्वेति स्तोत्रियानुरूपौ सन्यूङ्खौ। मध्यमस्य पादस्य द्वितीयसप्तमयोरक्षरयोर्द्विः पूर्वं द्विरुत्तरमित्यानुष्टुभः'[g] इति। अस्यार्थः—वैराजस्य पृष्ठसाम्नस्तावत् 'पिबा सोममिन्द्र'[d] 'श्रुधी हवम्'[e] इत्येतौ स्तोत्रियानुरूपौ भवतः। तौ च न्यूङ्खसहितौ भवतः। न्यूङ्खशब्देनाभ्यस्त ओकार उच्यते। तत्र द्वौ न्यूङ्खौ आनुष्टुभो वैराजश्च। तत्र त्रिपदासु विराट्छन्दस्कासु ऋक्षु मध्यमे पादे द्वितीये सप्तमे चाक्षरे द्विवारं यदोकारस्य पठनमस्ति स आनुष्टुभो न्यूङ्खो नाम भवति। तद् यथा—'यं तो ओ ओ सुषाव हर्यो ओ ओ श्वादिः' इति। वैराजन्यूङ्खलक्षणमपि सूत्रकृतैव दर्शितम्—'द्वितीये अक्षरे द्वादशकृत्व एकैकं दीर्घं ह्रस्वांस्त्रींस्त्रीनन्तरेणेति वैराजः'[h] इति। मध्यमस्य पादस्य द्वितीये अक्षरे द्वादशवारमोकारः पठनीयः। तत्रैकश्रुत्या त्रिवारं ह्रस्वमुच्चार्य तत एकं दीर्घं स्वधर्मणोच्चारयेत्। पुनरप्येवमेव द्विवारं पठेत्। तद् यथा—'यं तो ओं ओं

a. RV. 10. 21. 1.
b. RV. 2. 11. 1.
c. RV. 10. 22. 1.
d. RV. 7. 22. 1.
e. RV. 7. 22. 4.
f. RV. 7. 22. 7.
g. ŚŚ. 10. 5. 9–10.
h. ŚŚ. 10. 5. 12.

1. T. तृतीयेषु पादेषु

ओॅ ओ ओॅ ओॅ ओॅ ओ ओॅ ओॅ ओॅ ओ सुषाव इति । एवं न्यूङ्खौ विकल्पेन दर्शितौ । अत्र च यथान्यूङ्खभेदं प्रतिगरभेदोऽपि दर्शितः सूत्रकृता । 'द्वितीयचतुर्थयोरक्षरयोः प्रतिगरस्यानुष्टुभः प्रतिगरः । द्वितीये वैराजः'[a] इति । तद् यथा—ओ थो ओ ओ मो दो ओ ओ इति । ओ थो ओ ओ ओ ओॅ ओ ओ ओ ओॅ ओ ओ ओ ओॅ ।

**वैराजं-दधाति** । ऋचि कस्मिन् भागे न्यूङ्ख इत्यपेक्षायामाह— 2. २७-२९
**मध्यमे-तत्** । पदं पादः । विराजस्त्रिषु पादेषु मध्यमे पादे न्यूङ्खः । यथा— 2. ३०-३४
यं तो इति । तच्चैतद् युक्तम् । यस्मात् पूर्वं पदं प्रथमः पाद आत्मा भवति, पूर्वभावित्वात् । उत्तमः पादः प्रजारूपः उत्तरभावित्वात् । मध्यमः पादः आत्मनो मध्यदेशरूपः । मध्यवर्तित्वसाम्यात् । अतस्तत्र[1] न्यूङ्खो युक्तः । न्यूङ्खस्यान्नरूपत्वात् । अन्नस्य च लोके मध्यदेशे उदराख्ये निधीयमानत्वात् । तत् तत्र यथा लोके पुरुषोऽभिग्रस्याभिग्रस्यान्नमद्यात्, एवं तन्मध्यमे पादे न्यूङ्खनं भवति । द्वादशकृत्व ओकारस्य विच्छिद्य विच्छिद्य पठ्यमानस्य न्यूङ्खशब्दवाच्यत्वात् ।

अथ सामप्रगाथं विधत्ते—**इन्द्रम्-अश्नुवते** । अष्टसंख्याका इन्द्रशब्दा 2. ३५-३७
यस्मिन् प्रगाथे स तथा । प्रतिपादादि इन्द्रशब्दस्य श्रवणात् । ता वा इत्यादिरष्टसंख्यास्तुत्यर्थवादो गतः । सूक्तं विधत्ते—**कुह-संपन्नाः** । कुह श्रुत इति 2. ३८-४१
शब्दवत्त्वात् कुहश्रुतीयाः । छन्दस्कृतमाभिरूप्यमाह—ता वा इति । यद्यपि 'त्वं त्या चिद्'[b] 'आ न'[c] 'त्वं न'[d] इत्येतास्तिस्र एव विराजः, अनुष्टुभो वा; अन्याः पुरस्ताद्बृहत्यस्त्रिष्टुप् च; तथापि छत्रिन्यायेन ता वा इति व्यपदेशः । आभिरूप्यस्य तावतापि सुसंपादत्वात् । चतुर्थस्याह्न आनुष्टुभत्वाद् वैराजत्वाच्च रूपसंपत्तिर्द्रष्टव्या ।

सूक्तान्तरं विधत्ते—**युध्मस्य-रूपम्** । तस्योक्तमिति । 'त्रैष्टुभो वा 2. ४२-४४
इन्द्रः'[e] इत्यादिकमित्यर्थः । रूपसंपत्तिमप्याह—स्वराज इति । इतिपदेनेति

a. ŚS. 10. 5. 14–15.
b. RV. 10. 22. 5.
c. RV. 10. 22. 7.
d. RV. 10. 22. 9.
e. KB. XXIII. 2. ९.

1. T. अतस्त्रिस्तत्र

2.४५-४८ शेषः । अस्य चतुर्थस्याह्नः तृचं विधत्ते—**त्यमु–ऽयहः** । ऊतय इति पदेनैतत्
तृचमूतिशब्दवद्भवति । अस्य चतुर्थस्याह्नः एतदेकं रूपमूतिमदिति । अतोऽ
स्त्याभिरूप्यमित्यर्थः । छन्दस्तः सवनाभिरूप्यमप्याह—गायत्रमिति ॥

इति द्वितीयः खण्डः

अथ वैश्वदेवशस्त्रप्रतिपदं 'विश्वो देवस्य नेतुः'[a] 'अस्य हि स्वयशस्तरम्'[b]
'स हि रत्नानि'[c] इत्येतास्तिस्रः सिद्धवत्कृत्यानुचरतृचं विधत्ते—**हिरण्यपाणि-**
3.१-३ **रूपम्** । तदेव ब्राह्मणं दर्शयति—ऊतय इति । गतमेतत् । सावित्रद्यावापृथिवी-
3.४-७ यार्भववैश्वदेवानि विधत्ते—**आ–अह्नः** । वाशब्दौ चार्थौ एति च प्रेति चेति ।
यदेतद् 'आ' इत्युपसर्गरूपम्, 'प्र' इत्युपसर्गरूपं चास्ति तत् प्रायणीय-
रूपमेवेति तावत् प्रसिद्धम् । यस्मादेवं तस्माद्धेतोः 'आ' इत्युपसर्गवन्ति 'प्र'
इत्युपसर्गवन्ति च सूक्तान्येतानि प्रायणीयरूपपर्यालोचनया चतुर्थेऽहनि शस्यन्ते ।
चतुर्थस्य ह्यह्नः प्रायणीयरूपत्वं विद्यते । आद्यत्र्यहावसाने समाप्तस्य यज्ञस्य
पुनश्चतुर्थेऽहन्यारभ्यत्वस्य 'पुनरारम्भ्यो वै चतुर्थेऽहन् यज्ञः'[d] इति प्रागुक्तत्वात् ।
इह केचिदध्येतारः 'प्र शुक्रैतु' इति द्विपदाशंसनस्तुत्यर्थवादवाक्यानि पठन्ति ।
3.८-११ **द्विपदाः–तत्** । 'प्र शुक्रैतु देवी'[e] इत्याद्याः पादद्वययुक्तत्वेन द्विपदाख्या ऋचः
पठ्यन्त इत्येतद् युज्यते । यस्मात् पादद्वययुक्त एव पुरुषो लोके गम्यभूमिमभि-
लक्ष्य पदविक्षेपं कर्तुं शक्नोति । न ह्येकपादत्वे पङ्गुत्वादिमत्त्वे वाभिक्रमणं
संभवति । अभिक्रान्त्यै तद्रूपमित्यादि गतम् ।

3.१२-१४ वैश्वानरीयं विधत्ते—**प्र–रूपम्** । स्पष्टमेतत् । मारुतं विधत्ते—**क–प्रशु-**
3.१५,१६ **क्रीयस्य** । यत् प्रशुक्रेति पदयुक्तस्य सूक्तस्य ब्राह्मणं तदस्य 'क ईं व्यक्ता'[f]
3.१७-२१ इत्यस्यापि । नान्यत् द्वैपदत्वसादृश्यात् । समूळ्हपक्षे विशेषमाह—**प्र–अह्नः** ।
'क ईं व्यक्ता'[f] इत्येतत् कृत्स्नं पठित्वा तदुपरि 'प्र यन्तु वाजा'[g] इत्या-

a. RV. 5. 50. 1.
b. RV. 5. 82. 2.
c. RV. 5. 82. 3.
d. KB. XXIII. 2. २.
e. RV. 7. 34. 1.
f. RV. 7. 56. 1.
g. RV. 3. 26. 4.

द्यास्तिस्र ऋचः पठेत् । 'आ त्वेषम्'[a] इत्याङुपसर्गवत्त्व रूपसंपत्त्या प्रशस्त-
मित्याह—एति वेति । जातवेदसीय विधत्ते—**हुवे-मरुत्वतीयस्य** । यन्मरुत्व- 3. २२,२३
तीयस्येति । 'विज्ञातत्रैष्टुभम'[b] इत्यादिकमित्यर्थः ।

अत्र समळ्हपक्ष विशेषमाह—**वसुं-अहः** । 'गातुमेरय' इत्याङ्पसर्ग- 3. २४-२८
श्रवणात् प्रायणीयरूपवत्त्वम । गतमन्यत् ।

अथास्य चतुर्थस्याह्नः षोळशिसंस्थतामाह—**अथो-आप्त्यं** । आग्नि- 3. २९-३१
मारुतशस्त्रपाठानन्तर होत्रकाणामुक्थ्याख्यानां शस्त्राणा पठनादूर्ध्व षोळशि-
नामक शस्त्र पठेयुः । तदन्ते यज्ञपुच्छाख्य भागमनुतिष्ठेयुः । तेन षोळश्यन्त-
मेतदहरित्युक्तम । षोळशकलमित्यादिगतम ।

अथ कर्मसमुदाय स्तौति—**अन्नं-अधिपती** । वैराजत्वाद् विराजश्चान्न- 3. ३२-३६
रूपत्वादन्नरूपन्यूङ्खयोगाद् वा चतुर्थस्याह्नोऽन्नप्राप्तिहेतुत्वम । चतुर्थस्याह्न
आनुष्टुभत्वात् तत्प्राप्तिः । एवमेकविंशाद्याप्तिहेतुत्वमपि । उदीचीशरदा-
श्चतुर्थत्वसाम्यात् तत्प्राप्तिः । साध्यनामानः केचिद् देवगणाः । आप्त्यनामा-
नोऽन्ये । साध्याना बृहस्पतिरधिपतिः । आप्त्याना चन्द्रमाः ।

अन्नस्य चानुष्टुभ एकविंशविराडुदीचीशरदां तथैव ।
साध्याप्त्यगोष्पत्यमृतत्विषां च प्राप्तेरहः शस्तमिद चतुर्थम ॥

इति तृतीयः खण्डः

इत्थ चतुर्थेऽहनि शंसनीय
शस्त्र समस्त क्रमशः प्रकल्प्य ।
अथाधुना पञ्चमशस्त्रक्लृप्तिं
विधातुकामः प्रविजृम्भते स्म ॥

**पशवः-इति** । यदेतत् पञ्चममहरस्ति तत् पशव एव । यस्मात् 4. १-४
पञ्चममहः पङ्क्तिरेव । पङ्क्तिच्छन्दस्कानामृचाम् अत्र शस्यमानत्वात् ।
तस्मात् पशुप्राप्तिहेतुत्वात् पशव एव । पशूना पाङ्क्तत्वात् । तन्न्वस्येत्यादि
पूर्ववत् ।

a. RV. 3. 26. 5.

b. KB. XXIII. 2. ८.

4.६-९ तत्र तावदाज्यशस्त्रक्लृप्तिं करोति—**इमम्-रूपम्**। इह हि तृतीयायामृचि 'रायः सूनो सहस' इति कश्चित् पादोऽस्ति। तत्र यद् राय इति पदमस्ति तेन पदेनैतत् सूक्तं रयिपदयुक्तं भवति। अस्य च पञ्चमस्याह्नो रयिमदित्येतदेकं रूपं भवति। रयिपदस्य श्रुत्यन्तरे 'अथा नो वर्धया रयिम्'[a] इति रयिपद-व्याख्याने 'पशवो वै रयिः'[b] इति श्रवणात्। अध्यासवच्चैतत् सूक्तम्। अन्त्यस्य पादस्योपरि कस्यचित् पादस्य पठ्यमानत्वात्। पङ्क्तेश्च पञ्चपदत्वाद् अध्यास-
4.१० वत्त्वं पङ्क्ते रूपं भवति। छन्दआभिरूप्यदर्शनेन स्तौति—**जागतं-ऽयह्वः**। तदेतत् सूत्रकृतोक्तम्—'इमम् ष्विति नवर्चमाज्यं व्यूळ्हे'[c] इति। **इति-**
4.११-१६ **रूपम्**। इति नु व्यूळ्हे इति गतम्। पाङ्क्तं पङ्क्तिच्छन्दस्कम्। तदेतद-त्राभिरूपं यस्मात् पञ्चममहः पङ्क्तिरूपम्। तथा सति यादृशमेतदहर्भवति तादृश्य एता 'अग्निं तं मन्ये'[d] इत्याद्या ऋचोऽपि भवन्ति। पाङ्क्तं ह्येतदहः। पङ्क्तिच्छन्दस्काश्च ह्येता ऋच इत्यस्त्याभिरूप्यमित्यर्थः। प्रकारान्तरेणाभि-रूप्यमाह—अस्तमिति। नवप्रसूता हि गौर्धेनुशब्दार्थः। अतः पशुमद् भवति। अथवा धेनुशब्दश्रवणाद् धेनुमदेतत् सूक्तम्। तच्चैकं पञ्चमस्याह्नो रूपं प्रसिद्धम्। एतदपि सूत्रकृतोक्तम्—'अग्निं तं मन्य इति समूळ्हे'[e] इति।

4.१७-१९ प्रउगशस्त्रमाह—**बार्हतः-आप्त्यै**। बृहतीछन्दस्कः। 'आ नो वायो महे तने'[f] इत्येका। 'आ नो यज्ञं दिविस्पृशम्'[g] इति द्वे। एष वायव्यस्तृचः। 'आ वां सहस्रं हरयः'[h] इत्यैन्द्रवायवः। 'ऋधगित्था स मर्त्यः'[i] इति द्वे। 'प्र मित्राय प्रार्यम्णे'[j] इत्येका। एष मैत्रावरुणः। 'इमां उ वां दिविष्टयः'[k] इत्याश्विनः। 'आ नो विश्वासु हव्यः'[l] इत्यैन्द्रः। 'देवंदेवं वोऽवसे देवंदेवम्'[m] इति वैश्वदेवः। 'इयमददाद्'[n] इति सारस्वतः। बार्हतत्ववाचोयुक्तिरत्र बाहुल्याभिप्रायेण। अथ

a. TS. 1. 5. 5. 2. b. TS. 1. 5. 7. 2.
c. ŚS. 10. 6. 2. d. RV. 5. 6. 1.
e. ŚS. 10. 6. 2. f. RV. 8. 46. 25.
g. RV. 8. 101. 9. h. RV. 4. 46. 3.
i. RV. 8. 101. 1. j. RV. 8. 101. 5.
k. RV. 7. 74. 1. l. RV. 8. 90. 1.
m. RV. 8. 27. 13. n. RV. 6. 61. 1.

मरुत्वतीयशस्त्रप्रतिपदं विधत्ते—**यत्–रूपम्** । पञ्चजनसंबन्धिन्येति विशो 4.२०,२१
विशेषणम् । अत्र प्रकृत्यंशे पञ्चशब्दस्य श्रवणात् पञ्चमस्याह्नो रूपमिदं भवति ।
**इत्था–आप्त्यै** । 4.२२-२५

अत्र शंसनप्रकारमाह—**तासां–रूपम्** । तासाम् 'अवितासि'[a] इत्यादि- 4.२६-२९
कानां षट्पदानां संबन्धि शस्त्रं शंसनं गायत्रीशंसं भवति । यथा गायत्रीणां शंसनमेवं तच्छंसनमपीति । यस्मात् यद् गायत्रीशंसं शस्त्रं तदत्रास्मिन् त्र्यहे माध्यंदिनसवने समृद्धं भवति । अस्य त्र्यहस्य गायत्रमाध्यंदिनत्वादिह गायत्र्य एवाभिरूपाः । कथं पुनः तच्छंसनमित्यपेक्षायामाह—तद् यदिति । तत्रैकया षट्पदयर्चा द्वे गायत्र्यौ कृत्वा 'यं ते भागमधारयन्'[b] इत्यष्टाक्षरं गायत्र्यास्तृतीयं पादं कृत्वा तदन्ते प्रणवमुच्चारयेत् । एवं 'विश्वाः सेहानः'[c] इत्यादिकां द्वितीयां गायत्रीं कृत्वा 'मरुत्वाँ इन्द्र सत्पते'[d] इति तृतीयमष्टाक्षरं गायत्र्यास्तृतीयं कृत्वा तदन्ते प्रणवं च कुर्यात् ।

गायत्रीशंसनमिव षट्पदानां च शंसनम् ।
कार्यमित्यत्रभवतो मतं कौषीतकेरिदम् ॥

अपरं सूक्तं विधत्ते—**मरुत्वाँ–रूपम्** । वृषभवत् वृषभशब्दवत् । तृचं विधत्ते— 4.३०-३२
**अयं–त्र्यहः** । इति गतम् ॥ 4.३३,३४

इति चतुर्थः खण्डः

महानाम्नीष्वेतास्विह[1] नवसु यत्[1] शाक्वरपदा-
स्पदेनामी साम्ना विदधति यतः सामगजनाः ।
स्तुतिं निष्केवल्ये तदनुसृतितः स्तोत्रियमिमं
तृचं होता शंसेत् प्रथममिति वक्ति प्रथमतः ॥

**महानाम्न्यः–भवन्ति** । शाक्वरसंज्ञस्य पृष्ठसाम्नः स्तोत्रियस्तृचो महा- 5.१

a. RV. 8. 36. 1.
b. RV. 8. 36. 1-6.
c. RV. 8. 36. 1-6.
d. RV. 8. 36. 1-6.

1. T. omits एतासु

नाम्नीनाम्ना प्रसिद्धः । अरण्येऽनूच्या 'विदा मघवन्'[a] इत्याद्या नवर्चो भवन्ती-
5.२ त्यर्थः । **महानाम्नीभिः–अहन् ।** ता एता महानाम्न्यो महानुभावाः । यस्मात्
पूर्वमिन्द्रो महानाम्नीभिर्वृत्रं हतवान् । अत्रेत्थं[-2] शंसनक्रमः—'विदा मघवन्'[a]
इत्याद्याः आम्नायसिद्धाः नवसंख्याका या ऋचः सन्ति तासु तिस्रस्तिस्र एकैका-
मृचं संपाद्य नवर्चस्तिस्रः कृत्वा स्तोत्रियतृचीकारेण पठनं कर्तव्यम् । तत्राप्यु-
त्तमायास्तृचरूपाया ऋच आम्नायसिद्धरूपानुरोधेन येयमुत्तम ऋगस्ति, सा
पङ्क्तिशंसं पठनीया । तस्या उत्तमाया अवसाने प्रणवेन पञ्चदशसंख्यानि फल-
संपूर्तिहेतुत्वात् पुरीषाख्यानि पदानि निविच्छंशसनवत् प्रणवरहितं विच्छिद्य
विच्छिद्य पच्छः पठेत् । तद् यथा—'विदा मघवन्'[a] इत्याद्यां 'पिब मत्स्व'[b] इत्य-
न्तामृचं अर्धर्चशस्त्रिरुक्त्वा 'विदा रायः'[c] इत्याद्यामृचं 'बृहद्'[d] इत्यन्तां पठेत् ।
अथ 'इन्द्रं धनस्य सातये'[e] इत्याद्यायामुत्तमायामृचि पठ्यमानायां 'नूनं तं नव्यं
संन्यसे'[f] इत्यस्या द्वाभ्यामवसाय[1] एकेन प्रणौतीति पङ्क्तिपठनवत् पठनं कृत्वो-
त्तमेन 'अद्भयो' इति प्रणवेन 'एवा ह्येव'[g] इत्यादि पुरीषपदानि पच्छोऽवगृह्य
प्रणवरहितं पठित्वा 'एवा हि देवो शोंसावो प्रत्यस्मा' इत्याद्यनुचरतृचं
पठेदिति ।

महानाम्नीनामृचामन्ते पठनीयानि 'एवा ह्येव'[g] इत्यादीनि पदान्याख्या-
5.३ यिकया स्तौति—**तं–प्रत्युपातिष्ठन्त ।** तमिन्द्रं वृत्रहननं कृत्वा देवान् प्रत्या-
गच्छन्तं सन्तमग्न्याद्याः सर्वाः प्रजापतिपुरोगमाः प्रत्युपस्थानं कृतवन्तः । कथ-
5.४-८ मागमनवेलायां प्रत्युपातिष्ठन्त इत्युच्यते—**पराच्यो–रूपम्** । ननु पूर्वमपि
देवताभिः सहित एवेन्द्रोऽभूदिति । नेत्युच्यते । अग्रे इतः पूर्वस्मिन् काले
वृत्राद् भियमनुभवन्त्यो देवता अस्मादिन्द्रात् पराच्यो भूत्वापक्रान्ताः
क्वापि निलीय स्थिता बभूवुः । तस्माद्धेतोर्वृत्रवधानन्तरमेव भीतिविग-

a. AA. 4. 1.
b. AA. 4. 3.
c. AA. 4. 4.
d. AA. 4. 6.
e. AA. 4. 7.
f. AA. 4. 9.
g. AA. 4. 10.

1. T. adds द्वाभ्यामवसाय

माद् देवता इन्द्रं प्रत्युपस्थिता इति युक्तमेव। एवं देवतासु प्रत्युपस्थितासु प्राधान्यात् प्रथमं प्रजापतिस्तस्य वृत्रवधलक्षणं वीरकर्म श्लाघमान औचित्यानुसारेण प्रश्नं कृतवान्। हे इन्द्र त्वमखिलैरपि हन्तुमशक्यं वृत्रं हन्तुं किमशकः शक्तिमानासीः इति। प्रश्नार्थे प्लुतिः। अथैवं प्रजापतिना पृष्टः इत्येवमनिरुक्तमनिर्दिष्टदेवताविशेषवाचिपदरहितं यथा तथा प्रतिवचनं कृतवान्। किमित्याकाङ्क्षायाम् आद्यं पदमवतारयति—एवाह्येवेतीति। न ह्यस्मिन् पदे देवताविशेषवाचकं पदमुत्तरवाक्येषु श्रूयते। सिध्यति चार्थात् प्रजापतिः संबोध्यः। हे प्रजापते एवमेवाहं वृत्रं हन्तुमशकमेव। महानाम्नीनां प्रभावात्। अस्यार्थस्य प्रसिद्धिं हिशब्देन सूचयति। कुतोऽनिरुक्तत्वं प्रतिप्रश्नस्येत्यत्राह[1]—अनिरुक्त इति। प्रजापतेरनिरुक्तत्वं प्रागुक्तम्। तदनिरुक्तत्वं प्रजापतेः संबन्धि रूपं भवति।

**तं-प्रत्युवाच**। तमग्निरित्यादि गतम्। तमिन्द्रं स्व इन्द्रस्य स्वभूतो 5. ९-१७
महिमा। महत्त्वाभिमानिनी देवता। येनायमिन्द्रो महानभूत् स खलु महिमा अग्रे वृत्रवधात् पूर्वस्मिन् काले वृत्राद् भीतिं कुर्वन् अस्मादिन्द्रादपक्रान्तः सन् क्वापि निलीय स्थितोऽभूत्। वृत्रवधानन्तरमागतवान् वृत्रमहत्त्वस्य प्रतिबद्धस्य तदनन्तरमभिव्यक्तत्वात्। 'इन्द्रो वै वृत्रं हत्वा महानभवद्'[a] इति श्रवणात्। अतो महत्त्वमहतोरभेदादिन्द्रेति संबुद्धिरुपपन्ना। तं पूषेत्यादि गतम्।

एतेषां पदानां पुरीषसंज्ञया विद्वत्प्रसिद्धिं वदन् स्तौति—**तानि-शस्यन्ते**। 5.१८
एवं विधान्येतानि 'एवा ह्येव'[b] इत्यादीनि पञ्चसंख्यानि पदानि विद्वद्भिः पुरीषशब्देन व्यवह्रियन्ते—पुरीषपदानीति[2]। फलपूर्तिहेतुत्वात् पुरीषशब्दवाच्यानि भवन्तीत्यर्थः। विधान्तरेण स्तौति—**सो-वेला**। सेति वेलापदा- 5.१९
पेक्षया स्त्रीलिङ्गनिर्देशः। तानि पञ्च पदानि ऋगाम्नायस्य वेलास्थानीयानि भवन्ति। तदवसानत्वात्। तेन सकलर्क्प्रतिष्ठारूपत्वात् प्रशस्तान्येतानि।

महानाम्नीनां वैदिकप्रसिद्धं शक्वरीनाम निर्ब्रुवन् स्तौति—**ता-हि**। 5.२०-२३

a. AA. 1. 1. 1.
b. AA. 4. 10.

1. प्रश्नस्य for प्रतिप्रश्नस्य
2. T. adds पुरीषपदानि

ता अध्येतृसंप्रदायसिद्धा इह शंसनीयतया प्रस्तुताः 'विदा मघवन्'[a] इत्याद्याः शक्वरीशब्दवाच्या भवन्ति। किं डित्थादिवदिति ? नेत्याह। शक्नोतिधातोर्निष्पन्नो ह्ययं **शक्वरी**शब्दः। इह चैताभिरृग्भिः करणभूतैरिन्द्रो वृत्रहननकर्मणि शक्तिमानासीदिति शक्नोत्यर्थयोगोऽस्ति। अतो वृत्रं हन्तुं इन्द्र एताभिरेव शक्तिमानभूदिति एताः शक्वरीशब्दवाच्याः संवृत्ताः। किं च इन्द्रस्य शक्तय एताः परमार्थतः। ताः शक्तयः एव सत्यः शक्वर्य इत्युच्यन्ते परोक्षवृत्त्या। सर्वथापीन्द्रस्य महत्त्वहेतुत्वात् प्रशस्ता एताः।

5.२४,२५ इत्थं प्रबन्धेन स्तोत्रियतृचं विधायानुचरतृचं विधत्ते—**प्रत्यस्मै-करोति**। तृचत्रयं पठित्वा तदनन्तरं 'अस्मा अस्मा इद्'[b] इत्येतां बृहतीछन्दस्काभृचं दशसंख्यापूरणीं कृत्वा पठेत्। अस्या ऋचः स्थानेऽन्यामृचं विधत्ते—**एवा-**
5.२६,२७ **संपद्यते**। स्थितत्वे हेतुगर्भं विशेषणमाह—पुरीषस्य समानाभिव्याहारेति। पुरीषपदाभिधेयस्य पदपञ्चकस्य समानस्तुल्यः अभिव्याहारोऽभिव्याहरणम् 'एवा ह्यसि' इत्यादिकमभिधानं यस्याः सा तथोक्ता। यथा पुरीषस्य एवाह्यसीत्याद्यभिधानमस्ति, एवमस्यामृच्यपि 'एवाह्यसि वीरयुः'[c] इत्याद्यभिधानमिति तुल्याभिलापत्वम्। तथा सति तस्या 'एवाहि'[c] इत्यृचो दशमीकरणे सति सोऽनुरूपस्तृचः स्तोत्रियतृचेन समस्तुल्योऽतिशयः अतिशेत इत्यतिशयः अधिको वा भवति। एवाहीत्यादिना पुरीषपदसाम्यसद्भावात् साम्यम्। स्तोत्रियतृचे हि नवर्चः। अनुरूपतृचे दश इत्यृक्संख्याधिक्यादतिशयः।

5.२८,२९ सामप्रगाथं विधत्ते—**यद्-रूपम्**। अत्र यत् पञ्चेतिपदमस्ति तत् पञ्चमस्याह्नो रूपं भवति। पञ्चसंख्याया अहर्वर्तिन्या इह प्रतिपत्तेः। अथैकं
5.३० सूक्तं विधत्ते—**इन्द्रो-ब्राह्मणम्**। मदायेत्यनेन मदिधातुमत्। पङ्क्तिच्छन्दस्कं च। 'इन्द्रो नव'[d] इत्यनुक्रमण्यां 'पाङ्क्तं हि'[e] इति तुह्यादि परिभाषया पूर्वत्र 'इत्था हि'[f] इत्यत्र हिशब्दश्रवणाद् 'इन्द्रो नव'[d] इत्यनुक्तच्छन्दसि पाङ्क्तत्वस्यानुवृत्तेः। तस्योक्तमिति। 'पङ्क्तिर्वै पञ्चममहः'[g] इति। अपरं सूक्तं विधत्ते—

a. AA. 4. 1.
b. RV. 6. 42. 4.
c. RV. 8. 92. 28.
d. SA. I. 81.
e. SA. I. 80.
f. RV. 1. 80. 1.
g. KB. XXIII. 4. १३.

**प्र-ब्राह्मणम्**। तासामिति। 'षड् वा ऋतवः'[a] इत्यादिकमित्यर्थः। अपरं 5. ३१,३२
विधत्ते—**अभूः-रूपम्**। तस्योक्तमिति। 'त्रैष्टुभ इन्द्रः[1]'[b] इत्यादिकम्। 5. ३३-३६
रयिमद् रयिशब्दयुक्तम्। अपरं विधत्ते—**तम्-त्र्यहः**। गतमेतम्॥ 5. ३७-४०

इति पञ्चमः खण्डः

वैश्वदेवशस्त्रे प्रातिपदं तृचं प्राकृतमेवानुजानानोऽनुरूपतृचं विधत्ते—**तत्-**
**रूपम्**। वैश्वामित्रः विश्वामित्रेण दृष्टः तृतीयमण्डलान्तर्वर्तित्वादस्य तृचस्य 6. १-३
तस्य च विश्वामित्रदृष्टत्वात् अत्र वाजमात्मन इच्छन्त इति वाजशब्दो
विद्यते। वाजवत्त्वं च पञ्चमस्याह्नो रूपमित्युक्तम्। सावित्रं विधत्ते—**उदु-**
**रूपम्**। अत्र 'वाममद्य सवितर्वाममु श्वः'[c] इति वामपदस्य श्रवणमस्ति। तथा 6. ४-६
चास्य पशुमत्त्वं सिध्यति। वामशब्दस्य पश्वभिधायकत्वात्। वननीयं हि
वामम्। वननं च संभजनम्। संभजनीयत्वं च पशूनामेवेति। तथा च श्रुत्य-
न्तरे—'वामं पशवो वाममेव पशूनवरुन्धे'[d] इति। द्यावापृथिवीयं विधत्ते—
**मही-रूपम्**। उक्षशब्देन पुंपशोरभिधानात् पशुमत्त्वम्। आर्भवं विधत्ते— 6. ७-९
**ऋभुः-रूपम्**। गोमन्तमिति साक्षादेव पशोरभिधानात् पशुमत्त्वम्। वैश्वदेवं 6. १०-१२
विधत्ते—**को-रूपम्**। पशुषु इति स्वशब्देन पशोरभिधानात् पशुमदेतत्। 6. १३-१६
'प्रश्रवसो मरुतो अच्छोक्तौ'[e] इति पदस्य पुनः पठ्यमानत्वादध्यासवत्। तच्च
पञ्चपदत्वात् पञ्चमस्याह्नो रूपं भवति। वैश्वानरीयं विधत्ते—**हविष्पान्तम्-**
**रूपम्**। अत्र यत् पान्तमिति पदमस्ति तत्र पञ्चमपदावयवभूतस्य पकारस्य 6. १७,१८
श्रवणात् पञ्चसंख्याप्रत्यायनद्वारा पञ्चमस्याह्नो रूपं भवति। पदावयवस्य
कृत्स्नपदार्थद्योतकत्वं प्रसिद्धमेव। मारुतं विधत्ते—**वपुः-रूपम्**। धेनुशब्देन 6. १९-२१
पश्वभिधानात् पशुमदेतद् भवति। जातवेदसीयं विधत्ते—**अग्निः-रूपम्**। 6. २२-२५

a. KB. 1. 4. ६, etc.
b. KB. XXIII. 2. १२.
c. RV. 6. 71. 6.
d. TS. 5. 3. 8. 1.
e. RV. 5. 41. 16.

1. B. T. त्रैष्टुभो वा इन्द्रः

वाजसाताविति वाजपदश्रवणाद् वाजशब्दयुक्तमेतत् सूक्तं भवति। 'तातरेम' इति पादेनाध्यासवच्च भवति।

6.२६,२७ समूळ्हपक्षे वैश्वानरीयादारभ्य विशेषमाह—**इति-समूळ्हे**। अथ
6.२८-३० समूळ्हे इति पाठे सुगमोऽन्वयः। वैश्वानरीयम्—**मूर्धानं-रूपम्**। अत्र
6.३१-३३ 'सदनं रयीणाम्' इति रयिशब्दश्रवणात् रयिमत्। मारुतम्—**आ-रूपम्**।
6.३४,३५ गोमदिति पदेन पशुमदेतत्। जातवेदसीयम्—**इमम्-रूपम्**। अस्य ब्राह्मणमाज्य-शस्त्रक्लृप्तावुक्तं[1] द्रष्टव्यम्। 'भरद्वाजाय सप्रथः' इति पादस्याधिकस्योपरि श्रूयमाणत्वादध्यासवच्च भवति। 'पशून् पञ्चमेन' इत्यादिना समुदितैतच्छस्त्र-
6. ३६-३९ षट्कस्तुतिः। **पशून्-अधिपतिम्**।

पशुपङ्क्तित्रिणवानां शाक्वरपृष्ठस्य चोर्ध्वकाष्ठायाः।
हेमन्तर्तोर्मरुतां रुद्रस्य च पञ्चमाहरवरुद्धचै॥

इति षष्ठः खण्डः

7.१ क्रमप्राप्तं पृष्ठचस्य षष्ठमहर्विधित्सुः प्रस्तौति—**पशवः-अहः**। पञ्चमस्याह्नः पशुरूपत्वमुक्तमनूदितम्। अथेत्यर्थान्तरप्रतिपादनार्थमानन्तर्यार्थं वा। षष्ठस्याह्नः पुरुषरूपत्वं पशुरूपस्य पञ्चमस्याह्न उपरिवर्तित्वात्। अधिष्ठेयानां पशूनामधिष्ठातुः पुरुषस्योपरीव स्थितत्वात्[1]। 'द्विपाद् यजमानः पशुष्वेवोपरिष्टात् प्रति तिष्ठति'[a] इत्यादिश्रवणात्। पुरुषस्य प्रजापतिरूपत्वोक्त्या
7.२-४ षष्ठमहः प्रजापतिरूपसंपादनेन स्तौति—**स-रूपम्**। पशूनामधिष्ठाता षष्ठाहोरूपतयोक्तः पुरुषः परमार्थनिरूपणदशायां प्रजापतिरेव भवति। कुत इति चेत्, यस्मात् स सर्वदेवतात्मकः प्रजापतिरस्य सर्वस्य जगतः पूर्वो भवति। तथा च मन्त्रः—'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीद्'[b] इति।

a. TS. 2. 6. 2. 6. b. RV. 10. 121. 1.

1. T. आज्ये for आज्य 1. B. M. उपर्येव for उपरीव

'स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥'[a]

इत्यादि च । तस्मात् सर्वस्मादस्माज्जगतः पूर्वः सन् पुरुष इति प्रजापतिरेवावयवार्थनिरूपणायां पुरुषशब्दवाच्यः । श्रुत्यन्तरे चैतत् स्पष्टतरं निर्वचनं श्रुतम्—'पूर्वमेवाहमिहासमिति । तत् पुरुषस्य पुरुषत्वम्'[b] इति । प्रकारान्तरेण प्रजापतिरूपसंपत्तिमाह—अतिच्छन्दा वा इति । अक्षराधिक्याद् गायत्र्यादिच्छन्दांस्यतिक्रान्तानि येन तच्छन्दोऽतिछन्दः । तथाभावश्च प्रजापतावेव मुख्यः । अपरिच्छिन्नमाहात्म्यत्वादयमीदृश इति निर्वक्तुमशक्यत्वात् । तदेतत् पुरुषरूपत्वमातिच्छन्दसत्वं च प्रजापतिरूपं भवति ।

इह षष्ठेऽहनि पारुच्छेप्य ऋचः पठ्यन्ते । तद्विषयां प्रशंसां कर्तुमाख्या-
यिकामाह—**असुरी-प्रामुच्यत** । पुरा काचिदसुरी असुरजातीया स्त्री । जाति- 7. ५-१२
लक्षणङीष् । स्वशरीरे पर्वन् पर्वन् पर्वणि पर्वणि । प्रत्यङ्गसन्धिस्थानम् । मुष्कान् स्त्रीन्द्रियाणि मायया संपाद्य जिगीषुः सतीन्द्रं प्रतिलक्ष्य ग्राम्यधर्मार्थमागतवती किल । अथेन्द्रस्तामसुरस्त्रियं जेतुमिच्छन् स्वशरीरे[1] पर्वणि पर्वणि शेपांसि संपादितवान् । मायिन्या माययैव जय इति निश्चिन्वानः । अत इन्द्रः परुषि परुषि शेपा अस्येति परुच्छेपशब्दवाच्यः संवृत्तः । किमर्थं स एवं जुगुप्सितं रूपं कृतवानिति चेत् । यस्मात् सर्वं जगदिन्द्रेण जेतुमिष्टम् । इतरथा परमैश्वर्यवाचकेन्द्रशब्दवाच्यत्वानुपपत्त्यापत्तेः । अतस्तादृश्या असुर्या अपि जेतव्यत्वात् पर्वणि पर्वणि शेपकरणमुपपन्नम् । अथेन्द्रस्तया सह ग्राम्यधर्ममकरोत् । तमिन्द्रं सासुरी असुरसंबन्धिन्या दुर्निवारया मायया गृहीतवती । अथेन्द्रो मायया गृहीतोऽहमित्यप्रतिबद्धशक्तिज्ञानत्वेनावबुध्य तन्निवर्तनार्थमेताः षष्ठेऽहनि शंसनीयतया प्रस्तुताः पुनःपदासंज्ञा ऋचोऽपश्यत् । दृष्टाभिश्च ताभिरङ्गादङ्गात् प्रत्यङ्गमवस्थितात् प्रतिसन्धिस्थानमवस्थिताच्च सर्वस्मात् पाप्मनोऽसुरमायालक्षणात् प्रमुक्तोऽभवत् ।

**तद्-सम्प्रमुच्यन्ते** । तत्र षष्ठेऽहनि प्रातःसवने माध्यंदिनसवने होत्रक- 7. १३,१४

a. *Śiva-purāṇa*. 5. 1. 8. 22. b. TA. 1. 23. 4.

1. T. स्वस्य for स्व

शस्त्रेषु पारुच्छेप्य ऋचः शस्यन्त इति यदस्ति, तेन यजमाना इन्द्रवदेव प्रत्यङ्गं प्रतिसन्धिस्थानं चावस्थितात् सर्वस्मादपि पाप्मनः प्रमुक्ता भवन्ति। तस्मात् पापनिर्मोकहेतुत्वात् प्रशस्तं पारुच्छेपीनामृचां शंसनमित्यर्थः।

प्रकृतितः प्राप्तासु प्रस्थितयाज्यासु कंचिद् विशेषं विधत्ते—**नित्याः-**
7.१५-१६ **इति**। अयमत्र षष्ठेऽहनि विशेषो द्रष्टव्यः। नित्याः प्रकृतावग्निष्टोमे स्थिताश्चोदकप्राप्ताः प्रस्थितयाज्या याः सन्ति ताः प्रथमं पठित्वा ताभिः संधाय पारुच्छेपीः ऋचः पठित्वा तदन्ते वषट्कारं कुर्यात्। सूत्रितं हि—'नित्याभिर्याज्याभिः पारुच्छेपीः संधाय यजन्ति'[a] इति। तदेतत् प्राकृतवैकृतरूपद्वयसंपत्त्या प्रशस्तम्। तत् तत्र विषये तस्मिन् षष्ठेऽहनि ताभिर्नित्याभिर्याज्याभिर्वषट्कारं न कुर्वन्ति सत्रिण इति यदस्ति, तेन हेतुना ता याज्या उत्सृष्टाः परित्यक्ता भवन्ति। वषट्कारवत्त्वं हि याज्यात्वप्रयोजकम्। तदभावे याज्यारूपत्वाभावात् पठिता अप्यपठितप्राया एव। तेनोत्सृष्टा इत्युक्तम्। यत् पुनरेना नित्या याज्या नान्तरिताः स्वरूपेणापरित्यज्यान्यासामेव तत्स्थाने निवेशनात् कुर्वन्ति सत्रिणः। किंतु ताः पठित्वा तदुपरि अन्या अपि पठित्वा वषट्कुर्वन्तीत्येतावत् कुर्वन्ति। तदच्युतं नित्ययज्ञसंबन्धि किंचिदङ्गम्। अत एव देवानां प्रीतिविषयं वयमन्तरितं करवाम, अत एव देवानामपध्यानादखिलपुरुषार्थपरिभ्रष्टा भवेमेति परिभयं द्योतयन्त एव सत्रिणः कुर्वन्ति। न तु स्वाच्छन्दद्यात्। अतः पारुच्छेपीभिर्यागाद् वैकृतरूपसंपत्तिः नित्यापरित्यागात् प्राकृतरूपसंपत्तिः इति रूपद्वयलाभात् प्रशस्तोऽयं प्रस्थितयाज्यापाठ इत्यर्थः॥

इति सप्तमः खण्डः

प्रकृतितश्चोदकप्रापितेषु ऋतुयाजेषु कंचिद् विशेषं विधत्ते—**नित्यान्-**
8. १-५ **इति**। नित्यानृतुयाजान् पूर्वान् कृत्वा गृत्समदमहर्षिदृष्टाभिः ऋग्भिः 'तुभ्यं हिन्वानो'[b] 'मन्दस्व'[c] इति सूक्तद्वयगताभिः क्रमेण होत्रादयो यागं

a. ŚS. 10. 7. 2.
b. RV. 2. 36.
c. RV. 2. 37.

कुर्युः । तद्यदेभिरित्यादि पूर्ववद् व्याख्येयम् । ऋतुयाजानामुपरिष्टाद् गार्त्स-मदीनामृचां वषट्कारशिरस्कपठने सति ऋतुयाजानां षष्ठाहरुचितस्य आति-च्छन्दसत्वस्यानपह्नवादपि यथोक्तो विशेषो वरीयानित्याह—**तेन-भवति** । ४. ६,७
तेन यथोक्तप्रकारवत्तया त ऋतुयाजाः षष्ठाहरभिरूपा अतिछन्दसः संपद्यन्ते । तथातिच्छन्दस्त्वे सत्येषामेभिर्होत्रादिभिः सप्तपदाभिः ऋग्भिर्वषट्कृतं यागः कृतो भवति । तद्धयस्मिन्नहन्युचितम् । ऋचां तावच्चत्वारः पादाः । प्रैषा-णामप्यक्षरगणनेन पदसंख्यायां त्रयः पादाः कथंचित् संपद्यन्त इति सप्त-पदात्वम् ।

इत्थं प्रस्थितयाज्या ऋतुयागयाज्याश्चाधिकृत्य कश्चिद्विशेषो विहितः । अथोक्तपक्षप्रतिक्षेपेण पक्षान्तरमुपक्षिपति—**तदु-इति** । तत् तत्र प्रस्तुते ४. ८-१२
प्रस्थितयाज्यादिविषये कौषीतकिर्मुनिरुक्तवान् । किमिति चेत्, विराण्णा-मकमष्टसंख्यापूरकच्छन्दो येषां तानि गायत्र्यादिसप्तछन्दांसि एतमाकाशे दीप्यमानं जगतः प्रकाशकमादित्यं रक्षन्ति । तत्र ये यष्टारोऽतिच्छन्दोभिः ऋग्भिर्यागं कुर्वन्ति ते तां यज्ञस्य समृद्धिं विमूढामनवक्ल्प्तां कुर्वन्ति । आदित्यस्यैव यज्ञरूपत्वात् । तस्य विराडष्टमच्छन्दस्समृद्धत्वात् । यस्मादेव-मतिच्छन्दोभिर्यागपक्षे अनिष्टापत्तिः, तस्माद् यज्ञासंमोहेन देवयानस्य पथः संमोहपरिहारार्थं प्रकृतावेकाहे अग्निष्टोम उत्पन्नाभिः ऋग्भिरेव यागः कर्तव्यः । इतरथा यज्ञासमृद्धया देवयानः पन्थाः संमूढोऽप्रज्ञातो भवेदित्येवं कौषीत-किर्मुनिराहेति पूर्वेणान्वयः ।

उक्तस्यैव पक्षस्य द्रढिम्ने कांचिदाख्यायिकामुपन्यस्यति—**तद्-अह्नः** । ४. १३-२३
तत् तत्र कथिते अर्थेऽपि काचिदाख्यायिकाप्यस्ति । हशब्द ऐतिह्यार्थः । पुरा किल मुनेरपत्यमणीचिनामा कश्चिन्महर्षिः जाबालनाममहर्षिः[1] गृह-पतिः येषां तान् कांश्चिदृषीन् सत्रनामकं यागविशेषं कुर्वाणान् संप्राप्य प्रश्नं कृतवान् । षष्ठेऽहनीति प्रकरणात् सिध्यति । किमिति चेत्, हे सत्रिणः, यूयं किमस्मात् षष्ठादह्नः सकाशात् गतवन्तः स्थ ? आहोस्वित् परुच्छेपाद् गतवन्तः स्थ ? अस्यार्थः—यदि पारुच्छेपीभिः ऋग्भिर्यागं कृतवन्तः स्थ तर्हि अहःसाम्येन प्रकृतेरग्निष्टोमात् प्राप्तानामैकाहिकीनां याज्यानामनादरणस्य

1. M. जाबाली; T. omits

कृतत्वादह्नो गताः स्थ। अहर्धर्मप्राप्तिमुपेक्षितवन्त इति स्यात्। न चैतत् समञ्जसमिव। अथ पुनरेतत्परिजिहीर्षव ऐकाहिकीभिर्याज्याभिर्यागं कृतवन्तः तर्हि यदस्याह्नो वैशेषिकं पारुच्छेपत्वं तन्न परिगृहीतं स्यात्। तदिह 'अपरं सन्धित्सतोऽपरं प्रच्यवते'[a] इति लौकिकोपालम्भवचनविषयस्यावसरः। अथोभयाविरुद्धः प्रकारोऽस्तीति मन्यध्वे वक्तव्योऽसाविति। एवं पृष्टास्ते सत्रिणस्तदुत्तरानभिज्ञतया निर्वचना बभूवुः। एवं प्रश्ने कृते तदुत्तरानभिज्ञतयैव तूष्णींभूतेषु सदस्येषु ब्रह्मवादिभिरभिपूर्णस्य सदोमण्टपस्योत्तरार्धप्रदेशे स्थित्वा गौश्रस्यापत्यं गौश्रायणः, तस्यापत्यं गौश्रायणिश्चित्रनामा कश्चिन्महर्षिस्तं प्रष्टारमभिलक्ष्य प्रतिवचनं कृतवान्। अथवा गौश्रनामा कश्चिदन्यो महर्षिरभिपरोवाच। उभयथाप्याख्यायिकोपदेष्टॄणां ब्रह्मवादिनामुपदेशस्यानादितया प्रवृत्तेः। किमुक्तवानिति चेत्, न वयमह्नः सकाशात् पारुच्छेपस्य सकाशाद् वा गतवन्तः। प्राकृतं विकृतमपि रूपमुभयमप्युररीकृतमेवेत्यर्थः। कथमेतत् ? न हि प्रतिज्ञयैव केवलया साध्यं सिध्यतीति चेत्, यस्मान्नोऽस्माकमेतत् षष्ठमहः कर्मकारकं शस्त्रेण हेतुना परुच्छेपोऽनुगमनं कृतवानेव। शस्त्रं खल्विह पठिष्यमाणं पारुच्छेपमेव। अतः शस्त्रस्याह्नः प्राणत्वात् न पर्यालोचना। अस्याह्नः पारुच्छेपत्वसंपत्तेः नो अस्माकं परुच्छेपादपयानप्रसक्तिः। न चैतावता अह्नः सकाशादपक्रान्त्यापत्तिः। यस्मात् प्रस्थितयागादावस्माभिरैकाहिक्य एव याज्याः कृताः। तेनैव हेतुना वयमह्नो न गतवन्तः। तस्मादपरसंधानेऽपरप्रच्युतिप्रसक्तिलक्षणो दोषो नावसरं लभते। इत्येव महर्षिरुक्तवान् इति पूर्वेणान्वयः। श्रुतिः स्वात्मनोपसंहरति—यथायथमिति। नित्याः प्रकृतितः प्राप्ता एव याज्याः कार्या इत्यर्थः।

ऋतुयाजेष्वध्वर्युयजमानसंबन्धिनोः वषट्कारयोः होत्रा वाच्यत्वं प्रकृतेः प्राप्तं प्रतिषेधन् स्ववाच्यं विधत्ते—देवायतनं वै षष्ठमहरित्यादिना। यथा लोके बहुषु प्रदेशेषु स्वभूतेषु मध्ये कश्चिदेव प्रदेशविशेषो निवासस्थानं भवति, तद्वद् देवानामिदं षष्ठमहरायतनं गृहं भवति। तथा चान्यत्र—'देवक्षेत्रं वा एतद्यत् षष्ठमहः। देवक्षेत्रं वा एत आगच्छन्ति ये षष्ठमहरागच्छन्ति'[b] इति॥

इत्यष्टमः खण्डः

a.

b. AB. 5. 9. 1.

**तद्–च** । तत् तत्रैवं षष्ठस्याह्नो देवायतनत्वे सति । यद् यदि । 9. १,२
तस्मिन् षष्ठेऽहनि प्रकृतावग्निष्टोम इव 'होतरेतद् यज'[a] इत्यध्वर्युगृहपतिभ्यां
प्रेषितो होतैव वषट्कारं पठेत् ; न स्वयमध्वर्युगृहपती एव ; तर्हि वषट्कारं
पठन्नयं होता वषट्कारप्रदातारौ यावध्वर्युगृहपती स्तः, ताभ्यां सकाशात्
षष्ठाहोरूपं देवायतनं अपानीय स्वयमेव परिगृह्णीयात् । संपृञ्चीतेति पाठे
स्वात्मनि संपृक्तं कुर्यादित्यर्थः । अध्वर्युगृहपत्योर्देवायतनात् प्रच्युतिः स्या-
दित्यर्थः । तस्मात् स्वयमेव वषट्कारं पठेताम् । न प्रकृताविव प्रदानं
कर्तव्यम् ।

याज्यादेरनुच्छ्वासेन पठनं विधत्ते—**आजि–एव** । आजिः काष्ठं बहूनां 9. ३-६
साधारणं गम्यभूतं दूरस्थितं लक्ष्यम् । यथा लोके बहुभिरेकार्थाभिलाषिभि-
र्मिथः समयपूर्वकमाजिधावनं क्रियते तथा सत्रिणां स्वर्गलोकं निमित्तीकृत्य
तदर्थमाजियानरूपमेतत् षष्ठाहरनुष्ठानम् । तेषां मध्ये यः प्रथमं समाप्ति
प्राप्नोति स प्रथमं स्वर्गं लोकम् आत्मीयं करोति । तत्र मध्ये उच्छ्वस्य पठतः
प्रागेव उच्छ्वासविरहेण पठन् पुरुषः समापयितुं पर्याप्नोति । प्रपाठकपाठादौ
तथा दृष्टत्वात् । अतोऽनवानं पठन् प्रथमं समाप्तिकरणेन स्वर्गलोकमुज्जयती-
त्यनवानमेव याज्यादिपाठः कर्तव्यः । तत्र यद्यपि प्राणनियमनशक्तिरहितत्वात्
कश्चिन्मध्य उच्छ्वासं कुर्यात् तथापि यथानुच्छ्वासेनैव पठितुं शक्तिः संपद्येत
तथा भूयो बहुवारमपि यत्र स्थान उच्छ्वासः प्रसज्यते ततः प्रत्यावृत्य प्रत्या-
वृत्य आदित आरभ्यैव यावदनुच्छ्वासपाठसंपत्ति पठितव्यम् । एवमभ्यस्यतः
सतः तस्यानुच्छ्वासेन याज्यापाठः शक्यः संपादयितुम् । तथा लोके अभ्यासस्या-
भीष्टफलसिद्धिपर्यन्तत्वनैयत्यदर्शनात् । अतः सर्वथा अनवानमेव याज्यापाठेन
भवितव्यम् ।

इदानीमाज्यशस्त्रसूक्तं प्राकृतापवादेन विधत्ते—**अयं–रूपम्** । स्तौति— 9. ७-१०
अयमित्यनिरुक्तमिति । अयमित्यस्य पदस्य सामान्यविषयत्वेन विशेषपरामर्श-
कत्वायोगादनिरुक्तत्वम् । निष्कृष्य विशिष्योक्तं वचनं यस्मिन् नास्ति तद-
निरुक्तम् । शिष्टं गतम् ।

a. ŚŚ. 7. 8. 7.

९.११,१२ अस्य छन्दस्त आभिरूप्यप्रदर्शनेनापि स्तौति—**अतिच्छन्दसः–पताः।** 'अयं जायते'[a] इति सूक्तवर्तिन्य ऋचः अतिच्छन्दश्छन्दस्का भवन्ति। गायत्र्यादिभ्यः चतुरुत्तरेभ्यः सप्तभ्यः छन्दोभ्यो यदतिरिक्तं तदतिच्छन्दो नाम जगत्यादि छन्दः। अत एव सप्त पदानि पादा यासां ताः सप्तपदाः। तत्रापि पुनरभिहितं पदं पादो यासां ताः पुनःपदा भवन्ति। यद्यपि पदैकदेश एव पुनः पठ्यते, तथाप्येकदेशैकदेशिनोरभेदोपचारादेवमुक्तिः। तस्माद् यद् यथारूपमेतदहरातिच्छन्दसं भवति, तत् तथारूपा एता अतिच्छन्दस ऋचो भवन्तीत्यभिरूपाः। सप्तपदत्वपुनःपदत्वोक्तिरतिच्छन्दस्त्वस्फुटीकरणार्था।

ऋचां[1] पुनःपदत्वप्रसंगात् पदपुनःपदयोरन्तराले उच्छ्वासपरिहारं विपक्षे
९.१३-१७ दण्डप्रदर्शनेन विधत्ते—**न–अवान्यात्।** पदपुनःपदयोर्मध्ये उच्छ्वासं न कुर्यात्। कुत इति चेत्, यदेतत् पदमस्ति तदात्मैव भवति। पुनःपदस्य प्राणस्य च पदात्मोपजीवित्वेन उपजीव्यत्वरूपेण प्राणस्यात्मनि साम्यात्। यत्तु पुनःपदमस्ति तत् प्राण एव भवति। उपजीवित्वसाम्यात्। एवं सति पदस्य पुनःपदस्य चान्तराल उच्छ्वासं कुर्वन्तं होतारं समीक्ष्य यः कश्चित् सदसि स्थितोऽभिज्ञो ब्रूयात्—संभावितं हि तदभिधानमित्यत इत्थमुक्तिः—अयं तपस्वी शंसितैवम् अस्मिन्नवधावुच्छ्वसन् प्राणसकाशादात्मानं व्यवहितमकरोत्। उच्छ्वासेन पदपुनःपदयोर्व्यवहितत्वात्। अतः स्वयं चिररात्राय न प्राणान् धारयिष्यति। क्षिप्रमेव मृतो भवेदिति। तस्याभिज्ञस्य तद् वचनं तथा यथाकथितमेव संपद्येत। शीघ्रं मरिष्यत्येव। तस्मादित्युपसंहारो गतार्थः।

९.१८-२० प्रउगशस्त्रं प्राकृतनिवर्तनेन विधत्ते—**आतिच्छन्दसः–समर्धयति।** तद् यथा—'स्तीर्णं बर्हिः'[b] 'आ वां रथो'[c] 'अयं मित्राय'[d] 'युवां स्तोमेभिः'[e] इति चत्वारि तृचानि। 'वृषन्निन्द्र'[f] इत्येका 'अवर्मह'[g] इति द्वे। इदमैन्द्रं तृचम्।

a. RV. 1. 128.
b. RV. 1. 135. 1.
c. RV. 1. 135. 4.
d. RV. 1. 136. 4.
e. RV. 1. 139. 3.
f. RV. 1. 139. 6.
g. RV. 1. 133. 6.

1. B. T. omit

'ओ षू णो अग्ने'[a] 'इयमददात्'[b] इति तृचे । एवं प्रउग आतिच्छन्दसो भवति ।
आतिच्छन्दसबहुलत्वात् ।मरुत्वतीये प्रतिपत्तृचं विधत्ते—**स-रूपम् ।** मरुत्व- 9. २१-२४
तीयशस्त्रस्य या प्रतिपत् सा 'स पूर्व्यो महानाम्'[c] इत्येतत् तृचं भवति ।
अतोऽर्थात् प्राकृतनिवृत्तिः । अन्यद् गतम् ।।

इति नवमः खण्डः

अथैकं सूक्तं विधत्ते—**यं-मरुन्यङ्गः ।** परुच्छेपेन दृष्टं पारुच्छेपं पठेदिति 10. १,२
शेषः । अत्र सूक्ते 'यः शूरैः स्वः सनिता'[d] इति यः पादोऽस्ति, स एव पादोऽ-
स्मिन् सूक्ते शूरशब्दसद्भावात् मरुन्यङ्गो भवति । मरुतामेव देवानां मध्ये
वृत्रवधाख्यायिकायां शूरत्वस्य प्रसिद्धत्वात् । असाधारणधर्मस्य चानिर्दिष्ट-
स्यापि धर्मिणः प्रत्यायकत्वात् । सूक्तान्तरं विधत्ते—**स-इयात् ।** इति सूक्तं 10 .३-७
पठेदिति शेषः । अत्र 'वृषा वृष्ण्येभिः' इत्येवं निनृत्तिर्भवति । वृषन्-
शब्दस्य द्विवारं पठनात् । शेषं गतम् । तृचं विधत्ते—**मरुत्वाँ-ऽयहः** । 10. ८,९
अथ निष्केवल्यशस्त्रं विधत्ते—तत्र तावत् स्तोत्रियानुरूपौ विधत्ते—
**रेवतीः-रूपम्** । स्तोतेति स्तोत्रियानुरूपौ स्त इति शेषः । अत्रान्य- 10.१०,११
साम्नो योनौ तृचेऽन्यस्य साम्नोऽन्यदेवत्ये तृचे अन्यदेवत्यस्य च साम्नो
विधानरूपं सामगैः क्रियमाणं कंचिद् विशेषं प्रजोत्पत्तिहेतुत्वाभिधानेन
स्तौति—रैवतस्य योनाविति । भवति हि रैवतं नाम साम रेवच्छब्दा-
ङ्किते तस्य साम्न उत्पन्नत्वेन तन्नामत्वात् । तस्य योनिः 'रेवतीर्नः'[e] इत्येष
तृचो भवति । तथा सामगानां प्रसिद्धेः । तस्मिंस्तृचे वारवन्तीयं नाम सामात्र
सामगैः प्रापितं भवति । न रैवतमेव । तस्य हि 'अश्वं न त्वा वारवन्तम्'[f]
इत्येषा योनिः प्रसिद्धा । एवं सामस्थानविपर्यासः सामगैः क्रियते । उक्तेन

a. RV. 1. 139. 7.
b. RV. 6. 61. 1.
c. RV. 8. 63. 1.
d. RV. 1. 129. 2.
e. RV. 1. 30. 13.
f. RV. 1. 27. 1.

प्रकारेण स्थानविपर्यासे सति देवतातो विपर्यासोऽपि बलाद् भवति । वारवन्तीयं हि सामाग्निदेवत्यम् । अग्निदेवत्यासु ऋक्षूत्पन्नत्वात् । अत एव च चित्याग्न्युपस्थाने तस्य विनियोगः । इन्द्रदेवत्याः पुनः 'रेवतीर्नः'[a] इत्याद्या ऋचः । एवं सत्याग्नेयं सामैन्द्रीषु ऋक्षूढं भवति । तदेतन्मिथुनमृक्सामरूपं स्त्रीपुंसयुगलं प्रजोत्पत्ते रूपं भवति । लोके भिन्नदेशवर्तिनोः स्त्रीपुंसयोः विवाहपूर्वकेन कादाचित्केन संगमेन प्रजोत्पत्तिदर्शनात् । इहापि पूर्वमसंयुक्तयोः संयोगः प्रजोत्पत्तेर्हेतुर्भवति ।

10.१२-१६ सामप्रगाथं विधत्ते—**मा-अभिवदति** । 'सखायो मा रिषण्यत'[b] इत्य-
स्मिन् पादे सखाय इति बहुवचनात्मकं संबोधनार्थं पदं सर्वरूपं भवति । बह्व-
र्थाभिधायित्वाद् वचनस्यार्थात् सर्वविषयत्वेन सर्वरूपत्वात् । सर्वाणि रूपयति
10.१७-२१ गमयतीति सर्वरूपम् । अन्यद् गतम् । सूक्तं विधत्ते—**ऐन्द्र-दधाति** । गतम् ।
10.२२-२६ सूक्तान्तरं विधत्ते—**प्र-इयात्** । इहापि सूक्तं पठेदिति । इतिशब्दादुपर्युप-
स्कारः । गतमन्यत् ।

10.२७-३२ तृचं विधत्ते—**उप-त्र्यहः** । अत्र 'याहि मदानां पते'[c] इति द्वितीयपादस्य पादो निनृत्तिरूपस्य तृतीयपादस्य विशेषणार्थः । अन्यथा प्रथमस्य तृतीयस्य च पादस्यैकत्वात् प्रथमपाद एव निनृत्तिरूपत्वेन कथमुदाहृत इति व्यामोहः स्यात् । तन्निवृत्त्यर्थं तृतीयपाद एव निनृत्तिरूपतयोक्तः । तस्य च पठितस्य पादस्य पुनः पठनरूपत्वादुपपन्नं निनृत्तिरूपत्वमित्येतत् सूचयितुं मध्यमपादपाठः कृत इति द्रष्टव्यम् । शिष्टं गतम् ॥

इति दशमः खण्डः

विधाय मध्यंदिनगं शस्त्रयुग्मलमित्यथ ।
वैश्वदेवाह्वये शस्त्रे विधत्ते प्रतिपत्तृचम् ॥

11.१-३ **अभि-अभ्यश्नुते** । अतिच्छन्दश्छन्दस्कयर्चा वैश्वदेवशस्त्रं प्रारभेत । तद्

a. RV. 1. 30. 13. b. RV. 8. 1. 1.
c. RV. 8. 93. 31.

यथा—पञ्चदशाक्षरेणावसाय[1] अष्टादशाक्षरेण प्रणुत्य पुनः पञ्चदशाक्षरेणावसाय पञ्चदशाक्षरेण प्रणयात्। पुनः 'अस्य हि स्वयशस्तरम्'[a] इत्येतं ऋचो पठेदिति। तत् तेनातिच्छन्दश्छन्दस्कायाः प्रतिपत्तृचप्रथमाया ऋचः पठनेनातिच्छन्दोनामक छन्दस्तृतीयसवनमभिप्राप्त भवति। आतिच्छन्दस खलु षष्ठमहः। तथा सति त्रिष्वपि सवनेष्वतिच्छन्दसा भाव्यम्। तत्रेतरयोः प्रातःसवनमाध्यंदिनयोः पारुच्छेपीनां पठनेनातिच्छन्दःसंबन्धः सिद्धः। एवमिहाप्यनेन प्रतिपत्तृचाद्यकपठनेनातिच्छन्दःसंबन्धः संपाद्यते। अस्या ऋचोऽतिच्छन्दस्त्वात्। न चान्या काचिदतिच्छन्दश्छन्दस्का ऋगत्र तृतीयसवने इह पठ्यते पूर्वयोरिव सवनयोः। अतोऽस्याः सवनाभिव्याप्तिद्वारा षष्ठस्याह्न आतिच्छन्दसत्वसंपादकत्वाद् अस्तितरामाभिरूप्यम्। **अथो रूपम्**। केचिदध्ये- 11. ४-६
तारः इह 'अथो आतिच्छन्दस वै षष्ठमहः। अतिच्छन्दा वै प्रजापतिः। तत् प्राजापत्यं रूपम्' इति पठन्ति। अपरे तु न पठन्ति। छन्दांस्यतिलङ्घ्य वर्तत इत्यतिच्छन्दाः। अनिरुक्तस्वरूपत्वेन प्रजापतेरयमेवंविध इति कृत्स्न वाचकशब्दागोचरत्वात्। 'कस्तं मातुमर्हद्'[b] इति हि प्रागप्युक्तम्। तस्मात् तदतिच्छन्दोनामकं छन्दः प्रजापतिरूपसंबन्धिरूपं भवति। अस्यापि गायत्र्यादिच्छन्दांस्यक्षराधिक्यादतीत्य वर्तमानत्वाद् अतिच्छन्दःशब्दस्यान्वर्थत्वात्।

अनुचरं तृचं विधत्ते—**अभिवान्-ब्राह्मणम्**। 'अभि त्वा देव सवितः'[c] 11.७
इत्यादिस्तृचोऽभिवान् अभिशब्दश्रवणात्। तस्योक्तं ब्राह्मणमिति। 'पृष्ठानामेव नानात्वाय'[d] इति। सावित्रद्यावापृथिवीयाभववैश्वदेवविध्यर्थवादवाक्यानि निगदव्याख्यातानि। **उदु-निनर्तिः**। पूर्वापरेति द्वयोरपि पदयोः पकार 11. ८,९
रेफयोरविशिष्टत्वात् पुनः पाठस्य सद्भावान्निनर्त्तिरित्युक्तम्। **अन्तः-**
**इयात्**। 'मंहनेष्ठा' इति स्थितवदिति। नाभानेदिष्ठस्य भागप्रदाने स्थिताः 11.१०-२८
सन्त इति नाभानेदिष्ठस्य भ्रातृणां विशेषणमेतत् 'मंहनेष्ठा' इति पदम्।

a. RV. 5. 82. 2.

b. KB. XI. 8. ८.

c. RV. 1. 24. 3.

d. KB. (L) 23. 3. ( KB. XXIII. 6. under f. n. 1. )

1. T. adds पादेन after पञ्चदशाक्षरेण

अत्र तिष्ठतिधातोः श्रवणादेतत् सूक्तं स्थितवद् भवति । गतमन्यत् ।

'इदमित्था'[a] इति वैश्वदेवसूक्तं यद् विहितम् तदन्तराले तस्मिन् पर्य-
11.२९-३१ वसितप्राय एव सूक्तान्तरपठनं विधत्ते—**तस्य–दधाति** । तस्य 'इदमित्था'[a] इति वैश्वदेवसूक्तस्य संबन्धिन्यौ शंसनक्रमेण समीपं प्राप्ते द्विसंख्याके 'स गृणानः'[b] त ऊ षु णः'[c] इत्येते अन्त्ये ऋचौ परिशिष्टे कृत्वा तयोः पठनात् पूर्वमेव नराशंसं 'ये यज्ञेन'[d] इत्येतत् सूक्तं पठेत् । अथ परिशिष्टे ऋचौ शंसेत् । सूत्रितं हि—'इदमित्थेत्युत्तमे परिशिष्य ये यज्ञेनेति शस्त्वा परिशिष्टे शंसति'[e] इति ।

एवं वैश्वदेवसूक्तमिह सूक्तान्तरगर्भं भवति । तत् स्तौति । तत्र यद् 'इद-मित्था'[a] इति सूक्तं तदात्मेति मन्तव्यम्[1] । आधारत्वात् । तन्मध्ये हि नाराशंससूक्तस्य प्रक्षेपः । अत एव नाराशंससूक्तं प्रजापुत्रादिरूपा पशवश्च द्विपाच्चतुष्पाद्भेदभिन्ना भवन्ति । आधेयत्वात् । कथमस्य नाराशंसत्वमिति चेत् , नरा अङ्गिरसः सावर्णिश्च शस्यन्ते[2], स्तूयन्ते[3] अनेनेति व्युत्पत्त्या नाराशंस-शब्दवाच्यमेतत् सूक्तम् । आङ्पूर्वाच्छंसेः कर्मणि घञ् । भावे ण्यत् । तत् तेनात्मन्नात्मनि सूक्तरूपे मध्ये प्रजां पुत्रादिरूपाम् । उभये द्विपाच्चतुष्पाद्भेद-भिन्नान् उभयप्रकारान् पशून् स्थापयति । अभय इति पाठे भयरहित इति मध्यविशेषणम् । बहुषु सह गच्छत्सु मध्ये स्थितस्य भयराहित्यस्य सुप्रसिद्ध-त्वात् । 'तौ वै मध्ये भिया एव शंसति'[f] इति हि प्रागुक्तं मध्यस्याभय-हेतुत्वम् ।

11.३२-३६ वैश्वानरीयं विधत्ते—**अह्नः-इयात्** । अर्जुनपदमहःपदविशेषणार्थम् । 'याहि मदानां पते'[g] इतिवत् । अहःपदस्याभ्यस्यमानत्वान्निवृत्तिरत्रास्ति ।

a. RV. 10. 61.
b. RV. 10. 61. 26.
c. RV. 10. 61. 27.
d. RV. 10. 62.
e. ŚS. 10. 8. 14.
f. KB. XVI. 7. २२.
g. RV. 8. 93. 31.

1. T. गन्तव्यम्
2. T. शस्यते
3. T. स्तूयते

मारुतं विधत्ते—**प्रयज्यवो–सोदर्कम्।** 'शुभं यातामनु रथा अवृत्सत'[a] इति 11.३७,३८
सर्वासामृचामन्त्यपादैकत्वात् सोदर्कमेतत् सूक्तम् । सोदर्कमेतत् सूक्तं भवतीति यदस्ति तत् तस्य सूक्तस्यान्नरूपं भवतीति योज्यम्। जातवेदसीयं
विधत्ते—**इमं–सोदर्कम्।** 'अग्ने सख्ये मा रिषामा वयं तव'[b] इति पादस्य 11.३९,४०
प्रत्यृचमेकत्वात् सोदर्कत्वम्। अत्र पादे मा रिषाम इति यत् पदमस्ति तद्
विशेषतः स्तौति—**मा–रूपम्।** 'मा रिषाम' इति यत् पदमस्तीति शेषः। 11.४१,४२
तत् पदमन्ततोऽन्ते षष्ठस्याह्नः पृष्ठचषळहस्य वावसाने अरिष्टचै। षष्ठचर्थे चतुर्थी। रिष्टिर्विनाशः। न रिष्टिररिष्टिरविनाशः। तस्य रूपं तस्याभिधायकं तत्प्रार्थनापदं भवतीति यावत्। महत्तरं खल्विदं कर्म। तत्रातिनिपुणस्यैकस्यापि सूक्ष्मापराधप्रसक्तेः दुर्निवारत्वादावश्यक्यरिष्टापत्तिः। तत्रेह किमु वक्तव्यम्? अतोऽविनाशप्रार्थनात्रात्यन्तमुचितैव। हे अग्ने अस्माकं त्वया सह सख्ये सखित्वे सति वयं मा रिषाम हिंसिता न भवाम। त्वमस्मान् परिपालयेत्यर्थः।

**अपः–अधिपतिम्।** शस्त्रषट्कसमुदितस्य षष्ठस्याह्नः प्रशंसा। अद्भिर- 11.४३-४७
पञ्चीकृताभिर्भूतान्तरोपलक्षिताभिरारब्धं हैरण्यगर्भं स्थानमप्छब्देनोच्यते। तत् सत्रिणोऽमी षष्ठेनाह्नानुष्ठितेन सता प्राप्ता भवन्ति। अतिच्छन्दसमतिच्छन्दः। पुंस्त्वं छान्दसम्। अर्वाचीमर्वागधोऽञ्चन्तीं गच्छन्तीमूर्ध्वाशाप्रतियोगिनीं दिशम्। ऋतूनां मध्ये शिशिरमन्त्यमृतुम्। प्रजापतिं हिरण्यगर्भम्। आप्नुवन्तीति सर्वत्रानुषञ्जनीयम्।

लोकं हैरण्यगर्भं परमतममतिच्छन्दआख्यं च छन्दः
स्तोमं चैव त्रयस्त्रिंशतमुपरिभवं रैवताह्वं च साम।
अर्वाचीं तद्वदाशामृतुमथ शिशिराख्यं तथा देवसङ्घं
विश्वान् देवान् प्रजेशं त्वधिपतिममुना सत्रिणोऽह्नाप्नुवन्ति॥

अभ्यासोऽध्यायसमाप्त्यर्थः॥

इत्येकादशः खण्डः

a. RV. 5. 55. 1–9. b. RV. 1. 94. 1–14.

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ।।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायस्त्र्यतिरिक्तविंशतिमितः कौषीतकिब्राह्मण-
व्याख्याने चरमं त्र्यहं प्रकटयन् पृष्ठ्यस्य निष्ठां गतः ।।

**इति कौषीतकिब्राह्मणव्याख्याने**
**तृतीयदशके तृतीयोऽध्यायः**

अथ

# चतुर्विंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
षळहयुगलभाजः शस्त्रजातस्य क्लृप्तिः
स्फुटमिति रचितात्र प्राक् प्रयोगक्रमेण ।
अभिजित इह तावद् वक्ष्यतेऽध्याय ऊर्ध्वं
स्वरपदयुतसामाख्यस्य[1] चाथ त्र्यहस्य ॥

प्रथमं चिकीर्षितं प्रतिजानीते—**अभिजित्–लोकान्** । अनन्तरमभिजि- 1. १,२
न्नामधेयः कश्चिदेकाहो विधास्यत इत्यर्थः । पुरा देवा अभिजिन्नाम्ना यागविशे-
षेणानुष्ठितेन साधनेन [2-]इमान् भूर्भुवःस्वराख्यान् लोकानभिजितवन्तः[-2] । अत
एवास्यैतन्नामकत्वमभिसंपन्नम् । अभिजयन्त्यनेनेति व्युत्पत्तिरस्य शब्दस्येत्युक्तं
भवति । उक्तं लोकत्रयाभिजयसाधनत्वं हेतूकृत्य सामगाभिमतां स्तोमक्लृप्तिं
प्रशंसति—**तस्मात्–भवति** । यद्यपि त्र्यावृत्त्वं चतुरुदयत्वं चाभिजित्संबन्धि- 1. ३
त्रिवृदादित्रयस्त्रिंशान्तस्तोमवर्त्येव तथापि स्तोमजीवितत्वादह्नः तदभेदाभि-
प्रायेण त्र्यावृच्चतुरुदय इत्यहर्विशेषणत्वेनायं व्यपदेशः । तथाहि—सर्वस्तोमे
अग्निष्टोमसंस्थे अभिजिति त्रिष्कृत्वः स्तोमावृत्तिः कर्तव्या । तत्र त्रिवृत्पञ्च-
दशसप्तदशैकविंशस्तोमानूर्ध्वान् क्रमेण कुर्यात् । सैका तावत् स्तोमावृत्तिः । ततः
पञ्चदशसप्तदशैकविंशत्रिणवस्तोमानूर्ध्वान् कुर्यात् । सा द्वितीयावृत्तिः । पुनः
सप्तदशैकविंशत्रिणवत्रयस्त्रिंशस्तोमान् कुर्यात् । सा तृतीयावृत्तिः । एवं चतुर्भिः
स्तोमैरूर्ध्वं गच्छद्भिः त्रिवारं स्तोमावृत्त्या द्वादशकृत्वः[3] स्तोत्रनिर्वहणे[4] सति[5]

1. B. omits up to this.
2–2. B. omits
3. B. T. द्वादशसंस्तोत्रकृत्वः
4. B. T. निर्वहणे
5. B. T. add न

स्तोमानां त्र्यावृत्त्वं चतुरुदयत्वं च[1] द्रष्टव्यम् । तथा च तेषां वचनम्—'त्रिवृत्पञ्चदशं सप्तदशमेकविंशम् , पञ्चदशं सप्तदशमेकविंशं[2] त्रिणवम् , सप्तदशमेकविंशं त्रिणवं त्रयस्त्रिंशमिति त्र्यावृतश्चतुरुत्तरिणोऽभिजितः स्तोमाः[a] इति ।

1. ४,५ प्रसङ्गाद् विश्वजितमधिकृत्याह— **विश्वजिता-भवति ।** विश्वजिति पुनस्त्रिभिरुक्तैः स्तोमैश्चतुष्कृत्व आवृत्तिः कर्तव्या । तथा च तद्वचनम्—'त्रिवृत् पञ्चदशं सप्तदशं पञ्चदशं सप्तदशमेकविंशं सप्तदशमेकविंशं त्रिणवमेकविंशं त्रिणवं त्रयस्त्रिंशमिति चतुरावृतो त्रिरुत्तरिणो[3] विश्वजितः स्तोमाः'[b] इति ।

1. ६-९ अभिजिद्विश्वजितोः संबन्धं सूचयन् स्तौति—**अभिजित्-विश्वजित् ।** अयमभिजिच्छब्दवाच्यो भवति । कस्मात् ? यस्माद् देवा अभिजिता लोकानभिजितवन्तः । तस्मादभिजिच्छब्दवाच्योऽसौ जातः । तदा तदभिजितं जगदनुषक्तमनुगतं स्वाधीनतया स्थितमेवाभूत् । तत्र यदजितं परिशिष्टमभूत् तज्जयाय विश्वजितमनुष्ठितवन्तः । तेन शिष्टमपि जितवन्तः । अतो विश्वं सर्वं जितवन्तोऽनेनेति विश्वजिच्छब्दः संवृत्तः ।

1.१०-१४ अथेन्द्राग्नीरूपेण स्तौति—**तौ-अजयत् ।** अग्नेः सर्वदाहहेतुत्वात् 'विश्वादम्'[c] इति मन्त्रवर्णाच्च सर्वाभिजेतृत्वम् । इन्द्रस्य सर्वेश्वरत्वात् । 'विश्वस्मादिन्द्र उत्तरः'[d] इति मन्त्राच्च विश्वजित्त्वम् । एवं प्राधान्येनाभिजितः स्तुतिः कृता ।

अथ क्रमानुरोधेनाभिजितः शस्त्रक्लृप्तिं विधित्सुस्तदुपयोगितया पूर्व-
1.१५-१८ कारिणां सामगानामभिमतिं[4] दर्शयति—**स-बार्हतराथन्तराणि ।** स विधास्यमानतया प्रकृतोऽभिजिन्नामा एकाहः पुनरुभयसामा भवति । उभयं बृहद् रथन्तरं च सामनिर्वाहकं यस्य स उभयसामा । तथा सर्वे त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाख्या स्तोमाः अस्येति सर्वस्तोमश्च भवति । सर्व-

a. b.
c. RV. 8. 44. 26. d. RV. 10. 86. 1.

1. T. omits
2. B. T. omit पञ्चदशं सप्तदशमेकविंशं
3. T. चतुरावृत्त...
4. B. °मभिमितिमिगे; T. °मभिमतिविंश

शब्दस्य परिमितविषयत्वदर्शनात् । स्तोमान्तरस्यैतत् स्तोमकार्यत्वेनात्रैवान्तर्भावाच्च । उभयसामत्वे चाभिजितोऽस्य रथन्तराख्यसाम प्रत्यक्षं निष्केवल्यशस्त्रसंबन्धि पृष्ठं भवति । बृहत् साम पुनरार्भवपवमानसंबन्धि भवति । यस्मादुक्तेन प्रकारेणोभयसामायमभिजित् तस्माद्धेतोरत्र बृहद्रूपयुक्तानि रथन्तररूपयुक्तानीत्येवं द्विप्रकाराणि सूक्तानि शंसनीयानि । एवं सत्येव ह्याभिरूप्यं सिध्यति ।

संप्रति आज्यशस्त्रं विधत्ते—**तस्य-बार्हतम्** । तस्याभिजित एते उभे 1.१९-२१
सूक्तं तृचं च समुदितमाज्यशस्त्रं भवति । तत्र 'प्र वो देवाय'[a] इति सूक्तं रथन्तररूपसंपन्नम् । यस्मादत्र प्रेति यच्छब्दरूपमस्ति तद् रथन्तररूपं भवति । प्रोपसर्गस्य प्राथम्यद्योतकत्वात् । पृष्ठानां मध्ये रथन्तरस्य प्राथम्यात् । यद्वा प्रशब्दस्य रथन्तरनिर्वहणीयप्रथमाह्नो रूपत्वाद् राथन्तरत्वम् । तथा 'यद् वाहिष्ठम्'[b] इत्यस्मिन् तृचे 'बृहदर्च विभावसो' इति यः पादोऽस्ति तत्र बृहदिति पदं साक्षादेव बृहतोऽभिधायकत्वात् बृहत्संबन्धि रूपं भवति । अतो बृहद्रथन्तररूपद्वयसंपत्त्या प्रशस्तमेतदाज्यशस्त्रम् । सूत्रितं च—'प्र वो देवाय यद् वाहिष्ठमित्याज्यम्'[c] इति ।

प्रउगशस्त्रमाह—**उभौ-संप्रवयेत्** । यो राथन्तरो माधुच्छन्दसः प्रउगः 1. २२
यश्च बार्हतो गार्त्समदः तावुभावपि प्रउगौ । तृचशः संश्लेषयेत् । संश्लिष्टौ च तावत्र प्रउगशस्त्रं भवति ॥

इति प्रथमः खण्डः

कथं संप्रवयेदित्याकाङ्क्षिते सति तत्प्रकारमाह—**वायव्याम्-संप्रवयेत्** । 2. १-५
'वायुरग्रेगा'[d] इत्यादिका वायुदेवत्या पुरोरुक् । तां पूर्वं पठित्वानन्तरमुभे यथाक्रमं माधुच्छन्दसगार्त्समदे वायुदेवत्ये तृचे पठेत् । अनन्तरं 'इन्द्रवायू इमे'[1][e]

a. RV. 3. 13.
b. RV. 5. 25. 7.
c. ŚŚ. 11. 10. 2.
d. ŚŚ. 7. 10. 9.
e. RV. 1. 2. 4.

1. MSS. इन्द्रवायू अर्हन्त (?)

इतीन्द्रवायुदेवत्यां पुरोरुचमुक्त्वा अनन्तरमिन्द्रवायुदेवत्ये माधुच्छन्दसगार्त्समदे तृचे पठेत्। अथ मित्रावरुणदेवत्यां पुरोरुचमुक्त्वा उभे माधुच्छन्दसगार्त्समदे मैत्रावरुणे तृचे पठेत्। अनन्तरमाश्विनीं पुरोरुचमुक्त्वा आश्विनं तृचं पठेत्। एवमुक्तेनैव प्रकारेण प्रउगयोः संप्रवयनं कर्तव्यम्। न त्वन्येन केनचित् प्रकारेण।

2. ६ तृचमेलने चायं क्रम इत्याह—**माधुच्छन्दसानि-उत्तराणि।** अत्र सूत्रम्—'उभौ माधुच्छन्दसगार्त्समदौ प्रउगौ। माधुच्छन्दसानि पूर्वाणि तृचानि। गार्त्समदान्युत्तराणि'[a] इति।

2. ७,८ अत्रैव पक्षान्तरमाह—**तदु-पर्याहरेत्।** तत् तत्र प्रउगे विषय एव केचिच्छाखिन आहुः। तावुभौ प्रउगौ किं संप्रवयेत्? किंशब्दः क्षेपे। न संप्रवयेदित्यर्थः। किं तर्हि कर्तव्यमित्यत्राह[1]—माधुच्छन्दस एवात्र प्रउगे भवति गार्त्समदं वैश्वदेवतृचं माधुच्छन्दसस्य वैश्वदेवतृचस्योपरिष्टात् पठेत्। माधुच्छन्दसेष्वेव वायव्यादिषु तृचेषु क्रमेण पठ्यमानेषु सत्सु यदा वैश्वदेवं तृचं पठितं भवति तदा प्रकृताविव तदनन्तरप्राप्तं सारस्वततृचपठनमकृत्वा ततः प्राक् गार्त्समदं वैश्वदेवं तृचं पठेत्। न तु पूर्वोक्तप्रकारेण सर्वेषां तृचानां संश्लेषणं कर्तव्यम्।

2. ९-१२ गार्त्समदं वैश्वदेवतृचं बृहद्रूपसंपत्त्या स्तौति—**तद्-रूपम्।** अत्रास्मिन् वैश्वदेवतृचे तदेतदेवैकं निरुक्तं बार्हतं पदमस्ति। निरुक्तं च तत् बार्हतं च तथा। निरुक्तत्वं साक्षादेवात्र बृहतः प्रतीतेः[2]। किं तदित्यत्रोदाहृतम्—विश्वे देवास इति। ननु नात्र साक्षाद् बृहत्सामाभिधायकं बृहत्पदं श्रूयते, यथा—'बृहदर्च विभावसो'[b] इति। कथं निरुक्तबार्हतपदसत्तोक्तिरित्यत्राह—बर्हिरिति। यद् बर्हिरिति पदमस्ति तद् बार्हतं रूपं भवति। बर्हिरित्यस्याक्षरसाम्याद् बृहत्पदप्रत्यायकतया बृहत्साम्नः प्रतीतिहेतुरेतत् पदमित्यर्थः।

2.१३-१६ अथ शस्यक्रममाह—**अथ-एव।** गार्त्समदवैश्वदेवतृचादनन्तरं 'पावका

a. ŚŚ. 11. 10. 3–4. b. RV. 5. 26. 7.

1. B. आहुः for आह 2. B. omits

नः'[a] इत्यादिकं सारस्वतं तृचं पठित्वा तस्यैव तृचस्यान्त्यया 'महो अर्णः'[b] इत्यनया ऋचा शस्त्रं समापयेत् । इति शब्दः 'तदु वा आहुः' इति पूर्वेण योजनीयः । अथ स्वमतमाह—ऐकाहिकमिति । एकाहे प्रकृतिभूते अग्निष्टोमे यदुत्पन्नं तदेवात्राभिजिति प्रातःसवनं भवेदित्येव सिद्धान्तः । योऽयमभिजित् स एकाह्ना समाप्यत्वादेकाह एव । एकाहश्च प्रतिष्ठारूपो भवति । तत्प्रकृतित्वेन सर्वक्रतूनां तत्प्रतिष्ठत्वात् । कृत्स्नस्याङ्गजातस्य तत्रोपदेशत एव प्रापितत्वाद् वा । अतः प्रतिष्ठाफलार्थमैकाहिकमेव[1] प्रातःसवनं ग्राह्यम् ।

प्र यद्वाहिष्ठमित्येतद् द्वयं सूक्ततृचात्मकम् ।
मिलितं स्यादाज्यशस्त्रं प्रउगं तु समाहृतौ ॥
मधुच्छन्दो गृत्समदावित्येकः पक्ष ईरितः ।
आज्यं यथोक्तं प्रउगे विशेषः कोऽपि विद्यते ॥
मधुच्छन्दो वैश्वदेवादधि[2] गृत्समदोदितम् ।
वैश्वदेवं भवेदन्यन्माधुच्छन्दसमेव तु ॥
इति द्वितीयः पक्षोऽत्र सिद्धान्तः संप्रकीर्तितः ।
ऐकाहिकं निर्विशेषं प्रातःसवनमस्त्विति ॥

इति द्वितीयः खण्डः

प्रातः सवनमुक्त्वेति माध्यंदिननिवेशिनोः ।
शस्त्रयोरभिजित्यत्र विशेषं विदधात्यथ ॥

तत्र तावन्मरुत्वतीयशस्त्रे विशेषमाह—**जनिष्ठा-दधाति** । गौरिवीति- 3. १
नाम्ना महर्षिणा दृष्टत्वात् गौरिवीतम् । प्रशंसार्थे[3] तद् विशेषणम् । तथान्यत्र श्रूयते—'गौरिवीतिर्ह वै शाक्त्यो नेदिष्ठं स्वर्गस्य लोकस्यागच्छत् स एतत् सूक्तमपश्यत् । तेन स्वर्गं लोकमजयत् । तथैवैतद् यजमान एतेन

a. RV. 1. 3. 10. b. RV. 1. 3. 12.

1. B. T. फलार्थत्वम् for फलार्थम् 2. B. M. वैश्वदेवावधि
3. T. प्रशंसात्वे

सूक्तेन लोकं जयति'[a] इति । पूर्वमादावित्यर्थः । दधाति स्थापयति । सूत्रितं च—'इन्द्र पिब तुभ्यं सुतो मदायेत्यैकाहिकादूर्ध्वं मरुत्वतीयाद्'[b] इति ।

3. २ निष्केवल्ये विशेषमाह—**इन्द्रस्य-दधाति**। हिरण्यस्तूपनाम्ना महर्षिणा दृष्टत्वाद्धैरण्यस्तूपम् । एतदपि स्तुत्यर्थं प्रकृतौ विध्यर्थद्योतनार्थं च । तदप्यन्यत्र श्रुतम्—'एतेन वै सूक्तेन हिरण्यस्तूप आङ्गिरस इन्द्रस्य प्रियं धामोपागच्छत् । स परमं लोकमजयद्'[c] इति । यथोक्तस्य विशेषस्याभिजितो रथ-
3. ३ न्तरप्रत्यक्षपृष्ठत्वाङ्गीकारपक्षैकविषयत्वमाह—**एवं-भवति**। यदि रथन्तराख्यं निष्केवल्यशस्त्रसंबन्धि क्रियेत तदैवोक्तप्रकारो विशेषः कर्तव्यः। बृहतः प्रत्यक्ष-
3. ४,५ पृष्ठत्वाङ्गीकारे तु सोऽन्यादृश इत्याह—**यद्यु-इति**। बृहदिति बार्हते 'इन्द्र पिब'[d] 'या त ऊतिः'[e] इत्येते सूक्ते । राथन्तरयोः गौरिवीतहैरण्यस्तूपयोः इति केचिदाहुरिति शेषः ।

3.६ एतन्मतावधीरणेन स्वमतमाह—**एकसूक्ते-स्थितिः**। प्रागुपक्षिप्तमते खलु द्विषूक्ते निष्केवल्यमरुत्वतीयशस्त्रे भवतः। न पुनरेषा स्थितिः । एकसूक्त एव । एकाहत्वात् प्रकृतिवदेकं सूक्तं ययोस्ते तथा । के ते सूक्ते इति ? ते दर्श-
3.७,८ यति—**पिबा-रूपम्**। अनयोरभिजित्याभिरूप्यमाह—अभिवती इति । 'अभि यमुग्रे'[f] इति, 'अभिभूत्योजा'[g] इति च अभिशब्दयुक्ते भवतः । तदेतदभिवत्त्वमभिजितो रूपं भवति । अभिशब्दवत्त्वरूपसाम्यात् । सूत्रितं च—'एकसूक्ते वा पिबा सोममभितमुष्टुहीति'[h] इति । यथा माध्यंदिने कश्चिद् यथोक्तो विशेषः, न तथा तृतीयसवने कोऽपि विशेषः। किं तु अन्यूनानतिरिक्तं प्राकृतमेव कर्तव्य-
3.९-११ जातं तत्रेत्याह—**अथ-एव**। इति गतम् ।

त्रिभिरित्यभिजिद् व्यधायि खण्डैः परिशिष्टैरिह पञ्चभिस्तु भूयः ।
कमपि त्रियहं क्रमानुरोधाद् विदधाति स्वरसामनामधेयम् ॥

इति तृतीयः खण्डः

a. AB. 3. 19. 4.
b. ŚŚ. 11. 10. 7.
c. AB. 3. 24. 11.
d. RV. 6. 40.
e. RV. 6. 25.
f. RV. 6. 17. 1.
g. RV. 6. 18. 1.
h. ŚŚ. 11. 10. 10.

तत्र त्र्यहस्य पुनरस्य विधित्सितस्य सोपानपर्वगमनागमनोपमित्या ।
कर्तव्यतां विषुवतः पुरतस्तथोर्ध्वमाख्यायिकाकथनतः प्रथमं ब्रवीति ॥

**स्वर्भानुः-अपघ्नते** । पुरा किलासुरपुत्रः स्वर्भानुः सैंहिकेयः सूर्यं तमसा 4.१-६
अन्धकारेणाच्छादितवान् । तदा नष्टसूर्ये जगति सति लोकोपकारपरायणाः केचिदत्रिनामानो महानुभावा महर्षयः सूर्याच्छादकमन्धकारमपहृत्य सूर्यमाविर्भावयितुमिच्छन्तः तत्साधनभूतमीश्वरानुग्रहादेवं वक्ष्यमाणं सप्तदशस्तोमं स्वरसामनामानं त्र्यहं दृष्ट्वा तं विषुवत आदित्याधिदैवतस्याह्नः पुरस्ताद् अभिजित ऊर्ध्वमन्वतिष्ठन् । अनुष्ठितेन च तेन साधनेनादित्यस्य पुरस्ताद्वर्तमानमाच्छादकं स्वर्भानुसृष्टं तमोऽपहृतवन्तः । अपहृतं तु तत्तमः तस्य सूर्यस्योपरिष्टान्निविष्टम् । स्वर्भानुरादित्यस्योपरिष्टाद्वर्तमानानवेक्ष्य तच्छादनार्थं मायया तमस्तत्र सृष्टवान् । अनन्तरमत्रयो महानुभावा महर्षयः चित्रमस्य दौरात्म्यमिति पुरस्तादनुष्ठितमेव त्र्यहमुपरिष्टादप्यनुष्ठाय तदप्यपहृतवन्तः । यस्मादेवं तस्मादिदानीमपि ये सत्रिणो यजमाना उक्ताख्यायिकाभिज्ञा विषुवन्नामकस्याह्नः प्रागूर्ध्वं च स्वरसामसंज्ञं त्र्यहमनुतिष्ठन्ति, त उभयलोकप्राप्तिप्रतिबन्धकं पाप्मानमपहृत्यास्मिन् लोके परस्मिंश्च समस्तान् समग्रानेव कामान् प्राप्नुवन्ति ।

अथैतस्य त्र्यहस्य वैदिकप्रसिद्धस्वरसामनामकत्वोक्तिपुरःसरमुक्तार्थाभिधायकत्वेन तन्नामनिर्वचनं दर्शयन् स्तौति—**तान्-स्वरसामानः** । तान् 4.१०-१३
प्रकृतान् विषुवतः प्रागूर्ध्वं चानुष्ठेयान् त्रीन् यागविशेषान् वैदिकाः स्वरसामान इत्येवमनादिपारम्पर्यप्रसिद्धेन नाम्ना व्यपदिशन्ति । न चैतदेषां नाम डित्थादिनामवद् यादृच्छिकमेव । यस्मादेतैः स्वरसामभिरत्रिनामानो महर्षय आदित्यं स्वर्भानुसृष्टमायाब्धिनिमग्नमविद्यमानमिव भवन्तं तत्तमोनिराकरणेन तस्मात् तमस उत्तारितवन्तः । स्पृणोतिः वारणकर्मा । तत्रास्पृण्वतेति यदस्ति तस्मादक्षरसाम्यात् स्वरसामनामानः संवृत्ताः । उक्तेऽर्थे कांचिदृचं संवादयति—**तद्-अभ्युक्ताः** । यदेतद् वस्तु प्रागुक्तं तदेतत् कयापि दाश- 4. १४-१७
तयीप्रसिद्धया ऋचा स्पष्टमुक्तम् । यं सूर्यमासुरः स्वर्भानुः तमसाविध्यत् तं सूर्यमत्रिसंज्ञा महर्षयः एवाविन्दन् । अन्ये केचिदप्यसामर्थ्यान्नान्वविन्दन्नित्यन्वयः । नन्वस्यामृचि स्वरसाम्नां प्रसङ्गोऽपि नावगम्यते । कथमस्या उक्ताख्या-

यिकार्थसंवादकत्वमित्याशङ्क्याह—**स्वरसामानो वा इति**। वैशब्दः प्रसिद्धौ। शब्दतः स्वरसाम्नां सूर्याच्छादकतमोनिवर्तकतया अत्रिभिर्दर्शनपूर्वकमनुष्ठितत्व-प्रतीत्यभावेऽपि तथाख्यायिकाविदामभियुक्तानां प्रसिद्धेरेव तदर्थसंवादकत्वमस्या एष्टव्यमित्यर्थः। एतेन मन्त्रेण भवन्तीत्येवमध्याहारः।

विधास्यसमानानां मरुत्वतीयशस्त्रसूक्तानां निष्केवल्यसंबन्धिनां प्रगाथानां
4.१८-२१ च कशब्दयुक्तत्वं स्तौति—**कद्वन्ति-स्वरसामानः**। प्रागाथा भवन्तीत्यनुषङ्गः।
मरुत्वतीयशस्त्रसंबन्धीनि यानि 'क्व स्य वीरः'[a] इत्यादीनि सूक्तानि तानि
कशब्दसंयुक्तानि भवन्ति। निष्केवल्यशस्त्रसंबन्धिनो ये प्रगाथाः तेऽपि कशब्द-
युक्ता भवन्ति। तदेतच्च कद्वत्त्वम् युक्तमेवात्र। यस्मात् कशब्देन प्रजापति-
रुच्यते। स्वरसामानश्च प्रजापतिरेव। अपरिच्छिन्नमाहात्म्यत्वात्। अतः
प्रजापतिरूपस्वरसामसु कद्वत्त्वमभिरूपमेव। येषु निवित्पदानि प्रक्षिप्यन्ते तेषां
निविद्धानाख्यानां सूक्तानामनुष्टुप्छन्दस्कतां स्तौति—**आनुष्टुभानि-स्वर-**
4.२२-२४ **सामानः**। यस्मादनुष्टुप् नाम आपः सांसिद्धिकद्रवत्वलक्षणा एव भवन्ति।
स्वरसामानोऽप्याय एव। अतोऽनुष्टुभां स्वरसाम्नां चाब्रूप्यैक्यादाभिरूप्यम्।
कथमपामनुष्टुब्रूपत्वमिति चेत्—**अद्भिः-अनुस्तब्धम्**। यस्मादिदं सर्वं जग-
4.२५ दद्भिरनुस्तब्धं लब्धप्रतिष्ठं भवति। न ह्यपो विना जगत् स्थितिं लभते। तथा
चाहुः—'पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम्'[b] इति। अनुस्तम्भ-
नाच्चानुष्टुप्च्छब्दवृत्तिः। भूतान्तरसंसृष्टानामपामखिलजगत्प्रतिष्ठारूपत्वाद्
वा। अतोऽनुस्तम्भनार्थसाम्यादपामनुष्टुब्रूपत्वम्। स्वरसाम्नामबात्मकत्वं
पुनः कथमिति चेत्, आदित्यस्याधस्तादुपरि च वर्तमानत्वसाम्यात्। **उभ-**
4.२६ **यतो-च**। यस्मादमुं दृश्यमानमादित्यमुभयतः अधस्तादुपरि चादित्यं परिवेष्टच
4.२७,२८ स्थिता भवन्ति। अस्मिन्नर्थे कामप्यृचं प्रमाणयति—**तद्-इति**। आदित्य-
द्वयभागेऽपां वर्तनलक्षणं वस्तु। ऋचार्धर्चेन। अथवा संभूयकारित्वात् सर्वापि
ऋगुक्तार्थाभिवादिनीति। स्वरसामानश्चादित्यात्मकस्य विषुवतोऽधस्तादूर्ध्वं च
स्थिता भवन्ति। अनेन साम्येन स्वरसाम्नामबात्मकत्वमिति॥

इति चतुर्थः खण्डः

a. RV. 5. 30. 1.

b.

इदानीं क्रमेण शस्त्रक्लृप्तिं करिष्यन् त्रयाणां स्वरसाम्नामाज्यशस्त्रक्लृप्तिं तावद् विधत्ते—**आ-राथन्तरम्**। यत् प्रथमं स्वरसामाहरस्ति तस्य 5. १-३
'आ यज्ञैः'[a] इत्याज्यशस्त्रं भवति। तच्चैतद् आङ्[1] इत्युपसर्गवत्त्वाद् राथन्तरं रथन्तरसंबन्धि भवति। आवत्त्वस्य प्रथमाह्नो रूपत्वाद् राथन्तरत्वम्। द्वितीयस्य तृतीयस्येत्यत्रापि स्वरसाम्न आज्यमित्यनुषञ्जनीयम्।

अथ क्रमेण प्रउगशस्त्रं विधत्ते—**माधुच्छन्दसः-ब्राह्मणम्**। तेषामुक्तमिति। 5. ४-७
'रथन्तरं वै साम सृज्यमानम्'[b] इत्यादि। मरुत्वतीयशस्त्रेषु त्रिषु प्रतिपदनुचरब्राह्मणस्पत्यान् पार्ष्ठिकान् पूर्वत्र्यहादतिदिशति—**अन्वायत्ता-ब्राह्मणम्**। त्रि- 5. ८,९
ष्वपि स्वरसामसु यानि मरुत्वतीयशस्त्राणि तेषां प्रतिपदनुचरास्त्र्यहरूपेणान्वायत्ता भवन्ति। तथा ब्राह्मणस्पत्याः प्रगाथा अपि त्र्यहरूपेणान्वायत्ता भवन्ति। पृष्ठ्यषळहपूर्वत्र्यहस्य रूपं त्र्यहात्मकत्वम्। तेन रूपेण तदीया एव प्रतिपदनुचरब्राह्मणस्पत्याः त्रिषु स्वरसामसु क्रमादनुगता भवन्ति।

आ त्वा रथमिदं प्रैतु प्रथमे स्वरसामनि।
विश्वानरस्येन्द्र उदुत्तिष्ठेत्येते द्वितीयके॥
तं तमित्त्रय इन्द्रस्य प्र नूनमिति तेऽन्तिमे।
एवं क्रमादिहानेयाः पृष्ठ्यपूर्वत्र्यहादमी॥

तेषामुक्तमिति। 'तिस्रो मरुत्वतीयानाम्'[c] इत्यादि। क्रमेण त्रिषु सूक्तं
विधत्ते—**क्वस्य-स्वरसामानः**। मरुत्वतीयं भवतीति शेषः। तच्च क्वेति पदेन 5. १०-१४
कशब्दयुक्तम्। वकारस्य विग्रहणे सति ककारस्य व्यक्तीभवनात्। 'ता कर्माषतरास्मै'[d] इति पादोऽत्रास्तीति शेषः। अत्र यत् कर्मपदं तेन कशब्दयुक्तमिदं सूक्तमित्यर्थः। कद्वत्त्वमत्राभिरूपमित्याह—को वै इति। इह निष्केवल्यशस्त्रे तावद् यदनुरोधिन्यस्माकं शस्त्रक्लृप्तिव्यवस्थितिः सा पूर्वकारिणां छन्दोगानां स्तोत्रक्लृप्तिस्त्रेधा प्रतायमानावगम्यते। स्वरसामसु संज्ञानुसारेणैव स्वराख्यान्येव पृष्ठानि भवेयुरित्येकः पक्षः। बृहद्रथन्तरे पृष्ठे स्तः। ते तु

a. RV. 5. 17. 1.
b. KB. XX. 2. ६.
c. KB. XX. 5. २३.
d. RV. 1. 173. 4.

1. T. आ

स्वरसामयोनिभूतास्वृक्षु प्रयोज्ये इत्येवमन्यः। यथाप्रकृति[1] बृहद्रथन्तरे एव
स्यातामित्यपरः। तत्राद्यपक्षद्वयाङ्गीकारिणो बृहद्रथन्तरसामनी पवमानेषु
कुर्वन्ति। अन्त्यपक्षावलम्बिनस्तु स्वरसामानि पवमानेषु कुर्वन्तो दृश्यन्ते।
इत्येवं छन्दोगानां त्रेधा स्थितेर्दर्शनात् तदनुरोधेन स्वरपृष्ठपक्षे शस्त्रक्लृप्तिं
5.१५-१७ करोति—**यज्जायथा-धाय्या**। एके छन्दोगाः 'आमासु पक्वमैरयः'[a] इत्येषा
बृहतीछन्दस्का त्रिसंख्यापूरणी ऋग् यस्य तस्मिन् 'यज्जायथा'[b] इत्येतस्मिन्
स्तोत्रिये तृचे स्वराख्यानि सामानि स्वरसामत्र्यहे अहन्यहनि अन्वायातयन्ति[2]
कुर्वन्ति। ते छन्दोगाः तथोक्तेन प्रकारेण स्तुतिं कुर्युर्यदि तर्ह्यस्माकं शस्त्रेऽ-
प्येतावेव स्तोत्रियानुरूपौ भवतः। काविति चेत्, 'यज्जायथा'[b] इत्ययमेव
स्तोत्रियः। यद्यपि स्तोत्रिय एवात्रोक्तस्तथाप्युपलक्षणन्यायेन 'यदिन्द्र चित्र
मेहना'[c] इति द्वे ऋचे 'या इन्द्र भुज आभरः'[d] इति च समुदितस्तृचोऽनुरूपो
गृहीतः। सूत्रकारेण दर्शितत्वात्। तथा च सूत्रम्—'यदिन्द्र चित्रमेहनेति द्वे।
या इन्द्र भुज आभरेति तृतीयानुरूपस्य'[e] इति। एवं स्तोत्रियानुरूपौ 'यज्जा-
यथा'[b] 'यदिन्द्र'[c] इत्येतावेव भवतः। तथा एषा प्रकृतावुत्पन्नैव[3] धाय्या
पठनीया।

5.१८ धाय्यानन्तरं कद्वतः प्रगाथस्य पठनं विधत्ते—**कन्नव्यः-ब्राह्मणम्।**
तस्योक्तमिति 'को वै प्रजापतिः'[f] इत्यादि। कद्वत्प्रगाथानन्तरम् 'अभि त्वा
5.१९ शूर'[g] इति रथन्तरयोन्यृक्पठनं विधत्ते—**अथ-ब्राह्मणम्**। पठनीयेति शेषः।
तस्या उक्तमिति। 'अथ यद् बृहत्या प्रतिपद्यते'[h] इत्यादि। कंचिद् द्वृचं
5.२०-२४ विधत्ते—**यम्-राथन्तरम्**। इति द्वृचः पठनीय इति शेषः। कस्माद् द्वृच-
शंसनम्? एकैव ऋक् कुतो[4] न पठ्यताम्? इत्यत्राह—अनेकपातितताया इति।

a. RV. 8. 89. 7.
b. RV. 8. 89. 5.
c. RV. 5. 39. 1.
d. RV. 8. 97. 1.
e. ŚS. 11. 11. 15.
f. KB. XXIV. 4. २०.
g. RV. 7. 32. 22.
h. KB. XV. 5. ५.

1. B. यथाप्रकृती
2. T. अन्वातयन्ति
3. T. उत्पन्नेव for उत्पन्नैव
4. B. adds वा

एकपातिता वा कस्मात् पर्युदस्यत इत्यत्राह—नेदसाविति । असौ 'यमिन्द्र'[a] इत्येषा बृहती 'य इन्द्र सस्ति'[b] इत्यनया रहिता सत्येकाकिनी असहायैव शस्त्रे पठिता स्यात् । न च बृहत्या एकाकित्वं युक्तम् ; प्रग्रथनधर्मत्वप्रसिद्धेः । अत एकाकिनीं तां न करवाणीति परिभयेन द्व्यृचं पठेत् । तृचं विधत्ते—इन्द्र तुभ्य-मिति । तृचं पठेदिति शेषः । कुतस्तृचत्वविनिगमनमिति चेत् , श्रुतिहृदयाभिज्ञसूत्रकारवचनादिति ब्रूमः । सूत्र्यते खलु 'इन्द्र तुभ्यमिन्मघवन्नभूमेति नवानां तिस्रस्तिस्रोऽन्वहम्'[c] इति । तथा 'अध्वर्यो वीरेदं त्यद्' इति प्रतीकग्रहणसामर्थ्यादपि तृचत्वमवधार्यते । तस्योक्तमिति 'त्रैष्टुभ इन्द्रः'[d] इत्यादि । सूक्तं विधत्ते—यस्ते इति । अनुष्टुप्छन्दस्कं निष्केवल्यमिति । तस्योक्तमिति 'आपो वा अनुष्टुब्'[e] इत्यादि । अस्याभिरूप्यमाह—इन्द्र इति । आङुपसर्गश्रवणाद् आवत् । अत एव रथन्तरसंबन्धि । तेनाभिरूप्यम् ॥

इति पञ्चमः खण्डः

प्रथमाहःशस्त्रक्लृप्तिमुपसंहरति—**इत्यु-प्रथमस्य** । प्रथमस्य स्वरसाम्न 6. १
इति इत्थमेव निष्केवल्यशस्त्रं भवतीत्यर्थः । द्वितीयतृतीयस्वरसामाहःशस्त्र-
कल्पकवाक्यसन्दर्भ एवमेव योजनीयः । **कदू-द्वितीयस्य** । 'कदू न्वस्य'[f] इत्यत्र 6. २-९
प्रथमं कशब्दश्रवणात् तस्य कद्वत्त्वम् । तृतीयाहर्विशेषमाह—**इमा-तृतीयस्य** । 6.१०-१८
ननु 'इमा उ त्वा'[g] इत्यस्य कथं कद्वत्त्वम् ? पूर्वयोरिवात्र कशब्दाश्रवणादित्या-
शङ्क्य अश्रवणमसिद्धमित्याह—पावकवर्णा इति । पावकवर्णा इत्यस्मिन् पादे
वकारात् परस्य[1] कस्यचित् ककारस्य श्रवणात् कद्वत्त्वमस्याप्यस्त्येवेत्यर्थः ।
अभिवत्त्वस्य बार्हतचतुर्थाह्नो रूपत्वेनोक्तत्वाद् बार्हतत्वम् ।

a. RV. 8. 97. 2.
b. RV. 8. 97. 3.
c. ŚŚ. 11. 12. 5.
d. KB. XXIII. 2. १२.
e. KB. XXIV. 4. २३.
f. RV. 8. 66. 9.
g. RV. 8. 3. 3.

1. T. omits

उक्तायाः[1] शस्त्रक्लृप्तेः सामगविशेषाङ्गीकृतस्वरपृष्ठपक्षविषयत्वमाह—

6. १९ **एवं-भवन्ति।** यदि स्वरसामानः स्वरपृष्ठा भवन्ति तर्हि उक्तप्रकारं शस्त्रं भवतीत्यर्थः। स्वरयोनिषु बृहद्रथन्तरसामप्रापणपक्षे प्रकृतामेव शस्त्रक्लृप्ति-
6.२०,२१ मतिदिशति—**यदि-अविकृतम्।** ऊळ्हे प्रापिते। यदि सामगाः स्वरयोनिषु बृहद्रथन्तरे प्रापयेयुः तदाप्युक्तप्रकारं विशेषलेशेनापि रहितमेतदेव शस्त्रं
6.२२,२३ जानीयात्। बृहद्रथन्तरपृष्ठपक्षे तु विशेषोऽस्त्येवेत्याह—**यद्यु-धाय्या।** प्रकृतिसिद्धा एव बृहद्रथन्तरसंबन्धिनः स्तोत्रियाः पठितव्याः। तद्यथा—

आद्येऽभित्वेत्यहनि भवति स्तोत्रियोऽसौ द्वितीये
त्वामिद्धीति प्रथमवदभित्वेत्यसावेव च स्यात्।
तार्तीयीके त्वहनि बृहतः कद्वतस्तु प्रगाथा-
दूर्ध्वं सूक्तादपि च पुरतः शंसनीयात्र योनिः॥

एवमनुरूपतृचाश्च प्रकृतौ प्रसिद्धा एव पठनीयाः। धाय्या च प्रसिद्धैव शंसनीया।

प्राक् स्तोत्रियानुरूपौ धाय्या कद्वत्प्रगाथयोन्योऽथ।
द्वृचतृचसूक्तानि ततो निष्केवल्येषु शस्यानि॥
योनी रथन्तरस्य प्रथमे बृहतो द्वितीये तु।
शस्या द्वयोस्तृतीये तत्र च पूर्वं रथन्तरस्यास्तु॥
यः स्तोत्रियः श्रुतिगिरा स्वयमभ्यधायि
'यज्जायथा'[a] इति भवेदुपलक्षणं तत्।
अन्येऽपि सामगवशात् कतिचित् प्रभेदाः
स्युः स्तोत्रियस्थितिजुषोऽप्यनुरूपगाश्च॥
'यज्जायथा अपूर्व्येति'[a] स्तोत्रियोऽहस्सु यस्त्रिषु।
'यदिन्द्र'[b] द्वे च 'या इन्द्रे'[c]त्येष चाप्यनुरूपकः॥
द्वितीये 'मत्स्यपायीति'[d] स्तोत्रियः स्याद्विकल्पकः।

a. RV. 8. 89. 5. b. RV. 5. 39. 1–2.
c. RV. 8. 97. 1. d. RV. 1. 175. 1.

1. T. कृतायाः

प्रथमां बृहतीमत्र तृतीयां विदधीत च ॥
स्तोत्रियेऽस्मिश्च विहिते 'मत्सि नो वस्य इष्टये'[a]।
इत्येते द्वे 'वयं घेति'[b] तृतीयं सोऽनुरूपकः ॥
विकल्पितस्तृतीये तु 'प्रत्यस्मा'[c] इति तत्र च।
तृतीयामृचमुत्सृज्य चतुर्थीं तत्पदे पठेत् ॥
पक्षेऽस्मिन् 'इममिन्द्रेति'[d] द्वे 'क ईं वेद'[e] वैष तु।
अनुरूपो भवेदस्मिन् पक्षे नाद्ये विकल्पना ॥
स्तोत्रिये यत्र बृहती मुखे मध्येऽन्ततोऽथवा।
अनुरूपेऽपि तत्रैव बृहती स्यादिति स्थितिः ॥

इति षष्ठः खण्डः

अपरं विशेषमाह—**साम्नोः-च**। स्वरपृष्ठपक्षे हि धाय्यापाठानन्तरं 7. १,२
कद्वतः शंसनम्। बृहद्रथन्तरपृष्ठपक्षे तु नैवम्। किंतु सामप्रगाथशंसनमेव
कर्तव्यम्। तत्र प्रथमे रथन्तरस्य द्वितीये बृहतः तृतीय उभयोः। तत्र पूर्वं
रथन्तरस्य ततो बृहत इत्यवसेयम्। सामप्रगाथानन्तरं कद्वतः प्रगाथान्
'कन्नव्यः'[f] इत्यादिकान् प्रागुक्तान् पठेयुः। 'यमिन्द्र दधिषे'[g] इत्यादिद्वृचानि
'इन्द्र पिब तुभ्यम्'[h] इत्यादीनि त्रैष्टुभानि च स्वरपृष्ठपक्षविहितान्यस्मिन्
पक्षे न शंसेत्। पक्षान्तरे येषु निवित्पदप्रक्षेपो विहितः तदपवादेन **तच्छंसन-**
पूर्वकं सूक्तान्तरेषु निवित्पाठं विधत्ते—**तद्-दधाति**। तत् तत्र निविच्छं- 7. ३,४
सनविषये अनुष्टुप्छन्दस्कास्वृक्षु निवित्पाठो न कार्यः। कुतः? यस्मात् तन्नि-
विद्धानं मध्यंदिनं मोहयति। अयं हि यज्ञः क्लृप्तच्छन्दा भवति। अतस्त्रैष्टु-
भत्वनियमात् माध्यंदिनसवनस्य अनुष्टुप्सु निविद्धाने सति किमिदं मध्यं-
दिनं सवनमेव न भवतीति व्यामोहो जायेत। यच्छन्दस्कं हि यत्सवनं तच्छ-

a. RV. 1. 176. 1 b. RV. 8. 33. 1.
c. RV. 6. 42. 1. d. RV. 1. 84. 4.
e. RV. 8. 33. 7. f. RV. 8. 3. 13.
g. RV. 8. 97. 2. h. RV. 6. 40. 1.

न्दस्कमेव सूक्तं तत्र निविद्धानं भवितुमुचितम्। अतो नानुष्टुप्सु निविच्छंसनं युक्तम्। कुत्र तर्हि तत्प्रक्षेप इत्यत्राह—आनुष्टुभानीति। अनुष्टुप्छंसने यः कामस्तस्याप्रहाणार्थमानुष्टुभानि प्रथमं शस्त्वा त्रैष्टुभेषु सूक्तेषु निविद्धानं
7. ५-७ कुर्यात्। कानि तानि सूक्तानीति तदाह—**अर्वाग्-अन्तरूपे**। 'आ ता सूरिः'[a] इत्याङुपसर्गश्रवणादावत्त्वम्। 'उदु नश्चित्रतम'[b] इत्युदुपसर्गश्रुतेरुद्वत्त्वम्।
7. ८,९. 'जग्मुः' इति गमिधातोः श्रवणात् गतवत्त्वम्। **तथा-दधाति**। इति गतम्।

धाय्यातोऽनन्तरं सामप्रगाथास्तदनन्तरम्।
कद्वत्प्रगाथास्तेषां च परस्तात् सूक्तयुग्मलम्॥
स्वरसाम्नि तृतीये तु कद्वतः शंसनात् परम्।
सूक्तशंसनतः पूर्वं योनिः शस्यात्र बार्हती॥

इत्थं पूर्वकारिच्छन्दोगस्तुतिक्लृप्त्यनुरोधेन शस्त्रक्लृप्तिं विधाय संप्रति
7,१०-१३ प्राग्दर्शिते पृष्ठविकल्पे कंचिद् विशेषं दर्शयति—**यदि-कुर्वन्ति**। स्वराख्यानां साम्नां पृष्ठकार्यविनिवेशनपक्षे बृहद्रथन्तरसाम्नोरपरिहाणार्थं पवमानेषु प्रयोगः सामगैः क्रियते। बृहद्रथन्तरपृष्ठपक्षे तु स्वराणाम्। इत्थं पक्षद्वयेऽपि नात्यन्तपरित्याग उभयेषां साम्नां भवति। स्वरयोनिषु बृहद्रथन्तरप्रापणपक्षे पुनरेकप्रयत्नेनैव सकलसामपरिग्रहणान्नान्यतरसाम्नः स्थलान्तरविनिवेशनप्रयासः।

7.१४,१५ अस्मिन् सामगस्तोत्रकरणविकल्पे कौषीतकेर्मतमाह—**स्वराणि-एते**। तुशब्दः पक्षान्तरव्यावृत्त्यर्थः। कुत इत्यत्राह—स्वरसामान इति। हिर्हेत्वर्थः। एते स्वरसामनामका यागविशेषाः स्वरसामानो भवन्ति यस्मात्। स्वराणि [1-]नाम सामानि[-1] येषामित्यवयवार्थानुगम एव हि स्वरसामसंज्ञत्वं समञ्जसं भवेत्। इतरथा डित्थादिवद् यादृच्छिकमेवैतदेषां नाम स्यात्। तच्च सति संभवेऽनुपपन्नम्। तथा च तलवकारब्राह्मणम्—'तद्धैतदेके स्वरसाम्नां स्वराण्येव पृष्ठानि **कुर्वन्ति**। पृष्ठेन वा अहराख्यायते। स्वरसामान इत्येत-

a. RV. 6. 37. 5. b. RV. 6. 38. 1.

1–1, B. नानानि; T. नामा सा

दाख्यायन्ते। तस्मात् स्वरसाम्नां स्वराण्येव पृष्ठानि कार्याणीति'[a] इति। इदानीं स्वरपृष्ठत्वं प्रशस्तमित्याह—**पृष्ठैः-इति**। पुरा देवाः पृष्ठै 7.१६-१८
रथन्तरादिभिः स्वर्गं लोकं स्पृष्टवन्तः प्राप्तवन्तः। अतः 'स्पृशन्त्येभिः स्वर्गम्' इति पृष्ठशब्दवाच्यत्वं संपन्नम्। तत्र स्वराणि पृष्ठानि भवन्तीति यदस्ति तत् स्वर्गस्य लोकस्यैव स्पृष्टचै स्पर्शनाय प्राप्तये संपद्यते। अतः स्वर्गलोकस्पर्शनहेतुत्वात् स्वरपृष्ठत्वं प्रशस्तमिति कौषीतकिराह स्मेति योजना॥

इति सप्तमः खण्डः

एवं माध्यंदिनसवनं विधाय तृतीयसवनगते वैश्वदेवशस्त्रे स्वरपृष्ठपक्षे स्वरयोनिकबृहद्रथन्तरपृष्ठपक्षे च क्रमेण त्रिष्वप्यहःसु समूळ्हपृष्ठ्यसंबन्धिनः
पूर्वत्र्यहात् प्रतिपत्तृचानतिदिशति—**पृष्ठ्यस्य-प्रतिपदः**। समूळ्हरूपस्य 8.१
पृष्ठ्यषळहस्य संबन्धी यः पूर्वस्त्र्यहः तस्य यानि वैश्वदेवशस्त्राणि सन्ति प्रत्यहम्, तेषां याः प्रतिपदः ता इहान्वहं प्रतिपदो विधेयाः। सूत्र्यते हि—'त्र्यहात् पार्ष्ठिकाद् यथासंख्यं प्रतिपदश्च स्वरपृष्ठानां स्वरयोनिकानां च'[b] इति। बृहद्रथन्तरपृष्ठपक्षे प्रथमत्र्यहाद्यथासंख्यं तृतीयसवनानि भवन्तीति नोक्तम्। स्वरपृष्ठपक्षाङ्गीकारात्। सूत्रकारः पुनस्तदाह—'प्रथमात् त्र्यहात् तृतीयसवनानि इति **बृहद्रथन्तरपृष्ठानाम्**'[c] इति। समूळ्हपृष्ठ्योत्तरत्र्यहा-
दनुचरप्रभृति तृतीयसवनान्यतिदिशति—**यानि-सानुचराणि**। पृष्ठ्यस्य षळ- 8.२
हस्य समूळ्हस्येत्यनुषङ्गः। 'अनुचरप्रभृति समूळ्हान्मध्यमात् त्र्यहाद्'[d] इति हि सूत्र्यते।

अत्र कंचिद् विशेषमाह—**तद्-अवधीयन्ते**। तत् तथा सति। तत्र 8.३
तृतीयसवने। यान्युत्तमानि वैश्वदेवशस्त्रे विश्वेदेवदेवत्यानि सूक्तानि सन्ति, तान्युद्धृत्यापठित्वा प्रत्येकमहःस्वन्यानि वैश्वदेवसूक्तानि प्रक्षिप्यन्ते। पठनीयानि तानि विशिनष्टि—अनिरुक्तानीत्यादि। प्राजापत्यत्वादनिरुक्तत्वम्। अत

a. JB. 2. 35. b. ŚŚ. 11.12.10,11. (much variation from the ptd. edn.)
c. ŚŚ. 11. 12. 9. d. ŚŚ. 11. 12. 12.

एव परोक्षवैश्वदेवत्वम् । देवताभिधायकपदनिर्देशाभावात् परोक्षत्वम् । 'प्रजापतिः सर्वा देवताः'[a] इति प्राजापत्यत्वं वैश्वदेवत्यत्वं[1] च । सूक्तग्रहणं 'स्वस्ति नो मिमीताम्'[b] इति तृचस्योपलक्षणार्थम् । सूत्र्यते हि—'उद्धृत्य तु[2] वैश्वदेवानामुत्तमानि सूक्तानि तृचं च'[c] इति । कानि तानीति चेदत आह—**प्र-प्रतिनाभानेदिष्ठः** । कदित्थेत्यस्य विशेषणं प्रतिनाभानेदिष्ठ इति । 'प्रत्येवयामरुद्'
८.४,५ इत्यादिवदिति । 'इदमित्था'[d] इति नाभानेदिष्ठसूक्तप्रतिरूपं सूक्तमित्यर्थः । षष्ठाहःस्थानीयत्वादिह तृतीयस्य स्वरसाम्नस्तदीयेन 'इदमित्था'[d] इति नाभानेदिष्ठसूक्तेन सदृशं 'कदित्था'[e] इति सूक्तं वैश्वरूपमनुरूपम् । सादृश्यं च वाचोयुक्तिप्रवृत्तिसाम्यनिबन्धनं द्रष्टव्यम् । एतदपवादेन सूक्तान्तराणि विधत्ते—

८.६-११ **तद्-स्वरसामानः** । वैशब्दः पक्षान्तरप्रदर्शने । तत् तत्र वैश्वदेवसूक्तविषये देवताभिधायकपदसाहित्यात् स्पष्टवैश्वदेवसूक्तान्येव नानिरुक्तादिविशेषणान्येव क्षिप्येरन् । तानि दर्शयति—अग्निरिन्द्र इत्यादि । सर्वत्रापि कथंचित् कशब्दसंपत्तेः कद्वत्त्वम् । को वा इत्यादि गतम् ।

८.१२-२२ अथ विहितानां स्वरसाम्नां संस्थाविषयं विकल्पं दर्शयति—**ते-उपाप्त्यै** । संस्था समाप्तिः । विकल्पस्य शाखाभेदेन व्यवस्थामाह—पैङ्ग्यमिति । मतमिति शेषः । ये सत्रिणः स्वरसाम्नोऽग्निष्टोमसंस्थामनुतिष्ठन्ति ते वृत्तस्वाध्यायजनितदीप्तिमन्तो भवन्ति । उक्थ्या उक्थ्यसंस्था । समृद्धिमत्तामुपपादयति—पञ्चदश ह्यस्येति । तत् प्राक् प्रपञ्चितम् । एवं सति स उक्थ्यः संख्यासाम्यात् त्रिंशदक्षरां विराजमभिसंपन्नो भवति । विराजः कोऽतिशय इत्यत आह—श्रीर्विराळिति । तस्माद् विराळभिसंपन्नोक्थ्यसंस्थस्वरसामत्र्यहानुष्ठानम् अन्नाद्यरूपायाः श्रीरूपायाश्च विराजः प्राप्त्यै संपद्यते । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इत्यष्टमः खण्डः

a. TB. 3. 3. 7. 3; TS. 3. 4. 3. 4.
b. RV. 5. 51. 11.
c. ŚŚ. 11. 12. 13.
d. RV. 10. 61.
e. RV. 1. 121.

1. T. वैश्वदेवत्वं
2. T. omits

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ।।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
अध्यायः स्वरसाम्न आद्यभिजितः कौषीतकिब्राह्मण-
व्याख्याने विशदं वदन्निह चतुर्विंशः समाप्तिं गतः ।।

## इति कौषीतकिब्राह्मणव्याख्याने
## तृतीयदशके चतुर्थोऽध्यायः

अथ

## पञ्चविंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
अध्यायेऽतिगते खलु प्रथमतः प्रोक्तोऽभिजिन्नामवा-
नेकाहः स्वरसामनामभृदथ व्याख्यायि कश्चित्त्र्यहः ।
वक्तव्यो विषुवानतः परममुष्मिन् पञ्चविंशे क्रमा-
दावृत्तस्वरसामतः परमनुष्ठेयस्तथा विश्वजित् ॥

तत्रादौ तावद् विधास्यमानस्य विषुवदाख्यस्याह्नोऽनुष्ठानकालं प्रदिदर्श-
1.१-४ यिषुः कांचिदाख्यायिकामाह—**आपः–उपयन्ति ।** इह विषुवदाख्यस्य अह्नः सूर्यदेवत्यत्वात् तदभेदाभिप्रायेण तत्प्रयोगयोग्यकालनिरूपणार्थेयमाख्यायिका वर्तिता । पुरा किलापः । अप्छब्देनाभिमानिदेवताव्यपदेशः । 'अभिमानिव्यपदेशस्तु'[a] इति वैयासिकसूत्रात् । 'ता आप ऐक्षन्त'[b] 'तत् तेज ऐक्षत'[c] इत्यादिवत् । अपस्योत्पत्त्यर्थं[1] तपस्तप्तवत्यः । 'तपस्तपःकर्मकस्यैव'[d] इति कर्मवद्भावः । आर्जितवत्य इत्यर्थः । ता आपश्चिरकालं तपस्तप्त्वा गर्भं धृतवत्यः । ततो गर्भधारणानन्तरमेष[2] दिवि दृश्यमान आदित्यो देवताविशेषः षष्ठे मासि संपूर्णे सति अद्भ्यो मातृभ्यो जन्म प्राप्तवान् । यस्मादेवमाख्यायिका तस्मादद्यापि सत्रानुष्ठानं कुर्वाणाः आदित्यदेवत्यत्वेन तदात्मकम् , अत एव दिवैव तच्छस्त्रादेः पठनीयत्वेन दिवाकीर्त्यनामकं विषुवदाख्यमहः षष्ठे मासि

a. BS. 2. 5. 1. b. ChU. 6. 2. 4.
c. ChU. 6. 2. 3. d. Pā. 3. 1. 88.

1. B. T. omit ॱ 2. T. गर्भधारणादनन्तरमेव

गते सत्यनुतिष्ठेयुः । पूर्वोत्तरपटलशब्दवाच्ययोः[1] मासषट्कयोर्मध्ये तदनन्तभूतमेव त्रिशङ्कुन्यायेन षट्कद्वयावधिभूतमेव विषुवदाख्यमहरवस्थितमिति हि प्राक् प्रपञ्चितम् ।

विषुवतः पार्श्वद्वयवर्तिनोर्मासषट्कयोः आरोहावरोहन्यायेनानुष्ठेयत्वं[2]
प्रसंगादाह—**सः-षळावृत्तान्** । यस्मात् स आदित्यः संवत्सरावयवभूतेषु 1.५,६
द्वादशसु मासेषु पूर्वान् षट्संख्यान् मासानुदङ्मुखो गच्छति, यः काल उत्तरायणसंज्ञया व्यपदिश्यते । अथोत्तरान् षट्संख्यान् मासान् पूर्वगतिवैपरीत्येनावृत्तः सन् गच्छति, यो दक्षिणायनसंज्ञयाभिहितः । तस्मात् तादृशादित्यरूपसंपादनेन सत्रिणो विषुवतः प्राचीनान् षण्मासानूर्ध्वतया आरोहन्यायेनानुतिष्ठेयुः । विषुवत उपरितनान् मासानावृत्तान् अवरोहन्यायेनानुतिष्ठेयुः ।

इदानीं विधास्यमानं वैषुवतमहः स्तौति—**अन्तरेणो-उपयन्ति** । अशितु- 1.७,८
मिच्छा अशनाया क्षुदभिभवजनिता । मरणादूर्ध्वं जनित्वा पश्चादपि मरणं पुनर्मृत्युः । तदेतद् द्वयमादित्यमन्तरेणैव भवति । आदित्यादन्यत्रैव वर्तेते । आदित्यं तु न स्पृशत इत्यर्थः । यस्मादेवं तस्माद् ये सत्रिण आदित्यात्मकं वैषुवतमहरनुतिष्ठन्ति ते तद् द्वयमपि जयन्ति, अतिक्रामन्ति । अशनायापुन-
र्मृत्युजयहेतुत्वात् प्रशस्तमिदमहरित्यर्थः । **तस्य-इति** । सुगमम् । 1.९,१०

आज्यशस्त्रं तावदाह—**समुद्राद्-आज्यम्** । एकादशर्चं त्रैष्टुभमिदं 1.११
सूक्तमाज्यशस्त्रं भवति । अस्यैतदहरात्मकादित्याभिधायकतया आभिरूप्यं
दर्शयन् स्तौति—**समुद्राद्-उदैति** । यस्मादेष आदित्यः समुद्रादुद्गच्छति । 1.१२
समुद्रादित्यस्य व्याख्या अद्भ्य इति । तस्मादादित्योदयप्रतिपादकत्वादभि-
रूपमिदम् । रूपसंपत्तिप्रदर्शनेनापि स्तौति—**इन्द्र-रूपम्** । तत् सूर्यपदोपेत- 1.१३,१४
त्वम् । इह सूक्ते दश त्रिष्टुभः । अन्त्यैकादशी जगती । तत्राद्यान्त्ययोस्त्रिरावृत्तिविधिमभिप्रेत्य तत्सहिता ऋचोऽनुष्टुप्छन्दस्काः संपाद्य तदुपाधौ तत्संख्यां
स्तौति—**ताः-समर्धयन्ति** । एकविंशतिमिति द्वितीया प्रथमार्थे । आद्यायास्त्रि- 1.१५-१७
रुक्तेर्द्वादश त्रिष्टुभः । अन्त्याया जगत्यास्त्रिरुक्तौ तिस्रो जगत्यः । द्वादशभिः षोळशाधिकाः षोळशानुष्टुभः । तिसृभिः षोळशाक्षराधिकाश्चतस्रः । षोळशक-

1. B. कपाल for पटल
2. T. आरोह is omitted ( gap )

द्वयमेलने सत्येकानुष्टुप् । सति चैवं संभूयैकत्रिंशतिसंख्या अनुष्टुभः
1.१८-२१ संपद्यन्ते । गतमन्यत् । अथ प्रउगं विधत्ते—**त्रैष्टुभः-समर्धयति ।** त्रिष्टुप्-छन्दस्कः । अह्नां सात्रिकाणां मध्ये एष विषुवान् मध्यस्थो भवति । छन्दसां गायत्र्यादीनां च मध्ये त्रिष्टुप्छन्दो मध्यस्थं भवति । तत् तेन त्रैष्टुभत्वेन एतद् विषुवदाख्यमहः कर्म स्वेनात्मीयेन त्रिष्टुभा छन्दसा समृद्धं करोति । आत्मीयत्वं मध्यस्थत्वतौल्यात् ।।

इति प्रथमः खण्डः

2. १-१९ अथ क्रमेण सप्त तृचानि विधत्ते—**कुविदङ्ग-रूपेण ।** स्पष्टमेतत् । अतोऽस्माद् वायव्यात् तृचादुत्तरमेव तृचमैन्द्रवायवं तृचं भवति । न स्थलान्तरे अन्वेष्यमित्यर्थः । तदेतत् तृचमित्येतेन रूपेणान्वितं भवतीति शेषः । अभिरूपमिति वा । चक्षसा दीध्याना इति तेजोदीप्त्योरादित्यरूपयोरभिधानादाभिरूप्यम् । तस्याश्विनतृचस्य क्रमप्राप्तां तृतीयामुत्सृज्य चतुर्थी 'वि चेदुच्छन्ति'[a] इत्येषा भानुशब्दवती तृतीया कर्तव्या । सूत्रितं हि—'आश्विने तु भानुमती तृतीया'[b] इति । व्यावरिति प्रकाशलक्षणविवरणाभिधानात् तस्य चादित्यरूपत्वात् तद्युक्ततृचस्याभिरूप्यम् ।

2.२०-२४ विशिष्टार्षेयत्वेन विहितं प्रउगशस्त्रं प्रशंसति—**एष-ऋध्नुवन्ति ।** य एष वायव्यादिभिस्तृचैः क्लृप्तत्रिष्टुप्छन्दस्कः प्रउगः स एष वसिष्ठेन महर्षिणा दृष्टः । अतः प्रशस्तोऽयम् । कुत इति चेत् ? यस्मात् स वसिष्ठः प्रजापतिरेव । तस्यैवातिशयेन प्रशस्यत्वात् । तथान्यत्र[1] श्रुतम्—'तं देवा अब्रुवन् । अयं वै नः सर्वेषां वसिष्ठ इति । तं यद् देवा अब्रुवन्नयं वै नः

a. RV. 7. 72. 4. b. ŚS. 11. 13. 15.

1. M. T. तथान्यतः

सर्वेषां वसिष्ठ इति। तस्माद् वसिष्ठ इत्याचक्षत एतमेव सन्तम्'[a] इति। स प्रजापतिर्यज्ञस्याग्निहोत्रादेः सहस्रसंवत्सरसत्रपर्यन्तस्य सर्वस्यापि तन्ता विस्तारयिता भवति। 'प्रजापतिर्यज्ञानसृजत अग्निहोत्रं च'[b] इत्यादिश्रवणात्। यस्मादेवं तस्मात् स प्रजापतिर्वसिष्ठशब्दवाच्यः सन्निह पुनस्ततौ यज्ञस्य पुनः प्रवृत्तौ सत्यां [1-]अयातयामा भवति[-1]। 'अयातयामा हि देवानां प्रजापतिः'[c] इति श्रवणात्। इतरथेह पुनः प्रवृत्तावयातयामत्वदोषापरिहारात्। तत् तेन यज्ञस्य मुखतः[2] प्रजापतेर्वसिष्ठात्मकतया निविष्टत्वेन ये प्रजापतौ निहिताः कामास्तान् सर्वानपि सत्रिणः प्राप्नुवन्ति।

इत्थं प्रातःसवने विषये कश्चित् पक्ष उपक्षिप्तः। अथैतदपवादेन पक्षा-
न्तरमुपक्षिपति—**तद्-समर्धयति**। मोहयति मूढमप्रज्ञातं करोति। क्लृप्त- 2.२५-२९
च्छन्दसो हि यज्ञस्य मुखं प्रातःसवनं गायत्रीछन्दस्कं युक्तम्। इदं तु न तथा। तथा सत्येतत् प्रातःसवनमेव न भवतीति प्रतीतिः स्यादित्यर्थः। ऐकाहिकं एकाहे प्रकृतिभूते अग्निष्टोम उत्पन्नम्। एकाहस्य प्रकृतित्वात् ज्योतीरूपत्वम्।
इदानीं पक्षान्तरं दर्शयति—**तस्य-ब्राह्मणम्**। 'प्र वो देवाय'[d] इत्यादि 2.३०-३२
आद्यया आवृत्तया सह नवर्चम्। 'त्वं हि'[e] इत्याद्या 'अच्छा नः'[f] इत्येतामन्त्यां विना दशानुष्टुभः। 'वेषि'[g] इत्युत्तमया आवृत्तया द्वादश। मिलित्वैकविंशतिः। उक्तम् 'एकविंशो वा'[h] इत्यादि। अत्र सूत्रम्—'समुद्रादूर्मिरित्याज्यम्। त्रैष्टुभः प्रउगः। मध्यमाच्छन्दोमात् त्रीणि तृचानि प्रथमे चोत्तमं च। प्रथमात् त्रीणि। आश्विने तु भानुमती तृतीया। प्र ब्रह्मैतु सदनादृतस्येति वैश्वदेवम्। ऐकाहिकं वा प्रातःसवनम्। प्र वो देवाय त्वं

a. AA. 2. 2. 2.
b. TS. 1. 6. 9.[1].
c. TS. 2. 6. 3. 2.
d. RV. 3. 13.
e. RV. 6. 2. 1.
f. RV. 6. 2. 11.
g. RV. 6. 2. 10.
h. KB. XXV. 1. १६.

1–1. B. अयातयामत्वात्; T. omits
2. T. य···

हि क्षैतवदिति वाज्यम् । माधुच्छन्दसश्च'[a] इति ।।

इति द्वितीयः खण्डः

इत्थं पक्षत्रयोपेतं प्रातःसवनमीरितम् ।
अथ क्रमागतं माध्यदिनं सवनमीर्यते ।।

3. १,२ तत्र तावन्मरुत्वतीयशस्त्रार्थमेकं सूक्तं विधत्ते—**कया–रूपेण**। शुभे-
त्यत्र भा इति यदक्षरमस्ति तस्य रश्मिवाचकत्वादादित्यसंबन्धिना रूपेणो-
3. ३,४ पलक्षितमेतत् सूक्तं भवति। अपरं विधत्ते—**त्यं–रूपम्**। जागतं[1] जगती-
3. ५,६ छन्दस्कम्। अथ निविद्धानं ससूक्तं विधत्ते—**जनिष्ठा–रूपेण**। त्रैष्टुभे त्रिष्टुप्-
छन्दस्के सूक्ते 'अप ध्वान्तमूर्णुहि पूर्धि चक्षुः'[b] इत्यन्धकारापाकरणस्य
चक्षुःपूरणस्य चादित्यकर्तृकत्वादेतदादित्यरूपसंपन्नत्वात् समृद्धमित्यर्थः ।
5. ७-९ सूक्तद्वयगतं छन्दोद्वयं प्रशंसति—**ताः–आप्नुवन्ति**। ताः सूक्तत्रयगता ऋचः
त्रिष्टुप्छन्दस्का जगतीछन्दस्का इत्येवं द्विप्रकाराः सत्य इह शस्यन्ते। 'कया'[c]
'जनिष्ठा'[d] इति सूक्तयोर्ऋचस्त्रिष्टुभः। 'त्यं सु मेषम्'[e] इत्याद्या जगत्यः।
यस्मादेष आदित्यः त्रिष्टुब्जगत्योः छन्दसोराहितः तत्रापि प्रतिष्ठितः कदा-
चिदविचलितस्थितिः सन् जगत् प्रकाशयति। वेदात्मकस्यादित्यस्य छन्दःसु
प्रतिष्ठितत्वात्। छन्दसां मध्ये च[2] त्रिष्टुब्जगत्योः अक्षराधिक्यात् प्राधा-
न्यात्। तत् तेन त्रिष्टुब्जगत्योः पठनेनैनमादित्यं प्रत्यक्षं साक्षादेव सत्रिणः
प्राप्ता भवन्ति। तदेतत् सूत्रकृतोक्तम्—'कया शुभा त्यं सुमेषं जनिष्ठा
उग्र इति मरुत्वतीयम्'[f] इति। एवं तावत् त्रिषूक्तं मरुत्वतीयशस्त्रं विधाय
निष्केवल्यशस्त्रं विधित्सुः तद्विधेः पूर्वकारिच्छन्दोगस्तोत्रक्लृप्त्यनुरोधित्वात्

a. ŚŚ. 11. 13. 11–19.
b. RV. 10. 73. 11.
c. RV. 1. 165.
d. RV. 10. 73.
e. RV. 1. 52. 1.
f. ŚŚ. 11. 13. 20.

1. T. omits
2. T. omits मध्ये च ( gap )

तेषां च पृष्ठसामाधिकृत्य विकल्पदर्शनात् प्रथमं तावदेकं पक्षमुपक्षिपति—**बृहद्-इति**। एके छन्दोगाः एतस्य वैषुवतस्याह्नः बृहदाख्यं साम पृष्ठं स्यादित्याहुः 3.१०-१६
किल। किं वदन्तस्ते तदाहुरिति चेत्, य एष आदित्यस्तपति स बार्हतः। द्युलोकस्य बृहद्रूपत्वात् तस्मिन् वर्तमानत्वादादित्यस्य बार्हतत्वम्। 'असौ लोको बृहद्'[a] इति श्रवणात्। तत् तेन बृहत्पृष्ठकरणेनैनमादित्यं स्वेन बार्हतत्वरूपेण समृद्धं कुर्वन्ति सत्रिणः। यस्मान्न केवलं बार्हतत्वमेवादित्यस्यास्ति अपि तु बृहत्त्वमपि। यदेतद् दिवि दृश्यमानं ज्योतिस्तपति तद् बृहद् भवति, सर्वात्मत्वात्। 'एक एव वा महानात्मा देवता स सूर्य इत्याचक्षते। स हि सर्वभूतात्मा। तदुक्तमृषिणा—सूर्य आत्मा जगतस्तस्थुषश्चेति। तद्विभूतयोऽन्या देवताः'[b] इत्युक्तत्वात्। 'अद उ एव बृहद् भुवनेष्वन्तरसावादित्यः'[c] इति च श्रवणात्। इत्येवं वदन्तस्ते बृहदेतस्याह्नः पृष्ठं स्यादित्याहुरित्यन्वयः।

अपरमपि ते छन्दोगाः प्राहुरित्याह—अथो इति। अपि च यन्महादिवाकीर्त्यं नाम सामास्ति तदेतदपृष्ठमेव। पृष्ठं न भवतीत्यपृष्ठम्। षण्णां पृष्ठानामन्यतमत्वाभावात्। तस्मान्न महादिवाकीर्त्यपृष्ठत्वं विषुवतो युक्तम्। न चैवमेव बृहदप्यपृष्ठमिति शङ्क्यम्। यस्मादथ अपि च बृहद्रथन्तरे इति यदस्ति एते एव प्रत्यक्षे मुख्ये पृष्ठे भवतः। वैरूपादीनामेतयोर्विकृतित्वेनामुख्यत्वात्। तस्मादपृष्ठमिति न कथमपि वाच्यम्। यस्मादेवं तस्माद्धेतोर्बृहदिव[1] न महादिवाकीर्त्यं पृष्ठं स्यादित्याहुरिति योजनीयम्।

इह सामगा बृहत्साम स्वयोनावस्वयोनौ च विकल्पेन कुर्वन्ति। तत्र स्वयोनिपक्षे तावन्न वक्तव्यमस्ति। प्रकृतिवदेव तत्र स्तोत्रियादीनां पठनीयत्वात्। अस्वयोनिपक्षे तु विशेषोऽस्तीत्याह—**यद्यु-रूपम्**। यदि सामगाः सूर्य- 3.१७-२०
शब्दयुक्ते प्रगाथे 'श्रायन्त इव सूर्यम्'[d] इत्यस्मिन् बृहत्साम कुर्युः, न स्वयोनौ, तर्हि प्रगाथान् स्तोत्रियानुरूपसामप्रगाथानपि सूर्यशब्दवत एव कुर्यात्। तत्र

a. AB. 8. 2. 3.
b. SA. 2. 14-17.
c. AA. 2. 1. 1.
d. RV. 8. 99. 3.

1. B. T. बृहद्व

'श्रायन्त इव'[a] इति स्तोत्रियः । 'यद् द्याव इन्द्र'[b] इत्यनुरूपः । ततो धाय्या । अनन्तरं 'बण्महाँ'[c] इति 'यः सत्राहा'[d] इति वा सामप्रगाथः । एतेषां च [1-]सूर्यशब्दवत्त्वं स्पष्टमेव । सामप्रगाथानन्तरम्[-1] 'इन्द्रः किल श्रुत्या'[e] इत्युक्थमुखीयाख्या ऋक् पठनीया । उक्थस्य शस्त्रस्य मुखे प्रारम्भे भवत्वादुक्थमुखीया । इत्थ-
3.२१-२३ मेकेषां पक्षमुपक्षिप्य पक्षान्तरमुपक्षिपति—**महादिवाकीर्त्यम्-समर्धयन्ति ।** केचिदध्येतारोऽधिकं पठन्ति-'महादिवाकीर्त्यमेवैतस्याह्नः पृष्ठं स्यादिति त्वेव स्थितम्' इति । महादिवाकीर्त्याख्यमेव पृष्ठं स्यान्न बृहदिति एष स्थितः पक्षः । कुतः योऽसावादित्यस्तपति, असावेव प्रत्यक्षं चक्षुर्गम्यं महादिवाकीर्त्यसाम भवति । सूर्यदेवत्यत्वात् । तत् तेन महादिवाकीर्त्येनादित्यं स्वेन साम्ना समृद्धं कुर्वन्ति ।

3.२४-३२ अस्मिन्नेव पक्षे छन्दोविकल्पेन पक्षत्रयं दर्शयति—**तद्-समर्धयति ।** एके सामगाः तन्महादिवाकीर्त्यं त्रिष्टुप्छन्दस्कास्वृक्षु कुर्वन्ति । अत्र 'चित्रं देवानाम्'[f] इति तृचः स्तोत्रियः । 'तत् सूर्यस्य देवत्वम्'[g] इति द्वे । 'उत् सूर्यो बृहदर्चींषि'[h] इत्येका । एष तृचोऽनुरूपः । वेदमूर्तित्वेनादित्यस्य त्रैष्टुभत्वादि द्रष्टव्यम् । बृहतीपक्षे 'बण्महाँ'[c] इति स्तोत्रियः । 'उदु त्यद् दर्शतम्'[i] इत्यनुरूपः ॥

इति तृतीयः खण्डः

जगतीष्वित्यस्य पक्षस्य स्थितत्वोक्तेः तत्र स्तोत्रियमाह—**विभ्राड् बृहत् पिबतु सोम्यं मध्विति स्तोत्रियो विश्वभ्राड् भ्राजो महि सूर्यो दृश इति विवद् भ्राजिष्मत् सूर्यवत् । तदेतस्याह्नो रूपम् ।** विभ्राडिति विशब्दश्रवणात् विवत् । भ्राज इति भ्राजिष्मत् । सूर्यो दृश इति सूर्यवत् । अत्र पदं

a. RV. 8. 99. 3.
b. RV. 8. 70. 5.
c. RV. 8. 101. 11.
d. RV. 8. 46. 3.
e. RV. 10. 111. 3.
f. RV. 1. 115. 1.
g. RV. 1. 115. 4.
h. RV. 7. 62. 1.
i. RV. 7. 66. 14.

1-1. T. सूर्यशब्द ··· gap

विशेष्यम्। [1-]अथवा विवान् भ्राजिष्मान् सूर्यवानिति पाठः[-1]। अथानुरूपमाह—**वि सूर्यो मध्ये अमुचद्रथं दिव इत्यनुरूपो विवान् सूर्यवान्। जागतमु वै समानं छन्दः**। जगत्येव जागतम्। यद्यपि 'वि सूर्यो मध्ये'[a] इत्यस्यैन्द्रत्वेन सूर्यदेवत्यत्वाभावाद् देवतैक्यनिबन्धमानुरूप्यं न संपद्यते, तथापि द्वयोर्जगतीछन्दस्कत्वात् स्तोत्रियेण सह सारूप्यसंभवादनुरूपत्वं संभवति।

अथ देवतातोऽपि सदृशमनुरूपं सिद्धान्ततया विधत्ते—**विश्वाहा त्वा सुमनसः सुचक्षस इति त्वेव स्थितः सौर्यः सौर्यस्य**। सूर्यदेवत्यस्य पृष्ठस्य सूर्यदेवत्य एव 'विश्वाहा त्वा'[b] इत्ययमनुरूपो भवतीति निश्चयः। देवतातोऽपि समानत्वात्। सामप्रगाथं विधत्ते—**बण्महाँ असि सूर्येति सूर्यवान् त्सामप्रगाथः श्रायन्त इव सूर्यमिति वा**। अत्र सूत्रम्—'बण्महानिति सामप्रगाथः स्वयोनौ बृहति महादिवाकीर्त्ये च। यः सत्राहा विचर्षणिरिति वा'[c] इति। अत्र सूत्रेऽदृष्टत्वात् 'श्रायन्त इव'[d] इत्यस्य विषयो विद्वद्भिर्मृग्यः। अथोक्थमुखीयां विधत्ते—**या विभ्राजः परिशिष्यते उक्थमुखं तां कुरुते। शं नो भव चक्षसेति महादिवाकीर्त्ये तत् सूर्य द्रविणं धेहि चित्रमिति सूर्यवती। तदेतस्याह्नो। रूपम्**। अत्र सूत्रम्—'इन्द्रः किलेत्युक्थमुखीयाः। शं नो भव चक्षसेति महादिवाकीर्त्ये'[e] इति। अतो या विभ्राज इत्यस्यापि विषयो मृग्यः। इह तावत् पूर्वकारिच्छन्दोगस्थितिविकल्पनिबन्धनास्त्रयः पक्षाः। बृहत्पृष्ठपक्षो द्विस्कन्धः महादिवाकीर्त्यपक्षः पूर्वोक्तच्छन्दोविकल्पेन द्विस्कन्ध इति मिलित्वा षट् पक्षाः। एतेषु सर्वेष्वपि उक्थमुखीयान्तं शस्त्रमेतावता वाक्यसन्दर्भेण विहितम्। उक्थमुखीयानन्तरं त्रैष्टुभं सूक्तं पठनीयम्। तत्र स्वयोनौ बृहत्पक्षे 'द्यौर्न य इन्द्र'[f] इति त्रयोदशर्चम्। अस्वयोनिबृहत्पक्षे महादिवाकीर्त्यपक्षे 'य एक इद्धव्यः'[g] इत्येकादशर्चम्। उद्धृतबृहद्रथन्तरे 'तमु ष्टुहि यो अभिभूत्योजाः'[h] इति पञ्चदशर्चम्। त्रैष्टुभ-

a. RV. 10. 138. 3.
b. RV. 10. 37. 7.
c. ŚS. 11. 13. 30–31.
d. RV. 8. 99. 3.
e. ŚS 11. 14. 3–4.
f. RV. 6. 20.
g. RV. 6. 22.
h. RV. 6. 18.

1–1. B. T. omit

शंसनानन्तरं जागतं पञ्चदशर्चम् 'अभि त्यं मेषम्'[a] इति सूक्तं सर्वत्र शंसेत्। तदनन्तरं निविद्धानसूक्तं 'प्र ते महे'[b] इत्येतं त्रयोदशर्चं पठेत्। तथा च सूत्रम्—'द्यौर्न य इन्द्रेति सुक्तं स्वयोनौ बृहति। य एक इद्धव्य इत्यस्वयोनौ महादिवाकीर्त्ये च। तमु ष्टुहीत्युद्धृतबृहद्रथन्तरे। अभि त्यं मेषमृतुर्जनित्रीयस्य नव शस्त्वा सर्वहरेर्वा[1] निविदम्'[c] इति। अत्र ऋतुर्जनित्रीयविधिः शाखान्तरमूल इति द्रष्टव्यम्। एतेषां विधिं श्रुत्यन्तरगतं सिद्धवत्कृत्य 'प्र ते महे'[b] इत्यस्मिन् निवित्पाठं विधत्ते—**सर्वहरौ निविदं दधाति। आविष्कृधि हरये सूर्यायेति सूर्यवती।** सर्वत्र प्रतिपादं हरिशब्दवत्त्वात् सर्वहरिशब्देन 'प्र ते महे विदथे'[b] इति सूक्तमुच्यते। तत्र नवर्चः शस्त्वा निविदं पठेत्। निवित्पठनानन्तरं परिशिष्टाश्चतस्रः शस्त्वा 'आ सत्यो यातु'[d] इत्येकविंशत्यृचं पठेत्। तदनन्तरं 'विश्वजिते'[e] इति जगतीछन्दस्कं षळृचं पठेत्। इत्यमुं विधिं सिद्धवत्कृत्य विश्वजित इत्यस्य पञ्चमीषष्ठ्योरन्तराले दूरोहणशंसनं विधत्ते—**जगतीषु दूरोहणं रोहति। जागतो वा एष तपति। यजमाना दूरोहणः। एतमेव तद् यजमाना रोहन्ति।** रोहतिः शंसनार्थः। दुःखेन शस्यत इति दूरोहणं तज्जगतीछन्दस्कासु विश्वजित इत्याद्यासु शंसेत्। सूत्रितं हि—'आ सत्यो यातु विश्वजित इति उत्तमां परिशिष्य तत आहूय दूरोहणं रोहति'[f] इति। 'हंसःशुचिषद्'[g] इत्यस्या ऋचो विशिष्टस्य शंसनस्य दूरोहणमिति संज्ञा वेदप्रसिद्धा। जगतीषु यद् दूरोहणशंसनमस्ति तत् प्रशस्तम्। यस्मात् जगतीनामायमादित्य एव। जगतीछन्दस्काम्नायवत्त्वात्। दूरोहणशब्देन यजमाना उच्यन्ते। ते हि दुःखेन कथंचिदेवामुमादित्यं रोहन्ति प्राप्नुवन्ति इति [2-]दूरोहणाः भवन्ति। तत् तेन[-2] दूरोहणशंसनेनामुमादित्यमेज सत्रिणः

a. RV. 1. 51. 1.
b. RV. 10. 96.
c. ŚŚ. 11. 14. 5–10.
d. RV. 4. 16.
e. RV. 2. 21.
f. ŚŚ. 11. 14. 11–13.
g. RV. 4. 40. 5.

1. T. omits वा
2–2. T. दूरो···तेन

प्राप्नुवन्ति । शंसनप्रकारं प्रकटयति—**पच्छः-अप्रच्युत्याम्** । प्रथमं 'हंसश्शु-(6.१६-२५)
चिषद्'[a] इत्येतां पच्छः पठेत् । तेन पच्छः पठनेन यजमाना इमं पृथिवीलोकं प्राप्नुवन्ति प्राथम्यसाम्यात् । [1-]द्वितीयमर्धर्चमवस्य पठेत् । तेनान्तरिक्षलोक-प्राप्तिः[-1] । अथ तृतीयं त्रिपच्छः । त्रीन् पादानुक्त्वावस्येत् । तेन द्युलोक-प्राप्तिः । अथ केवलीं सर्वामृचं पठेत् । केवली ऋग् आवेशः द्युलोके प्रवेशनमेव भवति । यथा गन्ता गम्यगृहादि प्राप्य तत्राविशति, एवं त्रिपच्छःपाठः प्राप्तिः । केवलीपाठस्तु [2-]तत्प्रवेशरूपः । एवमारोहरूपेण[-2] पच्छोऽर्धर्चशस्त्रि-पच्छोऽनवानमिति चतुर्वारं पठित्वा पुनरवरोहरूपेण त्रिपच्छोऽर्धर्चशः पच्छ इति प्रातिलोम्येन पठित्वावस्येत् । तेन च क्रमेण द्युलोकान्तरिक्षपृथिवी लोकप्राप्तेः सप्तमवारपठने सति अत्र पृथिवीलोके यजमानाः प्रतिष्ठिता भवन्ति । प्रतिष्ठायामप्रच्युत्यामिति पृथिवीविशेषणम् । एवमुक्तप्रकारेण सप्तवारं पठनं कृच्छ्रसाध्यमित्यस्य दूरोहणमिति संज्ञा । सूत्रितं हि—'हंसः शुचिषदित्येतां पच्छोऽर्धर्चशस्त्रिपच्छोऽनवानं त्रिःपच्छोऽर्धर्चशः पच्छः'[b] इति ।

**सैषा-एकपञ्चाशत्** । दूरोहणपाठानन्तरं विश्वजित इत्यस्यान्त्यां परि- (7.१-१२)
शिष्टामृचं पठित्वा ततः 'एष प्र पूर्वीः'[c] 'पतङ्गमक्तम्'[d] इति सूक्ते पठेत् । तदनन्तरम् 'उरुं नो लोकम्'[e] इति त्रिः परिधानीयां शंसेत् । सूत्रितं हि—'उत्तमामुपसंशस्यैष प्र पूर्वीः पतङ्गमुरुं न इति पैङ्ग्यम्'[f] इति । एतद्विधिं सिद्धवत्कृत्य विहितनिष्केवल्यशस्त्रनिविष्टानामृचां[3] संख्यां स्तौति—**ता-संपत्** ।(7.१३-१७)
ताः शस्त्रावयवभूताः ऋचो मिलित्वैकाधिकशतसंख्याका भवन्ति । तद् यथा—निविदस्तावत् पूर्वमेकपञ्चाशदृचः ऊर्ध्वं पञ्चाशदिति संभूयैकशतम् । स्वयोनि-

a. RV. 4. 40. 5.
b. ŚS. 11. 14. 14.
c. RV. 1. 56.
d. RV. 10. 177.
e. RV. 6. 47. 8.
f. ŚS. 11. 14. 15–19.

1–1. T. द्वितीयमर्धस्वमवस्य'''लोकप्राप्तिः
2–2. T. तत्'''हरूपेण
3. B. M. omit विहित

बृहत्पक्षे स्तोत्रियतृचेन त्रिरावृत्तया अन्त्यया पञ्च । अनुरूपेणाष्टौ । ततो धाय्यैका । तया नव । सामप्रगाथेनैकादश । रथन्तरयोन्या त्रयोदश । 'इन्द्रः किल'[a] इत्युक्थमुखीयया चतुर्दश । 'द्यौर्न य'[b] इति सूक्तेन सप्तविंशतिः । साव्येन द्विचत्वारिंशत् । सर्वहरैर्नवभिरेकपञ्चाशत् । निविद ऊर्ध्वं सर्वहरैश्चतसृभिः 'आ सत्यः'[c] इति सूक्तेन च पञ्चविंशतिः । 'विश्वजिते'[d] इति षड्भिस्तन्मध्यपतितसंपन्नसप्तसंख्यदूरोहणीयासहिताभिरष्टत्रिंशत् । 'एष प्र पूर्वीः'[e] इत्यनेन चतुश्चत्वारिंशत् । 'पतङ्गम्'[f] इत्यनेन सप्तचत्वारिंशत् । परिधानीयया त्रिरुक्तया पञ्चाशत् । एकपञ्चाशत् पञ्चाशच्च मिलिता एकशतम् । अस्वयोनिमहादिवाकीर्त्यपक्षयोः योनिद्वयपाठादुक्थमुखीयान्ताः षोळश । 'य एक'[g] इत्यनेन सप्तविंशतिः । शेषं पूर्ववत् । [1-]अनुभयसामपक्षे योनिद्वयापाठात्[-1] उक्थमुखीयान्ता द्वादश । 'तमु ष्टुहि'[h] इत्यनेन सप्तविंशतिः । शिष्टं पूर्ववत् । शतायुर्वा इत्यादि गतम् । तत् तेन एकशतसंख्यानामृचां पठनेनात्र विषुवन्निष्केवल्यशस्त्रे यजमानान् संस्कुर्वन्त्यात्मभूतान् सत्रिणः । [2-]संस्कारश्च मानुष्यकनिबन्धनमलापकर्षणेन[-2] देवीभवनयोग्यत्वसंपादनलक्षणः । 'एष ह वै दैव आत्मा यजमानस्य यमृत्विजः संस्कुर्वन्ति'[i] इति हि प्रागाम्नातम् । प्रजननं देवत्वस्यैव साक्षात् संपादनलक्षणम् । देवत्वजन्मप्रापणमिति यावत् । कृतायाः शस्त्रक्लृप्तेः शाखान्तरगोचरत्वं वदन्नुपसंहरति—इति पैङ्गी संपदिति । पैङ्ग्यकल्पिता संपत् शस्त्रभूमा एवमुक्तप्रकारा भवति । ऋष्यन्तराभिमता त्वन्यादृशी भवतीत्यर्थः ।

(7. १८) कथं तर्हि तदभिमता संपदित्यपेक्षित आह—**अथ कौषीतकेः ।** संपदुच्यत इति शेषः । तत्र तावद् विशेषमात्रं दिदर्शयिषुः साधारणमंशमाह—

a. RV. 10. 111. 3.
b. RV. 6. 20.
c. RV. 4. 16.
d. RV. 2. 21.
e. RV. 1. 56.
f. RV. 10. 177.
g. RV. 6. 22.
h. RV. 6. 18.
i. KB. III. 10. १९.

1–1. T. अनुभयसामय···या पाठात्
2–2. T. सं···पापकर्षणेन

**समानमोक्थमुखीयाय** । उक्थमुखीयामभिव्याप्य स्थितः शस्त्रभागः पैङ्ग्यमते(7.१९)
कौषीतकिमते चाविशिष्ट इत्यर्थः। परिशिष्टभागे तु विशेषोऽस्तीत्याह—
**ऋतुर्जनित्रीय-अन्यत्र** । पक्षचतुष्टयेऽपि 'द्यौर्न यः'[a] 'य एक इत्'[b] 'तमु(7.२०-२२)
ष्टहि'[c] इति पूर्वोक्तानां सूक्तानां स्थाने 'ऋतुर्जनित्री तस्या'[d] इति सूक्तमेवात्र
शंसेत् । इयांस्तु भेदः—उद्धृतबृहद्रथन्तरे अनुभयसामपक्षे कृत्स्नमेव सूक्तं
शंसेत् । स्वयोनिबृहत्पक्षे तस्य ऋतुर्जनित्रीयस्यैवान्त्ये द्वे परिशिष्य एकादशर्चः
पठेत् । अन्यत्रास्वयोनिमहादिवाकीर्त्यपक्षयोः तस्यैवान्त्याश्चतस्रः परिशिष्य
नवर्चः पठेत् ।

**तद्-रूपेण** । 'अभि त्यं मेषम्'[e] इत्यस्य स्थाने सूक्तान्तरं विधत्ते—**एन्द्र-**(7.२३)
**रूपेण** । 'एन्द्र याहि हरिभिः'[f] इति पञ्चदशर्चम् । उद्धृत्य साव्यमिति । सव्या-(7.२४,२५)
ख्येन केनचिदृषिणा दृष्टम् 'अभि त्यं मेषम्'[e] इति सूक्तमुद्धृत्य तस्य स्थाने
'एन्द्र याहि'[f] इति सूक्तं पठेत् । 'प्र ते महे विदथे'[g] इति सूक्ते निविदः स्थान-
विशेषं दर्शयति—**बरोः-दधाति** । बरुनामा कश्चिदृषिः । स 'प्र ते महे'[g] सूक्तं (7.२६)
दृष्टवान् । तेनर्षिणैव तस्य सूक्तस्यौपचारिकः प्रयोगः । तथान्यत्र वेदभागेषु
परःशतं प्रयोगदर्शनात् । 'प्र ते महे'[g] इत्यस्यैकादशर्चः पठित्वा निविदं पठेत् ।
निविद उपरितनं शस्त्रभागमृक्संख्याभिधानमुखेन विधित्सुराह—**मध्य-अभ्यु-** (7.२७)
**दैति** । एकशतं खल्वस्मिन् शस्त्रे ऋचो भवन्ति । तस्मिन्नेकशतसंख्यक-
संघे निविदः पूर्वमेकपञ्चाशद् भवन्ति । तत्र हि उक्थमुखीयान्तं पूर्ववत् ।
अनुभयसामपक्षे उक्थमुखीयान्ताभिः द्वादशभिः ऋतुर्जनित्रीति त्रयोदशर्चां
संयोगे पञ्चविंशतिर्भवन्ति । स्वयोनिपक्षे चतुर्दशभिरेकादशर्चां मेलनेऽपि[1]
तावत्यः। अस्वयोनिमहादिवाकीर्त्यपक्षयोरपि षोळशभिर्नवर्चां समवाये ताव-
त्संख्या भवन्तीति सर्वपक्षेष्वपि पञ्चविंशतिसंख्यासंपत्तौ 'एन्द्र याहि'[f] इति
पञ्चदशभिश्चत्वारिंशत् । 'प्र ते महे'[g] इत्येकादशभिरेकपञ्चाशद् भवन्ति ।

a. RV. 6. 20.
b. RV. 6. 22.
c. RV. 6. 18.
d. RV. 2. 13.
e. RV. 1. 51.
f. RV. 1. 130.
g. RV. 10. 96.

1. T. च'''मेलनेऽपि

एकपञ्चाशतमृचः शस्त्वा निविदं पठेत् । निविदनन्तरं परिशिष्टे द्वे पठेत् ।
तदनन्तरं पठनीये 'आ सत्यो यातु'[a] इति सूक्ते ऋक्संख्यामभिधत्ते—**आ-**
(7. २८) **त्रयोविंशतिः** । एकविंशतिः पठनीया इति शेषः । पूर्वाभ्यां मेलने संख्यामाह—
तास्त्रयोविंशतिरिति ।

अथ विश्वजित इति सूक्तगतामृक्संख्यामभिधत्ते—**विश्वजित-एकयान-**
(7. २९) **त्रिंशत्** । त्रयोविंशतिसहिताः षळृचः । 'हंसः शुचिषद्'[b] इत्यस्या अप्या-
(7. ३०) वृत्तिनिबन्धनं सप्तसंख्यत्वमाह—**दूरोहणीयाः-षट्त्रिंशत्** । ता एकोनत्रिंश-
त्सहिताः सप्त ऋचः । 'एष प्र पूर्वीः'[c] इत्यस्य स्थाने सूक्तान्तरं विधत्ते—
(7.३१-३३) **अभूः-एकचत्वारिंशत्** । त्रिष्टुप्छन्दस्कम् । पञ्चर्चां षट्त्रिंशत्संयोगे ह्येक-
(7.३४-३६) चत्वारिंशत्संख्योत्पद्यते । सूक्तान्तरं विधत्ते—**त्यमू-चतुश्चत्वारिंशत्** । 'त्यमू
षु वाजिनम्'[d] इति सूक्तं तार्क्ष्यदृष्टत्वात्तार्क्ष्यशब्देनोक्तम् । तिसृभिरेकचत्वा-
रिंशदृचां मेलने हि चतुश्चत्वारिंशदृचो भवन्ति । 'पतङ्गम्'[e] इति सूक्तसंयोगजां
(7. ३७) संख्यामाह—**पतङ्गः-सप्तचत्वारिंशत्** । पूर्ववदत्रापि पतङ्गशब्दः सूक्ते वर्तनीयः ।
(7. ३८) परिधानीयासहितानामुक्तसंख्यानामृचां संख्यामाह—**उरुं-पञ्चाशत्** । अथ
(7. ३९) निविदः प्राक्तनशस्त्रभागगततत्समुदितसंख्यामनुवदति—**पूर्वा एकपञ्चाशत्** ।
(7. ४०) मिलितानां भागद्वयनिविष्टानामृचां संख्यामाह—**ता-ब्राह्मणम्** । ब्राह्मणं
त्वत्र पूर्वोक्तम् 'शतायुर्वै'[f] इत्यादिकमेव द्रष्टव्यमित्याह—तासामुक्तमिति ।
अत्र सूत्रम्—'अथ कौषीतकम् । समानमोक्थमुखीयायाः । ऋतुर्जनित्रीय-
मुद्धृतबृहद्रथन्तरे । तस्यैवैकादश स्वयोनौ । नवान्यत्र । एन्द्र याहि हरिभिरिति
पञ्चदशोद्धृत्य साव्यम् । बरोरेकादश शस्त्वा निविदम् । अभूरेक इति साव्यस्य
स्थाने तार्क्ष्यः पूर्वः पतङ्गात् । एकशतं निष्केवल्यम्'[g] इति ॥

a. RV. 4. 16.
b. RV. 4. 40. 5.
c. RV. 1. 56.
d. RV. 10. 178.
e. RV. 10. 177.
f. KB. XVIII. 8. २.
g. ŚŚ. 11. 14. 20–29.

यस्याधीतिविधौ भ्रमादिघटिते पाठान्यथात्वे स्फुटं
श्रूयन्ते युगपन्न नेति परितो वाचो बहूनां क्षणात् ।
दर्पादन्यथयन् यदक्षरमपि प्रेत्योल्बणं यातनाः
प्राप्नोति क्रमशोऽखिला भगवते वेदाय तस्मै नमः[1] ॥
अध्येतॄणामनादिः क्वचिदिह पदवाक्यादिगः पाठभेदो
दृष्टोऽसौ यत्र तत्रेतरतरपरिसंख्यानहेतोरभावात् ।
कुर्वे तत्तत्प्रभेदद्वितयमपि यथाशक्त्यभिज्ञोपदेशं
वाक्ये सादौ प्रमादस्खलितमिदमिति प्रायशः शक्यते हि ॥

इह केचिदध्येतारो विभ्राड् बृहदित्यारभ्य निष्केवल्यशस्त्रविषयमधिकं
वाक्यजातमधीयते—**विभ्राट्-रूपम्।** गतमेतत्। सामप्रगाथानन्तरं योनि- 4. १-८
शंसनं विधत्ते—**अथ-शंसति।** 'अभि त्वा शूर नोनुमः'[a] 'त्वामिद्धि हवामहे'[b] 4. ९
इत्येते साम्नो योनी शंसेत्। अथोक्थमुखीयां विधत्ते—**इन्द्रः-रूपम्।** महा- 4.१०,११
दिवाकीर्त्यपृष्ठे पूर्वविहितामपोद्यान्यां सिद्धान्ततया विधत्ते—**शं-रूपेण।** 4.१२,१३
सूर्यदेवत्या सूर्यदेवत्यस्य पृष्ठस्योक्थ्यमुखीया स्थिता। 'इन्द्रः किल'[c] इत्यस्याः
पुनरिन्द्रदेवत्यत्वेन नात्र तावत्यभिरूपता। तेन 'शं नो भव'[d] इत्येषैव महा-
दिवाकीर्त्यपृष्ठपक्ष उक्थमुखीया कर्तव्या। सूक्तं विधत्ते—**य-रूपेण।** अन्त- 4.१४,१५
रिक्षस्थानदीप्तिहेतुत्वम् आदित्यस्य रूपमिति तद्रूपोपेतत्वादिदं सूक्तमभि-
रूपम्। महादिवाकीर्त्यपक्षे वैशेषिकविधानमुपसंहरति—**एवं-भवति।** यदि 4. १६
महादिवाकीर्त्याख्यं साम पृष्ठं भवति तद्युक्तप्रकारं शस्त्रं भवति। इदानीं
स्वयोनिबृहत्पक्षे विशेषं दर्शयति—**यद्यु-रूपम्॥** 4.१७-२०

इति चतुर्थः खण्डः

a. RV. 7. 32. 22.
b. RV. 6. 46. 1.
c. RV. 10. 111. 3.
d. RV. 10. 37. 10.

1. T. omits this line with gap.

5. १,२ **द्यौः-रूपम्** । स्वयोनौ 'त्वामिद्धि हवामहे'[a] इत्यस्मिन् प्रगाथे बृहत्साम
सामगाः कुर्युः । यदि तर्हि बृहत आतानं यथाप्रकृति साम प्रगाथान्तं
पठेत् । तदनन्तरं रथन्तरस्य योनिमनुशंसेत् । न बृहतः, तस्य पठितत्वात् ।
पूर्वस्मिन् पक्षे त्वपठितत्वाद्योनिद्वयशंसनम् । तदनन्तरम् 'इन्द्रः किल'[b] इत्यु-
क्थमुखीया पठनीया । तस्य अनन्तरं 'द्यौर्न य'[c] इति सूक्तं पठनीयम् । एता-
वान् स्वयोनिबृहत्पक्षे विशेषोऽवगन्तव्यः ।

5. ३-१२ अथास्वयोनिबृहत्पक्षे विधत्ते—**न-ब्राह्मणम्** । बृहत् कुर्युरिति शेषः ।
सूर्यवान् सूर्यशब्दयुक्तः । तत् सूर्यशब्दवत्त्वम् । 'सहस्रं सूर्या'[d] इत्यंशेन सूर्य-
वान् । इहोभयोरपि योनिशंसनं कर्तव्यम् । बृहतो योनेरपठितत्वात् । श्राय-
न्तीयतृचस्यैव स्तोत्रियत्वात् । तस्या उक्तमिति । 'स हि जिष्णुः पथिकृत्
सूर्यायेति सूर्यवती'[e] इति । तस्योक्तमिति । 'दिव्यानि दीपयोऽन्तरिक्षेत्येतेन
रूपेण'[f] इति ।

5. १३ बृहत्पृष्ठपक्षे विधिमुपसंहरति—**एवं-कुर्युः** । अथोद्धृतबृहद्रथन्तरपक्षे
5.१४-१८ विशेषमाह—**अनुभयसामानं-रूपेण** । यदि सामगा विषुवन्तमनुभयसामानं
बृहद्रथन्तराख्यद्वयरहितं कुर्युः, तर्हि उक्थमुखीयापर्यन्तं महादिवाकीर्त्यपक्षेण
समानं भवति । अयं तु विशेषः—अनुभयसामपक्षे योनिद्वयशंसनं न कर्तव्यम् ।
तयोः पवमाने सामगैरकरणात् । सूक्तं च त्रैष्टुभं 'तमु ष्टुहि'[g] इत्येतत् पठ-
नीयम् । 'य एक इद्'[h] इति 'द्यौर्न य'[c] इति वा । एवं तावत् पक्षचतुष्टये
5. १९ विशेषान् विधायाधुना साधारणं विधिं वक्तुमाह—**समानमुत्तरम्** । तत्र
5.२०,२१ जगतीछन्दस्कमेकं सूक्तं विधत्ते—**अभि-रूपम्** । अथ सूक्तसंबन्धि छन्दः
5.२२-२४ प्रशंसति—**ता-स्पृशन्ति** । स्पृशन्ति प्राप्नुवन्तीति यावत् ।।

इति पञ्चमः खण्डः

a. RV. 6. 46. 1.
b. RV. 10. 111. 3.
c. RV. 6. 20.
d. RV. 8. 70. 5.
e. KB. XXV. 4. १०.
f. KB. XXV. 4. १५.
g. RV. 6. 18.
h. RV. 6. 22.

निविद्धानीयं सूक्तान्तरं विधत्ते—**प्र-इति**। सूक्तं शंसेदिति शेषः। 6. १
अस्मिन् सूक्तेऽवधिप्रदर्शनेन निवित्पाठं विधत्ते—**तस्य-दधाति**। तस्य 'प्र ते 6. २
महे'[a] इति सूक्तस्याद्या नवर्चः शस्त्वा 'उत स्म सद्म'[b] इत्यस्या ऋचः पाठात्
पूर्वं 'शोंसावो'[c] इत्याहावमुक्त्वा निविदं पठेत्। तदेतत् स्तौति—**आविष्कृधि-**
**रूपम्**। निविदाम् उपरितनशस्त्रभागगतानामृचां[1] संख्याप्रदर्शनेन सह शस्त्र- 6. ३,४
वल्पिंत चिकीर्षुः[2] निवित्पाठादूर्ध्वमेतत्सूक्तगतसंख्यामाह—**सर्वहरेः-अभ्युदेति**। 6. ५
सर्वहरेः[3] 'प्र ते महे'[a] इति सूक्तस्य[4] संबन्धिनीश्चतस्र ऋचः परिशिनष्टि।
[5]ता निवित् पाठादूर्ध्वं[5] शंसनीयाः। अनन्तरपठनीयतयैकं सूक्तं विधत्ते—
**आ-पञ्चविंशतिः**। बरोः पाठादूर्ध्वं 'आ सत्यो यातु'[d] इत्येकविंशत्यृचं[6] 'महि 6. ६-८
ज्योतिः'[e] इति पादे सूर्यवाचकज्योतिःशब्दश्रवणादादित्यरूपयुक्तं सूक्तं[7] पठेत्।
एवं सति चतस्र एकविंशतिश्च मिलिता ऋचः पञ्चविंशतिर्भवन्ति। षळृचं
सूक्तान्तरं विधत्ते—**विश्वजिते-एकत्रिंशत्**। हर्यतवत्त्वमेतस्याह्नो रूपमिति 6. ९-११
प्रागुक्तत्वाद् रूपयुक्तमेतत् सूक्तम्। पञ्चविंशतिः षट् च मिलिता एकत्रिंशत्।
अस्मिन् सूक्ते पञ्चमीषष्ठ्योर्मध्ये दूरोहणशंसनं विधत्ते—**तासु-अप्रच्युत्याम्**। 6.१२-२५
व्याख्यातमेतत्॥

इति षष्ठः खण्डः

अथैकस्यामपि 'हंसः शुचिषद्'[f] इत्यस्यामृचि सप्तसंख्यावृत्त्युपाधिनिब-
न्धनां सप्तसंख्यां संपादयति—**सैषा-अष्टत्रिंशत्**। दूरोहणसंबन्धिनी सैषा 7. १,२
'हंसश्शुचिषद्'[f] इत्यृक् संशस्ता आवृत्ता सती सप्तसंख्याका ऋचः संपन्ना

a. RV. 10. 96.
b. RV. 10. 96. 10.
c. ŚS. 7. 9. 1.
d. RV. 4. 16.
e. RV. 4. 16. 4.
f. RV. 4. 40. 5.

1. T. omits उपरित ( gap )
2. T. चिकीर्षन्
3. T. omits हरेः ( gap )
4. T. सूक्त
5–5. T. omits.
6. B. T. °त्यृचः
7. B. omits

भवन्ति । ता ऋच एकत्रिंशत् सप्त च मिलित्वा[1] अष्टत्रिंशद् भवन्ति । सूक्ता-
7. ३-५ न्तरं विधत्ते--**एष-चतुश्चत्वारिंशत्**। ता अष्टत्रिंशत् षट् च मिलिताः सत्यः ।
7.६-८ तृचं सूक्तान्तरं विधत्ते—**पतङ्गम्-सप्तचत्वारिंशत्** । 'द्योतमानाम्' इत्येवं
द्योतनस्यादित्यधर्मत्वात् तद्रूपयुक्तमेतत् सूक्तम् । ताश्चतुश्चत्वारिंशत् तिस्रश्च
7. ९-११ मिलिताः । अथ परिधानीयां विधत्ते—**उरुं-पञ्चाशत्**। ज्योतिःशब्दवत्त्वाद्
रूपयुक्तया 'उरुं न'[a] इत्येतया त्रिवारं पठितया तत एव त्रिसंख्यत्वमापन्नया
ऋचा सहितास्ता निवित्पाठादूर्ध्वं पठिता ऋचः पञ्चाशत्संख्याका भवन्ति ।
7.१२ निविदः पूर्वं पठनीयानां समुदितानां संख्यामाह--**पूर्वा एकपञ्चाशत्**। अथ
7.१३-१७ सर्वासां समुदितसंख्यामाह—**ता-संपत्**। पर्वाणि संधयः । गतमन्यत् । इति
7.१८-४० पैङ्गी संपदित्यादि पूर्ववत् । **अथ-ब्राह्मणम्**॥

इति सप्तमः खण्डः

इत्येकशतसंख्याभिर्ऋग्भिः संपूर्णविग्रहम् ।
निष्केवल्यं विधायाथ वैश्वदेवं विधीयते ॥

8.१,२ तत्र तावत् सावित्रं विधत्ते—**युञ्जते-रूपम्** । द्यावापृथिवीयं विधत्ते—
8.३,४ **ते-रूपम्**।

8.५,६ आर्भवं विधत्ते—**किमु-रूपेण** । 'यदावाख्यद्'[b] इत्यस्मिन् पादे यद्
अवाख्यदिति पदमस्ति तस्य ज्ञानलक्षणप्रकाशार्थत्वेनादित्यरूपत्वात् तद्रूप-
8.७,८ युक्तमेतत् सूक्तम् । अतोऽभिरूपम्। वैश्वदेवं विधत्ते—**देवान्-रूपम्**। वैश्वदेव-
8.९,१० शस्त्रं समाप्याग्निमारुतशस्त्रे वैश्वानरीयं विधत्ते—**वैश्वानराय-रूपम्** ।
रुरुचानमिति रुचितवत् । भानुनेति भानुमत् । ज्योतिषेति ज्योतिष्मत् ।
8.११,१२ मारुतं विधत्ते—**प्रयज्यवो-रूपम्**।

a. RV. 6. 47. 8. b. RV. 1. 161. 4.

1. T. मिलिताः

जातवेदसीयं विधत्ते—**वेदिषदे–रूपेण ।** [1]-ज्योतिर्मयरथवत्त्वं शुक्रवर्णत्वं 8.१३,१४
तमोहन्तृत्वमिति-[1] त्रीण्यप्यादित्यरूपाणीति । आग्निमारुतशस्त्रक्लृप्तिमुपसंह-
रति—**इत्याग्निमारुतसूक्तानि ।** 8.१५

इदानीमेतदहःशस्त्रक्लृप्तिमुपसंहरति—**इति–सूक्तानि** । अथ विषूव- 8.१६
दाख्यस्याह्नोऽग्निष्टोमसंस्थतामाह[2]—**तद्–संतिष्ठते ।** तद्[3] वैषुवतमहः[4] अग्नि- 8.१७
ष्टोमो भूत्वा समाप्तिं गच्छति । स्तौति—**ज्योतिः–उपयन्ति** । अग्निष्टोमस्य 8.१८-२१
ज्योतीरूपत्वं सर्वोत्तराहःप्रकृतित्वात् । 'अयं ह्येकाह उत्तरेषामह्नां ज्योतिः'[a]
इति प्रागाम्नानात् । एष विषुवदात्मको जगत्प्रकाशक आदित्यो ज्योतीरूपः ।
तत् तेन विषुवतोऽग्निष्टोमान्तताकरणेन ज्योतीरूपविषुवदात्मकादित्यरूपं
ज्योतिरग्निष्टोमात्मकज्योतिषि प्रतिष्ठितं कुर्वन्ति सत्रिणः । तथा सति ये
सत्रिणो वैषुवतमेतदहरनुतिष्ठन्ति, तेऽमृतत्वम् आभूतसंप्लवावस्थानलक्षणं
मुख्यं वा प्राप्ता भवन्ति । ज्योतीरूपत्वादेवंविधमहाफलत्वात् प्रशस्तमेतदहरि-
त्यर्थः । इदानीमेतस्याह्नः समाप्तौ कालविशेषं नियमयति—**पुरा–संस्थाप-
यिषेयुः** । संतिष्ठापयिषेयुः इति केषांचिद् अध्येतॄणामाम्नायः । आदित्यो 8.२२
यस्मिन् कालेऽस्तमेति तस्मात् पूर्वमेवास्य समाप्तिं कर्तुमिच्छेयुः ॥

इत्यष्टमः खण्डः

कुत इत्याशङ्क्य प्रातरनुवाकस्य आदित्योदयादूर्ध्वं कर्तव्यतां नियमयन्
हेतुमाह—**सप्रातरनुवाकम्–भवति** । प्रातरनुवाकेन सहितमेतदहःपठनीयं 9.१
कृत्स्नं दिवाकीर्त्यमेव भवति । प्रातरनुवाकोऽप्युदिते कर्तव्यः । दिवैव कीर्तनी-
यत्वाद् दिवाकीर्त्यमिति वैशेषिकी संज्ञा वेदप्रसिद्धा अस्याह्नः प्रतायते । यत-
स्तस्मात् । **सप्रातरनुवाकेन–समीप्सेयुः** । द्वितीयार्थे तृतीया । समीप्सेयुः 9.२

a. KB. XXI. 6. १०.

1–1. T. ज्योतिर्मयरथ'''न्तृत्वमिति B. अन्धकारापहन्तृत्वम् for तमोहन्तृत्वम्

2. T. omits संस्थ ( gap ) 3. T. स

4. T. बिषुवान्

समाप्तिं कर्तुमिच्छेयुः। तथा च सूत्रम्—'एकविंशस्तोमं बृहत्पृष्ठं महादिवाकीर्त्यं वाग्निष्टोमो विषुवान्। पुरादित्यस्यास्तमयात् संस्थाप्यः। उदिते प्रातरनुवाकः'[a] इति॥

प्रातरनुवाकस्य उदिते कर्तव्यत्वमुक्तम्। तत्र प्रातरनुवाकप्रतिपदृचं
9.३-६ प्रकृतितः प्राप्ताम् आपोरेवतोयामपोद्यान्यां विधत्ते—**अग्नि-रूपम्।** तद्विषुव-
दाख्येऽहनि होता 'अग्निं मन्ये'[b] इत्येतया आपिमित्यनेन पदेन युक्तत्वादापोरेवतीत्यस्या रूपेणाप इत्यनेन युक्तया प्रातरनुवाकं प्रारभेत। न प्रकृताविव 'आपो रेवतीः'[c] इत्यनया। सा चैषा सूर्यस्येति सूर्यशब्दवती भवति। तत् सूर्यवत्त्वमेतस्याह्नो रूपं भवति। इदानीं प्रकृतिशिष्टमेव प्रातरनुवाकप्रारम्भ-
9.७-१० कालं प्रतिप्रसूते—**तदु-समृद्धम्।** प्रातरनुवाकस्य प्रजापतिरूपत्वं प्रागुप-
पादितम्। एतं प्रजापतिरूपं प्रातरनुवाकं तमोयुक्तात् कालादूर्ध्वं नोपाकुर्यात्। अपरिमितरूपत्वात् प्रजापतेः। किंतु विहित एव स्वकाले महारात्रे उपाकुर्यात्। एवं सति तस्य समृद्धिः स्यादित्येवं कौषीतकिराह स्म।

प्रकृताविव महारात्रे प्रातरनुवाकोपाकरणे क्रियमाणे सत्युपांश्वन्तर्यामयागयोरपि स्वकालो न परित्यक्तः स्यात्। अतोऽपि प्राकृत एव काले प्रातरनु-
9.११,१२ वाकोपाकरणं युक्तमित्याह—**तथा-इति।** तथा सत्युपांश्वन्तर्यामयोरपि होमः
स्वकालादन्यस्मिन् काले कृतो न भवेत्। स्वकाल एवानुष्ठानं सिध्यति। 'अथ यस्यैता उभा उदिते जुह्वत्युभौ वानुदिते। उदकयाजी स न सोमयाजी'[d] इति स्वकालातिलङ्घने दोषस्य प्रागेव प्रतिपादितत्वात् तत्परिहारोऽपि सिध्यति। तयोरुपांश्वन्तर्यामयोः। तद् यथाप्राप्तकालानुष्ठानमेव समृद्धिहेतुर्भवति। इतरथोक्तदोषादसमृद्धिर्दुर्निवारेत्यर्थः। इतिशब्द आहेत्यनेन घटनीयः।
9.१३,१४ **वासिष्ठम्-रूपम्।** एतस्मिन् वैषुवतेऽहनि शुक्रत्वपिङ्गाक्षत्वगुणविशिष्टस्यैव
9.१५-१७ होतृत्वेन वरणीयतामेकेषामभिमतं दर्शयति—**शुक्रः-तत्।** शुक्रः श्वेतवर्णः।
पिङ्गवर्णे अक्षिणी यस्य। तथाविधाकारोऽस्मिन्नहनि होता कार्यः। कस्मात्? एतेन विषुवदाख्येनाह्ना सत्रिणोऽमुं जगत्प्रकाशकमादित्यमाप्तुमिच्छन्ति। तत्

a. ŚŚ. 11. 13. 1–3.
b. RV. 10. 7. 3.
c. RV. 10. 30. 12.
d. KB. XII. 5. १६–१७.

तत्र यथा लोके श्रेयांसं राजादिकं यत् किंचिदुचितं द्रव्यं—'रिक्तहस्तस्तु नोपेयाद् राजानम्'[a] इति वचनात् आहरन्नुपायनौपयिकतया गृह्णन् जनः प्राप्नुयात्, तथैवैतद् भवति यदेवंविधाकृतेर्होतुः स्वीकरणम्। तादृशस्यैव होतुरादित्यरूपसादृश्यसंपत्त्या अस्मिन्नहन्याभिरूप्यात्। नायमीदृशो नियम इति स्वाभिमतमाह—**यथोपपादम्–स्थितम्।** यथोपपद्यते संपद्यते शुक्र- 9.१८
त्वादिमानशुक्रत्वादिमान्, तथाविध एव होता स्यादिति व्यवस्थितिः, न तु शुक्रत्वादिमानेवेति। अमुं वा एतेनेत्युक्तं हेतुमन्यथासिद्ध्या कदर्थयति—**शस्त्रेण–संपादयिषेयुः।** शस्त्रेणैव न होत्रापि। संपादयितुमिच्छेयुः। इच्छात्र यत्न 9.१९
एव। संपादयितुं यतेरन्नित्यर्थः।

अथात्राहनि असाधारणं पशुं विधत्ते—**सौर्यः–सवनीयस्य।** सूर्यदेवत्यः 9.२०
कश्चित् पशुः प्रकृतितः प्राप्तस्याग्नेयस्य सवनीयस्य पशोरुप समीपे आलम्भि-
तव्यो[1] भवति। तस्योपांशुप्रयोगतामाह—**स–भवति।** विहितामुपांशुप्रयोज्य- 9.२१
तामेव विपक्षे बाधकप्रदर्शनेनोपपादयन् स्तौति—**स–स्यात्।** स यः कश्चिद्धोता 9.२२-२४
तं सौर्यं[2] पशुं निर्ब्रूयात्। निष्कृष्य[3] विस्पष्टमुच्चैर्वचनं कुर्यात्। तमुच्चैः प्रयोगं कुर्वाणं होतारं यः कश्चिदभिज्ञः त्वमेवं सौर्यं पशुमुच्चैः प्रयोगं कुर्वन् दुश्चर्मा त्वग्दोषवान् किलासी कुष्ठवांश्च भविष्यसीति ब्रूयात्। तत् तस्य वचनं यथार्थमेव स्यात्। तस्मादुक्तदुश्चिकित्समहारोगापत्तिभयादुपांशु[4] तत्प्रयोगः
कर्तव्यः। प्रसंगादुपांशुप्रयोज्याः पशुयागा इयन्त एवेत्यवधारयति—**ते–निरुक्ताः।** 9.२५-२७
सौर्यः सूर्यदेवत्यः। सवितृदेवत्यः। प्रजापतिदेवत्यः। वाक् सरस्वती देवतास्येति। इत्येते चतुःसंख्या एव पशवः इहोपांशुप्रयोगा भवेयुः। अथ गणितेभ्य एतेभ्योऽन्ये पशव उच्चैःप्रयोगा भवन्ति।

विषुवदहरनुष्ठानानन्तरं प्राग् विहितानामेव त्रयाणां स्वरसामनाम्नां
यागानामावृत्तत्वगुणविशिष्टतया अनुष्ठानं विधत्ते—**अथ–ब्राह्मणम्।** पूर्वं 9.२८

a. Cf. *Vikramārkacaritam*. VII. 121.

1. M. T. आलम्भितो
2. T. omits ( gap )
3. T. omits निष्कृ ( gap )
4. B. omits उक्त

यस्तृतीयः स इह प्रथमः कर्तव्यः । यो द्वितीयः स मध्यमः । यः प्रथमः स तृतीयः । इत्येवं प्राचीनक्रमवैपरीत्येन त्रीन् स्वरसाम्नोऽनुतिष्ठेयुः । तेषामुक्तम् 'स्वर्भानुर्ह वा'[a] इत्यादिकमेव ब्राह्मणं द्रष्टव्यम् ॥

इति नवमः खण्डः

इत्थं विषुवन्नाम्ना विदितो विहितोऽत्र कश्चिदेकाहः ।
संप्रति विश्वाजिदाख्यं किंचिदथाहर्विधातुमारभते ॥

10.१-३ **त्रयोदशम्-भवति** । प्रायणीयातिरात्रादारभ्य गणनायां क्रियमाणायां विश्वजितस्त्रयोदशत्वात् तत्संख्यासामान्यात् त्रयोदशमासावाप्तिहेतुत्वम् । अन्यद् गतम् ।

10.४ अथास्य सर्वस्तोमतां सर्वपृष्ठतां च प्रदर्शयितुं प्रशंसति—**तम्-इति** । तं प्रकृतं विश्वजिन्नामकं[1] यागविशेषमित्येवं वेदविद आहुः । कथमिति चेत् ? अयं विश्वजिदेकाहात्मकः कश्चित् षळह एव । षळहस्य खल्वहःषट्कसमुदायरूपत्वेनैकाहरूपत्वमनुपपन्नम् यथा पृष्ठ्यादिषु न तथाऽयम् । किंतु एकाह एव सन् षळहः । तेन षळहत्वस्य एकाहरूपत्वस्य च विरुद्धस्यापीह दृष्टत्वात् प्रशस्तोऽयम् । कथं पुनरस्य षळहरूपत्वम् ? न हि विरुद्धयोर्द्वयोरेकत्र संभव
10.५,६ इत्याकाङ्क्षायामाह—**यदि-क्रियते** । षळहे अहन्यहनि यत् कर्म क्रियते तत् कर्मास्मिन् विश्वजिन्नामके एकस्मिन्नेवाहनि क्रियते । तेनैकाहर्निवर्त्यत्वादेकाहरूपत्वम् । षळहानुष्ठेयकर्मसंबन्धाद् गौणं षळहरूपत्वमिति न विरोधः । षळहादेकाहाच्च विशिष्टत्वं चास्य सिद्धम् ।

10.७,८ एतदेव प्रपञ्चयन् सर्वस्तोमत्वं सर्वपृष्ठत्वं चाह—**तद्-समवधीयन्ते** । अस्मिन् विश्वजिदाख्येऽहनि तदिदं बहु विश्वरूपं नानाप्रकारं च कर्म क्रियते । किं तदिति चेत्, सर्वाणि रथन्तरादीनि रैवतान्तानि पृष्ठानि उच्चावचाः सर्वे त्रिवृदादयः त्रयस्त्रिंशान्ता स्तोमाश्चात्र विश्वजिति समवहिता भवन्तीति

a. KB. XXIV. 4. १.

1. T. विश्वजितं नामकं

यदस्ति तदेतद् विश्वरूपं बहुकर्मकरणं विश्वजिति भवति । एतेन सर्वपृष्ठत्वं सर्वस्तोमत्वं चास्याह्न उक्तम् । तदुक्तं सूत्रकृता—'विश्वजित् सर्वस्तोमः सर्वपृष्ठः बृहत्पृष्ठो वाग्निष्टोमः'[a] इति । 'पृष्ठशब्दः स्तोत्रकर्मवचनः'[b] इति न्यायविदः ।

पृष्ठानां स्थानविशेषप्रदर्शनमुखेन सर्वपृष्ठत्वं स्फुटयति—**वैराजम्–**
**उपयन्ति** । निष्केवल्यसंबन्धि पृष्ठं प्रत्यक्षशब्देन व्यपदिशन्ति वैदिकाः । 10.९-१७
रथन्तरं भवतीति शेषः । एवं मैत्रावरुणस्येत्यादावपि । त एते सर्वान् स्तोमान् सर्वाणि च पृष्ठान्यनुतिष्ठन्तः एतमधिमासाख्यं त्रयोदशं मासमाप्ता भवन्ति । कुतः ? यस्मादेतदहस्त्रयोदशं भवति । अस्मिंश्च त्रयोदशेऽहन्युक्तप्रकारेण पृष्ठ्यान्यहान्यनुतिष्ठन्ति । षट्संख्याहःसंबन्धिनां पृष्ठानां करणात् । तद्द्वाराह्नामप्यनुष्ठितत्वसंपत्तेः । कथं पुनरस्याह्नस्त्रयोदशत्वम् ? उच्यते । गवामयनसत्रे हि प्रथमं प्रायणीयातिरात्राख्यमहः । द्वितीयं चतुर्विंशम् । तृतीयः पृष्ठ्यः । चतुर्थोऽभिप्लवः । पञ्चमोऽभिजित् । त्रयः स्वरसामानः । तेऽष्टौ । विषुवान्नवमः । आवृत्ता स्वरसामानस्त्रयः । ते[2] द्वादश । विश्वजित्तु त्रयोदश इति । **तस्य–**
**विश्वजित्** । कयाशुभीयमित्यनया संज्ञया प्रसिद्धमेतत् सूक्तं कयेति कशब्दयुक्तं 10.१८-२५
भवति । तदेतत् प्रशस्तम् । यस्मात् कशब्दवाच्यः प्रजापतिरेवायं विश्वजित् । तस्यैव सर्वकारणत्वेन मुख्यतया विश्वजिच्छब्दवाच्यत्वात् ।

अथ निष्केवल्यशस्त्रे स्तोत्रियानुरूपौ विधत्ते—**यौ–अन्यूङ्खनाय** । वैरा- 10.२६-२८
जाख्यस्य साम्नो यावमू स्तोत्रियानुरूपौ 'पिबा सोममिन्द्र मन्दतु त्वा'[c] 'श्रुधी हवं विपिपानस्याद्रेः'[d] इत्येतौ भवतः, ताविह स्तोत्रियानुरूपौ कर्तव्यौ । तयोः स्तोत्रियानुरूपयोः यथास्मिन् पाष्ठिके चतुर्थेऽहनि न्यूङ्खनं क्रियते, तथैवात्रापि न्यूङ्खनं कुर्यात् । स्तोत्रिय एव न्यूङ्खस्योपदेशात् । न खलु स्तोत्रियस्थानं स्तोत्रियगतं वैराजं साम अन्यूङ्खनसामर्थ्याय भवति ।

a. ŚS. 11. 15. 1.
b.
c. RV. 7. 22. 1.
d. RV. 7. 22. 4.

1. B. T. तस्माद् for यस्माद्
2. T. तैः

किंतु न्यूङ्खनसंयोगायैव भवति । सूत्रितं हि—'सन्यूङ्खं वैराजम्'[a] इति ॥

इति दशमः खण्डः

11.१-३ सूक्तं विधत्ते—**तद्-विश्वजित्** । अत्रादौ प्रस्तुतविश्वजिदभिवदनादा-
भिरूप्यं दर्शितम्—यज्ञो वा इति । भुवनेषु मध्ये यज्ञस्यैव ज्येष्ठत्वम् ।
यज्ञस्य जगद्धेतुत्वात् । 'यज्ञेन वै प्रजापतिः प्रजा असृजत'[b] इत्यादिश्रुतेः । स च
यज्ञः प्रजापतिरेव सर्वदेवतात्मकस्य तस्यैव यजनीयत्वात् । स प्रजापतिरेव
मुख्यया वृत्त्या विश्वजिदित्युक्तम् । पार्ष्ठिकात् षष्ठादह्नस्तृतीयसवनमति-
11.४-६ दिशति—**अथ-विश्वजित्** । अतिदेशायातां षष्ठाहःप्रतिपदम् 'अभि त्यं देवम्'[c]
11.७-९ इत्येतामपोह्य 'तत् सवितुः'[d] इत्येतामेव प्रापयति—**ऐकाहिकी-एव** । एकाहे
प्रकृतावग्निष्टोम उत्पन्ना । सूत्रितं हि—'अनुचरप्रभृति षष्ठात्तृतीयसवनम्'[e]
इति ।

अथैकाहरूपे अतिरात्रसंस्थे विश्वजिति[1] तृतीयसवने संवत्सरसत्रावय-
वभूते अग्निष्टोमसंस्थे माध्यंदिनसवने च होतृहोत्रकाणां शिल्पशंसनं प्रश्नोत्तर-
11.१० व्याजेन विधत्ते तदाहुरित्यादिना । तत्र तावत् प्रश्नमाह—**तद्-इति** ।
विश्वजितो हि बहवो भेदाः पृष्ठभेदनिमित्ततः संस्थाभेदनिमित्तवशाच्च ।
सर्वपृष्ठो बृहत्पृष्ठः परोक्षपृष्ठ इत्यादि पृष्ठभेदनिबन्धनो भेदः । तथा एकाहः
संवत्सरावयवभूतश्च । तत्रैकाहत्वे अतिरात्रसंस्थः, सांवत्सरिकत्वे अग्नि-
ष्टोमसंस्थ इति । तदेतत् सर्वं सूत्रपर्यालोचनया अवगन्तव्यम् । विस्तरभीत्या
पुनरत्र न लिख्यते । तत् तत्र विश्वजिति केचिज्जिज्ञासवः पृच्छन्ति—योऽयमे-
काहभूतः सर्वपृष्ठोऽतिरात्रसंस्थो विश्वजिदस्ति, तस्मिंस्तृतीयसवने शिल्पानि
नाभानेदिष्ठादीनि होतृहोत्रकैः शस्यन्ते । संवत्सरावयवभूते अग्निष्टोमसंस्थे

a. ŚS. 10. 5. 9.
b. TS. 5. 3. 5. 4.
c. VS. 4. 25.
d. RV. 5. 82. 1.
e. ŚS. 11. 15. 7.

1. T. विश्वजिदिति

विश्वजिति माध्यंदिने सवने वालखिल्यादीनि शिल्पानि शस्यन्ते। स एष शिल्पशंसने स्थानभेदः किंनिबन्धन इति प्रश्नः।

तत्रैकाहे तृतीयसवने शिल्पशंसनहेतुं वदन्नुत्तरमाह—**ये-आयतनम्**। 11.११-१७
ये वा इमेऽवाञ्च इत्यस्यैव प्रपञ्चः पुरुषो वा इत्यादि। योऽयं यज्ञः स पुरुष-साधर्म्यात् पुरुष इति द्रष्टव्यम्। तस्य यज्ञपुरुषस्य य ऊर्ध्वा उपरिष्टाद् भवाः शिरस्याः स्तन्यौ च प्राणा अपेक्षिताः ते प्रातःसवनमिति द्रष्टव्यम्। प्राथम्य-साम्यात्। जननकाले पूर्वकायभागस्य योनेः प्रथमं निर्गमात्। योऽयमात्मा मध्य-भागस्तन्माध्यंदिनं सवनम्। ये त्ववाञ्चो नाभेरधस्तादवस्थिता रेतोमूत्रपुरीष-विसर्गहेतवः प्राणाः, 'त इमेऽवाञ्चो रेतस्यो मूत्र्यः पुरीष्याः'[a] इत्यन्यत्र श्रवणात्; तत् तृतीयसवनं भवति। पश्चाद्भवत्वसाम्यात्। शिल्पान्यपि तथाविधानि अधोवर्तिप्राणरूपाणि। तेषामपि यज्ञस्यापरभागे पठ्यमान-त्वात्। यस्मादेवं तस्मात् तृतीयसवने शिल्पानां शंसनमुपपद्यते। तेषां तृतीय-सवनस्य तुल्यरूपत्वेन तत्संबन्धस्योचितत्वात्।

अग्निष्टोमविषये माध्यंदिनसवने तच्छंसनमुपपादयति—**अथ-इति**। 11.१८-२५
पठिष्यति हि—'सोऽग्निष्टोमः संतिष्ठते। यः सत्रियः सांवत्सरिको विश्व-जिद्'[b] इति। संवत्सरनिर्वर्त्यसत्रमध्यवर्तित्वात् सत्रियत्वं सांवत्सरिकत्वं च। अत एवाग्निष्टोमसंस्थत्वम्। तस्मिन् सर्वपृष्ठे विश्वजिति माध्यंदिने सवने शिल्पानि शस्यन्त इति यदस्ति तद् युक्तम्। कस्मात्? यानि मध्यं-दिनवर्तीनि पृष्ठानि तानि यज्ञपुरुषस्यात्मा भवति। प्राधान्यात्। यानि शिल्पानि तानि प्राणा भवन्ति। पृष्ठसामानुरोधित्वात् शस्त्रशंसनस्य। आत्माधारत्वाच्च प्राणानाम्। एवमात्मप्राणात्मकत्वे पृष्ठशिल्पानां स्थिते तयोरन्योन्यसंबन्धो युक्त एव। यस्मात् प्राणा आत्मना वियुक्ता न प्रत्येतुं शक्यन्ते। आत्मापि प्राणवियुक्तो नोपलब्धुं शक्यते। न खल्वेतदात्मप्राणरूपं द्वयमन्योन्यवार्तानभिज्ञं सत् पृथक् पृथग् व्यवस्थितं भवति। अनुपलब्धत्वाद-नुपपन्नत्वाच्च। यस्मादेवं तस्मादग्निष्टोमसंस्थे विश्वजिति मध्यंदिनेऽपि शिल्पानि शस्यन्त एव। पृष्ठानां मध्यंदिनस्थानत्वात्। मध्यंदिनादन्यत्र शिल्पानि पठन्नहं प्राणेभ्यः सकाशादात्मानमपगमय्यान्यत्र स्थापयानीति परि-

a. AB. 1. 20. 4. d. KB. XXV. 12. २४; 13. १.

भयं द्योतयन् मध्यंदिने शिल्पानि शंसेत् । इतरथा प्राणेभ्य आत्मनो विच्छेदः प्रादुर्भवेत् । तत्परिहारार्थं यथोक्तविधया शिल्पानि पठेदित्यर्थः ॥

इत्येकादशः खण्डः

12.१-३ इत्थं विश्वजिच्छस्त्रक्लृप्तिं विधाय प्रशंसति—**अथो-वेद ।** विश्वजितः सर्वयज्ञेभ्यः व्यावृत्त्यर्थोऽथोशब्दः । योऽयं विश्वजित् स प्रजापतिरेव, तस्य मुख्यया वृत्त्या[1] विश्वजिच्छब्दवाच्यत्वात् । विश्वजिदात्मकः प्रजापतिरेव सर्वं दृश्यमानं वस्तुजातं भवति । तस्यैव जगत्सृष्टिस्थितिप्रलयकर्तृत्वात् । तत् तथा सति यः कश्चिदेवं वेद जानाति स वेत्ता सर्वरूपेण विश्वजिता सर्वमाप्तव्यमाप्नोति । वेदनफलोक्तौ कैमुतिकन्यायेनानुष्ठानफलमप्युक्तं भवति । अस्यां
12.४-६ विहितायां शस्त्रक्लृप्तौ किंचिद् वक्तव्यमस्तीति मन्यमान आह—**तत्र-इति ।** तत्राग्निष्टोमसंस्थे सर्वपृष्ठे विश्वजिति होता रौद्रीं प्रकृतितः प्राप्तामेव पठित्वा तदनन्तरं मारुतस्य पुरस्तात् 'प्र वो महे'[a] इत्यादिकमेवयामरुत्संज्ञितं सूक्तं पठेत् । वयमच्छावाकस्य स्वभूतं शिल्पमेतदेवयामरुदाख्यमन्तरितं विपरिलुप्तं करवामेति परिभयं द्योतयन् होतैवयामरुतं शंसेत् ।

इह खलु मध्यंदिने शिल्पानां शंसनं क्रियते । तत्र मैत्रावरुणस्य महानाम्नीनां 'विदा मघवन्'[b] इत्याद्याः स्तोत्रियः । अनुरूपः 'प्रत्यस्मै पिपीषते'[c] इत्याद्याः । तदनन्तरं 'कद् न्वस्य'[d] इति कद्वतः शंसनम् । तत उक्थमुखीयां शस्त्वा वालखिल्यानां षट् सूक्तानि इन्द्र निहवम् 'आ नो विश्वे सजोषसः'[e] इति च प्रगाथं विना विहरणरहितानि शंसेत् । अथ 'अभूरेकः'[f] इति सामसूक्तमहीनसूक्तं च शस्त्वा ऐकाहिक्या शस्त्रं समापयेत् । ब्राह्मणाच्छंसी 'यद् द्याव इन्द्र'[g] 'यदिन्द्र यावत'[h] इति स्तोत्रियानुरूपौ 'कन्नव्यः'[i] इति कद्वन्तमुक्थमुखीयां कुन्तापरहितमन्यूङ्ख्वं वृषाकपिं 'यो जात'[j] इति सामसूक्तमहीनसूक्तं च शस्त्वा

a. RV. 5. 87.
b. AA. 4. 1.
c. RV. 6. 42. 1.
d. RV. 8. 66. 9.
e. RV. 8. 54. 3.
f. RV. 6. 31. 1.
g. RV. 8. 70. 5.
h. RV. 7. 32. 18.
i. RV. 8. 3. 13.
j. RV. 2. 12.

1. B. मुख्यवृत्यया; T. मु···( gap )

ऐकाहिक्या परिदध्यात् । अच्छावाको 'रेवतीर्नः सधमादे'[a] 'रेवाँ इद् रेवतः'[b] इति स्तोत्रियानुरूपौ 'कद्‌ न्वस्य'[c] इति कद्वन्तमुक्थमुखीयामेवयामरुतस्थाने 'द्यौर्न य इन्द्र'[d] इति विष्णुन्यङ्गं सूक्तं 'प्र घा न्वस्य'[e] इति सामसूक्तमहीनसूक्तं च शस्त्वा ऐकाहिक्या परिदध्यात् । अत्र च शिल्पशंसने अच्छावाकेन शिल्पस्य स्वकीयस्यैवयामरुतो शंसनात् तदन्तरितमेव भवेत् । तन्मा भूदिति होता तदस्मिन्नवधौ शंसेत् । अत्र केचित् 'तत्राग्निमारुते रौद्रीं शस्त्वा होतैवयामरुतं पङ्क्तिशंसं शंसति । पञ्चपदा पङ्क्तिः । पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै । नेदच्छावाकस्य शिल्पमन्तरयामेति' इत्यधिकं पठन्ति । तत्रार्थो व्यक्तः । अत्र[1] सूत्रम्—'जगतीशंसमन्यूङ्खम् । पङ्क्तिशंसं वा सन्यूङ्खम्'[f] इति ।

रौद्रचा अनन्तरमेवयामरुतश्च शंसनं छन्दस्त आभिरूप्यकथनेन स्तौति—**अथो–समर्धयति** । अपि च देवानां मध्ये रुद्रनामा देवो ज्येष्ठः प्रथमः श्रेष्ठो 12.७-१० गुणैः श्रेयांश्च भवति । छन्दसां मध्ये अतिच्छन्दोनामकं छन्दो ज्येष्ठं च श्रेष्ठं च भवति । एकाहानां मध्ये विश्वजिन्नामक एकाहो ज्येष्ठत्वश्रेष्ठत्वगुणयुक्तो भवति । एवं स्थिते सति रौद्रचा अनन्तरमातिच्छन्दसस्य 'प्र वो महे'[g] इत्यस्य विश्वजिति शंसनेन होतैनद् विश्वजित्संज्ञितमहः स्वेन ज्येष्ठत्वश्रेष्ठत्वगुणसाम्याद् आत्मीयेनातिच्छन्दोनाम्ना छन्दसा समृद्धं करोति ।

इदानीमस्मिन् सूक्ते न्यूङ्खं विधत्ते—**तस्य–न्यूङ्खयेत्** । तस्य एवयामरुत- 12.११-१३
स्त्रिसंख्याकास्वृक्षु न्यूङ्खं कुर्यात् । यदि न्यूङ्खं कर्तुमादरम् इच्छां कुर्यात् तर्हि सर्वास्वेवर्क्षु न्यूङ्खं कुर्यात् । न तिसृष्वेव न्यूङ्खं कुर्यात् । न वा कुर्यात् । करणे तिसृषु वा सर्वास्वेव वा इति विकल्पाः ।

स्तौति—**अन्नं–दधाति** । न्यूङ्खस्यान्नत्वमन्नहेतुत्वात् । अन्नस्य प्राणत्वं 12.१४-१७
तत्प्रतिष्ठाहेतुत्वात् । शिल्पानां प्राणत्वमुक्तम् । यदेवयामरुति शिल्पे प्राण-

a. RV. 1. 30. 13.
b. RV. 8. 2. 13.
c. RV. 8. 66. 9.
d. RV. 6. 20.
e. RV. 2. 15.
f. ŚŚ. 11. 15. 11–12.
g. RV. 1. 127. 10.

1. T. तत्र

रूपेऽन्नद्वारा प्राणरूपस्य न्यूङ्खस्य करणमस्ति तत् प्राणे प्राणस्थापनरूपत्वात्
12.१८-२१ प्रशस्तम् । इतश्च न्यूङ्खनं कर्तव्यमित्याह—**अथो-चरति** । अपि च पुरा प्रजापतिर्विश्वजिता यज्ञेन सर्वाः प्रजाः सृष्टवान् । सर्वं च जेतव्यमुज्जितवान् । अत एवास्य विश्वजिदिति नाम निर्वृत्तम् । यस्मादेतत् प्रजाजननहेतुः, तस्माद् यो यजमानो विश्वजिता यागं करोति, स एतस्मिन् काले जन्मैव प्राप्नोति । मानुषाज्जन्मनोऽतिरिक्तं दैवं जन्मैवैतत् प्राप्तो भवति । तदिह विश्वजिद्यागेन यजमानो जातमात्रः कुमार इव भवति । यस्मादेवं तस्मान्न्यूङ्ख उचित एव । तथा हि लोके जातः कुमारः प्रथमं चरितुमिच्छन् न्यूङ्खं कुर्वन्निव चरति । अपटुत्वेन नीचैर्नीचैरेव कथंचित् पदविन्यासेन संचरणात् ।

12.२२,२३ अथ विश्वजितममृतत्वप्राप्तिहेतुत्वेन स्तौति—**तद्-उपयन्ति** । तत् तेन विश्वजिद्यजनेन । एनं यजमानम् । अमृतादमृतत्वहेतोः । छन्दसः पापात् कर्मण आच्छादयितुः वेदात् कारणात् । अमृतत्वफलप्राप्त्यर्थं प्रजातं कुर्वन्ति होत्रादयः । प्रेत्यामृतत्वमाभूतसंप्लवावस्थितिलक्षणं मुख्यं वा प्राप्नुवन्ति, ये विश्वजिदाख्यं यज्ञमनुतिष्ठन्ति । इत्थं विश्वजितं विधाय तस्य संवत्सर-
12.२४ सत्रान्तःपातिनः सतोऽग्निष्टोमसंस्थतामाह—**सो-संतिष्ठते** ॥

इति द्वादशः खण्डः

13. १,२ **यः-एव** । यो विश्वजित् संवत्सरसत्रावयवभूतो भवति सोऽग्निष्टोमसंस्थो भवति । केचिदत्र 'प्रतिष्ठा वा अग्निष्टोमः प्रतिष्ठित्या एव' इत्यग्निष्टोमसंस्थत्वस्तुत्यर्थवादवाक्यमधिकं पठन्ति । अग्निष्टोमस्य प्रकृतित्वात् प्रतिष्ठापकत्वम् । तस्यैव विश्वजितः एकाहरूपत्वे रात्रिसत्रमध्यस्थत्वे चाति-
13. ३ रात्रसंस्थतामाह—**एकाहः-स्यात्** ।

13. ४-६ अतिरात्रसंस्थतां स्तौति—**स-राज्या** । केचिद् 'विश्वजितोऽह्ना' इति पठन्ति । योऽतिरात्रसंस्थो विश्वजित् स कृत्स्नो भवति । अहोरात्रव्यापित्वसंपत्तेः। तथाहि विश्वजितेति पाठे षष्ठ्यर्थे तृतीया। अन्यत्र तु यथाश्रुति व्याख्येयम् । विश्वजितो यदर्धं द्विधा साम्येन विभक्तस्यैको भाग उक्थ्यान्तः तदह्ना

क्रियते। इतरो भागो रात्र्या षोळश्यादिराश्विनान्तोऽनुष्ठीयते। अतोऽह्नि रात्र्यां च कार्त्स्न्येन व्याप्तिसिद्धेः कृत्स्नत्वसंपत्तेः[1] विश्वजितोऽतिरात्रसंस्थता सिध्यति।

अथ विपक्षे बाधकप्रदर्शनद्वारा विश्वजितः सर्वस्वदक्षिणतां विधत्ते—**सर्वपराजिद्-स्माह**। यो विश्वजित् सत्राद् बहिर्भाविनैकाहत्वेन स्वतन्त्र एव 13.७-१३
सन् सर्वस्वदक्षिणाशून्य एवावष्ठीयेत स विश्वजित् सर्वपराजिदेव, न तु विश्वजित्। नात्र संशयलेशोऽप्यस्ति। तथा यो विश्वजितो बहिरेव तदनङ्गतया स्वातन्त्र्येण सर्वं स्वकीयं धनं ददाति तस्य तत् सर्वधनपरित्यागमात्रमेव भवति। न तु भस्महुतन्यायेन कस्मैचित् फलाय कल्पते। यस्माद् यो विश्वजिद् स सर्वमेव सर्वाभीष्टप्राप्तिहेतुत्वात्। यच्च सर्वं भोग्यं वस्तुजातं तद् विश्वजिदेव; तत्साध्यत्वात्। एवं सर्वविश्वजितोरेकरूपत्वाद् विश्वजितः न सर्वस्वदक्षिणारहितस्यानुष्ठानम्। सर्वस्वदानस्य च विश्वजित्येव कर्तव्यत्वम्। तत्रैवं सति यथा लोके कश्चित् तुभ्यमहं सर्वं ददामीति प्रतिज्ञां कुर्वाणः यथाप्रतिज्ञं न सर्वं तस्मै ददाति, तद्वद् विश्वजितमनुष्ठाय सर्वस्वदक्षिणामकुर्वतः तत् कर्म कर्तपत्यं कर्तपातहेतुरेव भवति। कर्तपातः प्रेत्यानर्थप्राप्तिः। अथवा इहैव शत्रुभिर्जीयते। यद्वा पुरा कालादायुर्भाग्यच्छेदान्मृतिं प्राप्नुयात्। जीयत इत्यत्र वाशब्दं केचिन्न पठन्ति।

इत्थं सर्वस्वदक्षिणां विधाय स्तौति—**सहस्रं-वेद**। अपि च एनं विश्व- 13.१४-१७
जिति सर्वस्वदातारं यजमानं सहस्रसंख्यं धनमवरुन्धे प्राप्नोति। इत्येवं कौषीतकिर्मुनिराह स्म। युक्तं चैतत्। यस्माद् यत् सहस्रं तत् सर्वमेव। न हि सहस्रादतिरिक्ता काचित् संख्यास्ति। ऊनाधिकसंख्यानां सहस्रेऽन्तर्भावात्। विश्वजिच्च सर्वमेव; सर्वफलावाप्तिहेतुत्वात्। तत् तेन हेतुना सर्वरूपेण विश्वजिता सर्वरूपं सहस्रमाप्नोति[2], य एवं सहस्रस्य विश्वजितश्च सर्वरूपत्वं जानानोऽनुतिष्ठति।

इदानीं विश्वजिदनुष्ठातुः तदनन्तरं सांवत्सरिकं व्रतमुपदिदिक्षुराह—**वत्सच्छवीन्[वीं]-इति**। वत्सच्छवीनिति केषांचित् पाठः। छविशब्दस्त्व- 13.१८-२१

1. T. संपत्तिः for संपत्तेः

2. T. adds कः

ग्वाचकः । 'स यथाहिरहिच्छव्यैनिर्मुच्येत'[a] इत्यादौ तथा दर्शनात् । गोवत्सस्य त्वचं परिधानत्वेन कल्पयेत् । केनाभिप्रायेणेति चेत् । यः खलु विश्वजिद्याजी सर्वं ददाति, सर्ववेदसदक्षिणत्वाद् विश्वजितः, एतस्य यजमानस्यात्मा रिरिचानः रिक्ततां निःस्वतां गच्छन्निव[1] भवति । 'स यत् सर्वमोंकुर्याद् रिञ्च्यादात्मानं[2] स कामेभ्यो नालं स्याद्'[b] इति श्रवणात् । पशवश्च वत्सं वाञ्छन्तीति सुप्रसिद्धम् । तत्र वत्सत्वचः परिधाने सति वत्सभूतममुं यजमानं पशव उपसंगता भवन्ति । तेनास्य रिक्तता विनिवृत्ता[3] भवति । तस्मात् पुनरित उत्तरकाले मां पशवो वाञ्छन्तु वाञ्छापुरःसरं प्राप्नुवन्त्वित्यभिप्रायेण वत्सत्वक्परिधानं कुर्यात् ।

अथास्य सांवत्सरिकव्रतानुष्ठानकालीनानि वासस्थानानि[4] विधत्ते—

13.२२-२७ **उदुम्बरे-उपास्यै** । सामीप्यार्थलक्षणा सप्तमी । ऊर्क्छब्दो रसवाचकः । उदुम्बरश्चोर्ग्रूप एव । तत्फलेषु माधुर्यरसस्य विद्यमानत्वात् । अन्नाद्यरूपश्चोदुम्बरः । तत्फलानां पक्वानां भक्ष्यत्वेनापक्वफलानामुपदंशत्वेन चात्तुं योग्यत्वात् । अतो रसस्यात्तुं योग्यस्य व्रीह्याद्यन्नस्य च प्राप्तये तन्निवासः संपद्यते । निषाद एव नैषादः । राक्षसादिवत् तद्धितोऽनतिरिक्तार्थः । शूद्रायां ब्राह्मणादुत्पन्नो निषादः । तस्य गृहे वसेत् । नैषाद इति यदस्ति तदेतदवरार्ध्यमन्नाद्यं भवति । अवरे अनुत्कृष्टे अर्धे स्थाने भवतीत्यवरार्ध्यम् । तद्वत्त्वात् तदात्मत्वोपचारः । निषादस्य क्षेत्रवशाद् अनुत्कृष्टत्वात् तदीयस्यान्नाद्यस्यानुत्कृष्टत्वम् । तदीयस्यापि निषादगृहवसतिः तदीयस्यान्नाद्यस्य प्राप्तये संपद्यते ॥

इति त्रयोदशः खण्डः

14. १-८ **वैश्ये-उपास्यै** । कृष्यादिव्यापारिणः पुष्टिमन्तो वैश्या इति प्रसिद्धम् । तस्मात् तस्य बहुतरान्नाद्यत्वात् यदन्नाद्यं वैश्ये भवति, तस्यावरोधाय तद्गृह-

a. JB. 2. 134. b. AA. 2. 3. 6.

1. T. गच्छन्नेव
2. T. रि'''दात्मानं
3. B. M. निवृत्ता
4. B. निवासस्थानानि

निवासः संपद्यते । पराध्यर्मुत्कृष्टम् । स्पष्टमन्यत् । समानमेकं गोत्रं यस्य तस्मिन् ब्राह्मणे तदीये गृहे वसेत् । तदिदं यदन्नाद्यं समाने गोत्रे स्थितमन्नाद्यमस्ति तस्याखिलस्यापि प्राप्तये भवति ।

अथ व्रतचरणस्य कालपरिच्छेदमाह—**संवत्सरं-अनुवसानः** । व्रत- 14. ९
मिति शेषः । अत्यन्तसंयोगार्थे द्वितीया । कथमिति चेत् तत्राह—अधः-
संवेशीत्यादि । अधः भूमावेव संवेशितुं शयितुं शीलमस्येति तथा । फालेन
कर्षणसाधनेन कृष्टं सस्यमशितुं शीलमस्य न भवतीत्यफालकृष्टाशी । आरण्या-
शीत्यर्थः । तथा अप्रतिगृह्णन् प्रतिग्रहमकुर्वन् । अन्नमन्यस्मान्न याचन् । अन्नयाचनं
चाकुर्वन् । तथा इदं तत्तद् यत् किंचिदनियतं यथाप्राप्तं वसनं परिदधानः संच-
रेदिति पूर्वेणान्वयः । इदं तत्तदनुवसान इत्येतदेवार्थभूयस्त्वायाभ्यस्यन्नाह—
**तत्-अनुवस्ते** । तेन तेनेत्यर्थः । संवत्सरं चरेदिति कालनियमे पक्षान्तरमाह— 14. १०
**द्वादशरात्रं-कौषीतकिः** । न कृत्स्नं संवत्सरमेवं चरेत् । किंतु द्वादशरात्रमेव 14. ११
चरेत् । चरित्वा चानन्तरमन्यस्यै लोकप्रसिद्धायै लोकयात्रानिर्वर्तिकायै धनार्जनात्मिकायै बुभूषायै भवितुं धनवत्तया श्रेष्ठत्वं संपादयितुमिच्छायै तत्पूर्वकाय व्यापाराय स्यात् घटेत इत्येवं कौषीतकिराह स्म । नन्वयं पक्षः संवत्सरसमापनीयव्रतविधिविरुद्धत्वादनुपादेय इत्याशङ्क्य तदन्तर्भावयुक्त्या तदविरोधोऽपि
तेनैवोक्त इति वदन् स्तौति—**द्वादश-इति** । इति ह स्माहेति शेषः । द्वादश- 14.१२,१३
संख्याश्चैत्रादयो मासाः समुदिताः सन्तः संवत्सरो भवति इति तावत् प्रसिद्धम् । अतो द्वादशानामह्नां मासत्वकल्पनया द्वादशमासनिष्पत्तेः स द्वादशरात्रिपरिच्छिन्नः कालः संवत्सरस्य प्रतिमा प्रतिनिधिर्भवति । तेन न[1] संवत्सरविधिविरोधः ।

एवं तावद् विश्वजिति होतृपठनीयं शस्त्रं परिकल्प्य होत्रकाणां प्रातः-
सवने पठनीयानि शस्त्राणि विधत्ते—**प्राजापत्यानि-भवन्ति** । अनिरुक्तत्व- 14. १४
मनिर्दिष्टविशिष्टदेवतात्वम् । अत एव प्राजापत्यत्वम् । तत्र स्तोत्रियान् क्रमेण
विधत्ते—**तस्य-स्तोत्रियाः** । तस्य विश्वजितो होत्रकशस्त्राणां क्रमादेते 14. १५

1. T. omits

स्तोत्रिया भवन्ति । अच्छावाकस्य स्तोत्रियविषयोऽत्र विकल्पः । अनु-
14.१६-१८ रूपान् क्रमेण विधत्ते—**ये-विश्वजित्।** ये पार्ष्ठिकस्य षष्ठस्याह्नो होत्रकाणां स्तोत्रियास्त इह विश्वजितो होत्रकाणामनुरूपतृचाः कर्तव्याः । ते च 'प्रति वां सूर'[a] 'भिन्धि विश्वाः'[b] 'यज्ञस्य हि स्थ'[c] इत्येते क्रमाद् द्रष्टव्याः । कुत एवमिति चेत्, यस्मात् षष्ठमहः प्रजापतिदेवत्यम् । तदुक्तं बहुशः प्राक् । विश्वजिच्च प्रजापतिरेव । तदप्युक्तमेव । तस्माद् द्वयोरपि प्रजापतिरूपत्वाद् युक्तं तत्रत्यानां स्तोत्रियाणामनुरूपत्वम् । अवशिष्टं शस्त्रश-
14. १९ रीरं विधत्ते—**इतरे-उक्थम्।** षष्ठस्य तावत् पार्ष्ठिकस्याह्नो ये स्तोत्रियाः तेषामनुरूपत्वसंपादनमुक्तम् । ये पुनरितरे पार्ष्ठिकेषु पञ्चस्वहःसु स्तोत्रियास्तृचाः होत्रकाणां सन्ति, त इह विश्वजिति । तेषां प्रत्येकं शस्त्रं कर्तव्यम् । मैत्रावरुणस्य पञ्चस्वहःसु ये स्तोत्रियास्ते समुदिताः सन्त इह विश्वजिति तस्य शस्त्रं भवति । एवमितरयोरपि द्रष्टव्यम् ।

14.२०-२२ अथ परिधानं विधत्ते—**पर्यासैः-एव।** त्रयाणां होत्राकाणां ये पर्यासाः 'प्रति वां सूर उदिते'[d] 'उद्धेदभि श्रुतामघम्'[e] 'इन्द्राग्नी अवसा गतम्'[f] इति एतैः शस्त्रं समापयेयुः । तत्र पर्यासाः प्रतिष्ठा भवति[1] । समाप्तिरूपत्वात् । अतस्तैः परिधानं प्रतिष्ठाफलाय संपद्यते । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति चतुर्दशः खण्डः

ब्राह्मणार्थविमृष्ट्या यत् सुकृतं समपीपदम् ।
तेन प्रीतः पुमर्थान् नः प्रदेयात् पुरुषोत्तमः ॥

a. RV. 7. 66. 7.
b. RV. 8. 45. 40.
c. RV. 8. 38. 1.
d. RV. 7. 65. 1.
e. RV. 8. 93. 1.
f. RV. 7. 94. 7.

1. B. M. भवन्ति

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
अध्यायस्त्विह पञ्चविंश उदगात् कौषीतकिब्राह्मण-
व्याख्याने कृतविश्वजिद्विषुवदाख्याहर्विधानक्रमात् ॥

इति कौषीतकिब्राह्मणव्याख्याने
तृतीयदशके पञ्चमोऽध्यायः

अथ

## षड्विंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

एवं तावत् प्रायणीयातिरात्रा-
दारभ्याह्नां सत्रिकाणां[1] क्रमेण ।
उक्ता व्यक्तं विश्वजिन्नामकाहः-
पर्यन्तानां शस्त्रक्लृप्तिः पुरस्तात् ॥

वक्ष्यत्यूर्ध्वं द्वादशाहाङ्गताव-
च्छन्दोमानां चाविवाक्यस्य चाह्नः ।
सर्वस्यान्तेऽरण्यपाठ्यत्वसाम्याद्
विद्याकाण्डे क्लृप्तमन्त्यं व्रताहः ॥

इत्थं सत्रं गोपदाङ्कं समाप्तं
कृत्वा निःशेषाब्दसत्राङ्गभूतम् ।
अह्नां योगं तस्य मासाहरूर्ध्वं
त्वावृत्ती गोआयुषी चाभिधत्ते ॥

तत्र तावदभिप्लवप्रकरणे 'पृष्ठ्यान्तान् वा'[a] इत्यादिना कथितायामहः-क्लृप्तौ द्वादशसंख्यानां मासानामुत्सर्गतः त्रिंशत्संख्याहःसंमितत्वप्रतिपत्तौ प्रसक्तायां सत्यां प्रथमोत्तमयोस्तदपवादेन द्वात्रिंशत्संख्याहःसंमितत्वं प्रदर्शयति—

1\. १ **द्वात्रिंशी–उत्तमः ।** गवामयने संवत्सरसत्रे यः प्रथमो मासोऽस्ति स[2] द्वितीया-

a. KB. XXI. 6. २३.

1\. M. सत्रिणां च; T. सत्रिकाणां

2\. B. तद्

दिमासवन्न त्रिंशी प्रत्येतव्यः, अपि तु द्वात्रिंश्येव। प्रायणीयातिरात्रचतुर्विंशाभ्यां[1] पृष्ठ्यान्तैश्चतुर्भिरभिप्लवैः द्वात्रिंशत्संख्याहर्विशिष्ट एव भवति। तथा उत्तमो द्वादशो मासोऽपि द्वात्रिंशी। अभिप्लवत्रयगोआयुषीदशरात्रमाहाव्रतोदयनीयातिरात्रात्मकद्वात्रिंशत्संख्याहःसंमित एव भवति। तच्चैतद् द्वात्रिंशत्त्वं प्रशस्तमित्याह—**द्वात्रिंशदक्षरा-अनूत्तिष्ठन्ति।** अनुष्टुभश्छन्दसो 1. २-५
द्वात्रिंशदक्षरत्वं प्रसिद्धम्। सा चानुष्टुप् वागेव। वाङ्नामसु पठितत्वात्। यद्वा 'चत्वारि वाक् परिमिता पदानि'[a] इत्युक्तत्वात् पदचतुष्टयोपेतत्वसाम्यात्। तत् तेन द्वात्रिंशत्संख्यासंबन्धेन सत्रिणो वाचा यज्ञनिर्वाहिकया प्रयन्ति सत्रं प्रारभन्ते। वाचमनुलक्ष्य चोत्तिष्ठन्ति समाप्नुवन्ति।

षष्ठसप्तमयोर्मासयोः विषुवतः प्रागूर्ध्वं च संदंशन्यायेन स्थितयोस्त्रिंशत्त्वमपोद्यान्यद् विधत्ते—**अष्टाविंशिनौ-प्रतिदधति।** यौ विषुवतो निरन्तराव- 1. ६-१०
स्थितौ प्रागूर्ध्वं च मासौ स्तः तावष्टाविंशतिसंख्याहर्युक्तौ भवतः। न त्रिंशिनौ वा[2]। पृष्ठ्यचतुर्थैस्त्रिभिरभिप्लवैरभिजिता त्रिभिः स्वरसामभिश्चाष्टाविंशी षष्ठो मासः। आवृत्तैः स्वरसामभिः विश्वजिता पृष्ठ्यमुखैः त्रिभिरभिप्लवैरष्टाविंशी सप्तमोऽपि मासः। उष्णिहोऽष्टाविंशत्यक्षरत्वं प्रसिद्धम्। ग्रीवा इति नाड्यवयवबहुत्वापेक्षं बहुवचनम्। 'ग्रीवाभ्यस्ते'[b] इत्यादिप्रयोगदर्शनात्। शिरोऽपेक्षया द्वितीया ग्रीवा। गायत्र्यपेक्षया द्वितीयोष्णिक्। तेन द्वितीयत्वसाम्याद् ग्रीवाणामौष्णिहीत्वम्। अथेत्यर्थान्तरोक्तौ। विषुवानिति यदस्ति, तदेतद् यज्ञस्य शरीरिणः शिरःस्थानीयम्। अर्धद्वयावसाने साधारण्येनावस्थित्यादिसाम्यात्। तत् तेनाष्टाविंशिनोरुभयपार्श्वस्थितयोः मासयोरनुष्ठानेन ग्रीवाकल्पनं क्रियते। तयोर्मध्ये विषुवदनुष्ठानेन ग्रीवासु शिरःप्रतिसन्धानमेव कुर्वन्ति सत्रिणः। तदनेन कथितेभ्यश्चतुर्भ्यो मासेभ्योऽन्येऽष्टौ मासाः त्रिंशिनः सिद्धाः।

अथ विषुवदाख्यमहरधिकृत्य किमपि चोद्यमुत्थापयति—**तद्-इति।** 1. ११
तत्राहर्गणनाविषये केचिज्जिज्ञासवः पृच्छन्ति—एष विषुवान् कतरेषामह्नां

a. RV. 1. 164. 45. b. RV. 10. 163. 2.

1. T. प्रायणीयातिरात्रश्चतुर्विं०
2. M. omits

संबन्धी भवति ? किमवरेषां विषुवतः प्राचीनानां संबन्धी किं वा परेषामूर्ध्व-वर्तिनाम् ? अस्य किं पूर्वस्मिन् पक्षस्यन्तर्भावः किं वोत्तरस्मिन् ? इति **चोद्यम्**।

1. १२ उभयानन्तर्भूततया त्रिशङ्कुन्यायेनावस्थितोऽयमित्युत्तरमाह—**न–आहुः**। अयं विषुवानर्वाचीनानामह्नां मध्ये न भवति। न चोपरितनानां मध्येऽपीत्यभिज्ञा आहुः। अतो न पूर्वैरुत्तरैर्वाहोभिः सह गणनीयः। युक्तं चैतदित्याह—

1.१३,१४ **उभयेषां–अहानि**। एष विषुवानुभयेषामवरेषां परेषां चाह्नां संबन्धी भवति। उभयावधिभावेनावस्थितत्वात्। अतः साधारण्यादयमेष्वेवान्तर्भूत इति वक्तुमयोग्य एव। यद्वा एतस्य विषुवदाख्यस्यैव राजस्थानीयस्याह्नः एतानि अवराणि पराण्यप्यहानि भृत्यस्थानीयानि गुणतया संबन्धीनि वर्तन्ते। प्राधान्यादस्य गुणत्वाच्चान्येषाम्। अतोऽपि न तैस्तुल्यतया सह गणनीयः। तथा चाश्वलायनः[1]—'न पूर्वस्य पक्षसो नोत्तरस्य'[a] इति।

1. १५ पुनरपि प्रश्नान्तरमुत्थापयति—**तद्–इति**। अस्मिन् संवत्सराख्य-कालसमापनीये गवामयनाख्ये सत्रकर्मणि कति षळहाः संभूय वर्तन्ते ? षळहैर्हि मासाः संपद्यन्ते। तथा चोक्तमधस्तात्। इति तन्निर्दिधारयिषया प्रश्नः।

1. १६ उत्तरम्—**षष्टिः–षळहशः**। षट्संख्यान्यहानि येषामिति षळहशब्दवाच्यतया वर्तमानाः षष्टिसंख्या षळहाः संवत्सरे भवन्ति। तथा सति षष्टिसंख्येषु षट्संख्यायोगे[2] षष्ट्युत्तरशतत्रयाहःसंघातसंपत्तेः संवत्सरसंज्ञः कालविशेषः परिपूर्णो भवति।

1. १७ इत्थं गवामयनस्याहर्योगं प्रकल्प्य निगमयति—**तद्–संवत्सरायणम्**। तदेतद् व्याख्यातप्रकारं संवत्सरकालावच्छिन्नं गवामयनाख्यमयनम् अव्यवलम्बि भवति। विविधमनवक्लृप्तमहःसंघातमवलम्बत इति व्यवलम्बि। न व्यवलम्बि अव्यवलम्बि। परिक्लृप्ताहर्योगतया मध्यस्थितेन विषुवता कीलितमिव दृढीकृततया च व्यवस्थितसन्निवेशमित्यर्थः। व्याख्यातमहर्योगप्रकारमन्वयव्यति-

1.१८-२१ रेकाभ्यां स्तौति—**तद्–संवत्सरे**। तत् तत्र ये सत्रानुष्ठायिन एव उक्तप्रकारेण संवत्सरसत्रस्याहानि प्रायणीयादीनि क्रमेण युञ्जन्ति घटयन्ति।

a. AŚ. 11. 7. 8.

1. T. चाश्वलायनम्        2. T. संख्याया योगे

उत्क्रमेणाहर्योगं कुर्वाणा अनुतिष्ठन्तीत्यर्थः । ते सत्रिणः संवत्सरे ये कामाः सन्ति, न हि संवत्सराद् बहिर्धा कामोऽस्ति, तान् सर्वान् कामान् प्राप्ता भवन्ति । ये पुनरत उक्तप्रकारादन्येन प्रकारेणाहर्योगं कुर्वन्ति, ते संवत्सर-संश्रितानां कामानामेकमपि न प्राप्नुवन्ति । तस्मादित्थमेवाहर्योगप्रकारः समा-श्रयणीयः श्रेयोऽर्थिभिः ।।

इति प्रथमः खण्डः*

अथ क्रमप्राप्तो दशरात्रो विधीयते । स च पृष्ठ्यषळहच्छन्दोमत्र्यहदश-माहरात्मकाहर्गणरूपः । तथा च सूत्रम्—'मध्ये दशरात्रः पृष्ठ्यः षळहः । त्रयश्छन्दोमाः । दशममहः'[a] इति । तत्र पृष्ठ्यषळहस्य द्वाविंशत्रयोविंशाध्याय-योर्विहितत्वात् तदनन्तरानुष्ठानयोग्यानि क्रमेण सप्तमाष्टमनवमानि छन्दोम-संज्ञितान्यहानि अध्यायशेषेण विधित्सुः तत्संबन्धिनः चतुर्विंशचतुश्चत्वारिंशा-ष्टाचत्वारिंशान्[1] स्तोमान् तावत् स्वरूपान्वाख्यानमुखेन विधत्ते—**षष्ठे-भूत्वा** । ३.१-६
पुरा देवाः पृष्ठ्यषळहसंबन्धिनि षष्ठेऽहनि त्रिवृदादीन् त्रयस्त्रिंशान्तान् स्तोमा-नाप्नुवः । आप्तिः समाप्तिः । तथा मासांश्च संवत्सरावयवान् समाप्तवन्तः । षळहसंपाद्यत्वान्मासानाम् । ते देवाः स्तोमानाप्त्वा तिष्ठन्तः, के पुनः स्तोमाः छन्दोमनिर्वाहका इति स्तोमान्तराभावं पश्यन्तः, एतानेव त्रिवृदादीन् पृष्ठ्य-संबन्धिनः[2] षट्संख्यान् स्तोमान् द्वौ द्वावेकीकृत्य त्रीन् स्तोमान् संपादितवन्तः । यस्माद्[3] देवा एतान् पृष्ठ्यस्तोमानन्तरेणान्यस्मात् कस्मात् सकाशादन्य स्तोम-माहर्तुं लभेरन् ? [4]न कुतोऽपीत्यर्थः[4] । तस्मादेतानेव त्रीन् कृतवन्तः । तावेकी-कृतावेतौ त्रिवृत्पञ्चदशाख्यौ प्रथमद्वितीयाहर्भाजौ स्तोमौ नवकपञ्चदशकयो-र्मेलने चतुर्विंशतिसंख्योत्पत्तेः चतुर्विंशस्तोमोऽन्यः कश्चिद् विशिष्टः स्तोमो भूत्वा प्रथमं छन्दोमानां दशरात्रापेक्षया सप्तममहर्निष्पादयतः । एवमन्यदपि

* द्वितीयखण्डस्य व्याख्या मातृकासु न दृश्यते ।

a. SŚ. 10. 1. 6-9.

1. B. °चत्वारिंशत्; T. °चत्वारिंश
2. M. पृष्ठ्यषळहसंबन्धिनः
3. B. T. omit
4-4. B. T. omit

व्याख्येयम् । त्रिणवस्य सप्तविंशतिस्तोमरूपत्वात् सप्तदशस्तोममेलने चतुश्चत्वारिंशस्तोमभावः । यद्यप्येकविंशत्रयस्त्रिंशस्तोमयोर्मेलने सति चतुष्पञ्चाशत्—स्तोम एव संपन्नो भवेत्, तथाप्यतिरिक्तानां षट्संख्यानां स्तोत्रियाणां दशमाहःसंबन्धितया वक्ष्यमाणत्वात् षळूनस्तोमद्वयैकीकरणाभिप्रायेण अष्टाचत्वारिंशस्तोमो भूत्वेत्युक्तमिति द्रष्टव्यम् ।

3.७-९ अथ छन्दोमनामनिर्वचनेन स्तौति—**तेषां–छन्दोमाः** । तेषां छन्दोमानां मध्ये यः प्रथमः छन्दोमोऽस्ति स गायत्र्या मितः परिच्छिन्नो भवति । गायत्र्याः चतुर्विंशत्यक्षरत्वादस्य च चतुर्विंशस्तोमत्वात् । द्वितीयश्छन्दोमस्त्रिष्टुभा मितः । चतुश्चत्वारिंशस्तोमत्वात् । त्रिष्टुभस्तत्संख्याक्षरपादत्वात् । तृतीयो जगत्या छन्दसा मितः । अष्टाचत्वारिंशस्तोमत्वाद् । जगत्या अष्टाचत्वारिंशदक्षरत्वात् । एवं यस्माद् गायत्र्यादिभिः छन्दोभिः मितास्तस्मात् छन्दोभिर्गायत्र्यादिभिर्मीयत इति छन्दोमशब्दवाच्याः संवृत्ताः ।

3.१०-१२ अतिरिक्ताः स्तोत्रियाः संख्यासामान्यादृतुत्वेन स्तौति—**अथ–ऋतवः** । तास्ता इत्यादरार्थे वीप्सा । नन्वेवमपीतरवदतिरिक्तानामतिरिक्तत्वादेव यज्ञे
3.१३ क्वचिद् विनिवेशाभावः प्रसक्त इत्याशङ्क्याह—**ताभिः–तायते** । अथ प्रथमच्छन्दोमभाजां सूक्तानां[1] तनोतिधातुमत्तालक्षणं किंचिद् रूपं दर्शयति—**अन्तः–**
3.१४-१७ **अह्नः** । पुनस्ततिः समाप्तस्य पुनःप्रारम्भरूपमित्यर्थः । ततवन्ति तनोतिधातुमन्ति । पुनः प्रयन्ति प्रारभन्ते यज्ञमनेनेति पुनः प्रायणीयम् । अतश्छान्दोमिकं प्रथममहः सप्तमं प्रथमं चेत्यवगन्तव्यम् ।।

इति तृतीयः खण्डः

4.१,२ अथ क्रमेण शस्त्रक्लृप्तिं करिष्यन्नाज्यशस्त्रं विधत्ते—**प्र–रूपम्** । प्रउग-
4.३-१५ संबन्धीनि सप्ततृचानि विधत्ते—**त्रैष्टुभः–अह्नः** । त्रैष्टुभस्त्रिष्टुप्छन्दस्कः । अस्य त्र्यहस्य त्रिष्टुप्प्रातःसवनत्वात् प्रथमाहःप्रकृतित्वादस्य तदीयानि रूपाणि अप्यवशिष्टानि द्रष्टव्यानि । ततवत्त्वं च वैकृतसप्तमत्वाकारोपनिवेशि रूपान्तरं भवतीत्युक्तम् । गतमन्यत् ।

1. T. सूक्तं

अत्र शंसनप्रकारमधिकृत्य कंचित् पक्षमुपन्यस्यति—**तद्-इति** । तत् 4.१६
तत्र प्रातःसवनशस्त्रशंसनप्रकारविषये केचिदाहुः । किमिति चेत्, प्रातः-
सवने यत् किमपि छन्दो गायत्र्यादीनामन्यतरद् युज्येत विनियुक्तं भवेत्, तस्य
शस्त्रशंसनमर्धर्चश एव शंसनं कर्तव्यम् । अपि च प्रातःसवनधर्मानुरोधाच्चा-
र्धर्चश एव शंसनम् । प्रातःसवने हि सर्वेषामर्धर्चश एव शंसनं प्रकृतौ दृष्टम् ।
तत् तद्रूपापरित्यागार्थमप्यर्धर्चशः शंसनमेव कर्तव्यम् । इत्येवं केचिदाहुः ।
अमुं पक्षं प्रतिक्षिपन् कौषीतकेर्मतमाह—**तदु-स्थितिः** । तत् तस्मिन् 4.१७-२०
विषये कौषीतकिनामा महर्षिरुक्तवान् किल । यद्यप्येते त्रिष्टुब्जगत्यौ प्रातः-
सवन एव युक्ते संबद्धे भवेतां, तथाप्येतस्मिन् स्थाने दशरात्रविषयेऽर्धर्चशः
शंसनं कर्तुं योग्ये न भवेताम् । किं तु एनयोः शस्त्रशंसनं पच्छ एव भवेत् ।
सैषैवानादिपारंपर्यायाता स्थितिरिति ।

अथ राथन्तरप्रथमाहःप्रकृतिकत्वेन प्राप्तं रथन्तरपृष्ठत्वं प्रतिषेधन् बृह-
त्पृष्ठतामाचष्टे—**बृहत्पृष्ठं-रूपम्** । अस्याह्न इति शेषः । तर्हि द्वितीयाद्यह्न इव 4.२१,२२
शस्त्रमपि बार्हतं स्यादिति? नेत्याह—राथन्तरमिति । स्तौति–तन्मिथुनमिति ।
तद् बृहद्रथन्तरयुगलं मिथुनं स्त्रीपुंसयुगलं भवति । बृहतो रथन्तरस्य च
पुंस्त्वस्त्रीत्वकल्पनात् । मिथुनं च प्रजोत्पत्ते रूपं कारणं भवतीत्यतः प्रजाजनन-
हेतुत्वात् प्रशस्तमिदं मेलनमित्यर्थः ॥

इति चतुर्थः खण्डः

अथ मरुत्वतीयशस्त्रे सूक्तमेकं विधत्ते—**कया-मरुत्वतीयम्** । स्तौति— 5.१
**तद्-वेद** । तदेतत् 'कया शुभा'[a] इति सूक्तं संज्ञा विप्रतिपन्नानां सतां संप्रति- 5. २-४
पत्तेर्हेतुः । अत एव श्रीः संप्रतिपत्तिजनितायाः श्रियः संपदो हेतुश्च भवति ।
कुतः संज्ञाश्रीरूपत्वमस्य? यस्मादेतेन सूक्तेन विप्रतिपन्ना इन्द्रश्च मरुतश्च
संज्ञानं संप्रतिपत्तिं कुर्वन्ति ।

a. RV. I. 165.

अगस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्य एतद्वितरीतुमैच्छत् ।
मरुद्गणागस्त्यमरुत्पतीनां महांस्तदानीमभवद्विवादः ॥
अनेन सूक्तेन ततस्तदुक्तिप्रत्युक्तिरूपेण शशाम तेषाम् ।
विरोधवह्निस्तदिहाधुनापि संवादहेतुर्विदितं श्रियश्च ॥

5. ५ रूपसंपत्तिमप्याह—**कया-राथन्तरम्** । 'एतास' इत्यत्र आङुपसर्ग-
श्रवणादावदेतत् । तच्च राथन्तरमित्युक्तम् । सूक्तान्तरं विधत्ते—**त्यं-**
5. ६,७ **राथन्तरम्** । 'एन्द्रम्' इत्यत्राङुपसर्गश्रवणादावत् । अस्य छन्दःकृतमाभिरूप्यं
5. ८ दर्शयन् स्तौति—**त्रैष्टुभजागते-ऽयहः** । त्रिष्टुप्छन्दस्कं जगतीछन्दस्कं च
यच्छस्त्रम्, सूक्तयोः क्रमेण त्रिष्टुब्जगतीछन्दस्कत्वात्, तस्मिन्नस्मिन् शस्त्रे
जागतं 'त्यं सु'[a] इति सूक्तम् एतदभिरूपम् । यस्मादेष त्र्यहो जगन्मध्यंदिनः ।

5. ९ सप्तमस्याह्नो बृहत्पृष्ठत्वमुक्तम् । तत्र चोद्यमाह—**तद्-इति** । तत् तत्र
सामविषये केचिज्जिज्ञासवः पृच्छन्ति । यस्मात् सप्तमस्याह्न आयतनेन स्थाना-
नुसारेण राथन्तरमेव पृष्ठं भवति । इह दशरात्रे खल्वयुग्मानि रथन्तरपृष्ठानि
इतराणि बृहत्पृष्ठानीति स्थितम् । एवं सति चास्य सप्तमस्याह्नोऽयुग्मत्वाद्
रथन्तरपृष्ठार्हस्य कथंकारं बृहत्पृष्ठत्वमिष्टमिति । उपलक्षणमेतन्नवमस्या-
ह्नोऽपि[1] । अथ तथा सति कस्मात् कारणात् त्रिष्वप्यहःसु बृहत् क्रियते? सप्तम-
नवमयोः स्पष्टमेव पृष्ठविनिवेशात् । अष्टमेऽहनि योनिशंसनात् । अतोऽत्र यः
5.१०-१३ कश्चिद्धेतुर्वक्तव्यः । इति चोद्यमाहुरिति । उत्तरम्—**तानि-इति** । यान्येतानि
सप्तमाष्टमनवमान्यहानि तानि पूर्वाण्यपेक्ष्य महास्तोमानि । त्रयस्त्रिंशान्तान्
स्तोमानपेक्ष्य महान्तश्चतुर्विंशादयः स्तोमा एषामिति महास्तोमानि भवन्ति ।
त्रिवृदादीनामेकरूपत्वादल्पत्वम् । चतुर्विंशादीनां स्तोमद्वयसमुदायरूप-
त्वान्महत्त्वम् । अतो बृहतः कारणानुसारेण वीर्यवत्त्वात् तत्करणे स्तोम-
भारसहत्वायाह्नां वीर्यवत्ता संपद्यत इति । अस्माद्धेतोः प्रत्यहं बृहत्साम्नः
करणमुपपन्नमेव । बृहतो वीर्यवत्त्वं[2] प्रजापतेरुरोबाहुसृष्टत्वात् । तच्च
'उरसो बाहुभ्यां पञ्चदशं निरमिमीत'[b] इत्यत्र 'तस्मात्ते वीर्यवन्तो

a. RV. 1. 52. b. TS. 7. 1. 1. 4.

1. B. एवतत् for एतत् 1. T. वीर्यत्व

वीर्याद्व्यसृज्यन्त'[a] इति तैत्तिरीये श्रुतम् । सामप्रगाथशंसनानन्तरं रथ-
न्तरयोनिशंसनं विधत्ते—**बृहतः-शंसति** । यदूळ्हं साम गीयते सा तस्य 5.१४
साम्नो योनिरित्युच्यते । अतः 'अभि त्वा शूर नोनुमः'[b] इत्येषा रथन्तरसाम्नो
योनिः । तां स्तोत्रियानुरूपधाय्यासामप्रगाथपाठानन्तरं शंसेत् । उभयसामत्वा-
दस्य । अग्निष्टोमव्यतिरिक्तसंस्थासु सामप्रगाथानन्तरं योन्यनुशंसनम् ।
अग्निष्टोमे तु[1] परिमितशस्यत्वात् तमुद्धृत्य तत्स्थाने योन्यनुशंसनमिति
स्थितम् । कुतो योन्यनुशंसनमित्यत्राह—**न-कौषीतकिः** । सैवासीदिति 5. १५
केचिदध्येतारः । यत्रोभयसामापि सन् केनचित् प्रत्यक्षादिना विशेषेण रथन्तर-
पृष्ठो बृहत्पृष्ठो वा सामाभिधीयते । तस्मिन् विषयेऽन्यतरयोन्यनुशंसनं कर्त-
व्यम् । यस्मादित्थं कौषीतकिराह । कथमिति चेत्, नः अस्माकं पिता याज्ञिकं
कृत्स्नं कर्तव्यं मह्यमुपदिशति । ईदृशि विषये योन्यवादं योनिशंसनं न कर्तव्यं,
[2-]तयोरेव च[-2] योन्यनुशंसनाभावं[3] नैवोक्तवान् । अतः शाखान्तरिणामिव सा
अप्रतिषिद्धा योनिः शस्यतया स्थितैवासीदिति । तस्मात्कौषीतकिवचनानुसारेण
योनिशंसनं कर्तव्यम् ।

बृहद्रथन्तरयोर्योन्यनुशसनं सर्वत्र कर्तव्यम् । तयोरेव च योन्यनुशंसन-
मित्यत्रापि तदीयं वचनं प्रमाणयति—**यत्र-अनुशंसेत्** । अन्वेव तत्रेति 5.१६,१७
केचित् । एवकारोऽत्रायोगान्ययोगव्यवच्छेदकतया योजनीयः । यत्र क्वचित्
संसवापचित्यादौ । एते बृहद्रथन्तरे सामनी समानेऽह्न्येकस्मिन्नहनि संनिपतेतां
संयुक्ते भवेताम् । तत्र यदि पृष्ठं रथन्तरं भवेत् तदा बृहतो योनिः पठनीया ।
यदि तु बृहत् तदा रथन्तरस्य । वैरूपादीनां तु न योनिशंसनम् ।

इह केचित् सामगाः कण्वरथन्तरं पवमाने कुर्वन्ति । तत्र यद्यपि 'पुनानः सोम'[c] इत्यृगन्तरोत्पन्नमन्यदेव कण्वरथन्तराख्यं साम । न खल्वसौ कण्वानां रथन्तरं कण्वरथन्तरमित्येवं कृत्वोच्यते । सांविज्ञायिक एव त्वसौ कण्वरथ-

a. TS. 7. 1. 1. 5.

b. RV. 7. 32. 22.

c. RV. 9. 63. 28.

1. B. omits

2–2. B. omit

3. B. योनिशंसनाभावं

न्तरशब्दः । अन्यथा कण्वसंबन्धस्य रथन्तरत्वस्य च विधाने वाक्यभेदापत्तेः । अत एव वैश्यस्तोमविषये 'कण्वरथन्तरं पृष्ठं भवति'[a] इति पृष्ठस्तोत्रकार्ये कण्वरथन्तरसंबन्धश्रवणे नामसाम्याद् रथन्तरयोनावेव कण्वरथन्तरं गेयमिति प्राप्तिं निराकृत्य प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवतः सर्वस्य सस्तोभस्वर-कालाभ्यासस्येयं कण्वरथन्तरमिति सांविज्ञायिकी समाख्या न तु रथन्तर-विशेषवत्तयेति प्रतिपादनमुखेन 'पुनानः सोम'[b] इति स्वयोनावेव गेयत्वं स्थापितं द्वादशलक्षण्यां दशमाध्याये[c] । तथापि रथन्तरसंज्ञासामान्यात् तत्रापि
5.१८-२० योन्यनुशंसनं कर्तव्यमिति केषांचिद् भ्रममपनुदति—**यद्‌ु–इति ।** वैरूपादिवत् तस्यापि रथन्तरत्वाभावाद् योन्यनुशंसनं न कर्तव्यमित्यर्थः । इति च[1] कौषीतकिराहेति योजना ।

5.२१,२२ अथ निष्केवल्ये सूक्तद्वयं विधत्ते—**तमु–रूपम् ।** 'अभि त्वा शूर'[d] इति
5.२३ रथन्तरयोनावभीत्युपसर्गश्रवणादस्य रथन्तररूपत्वम् । **त्रैष्टुभजागते–ऽयद्दः ।** इति गतम् ।

5.२४-२६ शस्त्रद्वयगतसूक्तगामिनीं संख्यां प्रत्येकं स्तौति—**द्वे–प्रतिष्ठित्यै ।** अष्टम-नवमयोः पञ्च पञ्च पञ्च षडिति वक्ष्यति । अतो[1] विशिनष्टि । प्रथमे छन्दोम इति । सैषा सूक्तगता द्विसंख्या द्विपदो यज्ञयजमानस्यापेक्षिताय प्रतिष्ठाफलाय
5.२७-३० संपद्यते । अथ समुदितानां[2] संख्यां स्तौति—**तानि–आप्त्यै ।** शस्त्रद्वयगतानि सूक्तानि मिलितानि चतुःसंख्यायुक्तानि भवन्ति । सैषा चतुःसंख्या पशूनामेव प्राप्त्यै संपद्यते । कुतः ? छन्दोमा हि पशव एव । तत्साधनत्वात् । 'देवता एव पृष्ठैरवरुन्धते पशून् छन्दोमैः'[e] इति श्रुतेः । पशवश्चतुष्टयाः मेदोऽसृङ्मांस-मज्जात्मकचतुःसंख्यावयवयुक्ता भवन्ति । अपि च पशवश्चतुष्पादा भवन्ति । अतः चतुःसंख्याद्वारा पशुप्राप्तये संपद्यते ॥

इति पञ्चम खण्डः

a. PB. 18. 4. 7.
b. RV. 9. 63. 28.
c. Cf. JS. 10. 4. 43,44.
d. RV. 7. 32. 22.
e. TS. 7.3.8.2; 7.4.1.2; 7.4.2.3; 7.4.6.2.

1. B. M. omit
2. T. समुचितानां

अथ वैश्वदेवे सावित्रं[1] तृचं विधत्ते—**तत्-रूपम्**। सावित्रं तृचमिति 6. १-३
शेषः। अथोत्तरत्रापि द्यावापृथिवीयं तृचं विधत्ते—**प्रेताम्-रूपम्**। आर्भवं 6. ४,५
तृचं विधत्ते—**अयं-रूपम्**। यद्यपि 'आसय' इत्यत्र नायमाङुपसर्गः, तथाप्या- 6. ६-८
कारस्यापि विशिष्टत्वमभिप्रेत्यावदित्युक्तम्। शब्दमात्रस्यापि रूपत्वात्।
वैश्वदेवसूक्तेषु पञ्चर्चमेकं सूक्तं विधत्ते—**ऋजुनीती-रूपम्**। 'ऋजुनीती नयतु 6. ९,१०
विद्वान्'[a] इति नयतिधातुमदेतत्। तच्च नयतिधातुमत्पदं सप्तमस्याह्नो रूपं
भवति। अस्य पुनरारम्भरूपत्वेन यज्ञप्रणयनरूपत्वात्। अपरं द्वैपदं सूक्तं
विधत्ते—**आ-रूपम्**। द्विपदा ऋचः सूक्तमिति शेषः। सामानाधिकरण्यमव- 6.११,१२
यवावयविनोरभेदाद् भवति। द्वृचमेतत् सूक्तसंख्यावचनादाम्नानाच्च। छन्दो-
विचितौ 'पितुभृतो न तन्तुमित्'[b] इत्युदाहृतत्वाच्च चतुष्पदात्वसिद्धेः।
अपरं तृचं सूक्तं विधत्ते—**ओमासः-रूपम्**। अथास्य गायत्रीछन्दस्कतां 6.१३-१५
स्तौति—**गायत्रं-त्र्यहः**। छन्दोव्यूहनात् गायत्रतृतीयसवनः। तस्मादेष सप्तमा- 6. १६
ष्टमनवमसमुदायात्मकास्त्र्यहा भवन्ति। तस्मात् सर्वेषां सूक्तानां गायत्रीछन्द-
स्कत्वं युक्तम्।

अग्निमारुते वैश्वानरीयं तृचं विधत्ते—**वैश्वानरो-रूपम्**। 'वैश्वानरो 6.१७-१९
न ऊतय आ प्रयातु परावतः। अग्निर्नः सुष्टुतीरुप'[c]॥ 'वैश्वानरो न आगमदिमं
यज्ञं सजूरुप। अग्निरुक्थेन वाहसा'॥ 'वैश्वानरो अङ्गिरसां स्तोमं यज्ञं च
जीजनत्। ऐषु द्युम्नं स्वर्यमत्॥'[d] इत्येतास्तिस्रः। गतमन्यत्। मारुतजात-
वेदसीयविध्यर्थवादवाक्यानि निगदव्याख्यातानि।

**प्र-रूपम्**। अत्र 'प्र यद्व'[e] इति पञ्चदश नव वा। अत्र सूत्रम्—'तत्स- 6.२०-२४
वितुर्वरेण्यं प्रेतां यज्ञस्यायं देवायेति तृचानि। ऋजुनीती पञ्च। आयाहि
वनसा सहौमासश्चर्षणीधृत इति वैश्वदेवे विकारः। वैश्वानरो न ऊतये।

a. Cf. RV. 1. 90.
b. RV. 10. 172. 3.
c. AV. 6. 35. 1; ŚŚ. 2. 5. 3.
d. ŚŚ. 10. 9. 17.
e. RV. 8. 7.

1. सावित्र

वैश्वानरो न आगमदिमं यज्ञं सजूरुप । अग्निरुक्थेन वाहसा । वैश्वानरो अङ्गि-
रसां स्तोमं यज्ञं च जीजनदैषु द्युम्नं स्वर्यमत् । प्र यद्वस्त्रिष्टुभमिति[1] पञ्चदश
6.२५-२७ नव वा अर्चन्तस्त्वेत्याग्निमारुते'[a] इति । **गायत्रम्-सूक्तानि** । गतमेतत् ।
6.२८ अथ प्रथमच्छान्दोमिकस्याह्नः संस्थामाह—**तद्-संतिष्ठते** ।तत् सप्तम-
महः उक्थ्यान्तं सत् समाप्तिं गच्छति । उक्थ्यसंस्थमित्यर्थः । अस्य पार्ष्ठिक-
प्रथमाहःप्रकृतित्वं सूचयंस्तत्रोक्तमेव 'इमं लोकं प्रथमेनाह्नाप्नुवन्ति'[b] इति
6.२९ पृथिवीलोकादिप्राप्तिफलमेतदहरनुष्ठानस्य दर्शयति—**तस्य-अह्नः** । या पार्ष्ठि-
कस्य प्रथमस्याह्नः प्रागुक्ता आप्तिः फलम् , सैवास्य छान्दोमिकस्य प्रथमस्या-
ह्नोऽपि द्रष्टव्या । अतश्च पृथिव्यादिप्राप्तिरेतदहःप्रयोगस्यापि फलमित्यर्थः ।
6.३० **अयं-छन्दोम**ः ॥

इति षष्ठः खण्डः

अपेक्ष्य छन्दोमानथ च दशरात्रं प्रथमतो
गतं साप्तम्यं च श्रुतिरिति विधाय स्फुटमहः ।
द्वितीयत्वं प्राप्तं घटितवपुरप्यष्टमतया
क्रमायातं खण्डैस्त्रिभिरथ विधातुं प्रववृते ॥

तत्र तावदेतदहःपठनीयानां महद्वत्त्वं नाम किंचिद् रूपमस्तीति प्रति-
7.१-४ पादयति—**अन्तरिक्षलोको-अन्तरिक्षम्** । त्रयाणामह्नां स्थानसाम्यकृतं क्रमेण
पृथिव्यन्तरिक्षद्युलोकरूपत्वम् । यस्मादेवं द्वितीयश्छन्दोमोऽन्तरिक्षलोकरूपः,
तस्मात् तस्मिन् मध्यमे छन्दोमाहनि महच्छब्देन तदर्थेन वा युक्तानि सूक्तान्येव
पठ्यन्ते । यस्मादन्तरिक्षस्य महत्त्वं प्रसिद्धम् । रूपान्तरमप्यस्य दर्शयति—
7.५-७ **अथो-कौषीतकिः** । अभ्यारब्धवन्ति स्युरिति केचिदध्येतारः । तथा च परमे-
वैतदहरभिवदतीति । सर्वत्र चाभ्यारब्धवदिति पठन्ति । अभ्यारम्भः पुन-
र्वचनम् । परमेवैतदित्यादि व्याख्यातम् ।

a. ŚŚ. 10. 9. 16–17. b. KB. XX. 2. ३०.

1. B. T. ° ष्टुभमिषमिति

आज्यशस्त्रं तावद् विधत्ते— **अग्नि-अभ्यारभ्य[ब्ध]वत्**। मह 7.८,९
इति पदश्रवणान्महद्वदेतत्। 'अग्निमग्निभिः' इति पुनर्वचनादभ्यारम्भवच्च
भवति। प्रउगं विधत्ते—**त्रैष्टुभः-अहः**। वृधास इति वर्धनार्थधातुमत्। 7.१०-१२
तच्च युक्तम्। यस्मादेतदष्टममहर्महच्छब्दवत्। अतो वृद्धेर्महत्त्वलक्षणस्या-
भिधायकं शब्दरूपमत्र युक्तम्। **अतः—अभ्यारभ्य[ब्ध]वत्**। यावत्पदस्य 7.१३,१४
पुनरभिधानात्। **प्रति-अभ्यारभ्य[ब्ध]वत्**। मित्रस्य वरुणस्य चाह्वान- 7.१५,१६
प्रतीतेः अभ्यारम्भः। **अप-अभ्यारभ्य[ब्ध]वत्**। मघशब्दस्य पुनरुक्तेरत्राभ्या- 7.१७,१८
रम्भः। **अयं-अभ्यारभ्य[ब्ध]वत्**। अत्र ब्रह्मपदस्य। 7.१९,२०

**प्र-अभ्यारभ्य[ब्ध]वत्**। अत्र प्रेत्युपसर्गस्य। 7.२१,२२

**उत-रूपम्**। गतमेतत्॥ 7.२३,२७

इति सप्तमः खण्डः

अथ पञ्चसूक्तं मरुत्वतीयं विधास्यन् आद्यं सूक्तं विधत्ते—**महाँ-अभ्यार-
भ्य[ब्ध]वत्**। महानिति महच्छब्दयुक्तं सदेतद् 'उरुः पृथुः' इत्यारम्भवच्च भवति। 8.१,२
द्वितीयं विधत्ते—**इमा-अभ्यारभ्य[ब्ध]वत्**। अत्र हव्यशब्दस्य पुनर्वचनात्। 8.३,४
तृतीयं विधत्ते—**कस्य-अभ्यारभ्य[ब्ध]वत्**। 'सुखरथम्' इति 'हरिभ्यामी- 8.५,६
यमानम्' इति कर्माभिधायकविभक्तेः द्विरभिधानादत्राभ्यारम्भः। चतुर्थं
विधत्ते—**महश्चित्-अभ्यारभ्य[ब्ध]वत्**। अत्र मह इति द्विर्वचनाद् रूपद्वय- 8.७,८
संपत्तिः। पञ्चमं विधत्ते—**तम्-अभ्यारभ्य[ब्ध]वत्**। महिमानमित्यनेन महद्वत्। 8.९,१०
'कृण्वानो' 'महिमानम्' इति शानच इमनिचश्च रूपस्यैकरूपावभासादभ्या-
रम्भः। एषां सूक्तानां छन्दोविशेषमादर्शयन् जगतीछन्दस्कत्वस्याभिरूप्य-
माह—**त्रैष्टुभजागते-ऽयहः**। गतम्। अथ पञ्चसूक्ते निष्केवल्य एकं सूक्तं 8.११
विधत्ते—**त्वं-अभ्यारभ्य[ब्ध]वत्**। महानिति महद्वत्त्वम्। त्वं तुभ्यमित्य- 8.१२,१३
भ्यारम्भः। अपरं विधत्ते—**त्वं-अहः**। स्पष्टम्। अपरं विधत्ते—**अपूर्व्या-
अभ्यारभ्य[ब्ध]वत्**। मह इति महद्वत्। वीराय तुरायेत्यभ्यारम्भः। 8.१४,१५ 8.१६,१७
अपरं विधत्ते—**तां-अभ्यारभ्य[ब्ध]वत्**। मघवन् महित्वेति मकाराभ्या- 8.१८,१९

8.२०,२१ सादभ्यारम्भः। अपरं विधत्ते—**इमां-अभ्यारभ्य[ब्ध]वत्।** महो महीमिति
8.२२ द्विर्वचनादभ्यारम्भः। महीमिति महद्वत्त्वम्। **त्रैष्टुभजागते-त्र्यहः।** इति
8.२३-३० गतम्। शस्त्रद्वयवर्तिसूक्तसंख्यां स्तौति—**पञ्च-उपाप्त्यै।** तानि पञ्च पञ्च च मिलितानीत्यर्थः। गतमन्यत्॥

इत्यष्टमः खण्डः

9.१,२ **हिरण्यपाणिम्-अभ्यारभ्य[ब्ध]वत्।** सावित्रं चतुर्ऋचमिति शेषः। अपां न पातमिति वर्णैक्यादभ्यारम्भः। सूत्र्यते हि—'हिरण्यपाणिमूतय' इति
9.३,४ चतस्रः'[a]। **मही-अहः।** तृचमिति शेषः। महीति महद्वत्। गतमन्यत्।
9.५,६ **युवाना-अभ्यारभ्य[ब्ध]वत्।** तृचमिति शेषः। द्विश्चकारप्रयुक्तेरभ्यारम्भः। सूत्र्यते हि—'मही द्यौर्युवाना पितरेति तृचौ'[a] इति। अथ वैश्वदेव-
9.७,८ मेकं सूक्तं विधत्ते—**देवानाम्-अभ्यारभ्य[ब्ध]वत्।** महदिति महद्वत्त्वम्। वाममिति द्विर्वचनादभ्यारम्भः। द्वैपदं सूक्तं विधत्ते—**इमा-अभ्यारभ्य[ब्ध]-**
9.९,१० **वत्।** द्विपदाः द्वैपदं सूक्तमित्यर्थः। द्विश्चकारश्रवणादभ्यारम्भः। अपरं
9.११,१२ तृचं विधत्ते—**विश्वे-अहः।** ऋतावृध इति वर्धतिधातुश्रवणाद् वृद्धवत्। यस्मादेतदहर्महद्वत् तस्माद् वृद्धवत्त्वमभिरूपम्। वृद्धवत्त्वमहत्त्वयोरनन्यात्मकत्वात्। अत्र सूत्रम्—'हिरण्यपाणिमूतय इति चतस्रो मही द्यौर्युवाना पितरेति तृचौ देवानामिदमानुकं विश्वे देवा ऋतावृध इति तिस्र इति वैश्वदेवे विकारः'[a] इति।

9.१३, एतच्छस्त्रं छन्दोद्वारा स्तौति—**गायत्रं-त्र्यहः।** आग्निमारुते वैश्वान-
9.१४-१६ रीयं विधत्ते—**वैश्वानरो-अभ्यारभ्य[ब्ध]वत्।** 'वैश्वानरो अजीजनदग्निर्नो नव्यसीं मतिम्। क्षमया वृधान ओजसा॥ वृषा पावकदीदिह्यग्ने वैश्वानर द्युमत्। जमदग्निभिराहुतः॥'[b] 'ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्।

a. ŚŚ. 10. 10. 7. b. ŚŚ. 10, 10, 8.

अजस्रं भानुमीमहे ।।'[a] इति । **एतस्मिंस्तृचे** क्षमयेति वृद्धवत्त्वप्रदर्शनार्थम् । पादो-
दाहृतिरुपलक्षणार्था । ईमह इति महद्वत् । ऋतावानमृतस्येत्यभ्यारम्भ-
वदिति ।

मारुतं विधत्ते—**कद्ध-अभ्यारभ्य[ब्ध]वत्** । कद्ध कधेति द्विरुक्तेरत्रा- 9.१७
भ्यारम्भः ।[1] विकल्पेन जातवेदसीयं [2]-सूक्तद्वयं विधत्ते-[2]—**दूतं-अहः** । आभि- 9.१८-२०
रूप्यार्थमुक्तम् । किमेकान्ततो विकल्प एवानयोरिति । नेति स्वमतमाह—
**पूर्वं-स्थितम्** । तु शब्दो वैकल्पिकपक्षव्यावृत्त्यर्थः । पूर्वं मतं स्थितमिति[3] । 9.२१
**महाँ-अभ्यारभ्य[ब्ध]वत्** । स हि वेदा स देवाँ इति पुनर्वचनादभ्यारम्भः । 9.२२
**गायत्रं-त्र्यहः** । गतम् । अत्र सूत्रम्—'वैश्वानरो अजीजनदग्निर्नो नव्यसीं 9.२३
मतिम् । क्षमया वृधान ओजसा । वृषा पावक दीदिह्यग्ने वैश्वानर द्युमत् ।
जमदग्निभिराहुतः । ऋतावानं वैश्वानरं कद्ध नूनं कध प्रियः दूतं वो विश्व-
वेदसमित्याग्निमारुते'[b] इति । अत्र 'ऋतावानं वैश्वानरमृतस्य ज्योतिष-
स्पतिम् । अजस्रं भानुमीमहे'[a] इत्यभ्युद्दृष्टायां पठितत्वादिह न पठिता ।
**इति-अहः** । गतमेतत् ।। 9.२४-२५

इति नवमः खण्डः

इत्थं विस्पष्टमुद्दिष्टमष्टमं दाशरात्रिकम् ।
अथ क्रमेणानवमं नवमं विदधात्यहः ।।

तत्र तावन्नवमाहःशस्यानां गतवत्त्वं नाम किंचिद् रूपं दर्शयति—
**अन्तो-शस्यन्ते** । यदेतन्नवममहरस्ति तदन्त एवावसानरूपमेव । छन्दोम- 10.१-३
त्र्यहान्तत्वात् । नवरात्रान्तर्वर्तित्वाच्च । अत एव गतिरूपमेतदहः । अन्तस्यैव
लोके गम्यत्वप्रसिद्धेः । यस्माच्चासावुत्तमः छन्दोमोऽसौ प्रसिद्धो द्यौर्लोक एव

a. ŚŚ. 3. 3. 5.　　b. ŚŚ. 10. 10. 8.

1. B. °भ्यारब्धिः　　2-2. T. सूक्त च'''विधिम
3. T. व इति

भवति । 'असौ लोक उत्तमः'[a] इति प्रागाम्नानात् । तस्माद् द्युलोकस्य गन्तव्यत्वेन गतिरूपत्वात् तद्रूपस्यापि गतिरूपत्वानवखण्डनादत्र नवमेऽहनि गमिधातुमन्ति सूक्तानि पठितव्यानि । तत्र द्विषूक्तमाज्यशस्त्रं तावद् विधत्ते—
10.४ **अगन्म–आज्यम्** । य एते तृचत्रयोविंशत्यृचे सूक्ते स्तः तन्मिलितमाज्यशस्त्रं
10.५-९ भवति । तत्र तृचसूक्तस्य रूपसंपत्तिमाह—**अगन्म–इयात्** । तृचमगन्मेति सूक्तम् अगन्मेति पदेन गमिधातुयुक्तं भवति । तच्च गतवत्त्वमन्तस्यावसानस्य रूपं लक्षणं भवति । यस्मान्नवममहरन्तोऽवसानरूपं भवति । लोके च कश्चिदन्तं गन्तव्यस्यावसानं प्राप्य पुनरैत्येव प्रत्यागच्छत्येव । यस्मात् ततस्तस्मात् कश्चन इयात् । तस्माद् गतिरन्तप्राप्तिनिमित्ता । तां गमयतीत्यन्तरूप
10.१०-१४ गतवत्त्वम् । त्रयोविंशत्यृचस्य द्वितीयस्य सूक्तस्य रूपसंपत्तिमाह—**अस्थुः–इयात्** । स्थितवत् गतिनिवृत्तिरूपार्थधातुमत् । अन्तं गत्वा तिष्ठति गमनान्निवर्तते । गन्तव्यस्य गतत्वात् । अन्यद् गतम् । आज्यसूक्तस्य द्विषूक्तत्वमेव स्थापयितुं शाखा-
10.१५-२० न्तरिणां मतमाह—**अगन्म–इयात्** । एवकारस्त्रयोविंशत्यृचस्य सूक्तस्य व्यावृत्त्यर्थः । गतमन्यत् । एतन्मतनिराकरणपुरःसरं स्वपक्षमुपक्षिपन् कौषी-
10.२१ तकेर्वचनमुपन्यस्यति—**अष्टाचत्वारिंशं–कौषीतकिः** ॥

इति दशमः खण्डः

11.१-३ **सोमस्य–अभि** । तृचमेव सूक्तमाज्यशस्यमिति पैङ्ग्यमतं विषयीकृत्य कौषीतकिमुनिरित्थमुक्तवान् किल । किमिति चेत् , इह खलु सामगा अष्टाचत्वारिंशं स्तोमं कुर्वन्ति । शस्त्रेण च होत्रादिपठनीयेन स्तोमो व्याप्तव्य इति स्थितिः । तत्रेह तृचमाज्यशस्त्रमष्टाचत्वारिंशं स्तोमं किं व्यश्नुवीत व्याप्नुयात् । किंशब्दोऽयं क्षेपे । न व्यश्नुवीत । अत्यन्तविषमसंख्यत्वात् । अतः तृचाज्यशस्त्रपक्षे स्तोमव्याप्तिर्न सिद्ध्यत्येव । यस्मादेवं तस्मात् 'सोमस्य मा तवसम्'[b] इत्येतत् त्रयोविंशत्यृचं तृचसूक्तानन्तरं तेन सह संधाय शंसितव्य-

a. KB. XXVI. 7. २. b. RV. 3. 1. 1.

मेव । तस्य तदेवेत्यादि गतम् । 'चक्रम' 'शशासुः' इति भूतार्थाभिधायकलकार-
सामर्थ्याद् भूतार्थाभिधायकमिदं पदद्वयं गम्यते ।

एवमाक्षिप्तस्वपक्षस्य महर्षेः पैङ्ग्यस्य कौषीतकिनं प्रति बन्द्या प्रत्यव-
स्थानं दर्शयति—**अत्र-इति** । अत्र न्वा अपीति केषांचिदध्येतॄणां पाठः । 11.४,५
अत्रेति न्वापीति च छान्दसौ दीर्घत्वविवृत्यभावौ । न्वा इति नु वै इति
पदच्छेदः । 'द्विगुणं न्वा अग्निमुद्यन्तुमर्हति'[a] इत्यादिवत् । अत्रापि 'सोमस्य मा'[b]
इति सूक्तस्योपशंसनेऽपि स्तोमोऽष्टाचत्वारिंशस्तोमो न व्याप्तव्यः, शस्त्रेण
व्याप्तुं न शक्यः । यद्ययमष्टाचत्वारिंशः स्तोमोऽनेन षड्विंशत्यृचात्मकेन
शस्त्रेण व्याप्नुवता सता स्वावयवभूताभिर्ऋग्भिरेव करणभूताभिर्व्याप्यत
इत्येवमभ्युपगम्यते, तदा न स्तोमव्याप्तिः साधयितुं शक्यते । तत्रापि संख्या-
वैषम्यस्य तदवस्थत्वात् । षड्विंशत्यृचं हि शस्त्रम् । स्तोमश्चाष्टाचत्वारिंशः ।
तत्र संख्यावैषम्यं स्पष्टमेव । तस्मात् स्तोमव्याप्त्यसंभवदोषः अस्मत्पक्ष इव
कौषीतकिपक्षेऽप्यविशिष्ट एवेति पैङ्ग्यनामा महर्षिराह स्म ।

तत् किमिदानीं स्तोमव्याप्तिरेव नापेक्षितेति ? अतस्तत्प्रकारमाह—
**अक्षरैः-एव** । शस्त्रगता खल्वृगक्षरैः स्वावयवैरेव स्तोमं व्याप्नोति, न तु 11.६-९
स्वरूपेण । यत्र स्वरूपेण न संभवति तत्राक्षरद्वारा स्तोमव्याप्तिरित्यर्थः । किंच
शस्त्रमध्यपठनीया निवित् शस्त्रात् पूर्वं पठनीया । पुरोरुक् चाक्षरपदाभ्याम-
न्यतमेनर्च[1] व्याप्नोति । स्वरूपेण व्याप्त्यसंभवे पदेन तदसंभवे अक्षरेणापि ।
यस्मादेवमत्यन्ताभ्यर्हिते निवित्पुरोरुचौ तस्माद् यस्मिन् शस्त्रे निवित्पुरोरुचौ
शस्येते तत्र शस्त्रेण स्तोमो व्याप्त एव भवति । तथान्यत्र श्रूयते—'एकैकं वै
निविदः पदमृचं सूक्तं प्रति । निविदा ह्येव स्तोत्रमतिशस्तं भवति'[c] इति ।
यस्मादेवं तस्मादनेन तृचेनाज्यशस्त्रेण अष्टाचत्वारिंशः स्तोमोऽक्षरद्वारा पुरो-
रुङ्महिम्ना वा व्याप्यत एव । तस्मात् पैङ्ग्यपक्षे न स्तोमाव्याप्तिदोष इत्युप-
संहरति—**तृचम्-वचसा** । यददोऽगन्मेति सूक्तम् तदेवं पैङ्ग्यवचसोऽनुसारेण 11.१०
तृचमाज्यं भवेदेव । तथाप्यनयोः पक्षयोः क उपादीयतामित्यपेक्षित आह—

a. TS. 5. 2. 5. 3. b. RV. 3. 1.
c. AB. 3. 11. 9.

1. MSS. ऋचा

11.११ **उभे-स्थितम्** । 'अगन्म'[a] 'सोमस्य'[b] इत्येते द्वे अपि सूक्ते आज्यमित्येतन्मतमेव
स्थितम् । अल्पमहतोर्महतः सति संभवे ग्राह्यत्वात् ।

14.१२-१४ इतश्च द्विषूक्तमाज्यशस्त्रं कर्तव्यमित्याह—**एतेन-स्याताम्।** पुरा किलैतेन
नवमेनाह्ना पूर्वं विसंवादवन्तौ सन्तौ वसिष्ठविश्वामित्रौ संवादवन्तावभूताम् ।
यः पुमानेवमिदमहः संवादहेतुत्वभूतं जानन्ननुतिष्ठति, अस्मै वेदित्रे श्रैष्ठ्यमु-
द्दिश्य स्वजनाः संप्रतिपत्तिमन्तो भवन्ति । अयमस्माकं मध्ये श्रेष्ठः वयमस्यानु-
जीविनो भूत्वा वर्तिष्यामह इति कृतसंविदस्तथा वर्तन्ते । यस्मादेवम् 'अगन्म'[a]
इति वासिष्ठं 'सोमस्य मा'[b] इति वैश्वामित्रं चास्मिन्नहन्यभिरूपम् ।
तस्मादुभे अप्येते सूक्ते आज्यशस्त्रतया भवेताम् । सूक्तयोरनियमेन
11.१५ पौर्वापर्यप्रसक्तौ नियमयति—**वासिष्ठं-उत्तरम्** । प्रउगं विधत्ते—**त्रैष्टुभः-**
11.१६ **प्रउगः** ॥

इत्येकादशः खण्डः

12.१ **आ-च** । अस्यार्थः—'आ वायो भूष'[c] इत्येतत् पञ्चर्चं सूक्तम् । तत्र प्रथमा
तृतीया चोत्तमा च वायव्या । सोऽयं वायव्यस्तृचः । परिशिष्टे द्वे द्वितीया-
चतुर्थ्याविन्द्रवायूदेवत्ये । तयोस्तृतीया 'अर्वन्तो न श्रवसः'[b] इति पूर्वस्य सूक्त-
स्यान्त्या स्वीकर्तव्या । सोऽयमैन्द्रवायवस्तृचः । यद्यपि सूक्तान्तरगतान्त्या
तथाप्यानन्तर्यस्याविशिष्टत्वात् तस्या अपि ग्रहणमविरुद्धम् । अतोऽयमर्थः—
'आ वायो भूष'[c] इत्येतद् 'अर्वन्तो न श्रवसः'[d] इत्यनयोपलक्षितं पञ्चर्चं सूक्तं
यथासंभवं वायव्यं चैन्द्रवायवं च तृचं भवतीति । तथा च सूत्रम्—'आ वायो
भूषेति प्रथमातृतीये चोत्तमा च । द्वितीया चतुर्थ्यौ चार्वन्तो न श्रवस
12.२-६ इति च'[e] इति । **आगतेति-इयात्** । यद्यपि गमिधातुरत्र न श्रूयते

a. RV. 7. 12.
b. RV. 3. 1.
c. RV. 7. 92.
d. RV. 7. 91. 7.
e. ŚS. 10. 11. 5.

तथाप्याङुपसर्गसामर्थ्याक्षिप्तत्वेन तत्प्रतीतेरविशिष्टत्वात् श्रुतएवेति कृत्वा
गतवदित्युक्तम्। ऐन्द्रवायवतृचस्य रूपसंपत्तिमाह—**प्र-इयात्**। गतमेतत्। 12.७-११

**दिवि-इयात्**। क्षितवत् निवासगत्यर्थक्षयिधातुमत्। क्षियति निवसति 12.१२-१७
प्रत्यागच्छतीति वा। गतमन्यत्। **आ-इयात्**। गतम्। 12.१७-२३

**इन्द्रं-दधाति**। अत्र 'यत्पार्या'[a] इति कश्चित् पादोऽस्तीति शेषः। अत्र 12.२४-२८
पार्या इति पदस्य परार्ध्या इत्यर्थः। पारमवसानभूमिस्तत्र भवाः पार्याः।
परार्धशब्दस्याप्यग्रभागार्थत्वात् तत्र भवन्त्यः पराध्याः धिय इत्यर्थोऽस्य
लभ्यते। तच्च पार्यत्वमन्तरूपम्। अतोऽन्ते त्र्यहस्यावसानभूते नवमेऽहन्यन्त-
मवसानलक्षणमर्थं दधाति स्थापयति। अस्य तृचाहरुचितावसानार्थद्योतकत्वा-
दाभिरूप्यमस्तीत्यर्थः। **ऊर्ध्वो-इयात्**। श्रयति तत्रैव निवसतीत्यर्थः। 12.२९-३४
**प्र-इयात्**। बकारस्याभ्यासादत्र निनृत्तिः। गतम्। एतेषां छान्दोमिकानां 12.३५-३९
प्रउगशस्त्राणां विशिष्टमहर्षिदृष्टत्वेन गरिष्ठतां साधारण्येनाह—
**एते-ऋध्नुवन्ति**। व्याख्यातमेतत्। 12.४०-४४
**बृहत्पृष्ठम्-रूपम्**। एतदपि गतम्॥ 12.४५,४६

इति द्वादशः खण्डः

अथ मरुत्वतीये पञ्चसूक्तानि क्रमेण विधत्ते—**त्र्यर्यमा-रूपम्**। अत्र यत् 13.१,२
त्रीति पदमस्ति तत् त्रिसंख्यावाचकत्वात् छन्दोमापेक्षया तृतीयस्यास्य नवम-
स्याह्नो रूपं भवति। **इन्द्रो-रूपम्**। अमुष्य द्युलोकस्य रूपं सामेति। एत- 13.३-१६
त्साम्नः स्वर्गलोकरूपत्वेन संस्तवनात्। एतदहश्च द्युलोकरूपमित्युक्तम्।
अतोऽस्ति रूपसंपत्तिः। **प्र-सोदर्कम्**। 'मरुत्वन्तं सख्याय हवामहे'[b] इति 13.१७,१८
चतुर्थस्य पादस्य प्रत्यृचमेकत्वात् सोदर्कमेतत् सूक्तम्। तदिदं सोदर्कत्व-
मन्तरूपं भवति। अन्त्यस्य पादस्याभ्यासाद् अन्तभूयस्त्वप्रतीतेः।
**त्रैष्टुभजागते-त्र्यहः**। गतम्। 13.१९

a. RV. 7. 27. 1. b. RV. 1.101. 1-7.

13.२०-२५ निष्केवल्यशस्त्रार्थं षट्सूक्तानि क्रमेण विधत्ते—**आ-इयात्**। लोके हि गन्ता सत्पुरुषोऽन्तं गत्वा ततोऽन्यत्र गमनप्रसंगेऽवसानं[1] गतेर्विरामं करोति।
13.२६-३५ **अस्मा-इयात्**। परशब्दस्याभ्यासादत्र निनृत्तिः। अन्यद् गतम्।

13.३६-४२ **अहं-इयात्**। 'अहं भुवम्' 'अहं धनानि' इत्यादि प्रतिपादमहंशब्दस्य[2] पठ्यमानत्वात्। 'विश्वजिते' 'धनजिते' इत्यादिजितेशब्दस्याभ्यासः।
13.४३ **त्रैष्टुभजागते-ऽयहः**। जागते इति द्विवचनम्। 'अहं भुवं'[a] 'विश्वजिते'[b]
13.४४-४७ इति सूक्ते इत्यर्थः। मरुत्वतीयशस्त्रसूत्रसंख्यां स्तौति—**पञ्चसूक्तानि-आप्त्यै**।
13.४८-५० गतम्। निष्केवल्यशस्त्रसूत्रसंख्यां स्तौति—**षळन्ततो-आप्त्यै**। अन्ततोऽन्ते छन्दोमावसानभूते नवमेऽहनि निष्केवल्यशस्त्रे षट् सूक्तानि शस्यन्ते। चत्वारि त्रैष्टुभानि द्वे जागते मिलित्वा षट्संख्यानि भवन्ति। शस्त्रद्वय-
13.५१-५३ सूक्तानां समुदितानां संख्यां स्तौति—**तानि-आप्त्यै**। पशूनां त्रैष्टुभत्वं त्रिष्टुब्रूपवीर्यवशवर्तित्वात् पशूनाम्। वाक्पारुष्यदण्डोद्यमनादिभिर्वीरकर्मभिः खलु पशवो मनुष्याणां वशवर्तिनः सन्तो वाहदोहनादिभिरुपभोगाय कल्पन्ते। गतमन्यत्॥

इति त्रयोदशः खण्डः

14.१-३ अथ वैश्वदेवशस्त्रे सावित्रं तृचं विधत्ते—**अभि-रूपम्**। अत्र यदभीति पदमस्ति तेनासौ द्युलोकोऽभिधीयते। सर्वैरभिगमनयोग्यत्वात्। तस्मात् तदभिपदममुष्य लोकस्य रूपं भवति। तदात्मकं च नवममहः। तेन तत् तृचम-
14.४,५ भिरूपम्। द्यावापृथिवीयं विधत्ते—**प्र-रूपम्**। महत्त्वद्योतनवत्त्वाभिगन्तव्यत्वानि द्युलोकरूपाणीति तदात्मकनवमाहरभिरूपत्वम्। आर्भवं विधत्ते—

a. RV. 10. 48. b. RV. 2. 21.

1. B. T. ° प्रसंगो ° 2. T. इत्याद्यप्रतिपादाहं शब्दस्य

**इन्द्र-इयात्।** या 'इन्द्र इषे ददातु'[a] इत्येका ऋगस्ति, ये च 'ते नो रत्नानि धत्त न'[b] इति द्वे ऋचौ स्तः ता मिलितास्तिस्रः ऋच आर्भवं तृचं भवति। अस्मिंस्तृचे 'एकमेकं सुशस्तिभिः'[b] इति कश्चित् पादोऽस्ति। तस्मिन्नेकपदस्य पुनः पाठान्निवृत्तिर्भवति। गतमन्यत्। 14.६-१०

अथ वैश्वदेवसूक्तानि विधत्ते—**अथ-दधाति।** आर्भवादनन्तरं मनुदृष्टं 14.११-१३
विश्वेदेवदेवत्यं सूक्तं पठेत्। तच्च 'अग्निरुक्थे पुरोहितः'[c] इत्यादिकम्। तत्र 'अग्निरुक्थे'[c] इति द्वाविंशत्यृचं सूक्तम्। 'ये त्रिंशति'[d] इति पञ्चर्चे सूक्ते 'यथा वशन्ति'[e] इत्युपोत्तमामुद्धृत्य शिष्टं 'बभ्रुरेकः'[f] इति द्वैपदं दशर्चम्। 'नहि वो अस्त्यर्भकः'[g] इत्येका। 'आ शर्म'[h] इति चतस्रः। तदेतत् सर्वं मनुदृष्टत्वान्मनुशब्देनोक्तम्। तथा चानुक्रमण्याम्—'अग्निरुक्थेध्यधिका मनुर्वैवस्वतो वैश्वदेवं ह प्रागाथम्'[i] इत्यादि। सूत्रितं च—'अग्निरुक्थ इति प्रभृति पञ्च मनुसूक्तानि ये त्रिंशतीत्युपोत्तमामुद्धृत्य नहि वो अस्त्यर्भक इत्येका। आ शर्मेति चतस्रः। **बभ्रुरेक** इति वा मनुप्रवर्हः'[j] इति। वृह उद्यमन इत्यस्य घञन्तस्य रूपम्। प्रकर्षेण उद्यतः सार इत्यर्थः। यो मनुर्मनुदृष्टसूक्तम् तत् सर्वस्यायुषः प्राप्तिहेतुत्वात् सर्वं आयुरित्युक्तम्। तत् तेन मनोः शंसनेन यज्ञे च यजमानेषु चायुः स्थापयत्येव। अथ तृचं विधत्ते—**विश्वे-भारद्वाजम्।** भरद्वाजेन महर्षिणा 14.१४
दृष्टम्। न गार्त्समदम्। **आ-इयात्।** गतम्। 14.१५-१९

**गायत्रम्-त्र्यहः।** गतम्। 14.२०

**दिवि-रूपम्।** 'दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहत्। ज्योतिषा 14.२१-२२
बाधते तमः॥ स विश्वं प्रति चाक्लृपदृतूनुत्सृजते वशी। यज्ञस्य वय उत्तिरन्॥'[k] 'अग्निः परेषु धामसु कामो भूतस्य भव्यस्य। सम्राळेको विराजति'॥[l] इति

a. RV. 8. 93. 34.
b. RV. 1. 20. 7.
c. RV. 8. 27.
d. RV. 8. 28.
e. RV. 8. 28. 4.
f. RV. 8. 29.
g. RV. 8. 30. 1.
h. RV. 8. 31. 10.
i. ŚA. 8. 27.
j. ŚŚ. 10. 11. 8.
k. ŚŚ. 10. 11. 9.
l. AV. 6. 36. 3; ŚŚ. 3. 5. 8.

14.२३–२८ तृचं वैश्वानरीयं भवति । मारुतं विधत्ते—**मरुतो-इयात्** । गतम् ।

14.२९–३५ **अग्निः-त्र्यहः** । गतम् ।

14.३६–३९ **इति-अह्नः** । गतमेतत् ।

14.४०–४४ त्रिष्वप्यहःसु द्विपदानां शंसनं विशेषतः स्तौति—**अन्वहं-तिष्ठति** । अहन्यहनि सप्तमेऽष्टमे नवमे चाहनि 'आ याहि वनसा'[a] 'इमा नु कम्'[b] 'बभ्रुरेकः'[c] इति । तत्र या द्विपदा नाम ता यजमानसंबन्धि छन्दो भवति, द्विपादत्वसाम्यात् । ततस्तेनान्वहं द्विपदानां शंसनेन पशूनामधि उपरि स्थितां तदधिष्ठातृत्वलक्षणायां यजमानान् स्थापयति । यजमानानां पश्वधिष्ठातृत्वमेव संपादयति । यस्माल्लोके पुरुषः पशूनधितिष्ठति । पशूनां पुरुषेण नियमेन वाक्पारुष्य-दण्डोद्यमनादिभिः प्रेर्यमाणत्वाभ्युत्थितत्वादिदर्शनात् । अभ्यासोऽध्याय-समाप्त्यर्थः ॥

इति चतुर्दशः खण्डः

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे ।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः ॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य विरिञ्चिवेश्मवसतेरीशस्य[1] चानुग्रहात् ।
अध्यायोऽत्र षडूर्ध्वविंशतिमितः[2] कौषीतकिब्राह्मण-
व्याख्यानेऽवधिमाप्तवानभिहितच्छन्दोमसंज्ञत्र्यहः ॥

## इति कौषीतकिब्राह्मणव्याख्याने
## तृतीयदशके षष्ठोऽध्यायः

a. RV. 10. 172. 1.
b. RV. 10. 157. 1.
c. RV. 8. 29. 1.

1. M. वटद्रुमूल for विरिञ्चिवेश्म
2. B. M. ° विंशतितमः

अथ

## सप्तविंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

पृष्ठ्यः स्पष्टं पुरोक्तष्षळह इह निरुक्तोऽथ छन्दोमनाम्ना-
मह्नामह्नाय कृत्स्नो विधिरथ दशमस्याविवाक्याह्वयस्य ।
अह्नः क्लृप्तिं क्रमाद्वैकितविधिपदवीकस्य कर्तुं प्रवृत्त-
स्तच्छस्त्रादेरधीतावपरविरचनायोग्यतां तावदाह ॥

**यद्–अन्वेतोः** । भूर्भुवःसुवराख्यानां त्रयाणां लोकानां मध्ये इतरलोक- 1.१-८
द्वयापेक्षयोपरि स्थितैर्मनुष्यैर्मनसापि गन्तुमयोग्ये दिवि द्युलोके देवानां संबन्धि यत् किंचित् कर्मास्ति तदेव दशममहः । न तु छन्दोमादीतराहर्वन्मनुष्य-संबन्धीदं दशममहर्भवति । इत्येवं कौषीतकिनामा महर्षिराह स्म । यस्मादेवं तस्माद्दिव्यत्वाद्धेतोः तद् दशममहः शस्त्रादिपठने प्रतिभाराहित्यवत्यादावप्यन्या-हर्वन्न वक्तव्यम् । अत एवाविवाक्यसंज्ञया वेदप्रसिद्धं भवति । न खलु कश्चन मनुष्यजातीयो दिवि भवं वस्तु समस्तेन्द्रियसन्निकृष्टस्फीतालोकमध्यवर्तिवस्तु-वद् अञ्जसैव इदमिति विवेक्तुं शक्नोति, येनावगतिपूर्वकत्वाद् वाक्प्रवृत्तेर्विवचनं सङ्गच्छेत । तथा च ब्राह्मणान्तरम्—'को हि तद् वेद यद्यमुष्मिन् लोके अस्ति वा न वेति'[a] इति । अतोऽविवक्तव्यम् । वस्त्विदमीदृगित्यविजानानो वैयात्य-मात्रादहं विवचनं करवाणि, तथा चोन्मत्तबालादिवदनवधेयवचनोऽयमिति सद्भिर्विगर्हणीयतां प्राप्नवानि, अविज्ञातवादस्यानृतवादप्रायत्वादनर्थं वा प्रपद्येयमिति परिभयं द्योतयन् विवचनं न कुर्यादिह । अविवाक्यनामत्वमस्याह्नो ब्राह्मणान्तरसिद्धमिहानूद्यते । तथा चान्यत्र श्रुतम्—'तस्माद् दशमेऽहन्नवि-

a. TS. 6.1. 1. 1.

वाक्य उपहताय न व्युच्यम्'[a] इति । अपि च यदेतद् दशममहराख्यं देवानां संबन्धि किंचित् कर्मास्ति, तन्मितम् । इदमेतावदिति मानेन व्यवच्छिन्नशरीरं भवति । यस्माद् दशममहरनुष्टुबेव भवति । सर्वेषां छन्दसामनुष्टुप्त्वसंपादनस्य वक्ष्यमाणत्वेन दशमस्याह्न आनुष्टुभत्वात् । अतस्तच्छब्दस्य सर्वस्यानुष्टुम्मात्रत्वसंपादनावश्यंभावात् परिमितत्वं सिद्धम् । तत्रैवं सति स यः कश्चिदत्र दशमेऽह्नि विवचनं कुर्यात्, स मितं तद् दशममहरतिरिक्तममितं कुर्यात् । ततश्च 'यज्ञस्य श्रेषमनु यजमानो श्रेषं न्येति'[b] इति न्यायेन विवक्तारं श्रेषः समस्तपुरुषार्थप्रत्युक्तिलक्षणः अन्वेतोरनुगन्तुमीश्वरः समर्थो भवति । असंशयं श्रेषं प्राप्नोत्येवायं विवक्तेत्यर्थः ।

1.९-१७ एतस्मिन्नेव विषये पक्षान्तरमुपक्षिपति—**तदु-शंसेत्** । तत् तत्र विवचनाकरणे प्राप्ते सति अभिज्ञा आहुः—विवचनविषये प्रतिभाराहित्यादिना[1] प्राप्ते विवचनं कुर्यादेव । कस्मादेवम्[2]? यदि कश्चिद् विद्वान् यज्ञस्वरूपतद्भ्रेषप्रतिसमाधानाद्यभिज्ञः कदाचिद् यज्ञदिदृक्षातोऽन्यतो वा कुतश्चिद्धेतोर्यज्ञमागच्छेत्, तदा तेनागच्छता आगमनं कुर्वता सता विदुषा हेतुना स स्वयं यज्ञः पुरुषविधयावस्थितो नन्दति । महान्तमानन्दं प्राप्नोति । केन प्रकारेणेति चेत्, मत्संबन्धि यत् किंचिदङ्गकर्म कर्तृप्रमादादिभिरसमृद्धं विकलं भविष्यति कदाचित्, तदयमागतो विद्वान् तत्प्रतिसमाधानोपदेशात् समृद्धं पूर्णं करिष्यति । यथा धातुवैषम्यजनितं व्याधिं भैषज्यकरणेन भिषगिति । एवं यज्ञस्य आनन्दहेतुर्विद्वदागमनम् । विदुषो यज्ञभिषक्त्वात् । तस्मात् भ्रेषे सति तत्प्रतिसमाधानस्यावश्यं कर्तव्यत्वे स्थिते यः कश्चित् शंसकस्तद्दशमाहश्शस्त्रमधीयात् पठेत्; स यदि प्रमत्तोऽनवहितमतिः सन्नुपहतिमप्रतिभामन्यथाप्रतिपत्तिं वा सन्देहं वा प्राप्नुयात्; तमुपहतं शंसकं यः कश्चिदन्योऽनुपयुक्तो विद्वान् तस्मिन् विषये ब्रूयात्, स न सहसा झटित्येव तदुपदेशरूपेण वक्तव्यं ब्रूयात् । किंतु यत्र स्थितः शंसकः शस्त्रं पठति तस्य देशस्य समीपदेशं गत्वा स्वाध्यायाध्ययनधर्मेण तद् वक्तव्यं पठेत् ।

a. TS. 7. 3. 1. 2.  b. AB. 5. 33. 3.

1. T. °राहित्यादितः  2. T. omits एवम्

यदि बाह्यो यज्ञदिदृक्षुर्विद्वान् विवक्ता न विद्येत, तदा गृहपतिः सत्रेषु याजमानकर्ता ऋत्विजाम् आध्वर्यवाद्यृत्विक्कर्मकर्तॄणामन्यतमो वा कश्चिद् विवचनकोविदः स्वकर्मत उपरम्य अनुपर्युक्तविद्वदन्तरवदेव शस्त्रदेशानति-विप्रकर्षशालिनि देशे स्थित्वा स्वाध्यायाध्ययनं कुर्यात्। तथा सत्येवमेवैतत् पठितव्यमिति समुपजातनिश्चयः शंसकः सम्यगेव शस्त्रं पठिष्यति ।।

इति प्रथमः खण्डः

**यदि–विब्रूयात्**। यदि पुनरेवं कृतेऽप्यल्पबुद्धितया शंसको न जानीयात्। 2.१-२
तर्हि **पार्श्ववर्तिनो** जना यथा न शृणुयुस्तथा तं शंसकं प्रत्येव विवचनं
कुर्यात्। सर्वथापिविवचनं कार्यमेव। तथा अन्यत्र श्रुतम्—'ते ये बाह्या
दृशीकवः स्युस्ते वि ब्रूयुः । **यदि** तत्र न विन्देयुरन्तः सदसाद् व्युच्यम् ।
यदि तत्र न विन्देयुः गृहपतिना व्युच्यम् । तद् व्युच्यमेव'[a] इति ।
अथास्मिन् दशमेऽहन्यनुष्टुप्छन्दस्कानां ऋचामपठनीयतामाह—**उत्सृज्यते–
आसीदामेति**। अस्मिन् दशमेऽहनि गायत्र्यादिच्छन्दसां मध्ये अनुष्टुप्- 2.३–७
छन्द उत्सृज्यते परित्यज्यत एव । न पठनीया अनुष्टुप्छन्दस्का ऋचः।
कुतः ? यस्मादनुष्टुप्छन्दो वागेव भवति। तदसकृत् प्रागुक्तम्। सानुष्टु-
ब्रूपैषा वाक् बहुरूपाभिवदनरूपा वाग्व्रतस्य दोहुषी वाङ्नियमप्रधानलक्षण-
व्रतसारहरणशीला। अत एव क्रूरवहा अनर्थप्राप्तिकरी च भवति। यस्मादेवं
तस्माद्धेतोः वयमुक्तप्रकारवत्तया दुरासदां वाचं प्राप्ता भवेमेति परिभयं द्योत-
यद्भिः शंसकैर्वागात्मिकानुष्टुप् परित्यज्यते। एवमनुष्टुभ उद्धारं प्रदर्श्यान्येषां
गायत्र्यादिछन्दसां दशमाहःशस्यानामनुष्टुप्संपादनं दर्शयति—**अथ–परिगीता**। 2.७–१२
इतराण्यनुष्टुभो व्यतिरिक्तानि गायत्र्यादीनि अक्षरगणनोपायेनानुष्टुभं छन्दः
संपादयेत। तत्प्रकारमुपरिष्टात् प्रदर्शयिष्यामः।

अथोद्धृतानामनुष्टुभां स्थाने विराट्छन्दस्कानामृचामावापं विधत्ते— 2.१३-१७
**तद्–इति**। नानुष्टुभ आयतनं रिञ्च्यादित्यन्यः पाठः। अनुष्टुभ उद्धारे

a. TS. 7. 3. 1. 1–2.

क्रियमाणे यत्रानुष्टुभः प्राक् स्थितिः तत् स्थानं रिक्तं शून्यं स्यात्। नत्वेवं कर्तव्यम् । अनायतनत्वापत्तिदोषात् । तेन तस्मिन् स्थाने विराट्छन्दस्का ऋचः पठेत् । ताश्च 'अग्निं नरो दीधितिभिः'[a] इति तिस्रः । 'आ शुभ्रा यातम्'[b] इति चतस्रः । यद्यप्युषस्ये अनुष्टुप्स्थाने 'प्रति ष्या सूनरी'[c] इति तिस्र ऋचो गायत्र्य एव, तथापि छत्रिन्यायेन विराजस्तत्रेति वचनमवकल्पते । स एषोऽनुष्टुभां स्थाने विराजः पाठ उपपन्न एव । यस्माद् विराडनुष्टुप् चेति ये द्वे छन्दसी स्तः तत् समानमेव एकमेव छन्दो भवति। न पुनरनुष्टुबन्या अन्या विराडिति स्वरूपभेदोऽस्ति ।

ननु विराजः त्रयस्त्रिंशदक्षरायाः द्वात्रिंशदक्षराया अनुष्टुभश्च न समानवत्त्वमक्षरवैषम्यात् । तत्कृतत्वाच्च छन्दोऽन्यत्वस्य । अन्यथा गायत्र्यादिच्छन्दोनानात्वमपि न समाश्रियेतेत्याशङ्क्योक्तम् न ह्येकेनाक्षरेण न्यूनेनाधिकेन वा द्वाभ्यां वाक्षराभ्यामूनाभ्यामधिकाभ्यां वा छन्दोऽन्यद् भवति । किं तु तदेव भवति । त्र्याद्यक्षरोनाधिकभावादेवान्यत्वं गायत्र्यादावभ्युपेतमिति व्यवस्थानाद् विराडनुष्टुभोः समानत्वमेव । इतिशब्द आहुरित्यनेन घटनीयः ।।

इति द्वितीयः खण्डः*

मरुत्वतीयशस्त्रे चोदकप्रापितापवादेनान्यां प्रतिपदं विधत्ते—**त्रिक-**
3.११-१४ **द्रुकेषु–सम्पन्नम्** । इह मरुत्वतीयं शस्त्रं त्रिकद्रुकेष्वित्यनया अतिच्छन्दश्छन्दस्कया ऋचा प्रारभेत, न प्रकृतितः प्राप्तया । सेयमृक् संपन्ना अनुष्टुब्रूपेण संपन्ना भवति । यतः चतुष्षष्टिसंख्यैरक्षरैरुपेता सा भवति । तथा सति तया चतुष्षष्ट्यक्षरया द्विसंख्ये ते अनुष्टुभौ संपन्ने भवतः । एवं सति तत् त्रिकद्रुकीयया प्रतिपदनमनुष्टुप्संपन्नं भवति । अतोऽभिरूपम् । सूत्रितं च—'**त्रिकद्रुकीया प्रतिपत्** । तस्याः षोळशाक्षरेण विगृह्य षोळशाक्षरेण **प्रणुत्य** षोळशा-

* Commentary on 2. १८–२० and 3. १–१० is missing.

a. RV. 7. 1. 1.  b. RV. 7. 68. 1.

c. RV. 4. 52. 1.

क्षरेणावसाय षोळशाक्षरेण प्रणौति । तुविशुष्मेत्युत्तरे'[a] इति । अपरं विशेषं
विधत्ते—**पिन्वन्त्यपीयया-संपन्नम्** । 'पिन्वन्त्यपो मरुतः'[b] इत्येषा पिन्वन्त्य- ३.१५,१६
पीया । तया 'जनिष्ठा उग्रः'[c] इति सूक्तात् प्राक् पठनीयया द्वौ प्रगाथौ संशं-
सति । समित्येकीभावे । एकीभावश्चात्राहावेन मध्ये विच्छेदविरहः । ततश्च
पिन्वत्यपीयायामाहावं कृत्वा प्रगाथद्वयमनाहावपूर्वकं पठित्वा आहावं कृत्वा
सूक्तं पठेत् । सूत्रितं च—'बृहदिन्द्रायेति सूक्तात् पूर्वौ प्रगाथौ पिन्वन्त्वपीयया
संशंसतीति मरुत्वतीयम्'[d] इति । तत्संशंसनं संपन्नम् । अथानुक्तं शस्त्रभागं
प्राकृतमेवाभ्यनुजानीते—**ऐकाह्रिकं-एव** । सुगमम् ॥ ३.१७,१८

इति तृतीयः खण्डः

अथ निष्केवल्ये शस्त्रे वामदेव्यस्तोत्रियानुरूपशंसनविधिमुन्नेतुं सामगा-
भिमतं पृष्ठसामक्लृप्तिविशेषं स्तौति—**कया-रूपम्** । वामदेवाख्यस्य साम- ४.१,२
विशेषस्य योनिभूतयोः 'कया नश्चित्रः'[e] 'कया त्वं न ऊत्या'[f] इत्यनयोः तृचयो
रथन्तराख्यं साम सामगैरूढं प्रापितं भवति । इह रथन्तरं साम पृष्ठकार्ये
सामगाः कुर्वन्ति । तत्तु न स्वयोनौ, किंतु वामदेव्यसाम्नो योनावित्यर्थः ।
तच्च रथन्तरं सामाग्नेयमग्निदेवत्यम् । 'अग्निर्वै रथन्तरम्'[g] इति श्रुत्यन्तरात् ।
तदाग्नेयं सद्रथन्तरमिह 'कया न'[e] इत्याद्यास्विन्द्रदेवत्यासूळ्हं भवति । तदेत-
दृक्सामरूपं मिथुनं स्त्रीपुंसयुगलं भवति । अतः प्रजात्यै प्रजोत्पत्ते रूपं कारणं
भवति । मिथुनाद्धि प्रजोत्पत्तिः प्रसिद्धा । अनेन वामदेव्यस्तोत्रियानुरूपयोर-
नयोस्तृचयोः शंसनविषयो विधिरुन्नेयः । तथा च सूत्रम्—'वामदेव्यस्य स्तो-
त्रियानुरूपौ शस्त्वा'[h] इति । अनुरूपादनन्तरं प्राकृत्येव 'यद्वावान'[i] इति

a. ŚŚ. 10. 13. 7–9.
b. RV. 1. 64. 6.
c. RV. 10. 73. 1.
d. ŚŚ. 10. 13. 10.
e. RV. 4. 31. 1.
f. RV. 8. 93. 19.
g. AB. 5. 30. 4.
h. ŚŚ. 10. 13. 11.
i. RV. 10. 74. 6.

धाय्या पठनीया। तदनन्तरं 'पिबा सुतस्य'[a] इति साम्नो रथन्तरस्य प्रगाथं स्तोत्रियानुरूपौ च प्रगाथसम्बन्धिनौ, 'सखाय आ शिषामहि'[b] इत्याद्या नवोष्णिहः, 'आ धूर्ष्वस्मै'[c] 'वज्रमेको बिभर्ति'[d] इति द्वे द्विपदे प्राकृते, 'इन्द्रस्य नु वीर्याणि'[e] इति सूक्तं च क्रमेण पठेत्। एतासु प्रकृतितः प्राप्तादतिरिक्तानां विधि
4.3-6 सिद्धिवत्कृत्य अनुष्टुप्संपत्तिं प्रदर्शयति—**यावन्तः-संपन्नम्**। इह प्रगाथा स्त्रयः। सामप्रगाथः स्तोत्रियोऽनुरूपश्चेति। ते च यावन्तः सन्ति तावन्ति 'सखाय आ शिषामहि'[b] इत्यादीन्युष्णिक्तृचानि सन्ति। आसामत्र नवर्चां साम्येन त्रिधा राशीकरणात् त्रीणि तृचानि भवन्ति। ये पुनः 'आ धूर्ष्वस्मै'[c] 'वज्रमेकः'[d] इति द्विपदे स्तः, तयोरन्या एका द्विपदा धाय्यां 'यद्वावान'[f] इत्येतां भजते प्राप्नोति। अन्या द्विपदा सूक्तस्य हैरण्यस्तूपस्य सप्तदशीमृचं भजते। यद्यप्येतत् सूक्तं पञ्चदशर्चमेव 'इन्द्रस्य पञ्चोना'[g] इति चानुक्रमणिका, तथाप्यन्त्यायास्त्रिवारं पठनादावृत्त्यपेक्षया तस्याः त्रित्वसंपत्तेः सप्तदशर्चत्वमभिप्रेत्य सूक्तस्य सप्तदशीमित्युक्तम्। तदेतद्धाय्यादिशस्त्रशेषमनुष्टुप्संपन्नं भवति। तद् यथा—इह हि प्रगाथास्त्रयः। ते च बृहतीसतोबृहतीमेलनात्मकत्वात् प्रत्येकं षट्सप्तत्यक्षराः सन्तो मिलित्वा अष्टाविंशत्युत्तरद्विशताक्षराः। तैश्च सप्तस्वनुष्टुप्सु संपन्नासु चत्वार्यक्षराणि शिष्यन्ते। ये तु त्रय औष्णिहास्तृचास्ते मिलिता द्विपञ्चाशच्छतद्वयसंख्याक्षरा भवन्ति। तैश्चतुरक्षरोना अष्टावनुष्टुभो निष्पन्ना भवन्ति। प्रगाथेषु शिष्टेनाक्षरचतुष्टयेनाष्टम्या अनुष्टुभः पूर्तौ सत्यां मिलित्वा त्रिभिः प्रगाथैः औष्णिहैस्तृचैश्च पञ्चदशानुष्टुभः संपद्यन्ते। 'यद्वावान'[f] इत्येषा धाय्या चतुश्चत्वारिंशदक्षरा। तस्याः विंशत्यक्षराया द्विपदायाश्च मेलने द्वे अनुष्टुभौ। तथा 'इन्द्रस्य नु'[e] इत्येतत् संशस्तं सत् सप्तदशर्चं त्रैष्टुभम्। तत्र षोडशभिः द्वाविंशतिसंख्यानुष्टुबुत्पत्तौ सप्तदश्येका त्रिष्टुबतिरिच्यते। तथा विंशत्यक्षराया द्विपदाया मेलने द्वे अनुष्टुभौ संभूय चतुर्विंशतिरनुष्टुभः संपन्नाः। इत्येवं सर्वत्रानुष्टुप्संपत्तिर्द्रष्टव्या।

a. RV. 8. 3. 1.
b. RV. 8. 24. 1.
c. RV. 7. 34. 4.
d. RV. 8. 29. 4.
e. RV. 1. 32.
f. RV. 10. 74. 6.
g. SA. I. 32.

चेदितविशेषव्यतिरिक्तस्य कृत्स्नस्य प्रकृतितः प्राप्तिमाह—**एकाहिकं-एव**। एकाहस्य प्रतिष्ठारूपत्वं प्रकृतित्वात्। दशमस्याह्नः समाप्तिरूपत्वात्। 4.७-९
तथा इह ये द्विपदे पठ्येते ते प्रतिष्ठारूपहेतुभूतं छन्दो भवति; पादद्वयोपेतत्वात्। तस्य च प्रतिष्ठाहेतुतया प्रसिद्धत्वात्। तस्मादैकाहिकशस्त्रपठनं द्विपदाशंसनं च प्रतिष्ठाफलाय[1] संपद्यते। वैश्वदेवशस्त्रे प्रतिपदृचं विधत्ते—**अभि-संपन्नम्**। गतमेतत्। 4.१०-१३

अनुचरं विधत्ते—**अभिवान्-ब्राह्मणम्**। सूत्रितं हि—'षष्ठात् प्रतिपदनु- 4.१४
चरौ वैश्वदेवस्य'[a] इति। शस्त्रशेषं मारुतशस्त्रं च प्रकृतितः प्रापयति—**अथ-एव**। तृतीयसवनशब्देन शस्त्रद्वयं लक्ष्यते। गतमन्यत्। तत्र वैश्वदेवे कंचिद् 4.१५,१६
विशेषमाह—**तत्र-एव**। तत्र वैश्वदेवशस्त्रे दशमस्याह्न एकाहरूपत्वं दशमा- 4.१७-१९
हरात्मकत्वं च भवति। तदुभयमपि प्रतिष्ठारूपम्। द्विपदानां 'प्र शुक्रैतु'[b] इत्यादीनां च प्रतिष्ठाहेतुत्वमस्ति। तस्मादेकाहात्मके दशमेऽहनि द्विपदानां शंसनं प्रतिष्ठाफलाय भवति ॥

इति चतुर्थः खण्डः

अथाग्निमारुतशस्त्रे प्राकृतापवादेन स्तोत्रियानुरूपौ विधत्ते—**विराट्सु-भवति**। इह वामदेवर्षिदृष्टास्वृक्षु उत्पन्नं सामाग्निष्टोमसाम 'अग्निं नरो 5.१
दीधितिभिः'[c] इत्यादि विराट्छन्दस्कास्वृक्षु सामगानां भवति। तस्माद् यज्ञायज्ञीययोनिस्थाने 'अग्निं नरः'[c] इति स्तोत्रियानुरूपौ पठेत्। उक्तं हि प्राक्—'अग्निं नर इत्यग्निष्टोमसाम्न स्तोत्रियानुरूपयोः षट्'[d] इति। **श्रीः-उपाप्त्यै**। गतम्। ऋक्प्रशंसां विधाय साम्नः प्रशंसां करोति—**अथो-** 5.२,३
**क्रियते**। शान्तिहेतुत्वात् शान्तिः। तत्त्वं च सुखप्राप्तिहेतुत्वमेव। भेषजत्वं 5.४,५
दुःखनिवृत्तिहेतुत्वम्। दशमस्याह्न आग्निमारुतान्तत्वादन्तत इत्युक्तम्।

a. ŚŚ. 10. 13. 17.
b. RV. 7. 34. 1.
c. RV. 7. 1. 1.
d. Cf. KB. XXVII. 2. १९.

1. T. प्रतिष्ठितिफलाय

अत्र समूळ्हदशरात्रानुष्ठाने अतिरिक्तोक्थाख्यं शस्त्रं पठनीयम्। 'आयं गौः पृश्निरक्रमीद्'[a] इति स्तोत्रियः। 'मही द्यौः पृथिवी च नः'[b] इत्यनुरूपः। 'तं प्रत्नथा'[c] इति त्रयोदश। 'यज्ञो बभूव'[d] इति परिधानीया। 'प्रजापते न त्वद्'[e] इति मनसा यजति। आहावाश्चत्वार इति। तदेतत् स्तौति—**अथ-**
5.६,७ **आप्नुवन्ति**। समूळ्हस्य दशरात्रस्य यदतिरिक्तोक्थमुपयन्तीति यदस्ति; तेन यदन्त्यातिरिक्तोक्थमस्ति तत् सर्वं यजमानाः प्राप्ता भवन्ति।

एवं तावत् क्रमेणाग्निमारुतान्तानि शस्त्राणि विधाय तद्गतानामृचामनुष्टुप्संपादनपूर्वकं सकलशस्त्रात्मके दशमेऽहनि विभागेन केनापि रूपेण गोरूपतदूधस्तनकल्पनया त्र्यत्याहःपयोदोहनोपासनां विधातुकामः प्रति-
5.८ जानीते—**अथ-दोहः**। अथेति प्रकृतादर्थाच्छस्त्ररूपादुपासने अर्थान्तरे वक्तव्ये प्रयुज्यते। एष वक्ष्यमाणप्रकारः कश्चिद् दशमस्याह्नः कल्पितगोरूपोधःस्तनस्य दोहः दोहनोपासनाविधिः भवतीति शेषः। तत्रादौ तावदत्र शस्यानामृचा-
5.९,१० मनुष्टुप्संपत्तिं विधत्ते—**यथा-संपादयेत्**। एतद् दशममहः। एतस्मिन् दशमेऽहनि[1]। पठनीयं शस्यम्। तत् तेन प्रकारेण संपादयेत्। कथमिति चेत्, यदा यस्मिन् काले अक्षरगणनायां क्रियमाणायां सत्यां सहस्रसंख्यास्तदुपरि पञ्चदशसंख्याकाश्चानुष्टुभः संपन्ना भवेयुः तेन प्रकारेण संपादयेत्। 'यथा सहस्रं च पञ्चदश चानुष्टुभः स्युः तथैतदहस्संपादयेद्' इत्यन्यः पाठः। तत्र व्यक्तोऽर्थः। तथाहि सूत्रम्—'उद्धृत्यानुष्टुभमितरेषां छन्दसां संपदानुष्टुभां पञ्चदशं सहस्रमेतस्मिन् सवनीये'[f] इति। तत्र प्रातरनुवाके पञ्चदशाधिकं शतद्वयमनुष्टुभां भवति। तत ऊर्ध्वमष्टौ शतानि। संभूय पञ्चदशाधिकं सहस्रं भवति। तत्र प्रातरनुवाके द्वात्रिंशतं गायत्र्यः। 'उपप्रयन्तो'[g] नव। 'स हि यो मानुषा'[h] इति चतस्रः। 'कस्त उष'[i]

a. RV. 10. 189. 1.
b. RV. 1. 22. 13.
c. RV. 5. 44. 1.
d. ŚS. 4. 12. 10.
e. RV. 10. 121. 10.
f. ŚS. 10. 12. 6.
g. RV. 1. 74. 1.
h. RV. 6. 16. 23.
i. RV. 1. 30. 20.

1. B. T. omit दशमे

इति तिस्रः । 'यावयद्द्वेषसम्'[a] इति चतस्रः । 'अश्विना यज्वरीः'[b] इति तिस्रः । 'आ मे हवम्'[c] इति नव । क्रतुषु प्रत्येकम् 'अग्निं नरः'[d] 'प्रति ष्या सूनरी'[e] 'आ शुभ्रा यातम्'[f] इति क्रमात्तृचान्यनुष्टुभां स्थाने कर्तव्यानि । 'आपो रेवतीः'[g] इति त्रिरुक्तया तिस्रः । 'ससस्य यद्'[h] इति पञ्च । 'अगन्म मह्'[i] इति तिस्रः । 'उपो रुरुचे'[j] षट् । 'प्रति स्तोमेभिः'[k] तृचम् । 'आ भात्यग्निः'[l] द्वे । 'उप त्या वह्नी गमतः'[m] इति द्वे । इति चतुर्विंशतिस्त्रिष्टुभः । 'वेदिषदे'[n] सप्त । 'जनस्य गोपा'[o] षट् । 'एता उ त्याः'[p] चतस्रः । 'त्रिश्चित्'[q] तिस्रः । 'क्वस्विदद्य'[r] चतस्रः । [1]-इति चतुर्विंशतिर्जगत्यः-[1] । 'एना वो अग्नि'[s] त्रयः । 'अयमग्निः'[t] त्रयः । 'प्रत्यु अदर्शि'[u] त्रयः । 'उषो यदद्य'[v] एकः । 'इमा उ वां'[w] त्रयः । 'अयं वां मधुमत्तमः'[x] द्वौ । इति पञ्चदश प्रगाथाः ।

'त्वामग्ने मनीषिणः'[y] तिस्रः । 'अग्ने यजिष्ठः'[z] तिस्रः । 'ईळिष्वा हि'[aa] त्रिंशत् । 'पुरु त्वा'[bb] तिस्रः । 'उषस्तच्चित्रमा भर'[cc] तिस्रः । 'युवोरु षू'[dd] तिस्रः इति पञ्चदशौष्णिहानि तृचानि । एकत्रिंशत् पङ्क्तयः सह त्रिर्वचनेन । एतासामृचामनुष्टुप्संपत्तौ सत्यां संख्योच्यते । द्वात्रिंशद् गायत्र्यो विराजो 'अग्निं नर'[d] इत्याद्याः षट् च मिलिताः सत्यः त्रिंशदनुष्टुभः संपद्यन्ते ।

a. RV. 4. 52. 4.
b. RV. 1. 3. 1.
c. RV. 8. 85. 1.
d. RV. 7. 1. 1.
e. RV. 4. 52. 1.
f. RV. 7. 68. 1.
g. RV. 10. 30. 12.
h. RV. 4. 7. 7.
i. RV. 7. 12. 1.
j. RV. 7. 77. 1.
k. RV. 7. 80. 1.
l. RV. 5. 76. 1.
m. RV. 7. 73. 4.
n. RV. 1. 140. 1.
o. RV. 5. 11. 1.
p. RV. 1. 92. 1.
q. RV. 7. 11. 3.
r. RV. 1. 168. 6.
s. RV. 7. 16. 1.
t. RV. 3. 16. 1.
u. RV. 7. 81. 1.
v. RV. 1. 48. 15.
w. RV. 7. 74. 1.
x. RV. 1. 47. 1.
y. RV. 3. 10. 1.
z. RV. 3. 10. 7.
aa. RV. 8. 23. 1.
bb. RV. 1. 150. 1.
cc. RV. 1. 192. 13.
dd. RV. 8. 26. 1.

1–1. T. omits

चतुर्विंशतिस्त्रिष्टुभो जगत्यश्च मिलिता एकोनसप्ततिसंख्या अनुष्टुभः । प्रगाथेभ्यः पृथक्कृताः पञ्चदश बृहत्यः चतुरक्षरोनाः सप्तदशानुष्टुभः । पञ्चचत्वारिंशदुष्णिहो द्वादशाक्षराधिकैकोनचत्वारिंशदनुष्टुभो भवन्ति । पञ्चदश सतोबृहत्यः चतुरक्षरोनाः सप्तदशानुष्टुभः । एकत्रिंशत्पङ्क्तयः 'प्रति ष्या'[a] इति तिस्रः उष्णिगक्षरद्वादशकं च मिलित्वा चतुरक्षराधिकाः षष्टिरनुष्टुभो भवन्ति । यदत्राधिकमक्षरचतुष्टयमस्ति, तत् बृहतीषु प्रक्षिपेत् । तथा सति तत्पूर्तिः सिध्येत् ।

इति स्थितं प्रातरनूक्तकर्मण्यनुष्टुभां पञ्चदशोपपन्नम् ।
शतद्वयं पञ्चदशातिरेकि सहस्रमध्ये कथितक्रमेण ॥

अत ऊर्ध्वमष्टाशतान्यनुष्टुभां गण्यन्ते ।

गायत्र्यः पञ्चाशदधिकं शतद्वयम् । तिस्रोऽपोनप्त्रीये । एकचत्वारिंशत् पशुकर्मणि । वपान्ते द्वे । हविष्पङ्क्त्या अष्टौ द्विदेवत्ये । त्रयोदश उन्नीयमानसूक्ते । षट् प्रस्थितयाज्याः । 'प्रति श्रुताय'[b] इति पञ्च । 'प्रातर्यावभिः'[c] इत्येका । द्वादशर्तुयाज्याः । त्रयोविंशतिः प्रउगे । षड्विंशतिर्होत्रकाणामाज्येषु । त्रयस्त्रिंशः अभिषवे । एका दधिघर्मे । पञ्च मरुत्वतीये । अष्टौ निष्केवल्ये । षड् वैश्वदेवे । तिस्रः आग्निमारुते । द्वे पत्नीसंयाजेषु । इति एताभिः पञ्चाशदधिकशतद्वयसंख्याभिः सप्ताशीत्यधिकशतमनुष्टुभः । शिष्टानि षोळशाक्षराणि भवन्ति ।

अथोष्णिहः । तिस्रोऽभिषवे । चतस्रो मरुत्वतीये । नव निष्केवल्ये । संभूय षोडश । एताभिश्चतुर्दशानुष्टुभः । पूर्वाभिः सहैकाधिकं शतद्वयम् । षोडशाक्षराणि शिष्यन्ते ।

अथ बृहत्यः । नव बहिःकर्मणि अच्छावाकस्य । चतस्रो मरुत्वतीये । तिस्रो निष्केवल्ये । नव नव शस्त्रेषु होत्रकाणाम् । संभूय त्रिचत्वारिंशत् । एताभिरेकोनपञ्चाशदनुष्टुभः द्वादश चाक्षराणि । पूर्वाभिश्चतुरक्षरहीनैकपञ्चाशच्छतद्वयम् । स्तोकीयास्तिस्रः । एका अच्छावाकस्य बहिःकर्मणि । एका अभिषवे । द्वे मरुत्वतीये । तिस्रो निष्केवल्ये । एकैका होत्रकाणां शस्त्रेषु । तिस्रः आग्निमारुते ।

a. RV. 4. 52. 1.
b. RV. 8. 32. 4.
c. RV. 8. 38. 7.

मिलित्वा षोडश पङ्क्तयः । एताभिर्विंशतिरनुष्टुभः । पूर्वाभिश्चतुरक्षरोनैक-सप्ततिशतद्वयम् । आपोनप्त्रीये विंशतिः । पशुकर्मणि वपान्ते त्रयोविंशतिः । सप्ताभिषवे । द्वे दधिघर्मे । चतस्रः पशुपुरोळाशे । अष्टादश निष्केवल्ये । विंशतिर्मैत्रावरुणशस्त्रे । एकविंशतिर्ब्राह्मणाच्छंसिनः । एकोनविंशतिरच्छावाकस्य । द्वे आदित्यग्रहे । सप्तदश मनोतासूक्तम् । षट् पशुयागे । त्रयोदश उन्नीयमानसूक्तम् । 'इन्द्राविष्णू पिबतं मध्व'[a] इति प्रस्थितयाज्या । सावित्रग्रहपुरोनुवाक्या सावित्रसूक्तस्योत्तमे ।

भवत्वेवंसंपादनेन पञ्चदशाधिकं सहस्रमनुष्टुभाम् , किमत इत्यत्राह—
**पञ्चदश-उद्धृताः** । पञ्चदशाधिके सहस्रे याः पञ्चदश सहस्रादधिकाः सन्ति, ताः 5.११-१४
सहस्रात् पृथक्कारेणोपादाय शिष्टानि सहस्रावयवभूतानि दशसंख्यानि यानि शतानि सन्ति, तेष्वेकैकस्य शतस्यावयवभूताः चतुःसंख्याका ऋचः प्रत्येकं षण्णवतेः पृथक् कुर्यात् । ताः सहस्रात् पृथक्कृता ऋचो मिलित्वा चत्वारिंशद् भवन्ति । ताः सहस्राधिकाभिः पञ्चदशभिर्मिलिताःसत्यः पञ्चपञ्चाशत्संख्या भवन्ति । केचित् पूर्वाः पञ्चदश इति वाक्यं न पठन्ति । शिष्टाभिस्त्रिंशदनुष्टुभः संपादयन्ति ।

**अथ-वर्गाः** । केचिद् दशभ्यः शतेभ्यः प्रत्येकं चतसृषूद्धृतासु शिष्टा दश 5.१५
षण्णवतयः संपद्यन्ते । तासु च प्रत्येकं साम्येन त्रेधा विभज्यमानासु द्वात्रिंशत्संख्यावच्छिन्नानामनुष्टुभां त्रयो वर्गा भवन्ति । वर्गावयवभूतासु द्वात्रिंशत्संख्यास्वनुष्टुप्सु संख्यासाम्यादक्षरत्वं संपाद्य एकैकस्य वर्गस्य एकैकानुष्टुप्त्वसंपादने सत्येकस्य षण्णवतौ तिस्रोऽनुष्टुभ उत्तिष्ठन्ति । एवमितरासु नवस्वपि प्रत्येकमनुष्टुप्त्रयसंपादने सति संभूय त्रिंशदनुष्टुभो वर्गोद्भवाः संपन्ना भवन्ति ।

अथैकत्रिंशीमपरामनुष्टुभं संपादयति—**अथ-पद्यानुष्टुप्** । पदानि 5.१६
गायत्र्यादिच्छन्दःपादाः । तदुद्भवा काचिद् वक्ष्यमाणानुष्टुब् भवति । कथमित्यत्राह—**गायत्र्यै-द्वात्रिंशत्** । इतिशब्द एषा पद्यानुष्टुबिति पूर्वेण संबध्यते । 5.१७-२२
अत्र चतुर्थ्यः सर्वाः षष्ठ्यर्थे द्रष्टव्याः । गायत्र्युष्णिग्विराजां त्रिपदत्वात् तैर्नव पदानि । अनुष्टुभस्त्विह संपादनीयत्वादनुक्तिः । चतुर्णां नवानां च मेलने त्रयो-

a. RV. 6. 69. 7.

दश भवन्तीति प्रसिद्धम्। एवं संख्याद्वयमेलने संख्यातिरेकप्रकारो गणकप्रसिद्ध्यनुसारेण स्वयमूह्यः। पङ्क्तिः पञ्चपदेति प्रसिद्धेः पङ्क्तेः पञ्चेत्युक्तम्। जगत्या अतिच्छन्दसश्च चत्वार्यक्षराणीति तन्मेलनेऽष्टौ पदानि भवन्ति। एवं द्वात्रिंशत्सु पदेषु संख्यासामान्यादनुष्टुबवयवाक्षरत्वसंपादनेनानुष्टुप्त्वं संपाद-
5.२३ यति—**इति-भवति**॥

इति पञ्चमः खण्डः

6.१,२ अथापरामनुष्टुभं संपादयति—**अथ-भवति**। देवत्या देवताभवा। इति-शब्दोऽत्रापि पूर्वेणान्वेति। इत्थं पञ्चपञ्चाशदतिरिक्ताभिस्त्रिंशदनुष्टुभः। छन्दःपादैः देवताभिश्चैकैका। संभूय द्वात्रिंशदनुष्टुभः संपन्नाः। तामेतामनुष्टुभं गोरूपामभिप्रेत्य पञ्चपञ्चाशदनुष्टुभां पङ्क्तिच्छन्दस्त्व-
6.३-६ संपादनापूर्वकं तदूधःस्तनरूपतामाह—**अथ-स्तनाः**। पञ्चसंख्यान्वितपञ्चाशत्संख्या अनुष्टुभोऽक्षरगणनायां चतुश्चत्वारिंशत् पङ्क्तयः संपद्यन्ते। तासु संपन्नासु पङ्क्तिषु याश्चत्वारिंशत् पङ्क्तयः सन्ति तदनुष्टुभो गोरूपाया ऊध इति ज्ञेयाः। अथ पुनर्याश्चतुःसंख्याकाः पङ्क्तयोऽतियन्ति चत्वारिंशत उपरि वर्तन्ते ते स्तना इति मन्तव्याः। ऊधःस्तनरूपत्वमुपर्यधोवृत्त्याधाराधेयभावावस्थितिसाम्यात्। न च किमर्थमनुष्टुभां पुनःपङ्क्तिरूपत्वसंपादनमिति शङ्क्यम्। पङ्क्तेरन्नरूपसंस्कृताया अन्नाद्यभिक्षरणसाधनोधःस्तनरूपत्वसंपादनौचित्याभिप्रायात्।

अथैवंविधोधःस्तनायाः शस्त्ररूपाया धेनोर्व्रत्याहःपयोदोग्धृत्वं कल्प-
6.७,८ यन्नाह—**सैषा-अभिक्षरति**। सा इत्थं प्रपञ्चेन संपादितस्वरूपैषा प्रकृता स्तोमाक्षरा सामवेदप्रसिद्धाः स्तोमा अक्षराणि यस्याः सैषा शस्त्ररूपानुष्टुबेतेन चत्वारिंशत्पङ्क्तिरूपेणोधसा पयआधारेण तथा एतैश्चतुःसंख्यपङ्क्तिरूपैः स्तनैः पयोनिर्गमप्रणालैः करणभूतैः एतं वक्ष्यमाणस्वरूपमिन्द्रस्यात्मानं स्वरूपं व्रत्यमहर्महाव्रतात्मकम्; वक्ष्यति हि—'अथो इन्द्रस्यैष आत्मा यन्महाव्रतम्'[a] इति; अभिमुखं क्षरति सिञ्चति। दशमाहरनन्तरभाविनि महाव्रताहनि गोरूप-

a. KA. 1. 1. 1.

दशमाहस्तन्यक्षरणोपासनं कुर्यादित्यर्थः । किंच न केवलमिन्द्रात्मभूतं व्रत्याह-रेवाभिक्षरति, अन्नाद्यादिभिः सर्वैःसहैवाभिक्षरति । अत्तुं योग्यं व्रीह्याद्यन्न-मन्नाद्यम् । रसः सारः स्वदनीयस्वरूपः । काम्यन्त इति कामाः पशुपुत्रवित्ता-दयः । एतदैहिकममृतत्वम् । आमुष्मिकमाभूतसंप्लवावस्थानलक्षणम् । तस्य बहुविधकर्मज्ञानसाध्यत्वाद् बहुत्वाभिप्रायेण सर्वेणेत्युक्तम् ।

अथैतदभिक्षरणं प्रशंसति—**एतस्या–वर्धन्ते** । छन्दोमा हि दशमादह्नः 6.९
समनन्तरावस्थिताहर्विशेषाः । ते खलु स्तोमवशात् शस्त्रवशाच्च प्रवृद्धा वर्तन्ते । क्रमेण चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशस्तोमत्वात् स्तोमतो वृद्धिः । शस्त्रतो महत्त्वं प्रागुक्तप्रकारेण तावत् प्रसिद्धमेव । सैषा वृद्धिरेतस्या अनुष्टुभो गोरभिक्षरणे सति यद्विक्षरणं **विविधं** स्तोकशः क्षरणं तत्कृतैवेति द्रष्टव्यम् । स्तोमशस्त्रवृद्धौ विक्षरणवृद्धिः कर्तव्येत्यर्थः । उक्तस्य दशमाहर्दोहो-
पासनस्य फलं दर्शयति—**यदु–इति** । अयमुपासकः पुरुषो यद्वस्तु वेद उपास्ते 6.१०-१४
तन्मय उपास्यवस्त्वात्मक एव भवति । 'यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति'[a] इत्यादिश्रुतेः ।

'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥'[b]

इत्यादिस्मृतेश्च । एवं सति लोके यः कश्चित् पुरुष एवंविद् भवति । उक्तप्रकारोपासनाकर्तृतैवंवित्ता । अस्यैवंविदः पुरुषधौरेयस्य आयुषः जीवित-कालादूर्ध्वमनुष्टुब्रूपा गौरुक्तेनोधसोक्तैः स्तनैश्च तमिन्द्रात्मभूतं महाव्रतीयमह-रात्मत्वेन अभिमुखं क्षरति । अपि च सर्वान्नाद्यरसकामामृतत्वविशिष्टतयैव व्रत्यमहरभिक्षरति; न तु केवलतया । उक्तप्रकारोपासनायुक्तः पुरुषो देहपातो-त्तरकालं महाव्रतकर्मफलभूतमिन्द्रस्य तादात्म्यमुपासनासामर्थ्यात् प्राप्नोती-त्यर्थः । न केवलमुपासितुरेवेदं फलम् , अनुष्ठातुरपीत्याह । यः पुरुष एवमुक्त-प्रकारेणानुष्टुप्संपन्नं दशममहः शंसेत् तस्यापि यथोक्तं फलं भवति । तस्मादेवे-त्युपसंहारः । इतिशब्दः 'अथैष दशमस्याह्नो दोहः' इति पूर्वेण संबध्यते ॥

इति षष्ठः खण्डः

a. ChU. 3. 14. 1.    b. BG. 8. 6.

7.१-४ अथ मानसस्तोत्रशस्त्रकर्म विधत्ते—**अथ-मात्रा**। अतिरिक्तोक्थमिति मानसस्तोत्रशस्त्रकर्म वक्ष्यमाणमुच्यते। तत् तेनातिरिक्तोक्थकर्मणा मनः सकलयज्ञनिर्वाहकं प्रीतं कुर्वन्ति। तन्मनः कर्म सर्वैर्यज्ञैः स्तोत्रशस्त्रात्मकैरनुशंसन्ति स्तुवन्ति। यस्मादेषा सर्वस्तोत्रशस्त्ररूपा मनसः संबन्धिनी मात्रा मीयत इति मात्रा विभूतिर्भवति। मनोऽन्तरेण कथमपि स्तोत्रशस्त्रनिष्पत्त्यनुपपत्तेः। तस्मादनेनानुशंसनेन मनसः प्रीतिर्भवतीति युक्तम्।

7.५-८ अथैतदितिकर्तव्यतां[1] विधत्ते—**संस्थिते-इति**। एतस्मिन् दशमेऽहनि हारियोजनपर्यन्ते समाप्ते सति पत्नीसंयाजनामकयागानुष्ठानात् प्राक् यः कालः एतस्मिन् काले संप्रसर्पणं कुर्वन्ति। कस्मात् पत्नीसंयाजेभ्यः पूर्वकाल एतत्प्रयुक्तिरिति चेत्, पत्न्यः पत्नीसंयाजा इति यदस्ति, अयज्ञियाः यज्ञाद् बहिर्भूता भवन्ति यतः। कस्मादयज्ञियत्वमिति चेत्, यस्मात् ताः पत्न्यः बहिर्वेदि वेदिप्रदेशादन्यस्मिन् प्रदेशे क्रियन्ते। तस्मादयज्ञरूपत्वात् ततः प्राचीन एव काले सर्पणादि कर्तव्यमित्येवं वदन्तः केचिच्छाखिनः सर्पणं कुर्वन्ति। न पुनरेवं कर्तुं युक्तम्। किंतु पत्नीसंयाजेषु संस्थितेष्वेवेत्येवं निश्चितं मतम्। अत्रास्मिन् पत्नीसंयाजसंस्थावच्छिन्ने काले यजमानस्य यो भ्रातृव्यलोकः शत्रुवर्गः स यद्यप्यनल्पः तथाप्यल्पकस्तुच्छ एव भवन् परिशिष्टो भवति। यजमानस्य शत्रुजनो विनश्यतीत्यर्थः। तेनात्र भ्रातृव्यविनाशहेतुत्वात् पत्नीसंयाजसंस्थावश्यमेष्टव्या।

7.९-१५ सर्पणानन्तरकरणीयं कर्म विधत्ते—**ते-राज्ञी**। ते प्रकृताः सामगाः सर्पणं कृत्वा सार्पराज्ञीनाम्न्या ऋषिस्त्रियः संबन्धिनीषु ऋक्षु 'आयं गौः'[a] इत्याद्यासु स्तुतिं कुर्वन्ति। तत्र येयं सार्पराज्ञी नाम सा इयं पृथिव्येव भवति। कस्मादिति चेत्, यस्मादियं पृथिवी सर्पतश्चतुर्विधस्य भूतग्रामस्य प्रकृतितया राज्ञी नियन्त्री भवति। अपि चानेनैव योगेन वाग् वाचकशब्दात्मिका सार्पराज्ञीशब्दवाच्या। यस्माद् वागेव सर्वतः स्थावरजङ्गमात्मकस्य जगतः प्रकाशोत्पादनेन व्यवहारनिर्वर्तकतया नियन्त्री भवति। अपि च गौरपि सार्पराज्ञीशब्दवाच्या। सापि

a. RV. 10. 189. 1.

1. T. तद् for एतद्

हि सर्पतो जगतो राज्ञी भवति। गवामेव यज्ञनिर्वर्तनद्वारा जगत्प्रतिष्ठाहेतुत्वात्। छान्दसोऽत्र दीर्घः प्रत्येतव्यः।

होतुरेतत्स्तोत्रियपाठं विधत्ते—**आयं-अनन्तरित्यै**। मानसस्तुत्यनन्तरं 7.१६
होता 'आयं गौः'[a] इत्येतास्तिस्रः ऋचः स्तोत्रियभूता नान्तरियाद् नोत्सृजेत्। पठेदित्यर्थः। कुतः? तस्यासां स्तोत्रियतृचत्वात् तदन्तराये स्तोत्रियतृचोऽन्तरितः[1] स्यात्। न चैतद् युक्तम्। 'स्तुतमनुशंसति'[b] इति न्यायव्याकोपप्रसङ्गात्। तस्मात् स्तोत्रियान्तरायपरिहार्थमेता एव पठेत्। अत्र सूत्रम्—'पुरा पत्नीसंयाजेभ्यः संस्थाप्य वा पत्नीसंयाजान् गार्हपत्ये हुत्वा यथाप्रपन्नमुपनिष्क्रम्य मानसेन स्तुते अध्वर्यो इत्यामन्त्रितो होयि होतः इति सर्वत्र प्रतिश्रृणोति। ओं होतस्तथा होत इत्याचक्षाणेऽनुगृणाति। आयं गौरिति सार्पराज्ञीःपराङ्पांश्चप्रणुवन्'[c] इति। पराङ्नावृत्ताः त्रिर्वचनरहिता इत्यर्थः। अप्रणुवन् प्रणवपाठमकुर्वन्नित्यर्थः। मानसस्तुत्यनन्तरं 'शोंसावो' इत्याहूय 'आयं गौः'[a] इत्याद्यास्तिस्र ऋचः उक्तधर्मवत्तया पठित्वा, 'अध्वर्यो' इत्यध्वर्युं होतृवदनार्थमामन्त्र्य होतृणां व्याख्यानं कुर्यात्। ते च दशहोतृचतुर्होतृपञ्चहोतृषड्ढोतृसप्तहोतारः। तद्व्याख्यानविधिश्च सूत्रादवगन्तव्यः। तत्र दशहोतरि तावद् 'अस्मासु नृम्णं धाः'[d] इति
यो भागोऽस्ति तं नृम्णशब्दव्याख्यानपुरःसरं स्तौति—**अस्मासु-दधाति**। अत्र 7.१७-१९
नृम्णमिति पदेनान्नमुच्यते। यस्मादेवं तस्मात् तेन 'अस्मासु नृम्णं धाः'[d] इति पठनेन यज्ञे यजमानेषु चान्नमेव धारयति। हे वाचस्पते त्वमस्मासु अस्माकं यज्ञे अस्मासु च नृम्णमन्नं धारय। यज्ञनिर्वृत्त्यर्थं लोकयात्रा**निर्वृत्त्यर्थं** च प्रभूतमन्नं प्रयच्छेत्यर्थः॥

इति सप्तमः खण्डः

a. RV. 10. 189. 1.
b. PB. 9. 8. 10.
c. ŚS. 10. 13. 26–28.
d. ŚS. 10. 14. 6.

1. T. adds इति

अथ होतृव्याख्यानस्य तनूवदनादिभ्यः पूर्वकर्तव्यतामाह—**आत्मानम्–**
८.१,२ **भवति**। ब्रह्मशब्दो होतृवचनः। तथा पूर्वमुक्तौ सत्याम्। अस्य होतुर्वक्तुर्यजमानस्यात्मान्तरायरहितो भविष्यति। आत्मनोऽन्तरायो भोक्तुर्भोग्यवर्गविच्छेदलक्षणः।

८.३-५ पञ्चहोतरि वातापिपदं व्याचष्टे—**वातापेः–निरहन्**। इह वातापिशब्देन इन्द्र एवोच्यते। यस्मात् स इन्द्रः सकलदेवतादिसमष्टयात्मकमध्यात्माद्यवच्छेदरहितं वातं वायुशब्दवाच्यं प्राणमात्मत्वेन प्राप्य शरीरान् व्यष्टिरूपाणि स्थूलान्यवच्छिन्नरूपाणि शरीराणि विवेकज्ञानबहुलान् निरहन् निरगात्। अध्यात्मपरिच्छेदमपहायानवच्छिन्नप्राणतादात्म्यं लब्धवान्। आत्मत्वेन साधकावस्थायामभिमतानामनात्मत्वेन प्रतिपत्तिपूर्वं 'तत् प्राणोऽस्मि'[a] इत्यनवच्छिन्नप्राणदेवतातादात्म्यानुभवितृत्वं वातापिशब्देनोच्यत इत्यर्थः। तथा चेन्द्रस्य स्वरूपं जिज्ञासमानं विश्वामित्रं प्रति प्रतिवचनरूपं वाक्यमत्राम्नायते—'प्राणो वा अहमस्म्यृषे प्राणस्त्वं। प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति'[b] इति।

८.६-९ प्रसङ्गादाध्वर्यवं कर्म विधत्ते—**प्रतिपरैति–प्रजापतिः**। अथाध्वर्युः पुनः गार्हपत्यसमीपं गच्छति। गत्वा च सोऽध्वर्युः गार्हपत्याग्नौ प्रजापतिदेवत्ये अत एवानिरुक्ते विशिष्टदेवतावाचकपदरहिते द्विसंख्याके आहुती कुर्यात्। तत्र गार्हपत्ये विषये प्राजापत्यत्वं युक्तम्। यस्माद् गार्हपत्यः प्रजापतिरेव प्रजापालकत्वात्। तच्च 'नर्य प्रजां मे पाहि मानुषान्मा भयात् पाहि'[c] इति प्रवासोपस्थानमन्त्रसामर्थ्यादवगतम्। अनिरुक्तत्वं च प्राजापत्यत्वादेव युक्तम्।

८.१०-१३ प्रकारान्तरेणाहुतिविधिं स्तौति—**आहुतिसंस्थे–भक्षयेयुः**। स्तुतिश्च शस्त्रं च स्तुतिशस्त्रे। ते आहुती पूर्वोक्ते प्राजापत्ये एव संस्था समाप्तिर्ययोः तादृशे भवतः। तदेव स्पष्टयति। स्तोत्रमत्रैव समाप्तं भवति। शस्त्रं चात्रैव समाप्तं भवति। ब्रह्मोद्यं च होतृवदनतनूवदनादिलक्षणं समाप्तं भवति। यस्मादेवं तस्मादेत आहुतिहोमादनन्तरं काममेवापि यागं कुर्युः। न तु पूर्वमिवावश्यं कर्तव्यबुद्धया यागं कुर्युः किंतु इच्छयैव कुर्युः। अथा-

a. KBU. 3. 2.
b. AA. 2. 2. 3.
c. ŚS. 2. 14. 2.

हुतिहोमादनन्तरमवश्यकर्तव्यतया भक्षणमेवानुतिष्ठेयुः । अन्यदिच्छात-एव । अस्मिन्नेव कामतः प्रवृत्तिपक्षे प्रजापतितनूवदनं विधत्ते—**अयं-वदेत्**। या एता अन्नादीत्याद्या प्रजापतेस्तन्वस्ता वक्ष्यमाणार्थवादानु- ८.१४
रोधेन पृथिव्यादिरूपत्वात् प्रत्यक्षप्रमाणग्राह्यभूताः । अयं वेनशब्दवाच्यः आदित्य एव भवति, आदित्यस्य सर्वजगदात्मकत्वात् । ता एताः प्रजापतेस्तनूः होता वदेत् । तच्च 'तनूरतो वदति'[a] इत्यारभ्य 'अध्वर्यो येषां व अन्नादीं प्रजापतेस्तन्वं विद्वान् होता भवति'[b] इत्यादि सूत्रकारेण दर्शितम् ॥

इत्यष्टमः खण्डः

अथैता द्वादशसंख्याकास्तनूर्विभागेन स्तौति—**अन्नादी-संवत्सरः**। ९.१-१६
अन्नं व्रीह्यादिकमत्ति भक्षयति वशीकरोतीतीयं पृथिव्येवान्नादी । अन्नस्य व्रीह्यादिलक्षणस्य पृथिव्यामुत्पद्यमानत्वेन तदेकायत्तत्वात् । नहि मुख्यमत्तृत्वं संभवति 'यद्ध किंचेदं प्रेर्ता३ इ तदसौ सर्वमत्ति यदु किंचातः प्रैती३ तदियं सर्वमत्ति'[c] इति श्रुत्यन्तरात् । असौ द्युलोक एव वृष्ट्यादिद्वारेण यज्ञ-संयोग्यन्नस्वामित्वादन्नपत्नी भवति । तस्मात् पृथिवी द्यौश्चान्नाद्यन्नपत्नीनामके प्रजापतेस्तन्वौ विज्ञेये । ये पुनः भद्रा कल्याणीति द्वौ तन्वौ तत्र भद्रेति यदस्ति तत् सोम एव भजनीयत्वात् । 'भद्रं भजनीयं भवति'[d] इति यास्कः । कल्या-णीति यदस्ति तत् पशव एव । तेषां कल्याणत्वस्य प्रसिद्धत्वात् ।

'नहि गोभ्यः परं किंचित् कल्याणमिह विद्यते'[e]

इति पुराणवचनात् । अनिलयाख्या अपभयाख्या चापरे द्वे तन्वौ । तत्र अनिलयेति यदस्ति तद्वायुरेव । यस्मादेष वायुर्नेलयति गच्छति । इलयतिर्गच्छतिकर्मा 'तिष्ठतेलयता सु कम्'[f] इत्याम्नानात् । सर्वत्र सर्वदा वर्त-मानत्वात् । अपभयेति यदस्ति तन्मृत्युरेव । अपगतं भयं यस्या इति । यस्मादेष

a. ŚŚ. 10. 19. 1.
b. ŚŚ. 10. 19. 2.
c. AA. 2. 1. 2.
d. N. 4. 9. 1.
e.
f. RV. 1. 191. 6.

मृत्युः कस्माच्चिन्न भीतिं करोति। सर्वं खलु मृत्योरेव बिभेति। यस्माच्च सर्वं बिभेति तस्य कथं भयप्रसक्तिरित्यपभयेति मृत्युरुच्यते।

अनाप्तानामान्या तनूः। तत्रेयं पृथिव्येव अनाप्ताशब्देनोक्ता। पृथिव्या अनन्तत्वेन केनापि कात्स्न्र्येनानाप्तत्वात्। अनाप्या नामासौ द्यौर्द्युलोक एव भवति। तस्यास्मदादिभिराप्तुमयोग्यत्वात्। अनाधृष्टा नामाग्निरेव। अग्नेः केनापि धर्षितत्वादर्शनात्। न ह्यग्नौ कश्चित्तिष्ठति। तथा च स्मृतिः—'न चैनमतिलङ्घयेद्'[a] इति। आदित्य एवानाधृष्या। आदित्यस्य धर्षणमीक्षणम्। तस्याशक्यत्वादनाधृष्यत्वम्। तथा च स्मृतिः—

'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्॥'[b]

अपूर्वा नाम मन एव। न विद्यते पूर्वं यस्या इति। मनसश्च सर्वस्मादग्रे सृष्टत्वादपूर्वत्वम्। 'मनसो हि न किंचन पूर्वमस्ति'[c] इत्यन्यत्र श्रवणात्।

अभ्रातृव्या नाम संवत्सर एव। न विद्यते भ्रातृव्यः सपत्नो यस्येति। संवत्सरस्य कालात्मनोऽखिलनियन्तुर्नित्यस्य विभोर्न कश्चिद् भ्रातृव्योऽस्ति। कालनिर्मितत्वात् सर्वस्य। तथा चाहुः—

'कालश्चैको विभुर्नित्यः प्रविभक्तोऽपि गम्यते'[d] इति। तथा—

'कालःसृजति भूतानि कालः संहरति प्रजाः'[e] इति।

प्रजापतिरूपत्वाच्च। होतुस्तनूवदनानन्तरं गृहपतिना गृहपतिवदनं कर्तव्यम्। तथा च सूत्रम्—'गृहपतिरतो गृहपतिवदनम्'[f] इति। 'गृहपतिसप्तदशा हि सत्रमासते'[g] इति हि स्थितिः। स गृहपतिः प्रथमदीक्षितः सत्रे तनूवदनानन्तरं गृहपतिवदनं वदेत्। असत्रे तु एष एव यजमानो गृहपतिरित्युच्यते। तच्च 'अध्वर्यो येषां वै गृहपतिर्गृहपतिं विद्वान् गृहपतिर्भवति। राध्नोति वै स गृहपतिः। राध्नुवन्ति ते यजमानाः। अध्वर्यो येषां वा अपहतपाप्मानमेवं विद्वान् गृहपतिर्भवति।

a. Manu. 4. 54.
b. Manu. 4. 37.
c. AB. 2. 40. 2.
d.
e. MBh. 1. 1. 248.
f. ŚŚ. 10. 20. 1.
g. Cf. AŚ. 4. 1. 8; ŚŚ. 13. 14. 1.

अप वै स गृहपतिः पाप्मानं हते अपहते यजमानः पाप्मानं घ्नते। [1]-येषामेवं विद्वान् गृहपतिर्भवति'-[1a] इत्येवम्।

अत्र गृहपतिशब्देनादित्य एवोच्यते इत्याह—**सो-तपति**। सेति 9.२०
लिङ्गव्यत्ययश्छान्दसः। सोऽसावेवेति पाठान्तरे तु न क्लेशः। गृहपति-
वदनवाक्योक्तो यो गृहपतिः सोऽयमसौ दिवि [2]-तपन् सूर्य एव भवति। कथं-[2]
तस्य गृहपतिशब्दवाच्यत्वमित्यत्राह—**एष-पतिः**। यस्मादेष आदित्यो गृहाणां 9.२१-२३
पतिर्भवति। तत् किमिदानीं लोकसिद्धानामेव गृहाणां पतिरिति चेत् न। तस्या-
दित्यस्य ऋतवो वसन्ताद्या गृहस्थानीया भवन्ति। यथा लोके गृहस्वामी
गृहानधितिष्ठति एवमादित्य ऋतून् वसन्ताद्यानधिष्ठाय प्रवर्तत इत्यृतूनां गृह-
साम्यम्। एष आदित्यस्तेषां पतिर्नियामकत्वेन स्वामी। 'येषां वा अपहत-
पाप्मानं देवमादित्यम्' इत्यस्य व्याख्यानम्—**एष-अपहतपाप्मा**। एष आदित्य 9.२४
एव देवः द्योतनस्वभावत्वात्। अपहतपाप्मत्वं चादित्यस्यैव प्रसिद्धम्। मानस-
यागभक्षणानन्तरं औदुम्बरीसमन्वारम्भणं विधत्ते—**उदाद्रवति-च**॥ 9.२५,२६

इति नवमः खण्डः

**औदुम्बरीम्-उपास्यै**। अथाध्वर्युः सदोमण्टपमुदाद्रवति आगच्छति 10.१-३
औदुम्बर्यन्वारम्भणार्थम्। तदा परिकर्मिणः सदोमण्टपस्य पूर्वापरे द्वारा-
वपिदधति घटयन्ति। तथा शालायाः पत्नीशालायाश्च द्वारावपिदधति। अथ
सर्वे यजमाना अग्रेण धिष्ण्यानासीना औदुम्बरीस्तम्भमन्वारभन्ते स्पृशेयुः।
गतमन्यत्। समन्वारम्भणे होतुर्विशेषं विधत्ते—**उत्तमौ-भवति**। सर्वेषु 10.४-६
पाणिभिरन्वारम्भणं युगपत् कुर्वत्सु होता स्वौ पाणी अन्येषां पाणीनामुत्तमौ
उद्गततमा उपरिष्टाद्वर्तिनौ कुर्यात्। अहं सर्वेषां मध्ये उत्तमः श्रेष्ठो भवानी-
त्यभिप्रायेण। तथा करणे च स होता उत्तमो भवत्येव। तेषां वाग्यमनं

a. ŚŚ. 10. 20. 2.

1-1. T.···र्भवति

2-2 T. omits ( gap )

10.७-९ विधत्ते—**ते-इति**। ते समन्वारब्धवन्तः सर्वे यजमानाः नक्षत्रदर्शनावधिं कालं वाग्विसर्गमकुर्वाणाः तथैवोपविशेयुः। तथा च सूत्रम्—'वाग्यताः संमील्यासत आ नक्षत्राणां दर्शनाद्'[a] इति। 'वाचं ह वा' इत्यादिप्रातरनुवाकप्रकरणे व्याख्यातम्।

10.१०-१५ अथ तेषां नक्षत्रेषु चक्षुषो निधानं विधत्ते—**दृश्यमानेषु-दधते**। इत्थं वाग्यतेष्वेषु संमीलितनयनेष्वासीनेषु सत्सु नक्षत्राणां दर्शने सति कश्चिददीक्षितः पुरुषः सदसो बहिः स्थितिं कुर्वन् 'दीक्षिता वेद' इति ब्रूयात्। हे दीक्षिताः अहं नक्षत्राण्युदितानि जानामि पश्यामि। तस्माद् युष्माकं तदीक्षणकालः प्राप्त इति तदुक्तेरर्थः। तदानीं परिकर्मिणः सदसः शालायाश्च पिहिते द्वारावपोर्णुवन्ति विघटयेयुः। अथ ते यजमानाः यथा सदः पूर्वं प्रपन्नास्तथा तस्मान्निष्क्रम्य मार्जालीयदेशं गत्वा 'तच्चक्षुः'[b] इत्यनयर्चा नक्षत्रेषु विषये चक्षुः प्रेरयेयुः। नक्षत्राणां ज्योतिरात्मकत्वस्य 'एतानि वै दिवो ज्योतींषि यन्नक्षत्राणि'[c] इत्यादिश्रुत्यन्तरसिद्धत्वात्। तेन नक्षत्रेषु चक्षुर्विसर्जनेन यजमाना आत्मनि ज्योतिरेव स्थापयन्ति। सूत्रितं च—'दृश्यमानेषु नक्षत्रेषु मार्जालीयदेशे तच्चक्षुरिति नक्षत्रेषु चक्षुर्विसृजन्ते'[d] इति।

10.१६ तेषां हविर्धानप्राप्तिं विधत्ते—**ते-प्रपद्यन्ते**। अथोद्गातुः सामविशेषगान-
10.१७-२१ विधिं स्तौति—**अथ-एव**। हविर्धानशकटसंबन्धिनीं कूबरीमवयवविशेषमभिपद्य प्राप्य उद्गातारं ब्रूते—'सत्रस्यर्धिसंज्ञं साम गाय' इति। उद्गाता तत् साम गायति। तत्सामनिधने पोतार उद्गातारश्च सर्वे सत्रस्यर्धिं समृद्धिमाप्नुवन्ति। अनेन चार्थयोगेन तस्य साम्न एतन्नामत्वं सम्पन्नमित्यवगन्तव्यम्।
10.२२,२३ अनन्तरं कर्म विधत्ते—**त-अपघ्नते**। ते यजमाना हविर्धानशकटे उत्तरेण उत्तरहविर्धानसंबन्धिनोऽक्षदण्डस्याधोदेशेन वा 'युवं तमिन्द्रापर्वता'[e] इतीन्द्रदेवत्यामतिच्छन्दश्छन्दस्कामृचं जपन्तो गच्छेयुः। तत् तत्र यदधोक्षं

a. ŚŚ. 10. 21. 10.
b. RV. 7. 66. 16.
c. TS. 5. 4. 1. 3.
d. ŚŚ. 10. 21. 11.
e. RV. 1. 132. 6.

गमनमस्ति तेनाक्षस्याधोगमनदेश एव पाप्मानं विनाशयन्ति सत्रिणः। पाप्म-
निबर्हणहेतुत्वात् प्रशस्तमधोक्षं गमनमित्यर्थः ॥

इति दशमः खण्डः

गमने मार्गद्वयं तावदुक्तम्। तत्र पूर्वोक्तस्य मार्गस्य कौषीतकिमुनिसंमत-
त्वेनोपादेयतामन्यव्यवच्छेदमुखेन दर्शयति—**ते-इति**। नु वा उ इति निपात- 11.१,२
त्रयसमुदायो विशेषार्थः। ते परम्परया एवमेवानुष्ठानं कुर्वाणा वयं पुनर्ह-
विर्धाने उत्तरेण नाधोक्षं परिगच्छाम इत्येव कौषीतकिर्मुनिरुक्तवान्। केनाभि-
प्रायेणेति चेत्, वयं यज्ञस्य यज्ञागारस्योत्तरेण संचरन्तः वयं खलूत्तर-
देशवर्तिभ्यः सप्तर्षिभ्यः अनन्तर्हिता अन्तर्धानरहिता भवाम इत्यभि-
प्रायेणेत्थमुक्तवान्। इतरथाधोक्षं गमने सति सप्तर्षिभ्यो व्यवच्छित्तिः
प्रसज्येत। अत्रोत्तरेणेत्यस्य पक्षस्य सिद्धान्तत्वं दर्शितम्। अस्मिन् पक्षे
'युवं तम्'[a] इत्यस्य अक्षदेशसान्निध्ये जपो द्रष्टव्यः। गतानां तेषां कर्तव्यं
विधत्ते—**ते-जपन्ति**। ते हविर्धाने उत्तरेण गताः सत्रिणः हविर्धान- 11.३-६
शकटयोरग्रभागे एकस्मिन् प्रदेशे उपविश्य यं यं कामं पशुपुत्राद्यन्यतम-
मिच्छन्ति तं तं ते ध्यायेयुः। मम पशवः समृद्ध्यन्तामित्यादि। एवं
सति ध्यानमाहात्म्यात् स काम एभ्यः सत्रिभ्यः समृद्धिं गच्छति। ये पुन-
र्बहुमनेकं कामं कामयमाना भवन्ति, ते 'भूर्भुवः स्वः'[b] इत्येतासां व्याहृतीनां
जपं कुर्युः। तदनन्तरकार्यं विधत्ते—**ते-दधते**। ते सत्रिणस्तदनन्तरं प्राङ्मुखा 11.७-९
उदङ्मुखाश्च प्रागुदग्रूपकोणदिगभिमुखाः सन्तो गत्वा वाचं देवतां नितरां
विशेषेण वाह्वयेयुः। विस्पष्टत्वमुच्चैष्ट्वं चोपसर्गार्थः। 'वागैतु वागुपैतु वागुप
मैतु वाग्'[c] इति तन्मन्त्रः। किमर्थं वागाह्वानमिति चेत्—वाग्यमनेन वाचो
निरसनस्य कृतत्वात् सा पराङ्मुखी स्यात्। तच्च महदनिष्टम्। अतो वाक्
पराच्येव स्याद् अनाह्वाने इति परिभयं द्योतयन्तः आह्वानं कुर्युः। तेन ते

a. RV. 1. 132. 6. b. VS. 3. 5.
c. ŚŚ. 10. 21. 16.

वाचमेव सत्रिण आत्मनि सन्निधापयन्त्येव । अथ वाग्विसर्गं विधत्ते—
11.१०-१२ **सुब्रह्मण्यया-विसृजन्ते।** सुब्रह्मण्ययेति 'सुब्रह्मण्योम्'[a] इत्येष भाग उच्यते। सुब्रह्मण्योमिति व्याहरन्तो वाचं विनियमितां विसृजेयुः । तत्र या सुब्रह्मण्या सा ब्रह्म परिवृढं जगत्कारणभूतं वस्त्वेव भवति। तदभिधायकत्वात् । तत् तेन सुब्रह्मण्यया वाग्विसर्जनेन ब्रह्मणैव वाचं विसृजन्ति ।

11.१३ रात्रौ तेषां संवेशने देशविशेषमुपदिशति—**त-संविशन्ते**। ते सत्रिणः
11.१४-१६ आग्नीध्रशालायां रात्रौ संविशन्ते। **तद्-संविशन्ते।** तत् तत्र लोके यथा राष्ट्रवासिनो जना मृगयादिना श्रान्तं राजानं [1-]वा राजमात्रं वा[-1] वेश्म तच्छ्रान्तिनिवृत्तये सत्कारपुरःसरं प्रापयन्ति। पुनश्च प्रपन्नमुपासीना एव परितो वर्तन्ते। एवमेव तत्तदहर्निर्वर्त्यकर्मणा श्रान्तं सोमं राजानम्—'सोमो वै ब्राह्मणानां राजा'[b] इति श्रवणात्—प्रत्यहं हविर्धानशकटद्वयसकाशादानीय विश्रमार्थमग्नीध्रं प्रापादयन्ति सत्रिणः। पुनश्च ते स्वयमपि स्वामिना राज्ञा सह तदुपजीविनः सन्तः तस्यां रात्रौ संवेशनं स्वापं कुर्वत इत्युपपन्नम् ।

एवं तावत् प्रायणीयातिरात्रादह्नः प्रारभ्याविवाक्यान्तिमानि ।
सत्रस्थानि त्र्यमन्त्यं विवर्ज्य व्यक्तं प्रोक्तान्यत्र कृत्स्नान्यहानि ।।
अन्त्यं त्र्यं पञ्चविंशं त्वहर्यत् वक्ष्यत्येव स्पष्टमारण्यके तत् ।
तेन ग्रन्थेनैतदन्तेन कृत्स्नं सात्रं हौत्रं कर्म संपूर्णमासीत् ।।
इह दशरात्रो विहितः स्फुटतरमतिरात्र आदितः प्रोक्तः।
एतावतैव तावत् संसिद्धो द्वादशाहगोऽपि विधिः ।।
पृष्ठ्यच्छन्दोमाख्यत्र्यहदशमाहर्मितस्तु दशरात्रः ।
अतिरात्राभ्यां पुटितः कथितो हि द्वादशाह इति सद्भिः ।।
यः स हि सत्राहीनप्रकृतितया वेदविद्भिरादिष्टः ।
तद्विहितौ विहिताः स्युः तस्मात् सत्राण्यहीनाश्च ।।

a. Cf. ŚŚ. 10. 21. 17.   b. TS.1.8.10.2 (सोमोऽस्माकं ब्राह्मणानां राजा)

1-1. T. omits ( gap )

अथ तु गवामयनाख्यं संवत्सरसत्रमेतदन्येषाम् ।
संवत्सरसत्राणां प्रकृतित्वेन व्यधायि पृथगत्र ॥

इदानीं द्वादशाहस्य सत्राहीनप्रकृतिभूतस्य व्यूळ्हसमूळ्हभेदेन द्वैविध्यं दर्शयितुं दशरात्रस्य व्यूळ्हसमूळ्हभेदेन भेदमुपजीव्य प्रत्येकं मिलित्वा च तद-
नुष्ठानविधिं प्रशंसति—**अथ–नानात्वाय**। गायत्र्यादिभिः छन्दोभिः सम्यक् 11.१७-२२
स्वे स्वे स्थाने निविष्टैरेव ऊळ्हः समूळ्हः। यद्वा स्वे स्व एव स्थाने छन्दांस्यूळ्हानि यस्य स समूळ्हः। तथाविधं दशरात्रमनुतिष्ठन्तीति यदस्ति तत् सर्वेषां कामानां प्राप्त्यै भवति। विविधैरन्योन्यस्थाननिविष्टैः छन्दोभिरूळ्हो व्यूळ्हः। यद्वा विविधमूळ्हानि प्रापितानि छन्दांसि यस्य स तथा। व्यूळ्हदशरात्रानुष्ठानस्य छन्दोलोकप्राप्तिः फलम्। व्यूळ्हसमूळ्हद्वयानुष्ठाने सर्वकामसर्वच्छन्दःप्राप्तिः। फलद्वयप्राप्तिरेव न केवलम्; किंतु दशरात्रस्य नानात्वमप्यतिव्यक्तं भवति। इतरथा एकेनैव कृतार्थत्वापत्तेरुत्तरानुष्ठानवैयर्थ्यं स्यात्। न च तद् युक्तम्; शास्त्रार्थतद्विदनुष्ठानसंप्रदायविरोधप्रसक्तेः।

अथ व्यूळ्हदशरात्रमेव प्रपञ्चेन प्रतिपादयितुं तस्य समूळ्हविकृति-
त्वमाह—**समूळ्हः—कुर्वन्ति**। हशब्द ऐतिह्यार्थः। पूर्वस्मिन् काले समूळ्ह 11.२३-२६
एव दशरात्र आसीत् किल, न व्यूळ्हः। स पुनः कथमासीदिति चेत्, तानि प्रसिद्धानि समूळ्हे स्वस्वस्थानस्थितानि गायत्र्यादीनि छन्दांस्यन्योन्यसंबन्धिस्थानं प्राप्तुमभिध्यानं कामनां कृतवन्ति। तदेव व्यक्तमनुप्रदर्शयति। गायत्र्या हि प्रथमं प्रातःसवनं स्थानं नियतम्। त्रिष्टुभो मध्यमं माध्यंदिनं सवनं स्थानम्। तथा जगत्या उत्तमं तृतीयसवनाख्यम्। तेषु सर्वेषु सर्वेषां प्राप्तौ सत्यां प्रथमत्वमध्यमत्वोत्तमत्वानि संपन्नानि भवन्ति। एवमन्योन्यं कृतसमयानि छन्दांस्यन्योन्यस्थानप्राप्तिपूर्वकमेतं व्यूळ्हं दशरात्रं निरवहन्। तदनेन मिषेण व्यूळ्हस्य समूळ्हविकृतित्वमुक्तम्। यस्मादेवं पूर्वमस्य व्यूळ्हस्योत्पत्तिः तस्माद्धेतोरेतदिदानीं व्यूळ्हदशरात्रानुष्ठायिनः सत्रिणः सर्वाणि गायत्र्यादिच्छन्दांसि सर्वाणि प्रातःसवनादीनि भजन्ति यानि तानि सन्ति कुर्वन्ति ॥

इत्येकादशः खण्डः

सर्वेषां छन्दसां सर्वसवनभाक्त्वमुक्तम् । तत् प्रकाशयति—
12.१-५ **गायत्रप्रातःसवनः–उपसंगच्छन्ते ।** दशरात्रे यः प्रथमस्त्र्यहोऽस्ति प्रथमं द्वितीयं तृतीयमहश्च, गायत्रीछन्दस्कः प्रातःसवनो भवति । प्रथमे त्र्यहे प्रातःसवने सर्वा एव गायत्रीछन्दस्का ऋचः पठनीया इत्यर्थः । एवं त्रिष्टुप्छन्दस्कं माध्यंदिनं सवनं यस्य, जगतीछन्दस्कं तृतीयसवनं यस्येत्यादियोजना द्रष्टव्या । दशमस्याह्नो गायत्रीछन्दस्कं प्रातःसवनमिति यदस्ति, तत् तेन सत्रिणः समानादेकस्माद् गायत्रीसंज्ञात् छन्दसः सकाशाद् गताः तदेव समानमेकं गायत्रीरूपं छन्दः प्राप्ता भवन्ति । यथा लोके कुतश्चिद् ग्रामाद् देशाद् वा गच्छन्तः पुनस्तमेव ग्रामं देशं वा प्राप्नुवन्ति, एवं गायत्रीछन्दसा प्रक्रम्य तेनैव गायत्रीछन्दसा समाप्तिं गच्छन्तीत्यर्थः ।

प्रसङ्गाद् दशरात्रस्य द्वैविध्यमुक्त्वा प्रकृतमेव दशमाहपरुसक्रम्य तत्र यत्
12.६-१० सर्वेषां छन्दसामनुष्टुप्त्वसंपादनं विहितं तत् स्तौति—**अथ–उपयन्ति ।** अथेत्यर्थान्तरार्थः । दशमेऽहनि सर्वाणि छन्दांस्यनुष्टुब्रूपेण कौशलेनाक्षरगणनया संपादयतीति यदस्ति तद् युक्तमेव । यस्मादेतदहर्वागेव, वाग्यमनप्रधानत्वादेतदनुष्ठानस्य । अनुष्टुप् च वाग्रूपेति सिद्धमेव । तेनानुष्टुप्संपादनेन वाग्रूपे दशमेऽहनि वाचं प्रतिष्ठां कुर्वन्ति । इत्थं दशमाहर्विधिं समाप्य तदेव प्रशंसन्नुपसंहरति । ये सत्रिण उक्तक्रमेण दशमं दशरात्रे दशसंख्यापूरकमन्त्यमहरनुतिष्ठन्ति तेऽमृतत्वमाभूतसंप्लवावस्थानलक्षणं मुख्यं वा प्राप्नुवन्ति ।

अविवाक्यसंज्ञमिदमन्त्यमहर्दशरात्र इत्थमुपयन्ति हि ये ।
अमृतत्वमापुरदिनक्षयावधिस्थितिमेव मुख्यमथ चाप्नुवन्ति ते ॥

अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति द्वादशः खण्डः

श्रुत्यर्थसारपरिभावनयाऽनयाऽस्य[1]
भूयः प्रयत्य सुकृतं समपीपदं यत् ।
तेनार्पितेन पदपङ्कजयोः प्रसन्नो
भूयाच्चिराय भगवान् पुरुषोत्तमो नः ॥

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायो दशमं वदन्नहरसौ कौषीतकिब्राह्मण
व्याख्यानेऽधिकृतो ··· ··· विंशोऽधिकैः सप्तभिः ॥

## इति कौषीतकिब्राह्मणव्याख्याने तृतीयदशके सप्तमोऽध्यायः

1. M. भाव for सार

अथ

## अष्टाविंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ।।
हविर्यज्ञास्तावत् प्रथममिह षड्भिर्निगदिता-
स्ततो ज्योतिष्टोमो दशभिरुपदिष्टोऽह्रवधेः ।
... ... ... ... ...
अहःसंघस्योक्तो विशदमथ सामस्य च विधिः ।।
प्रबन्धेऽस्मिन्नेतावति तु यदनुष्ठेयपदवी-
निविष्टं होतुस्तं सकलमुपदिष्टं ··· ।
... ... ... ... ...
... ... विवक्षुः प्रववृते ।।

तत्र प्रथमं प्रैषप्रवदनरूपं प्रशास्तुरुपदेक्ष्यन् तन्माहात्म्यप्रथनीं काम्प्या-
1.१-१३ ख्यायिकामुपक्षिपति—**प्रजापतिः-इति** । इह सर्वे हशब्दा ऐतिह्यार्था द्रष्टव्याः । पुरा प्रजापतिर्जगत्कर्ता यज्ञमग्निहोत्रादिकं विश्वसृजामयनपर्यन्तं प्रजानां सृष्टानामभ्युदयनिःश्रेयसार्थं सृष्टवान् किल । सृष्टेन च तेन यज्ञेन प्रथमं देवा इष्टवन्तः । ते[1] यज्ञेन यागान् निर्वर्त्य सर्वानैहिकानामुष्मिकांश्च कामान् प्राप्तवन्तः । प्राप्तसर्वकामाश्च ते मनुष्याणामन्येषामप्याप्तसर्व-कामत्वेन स्वतुल्यतापत्तिमाशङ्क्य तत्साधनयज्ञवैगुण्यापादनार्थं तस्य यज्ञस्य ऋग्रूपप्रैषनिगदरूपार्धद्वयोपेतस्य प्रैषनिगदात्मकमितरदर्धं यज्ञात् पृथक् कृत्वा अचिन्त्यशक्तित्वात् तिरोधाय क्वापि निहितवन्तः । प्रसिद्धं हि देवानां मनुष्योत्कर्षप्राप्तिप्रतिबन्धस्वारस्यम् । 'तस्मादेषां तन्न प्रियं यदेतन्मनुष्या

1. T. तेन

विद्युः'[a] इत्युक्तज्ञानस्य विषये प्रतिबन्धकत्वस्य न्यायतः कर्मण्यपि तुल्यत्वात्। अनन्तरं देवेभ्यो मनुष्येष्ववतीर्णेनेतरेण प्रैषनिगदरूपार्धरहितऋग्रूपार्धमात्रावस्थितेन यज्ञेन ऋषयो विश्वामित्रादय इष्टवन्तः।

अथ श्रुतिप्रामाण्यात्रधृतसर्वकामावाप्तिसामर्थ्येनानुष्ठितेन सम्यगेव यज्ञेन सर्वकामप्राप्तिफलोत्पत्त्यदर्शनाद् अन्यथानुपपत्तिप्रसूतार्थापत्तिप्रमाणसहकृतेन दिव्येन चक्षुषा ते ऋषयः यस्माद् वयं सम्यगनुष्ठितयज्ञा अपि न सर्वान् कामान् प्राप्ता वर्तामहे तस्मादयमसर्वोऽकृत्स्न एव स्वरूपतो यज्ञ इति विज्ञातवन्तः। विज्ञाय च इतरार्धप्राप्त्यर्थं तपः कुर्वाणास्तपसा श्रान्ता बभूवुः। **'ते** तपोऽतप्यन्त ते तपसाश्राम्यन्'[b] इत्यन्यत्र श्रमस्यास्मिन् विषये तपःकृतत्वस्य श्रवणात्। अनन्तरं तपसि स्थितास्ते ऋषय ईश्वरानुग्रहवशाद् इतरमर्धं प्रैषनिगदरूपं दृष्टवन्तः। दृष्ट्वा प्रैषनिगदसहितेन अत एव संपूर्णेनानुष्ठितेन यज्ञेन यागं कृत्वा सर्वान् कामान् प्राप्तवन्तः। एतावते ह वा इत्यादिरुपसंहारः। ये प्रैषा निगदाश्च ते एतावते वक्ष्यमाणस्वरूपाय फलाय भवन्ति। कियते भवन्तीति चेत्—ऋग्भिः साधनैर्यज्ञस्य संबन्धि फलं यदनाप्तं तन्निगदेन[1] प्राप्ता भविष्याम इत्येवंपरिमाणाय फलाय प्रैषादिपठनं भवति। सर्वकामप्राप्तिहेतुत्वान्महानुभावोऽयं प्रैषादिपाठ इत्यर्थः॥

इति प्रथमः खण्डः

ऋषयः प्रैषनिगदान् दृष्टवन्त इत्युक्तम्। तदेव विभागप्रदर्शनेन प्रपञ्चयति—**तान्-इतरान्**। प्रैषपाठस्य मैत्रावरुणकर्तृत्वं प्रश्नोत्तराभ्यां दर्शयति— 2.१-३
**तद्-प्रेष्यति**। तत् तत्र प्रैषपाठकर्तृविषये जिज्ञासवः पृच्छन्ति। मैत्रावरुण 2.४-७
एव हि सर्वान् होतृहोत्रकान् प्रेष्यति, न पुनः कदाचिदन्यथा। अस्मिन् नियमे किं निबन्धनमिति प्रश्नः। तस्योत्तरम्—पुरा एताः प्रसिद्धा देवता इन्द्रवायुप्रभृतयः प्रैषा ममैव स्युः ममैवेति विप्रतिपन्नाः संप्रतिपद्य प्रैषाणामर्थे आजि-

a. BṛU. 1. 4. 10. b. T S. 5. 3. 5. 4.

1. T. omits ( gap )

धावनं कृतवत्यः किल । प्रसिद्धं हि तत्र तत्र वेदप्रदेशेषु कस्मिंस्तस्मिन्निमित्ते सत्याजिधावनं देवानाम् । तस्मिन् आजिधावनकर्मणि अन्या देवता मित्रावरुणौ जितवन्तौ किल । तत आरभ्य प्रैषा मित्रावरुणयोरेव स्वभूता बभूवुः । तस्माद्धेतोर्मैत्रावरुण एव प्रैषपाठकर्ता संवृत्तः ।

2.८-११ अथासीनवाच्यतानिषेधेन स्थानं विधत्ते—**स-इति** । स मैत्रावरुणो वेद्यां स्थित एव सन् नासीनः प्रैषान् ब्रूयात् । यस्माल्लोके पुरुषः स्थितिं कुर्वन्नेवातिशयेन वीर्यवान् भवति । आसीनात् पुरुषात् तिष्ठतो वीर्यकार्यदर्शनात् । अपि च तिष्ठन्नेव वक्ता आसीनाद् वक्तुराश्रुतवदनतमो भवति । आसमन्तादाभीक्ष्ण्येन आभिमुख्येन वा श्रुतां वाचं वदतीत्याश्रुतवदनः । अतिशयेनाश्रुतवदनः आश्रुतवदनतमः । स्थितस्य हि वदतो वागासीनाद् वदतः श्रोतॄणां श्रोत्रगोचरीभवतीति प्रसिद्धम् । तथा चान्यत्र श्रुतम्—'तिष्ठन् ह्याश्रुततरं वदति'[a] इति । यस्मादेवं तस्मात् मैत्रावरुणः प्रैषान् पठन् देवेषु विषये विशिष्टबलयुक्तामाश्रुतां श्रोतृगृहीतां वाचमहं ब्रुवन् भूयासमित्यभिप्रायेण तिष्ठन्नेव ब्रूयात् । अन्यथा अल्पवीर्या देवैरनाकर्णिता चास्य वागुदिता
2.१२,१३ आपद्येतेत्यर्थः । प्रैषपठनसमये प्रह्वीभवनं विधत्ते—**कुवक्र-कौषीतकिः** । यथा कश्चित् पुरुषोऽदीर्घकायः[1] प्रकृत्यैव भवति तथा प्रह्वीकृतशरीर एव प्रैषान् पठेत् । तथा सति पर्जन्यो देवाभिमानी देवो वर्षणशीलः यथाकालं भवतीति प्रह्वीभवनेन प्रैषानुवचनस्य फलं कौषीतकिर्मुनिराह स्म ।

अथ पर्यग्निकरणवेलायाम् 'अग्निर्होता नो अध्वरे'[b] इति तृचस्य पाठं
2.१४-१७ विधत्ते—**तद्ध-अपजघ्निरे** । तत् तत्र पशुकर्मणि प्रवृत्ते । असुराश्च रक्षांसि च हवींषि पश्वादीनि मथितवन्ति किल । ततो हेतोरेता 'अग्निर्होता नः'[b] इत्याद्याः 'परि णीयते' 'परि याति' 'पर्यक्रमीद्' इति क्रियमाणकर्मविद्योतकत्वादभिरूपा योग्यास्तिस्र ऋचो वामदेवनामा महर्षिः दृष्टवान् । ताभिर्वामदेवदृष्टाभिः ऋग्भिः ऋत्विजोऽग्निं हविषा[2] परितः सर्वासु दिक्षु प्राकाररीत्या प्रापितवन्तः ।

a. TS. 2. 5. 11. 1. b. RV. 4. 15. 1.

1. T. पुरुषादानकोयः (?) 2. T. हविषां

ततो हेतोस्तानि रक्षांस्येव नाष्ट्राः शत्रून्। नाष्ट्राशब्दो रातिशब्दवत् स्त्रीलिङ्गान्तः। अपहृतवन्तः।

अथ वपाश्रपणकाले पठनीयामृचं कांचिद् विधत्ते—**जुषस्व-इति**। जुषस्वेति 2.१८,१९
जुषधातुमतीम्। 'हव्या जुह्वान आसनि'[a] इति श्रपणकर्मविद्योतकत्वादभिरूपाम्। अथ किंचित् सूक्तं विधत्ते—**इमं-इति**। सूक्तमनुब्रूयादिति शेषः। 2.२०
**स्तोकान्-स्वदयति**। अक्तस्य मेदसः संबन्धिनः स्तोकान् बिन्दूनेव एताभिः 2.२१
'इमं नः'[b] इत्याद्याभिरग्नये स्वादून् करोति। यथामी स्तोका अग्नेरास्वादनविषयतां गताः सन्तः प्रीतिहेतवो भवन्ति, तथा तद्गुणवर्णनेन प्रशंसति।
अपि च—**एता-भवन्ति**। एताः स्तोकशब्दयुक्ता ऋच एव स्तोकानां पुरोनुवाक्या 2.२२,२३
भवन्ति। तथा एता एव याज्याश्च भवन्ति। अन्ययागेषु हि पुरोनुवाक्यानां याज्यानां च भेदोऽस्ति। इह तु पुरोनुवाक्यात्वं याज्यात्वं चैतासामेव। तेनाभिरूप्यमतिशयेनैवासामुपपद्यत इत्यर्थः। 'अभिरूपाय कन्या देया' इत्यत्र अभिरूपतमायेतिवद् अत्रातिशयार्थोऽवगन्तव्यः। उभयरूपत्वोक्तिसामर्थ्यात्॥

इति द्वितीयः खण्डः

अथ पशुपुरोळाशसंबन्धिनि स्विष्टकृद्यागे पुरोनुवाक्यां विधत्ते—
**वैश्वामित्रीं-ब्राह्मणम्**। विश्वामित्रदृष्टाम् 'इळामग्ने पुरुदंसं सनिम्'[c] इत्येताम्। 3.१
सूत्र्यते खलु—'इळामग्न इति स्विष्टकृतः पुरोनुवाक्या'[d] इति। वैश्वामित्रीत्वं तद्दृष्टमण्डलान्तःपातित्वात्। 'ततिर्वै यज्ञस्य पुरोळाशः। वाग्वै विश्वामित्रः। वाचा यज्ञस्तायते'[e] इति दशमाध्याय उक्तमेव ब्राह्मणं द्रष्टव्यम्।

अथ सवनीयपुरोळाशानां तत्स्विष्टकृतश्च पुरोनुवाक्यां विधत्ते—
**वैश्वामित्रीः-सलोमतायै**। प्रातःसवने माध्यंदिनसवने तृतीयसवने च ये 3.२,३
पुरोळाशयागाः सन्ति तेषां विश्वामित्रदृष्टा ऋचः पुरोनुवाक्याः पठेत्।

a. RV. 1. 75. 1.
b. RV. 3. 21. 1.
c. RV. 3. 1. 23.
d. ŚŚ. 5. 19. 9.
e. KB. X. 8. ३०–३२.

तत्र 'धानावन्तम्'[a] इति प्रातःसवने। 'माध्यंदिनस्य सवनस्य धानाः'[b] इति माध्यंदिने। 'तृतीये धानाः सवने'[c] इति तृतीयसवने। 'अग्ने जुषस्व नः'[d] इति प्रातःसवने स्विष्टकृतः। 'माध्यंदिने सवने'[e] इति माध्यंदिने। 'अग्ने तृतीये सवने'[f] इति तृतीयसवने। एतासां तृतीयमण्डलान्तर्वर्तित्वाद् विश्वामित्रदृष्टत्वं द्रष्टव्यम्। यस्माद् विश्वामित्रः प्राक् पुरोळाशसंबन्धिनः प्रैषान् दृष्टवान्। तत् खलूक्तम्। तेन तत् पुरोनुवाक्यानां वैश्वामित्रीत्वं सलोमतायै प्रैषैः समानरूपत्वादभिरूपत्वसिद्धये संपद्यते।

द्विदेवत्यानां त्रयाणां पुरोनुवाक्या विधास्यन् प्रथममैन्द्रवायवस्य
3.४,५ विधत्ते—**माधुच्छन्दस्यौ-सलोमतायै**। मधुच्छन्दोनाम्ना महर्षिणा दृष्टे 'वायवा याहि दर्शत'[g] 'इन्द्रवायू'[h] इत्येते वाय्विन्द्रवायुदेवते सोमद्रव्यसंबन्धप्रतिपादकत्वादभिरूपे ऐन्द्रवायवस्य पुरोनुवाक्ये पठेत्। अथेतर ऋषय इतरानित्युक्तत्वाद् द्विदेवत्यप्रैषाणां मधुच्छन्दोदृष्टत्वमुक्तम्। मैत्रावरुणाश्विनग्रहयोः
3.६ पुरोनुवाक्ये दर्शयति—**गार्त्समदीम्-अन्वाह**। गृत्समदेन दृष्टां 'अयं वां मित्रावरुणा'[i] इत्यृचं मैत्रावरुणग्रहस्य पुरोनुवाक्यां पठेत्। मेधातिथिना दृष्टां 'प्रातर्युजा'[j] इत्येतामाश्विनस्य पुरोनुवाक्यां पठेत्।

अथ प्रातःसवन उन्नीयमानेषु सोमेषु प्रशास्त्रा पठनीयं सूक्तं विधत्ते—
3.७,८ **मैधातिथीः-प्रोवाच**। प्रातःसवने विषये अध्वर्युभिरुन्नीयमानान् चमसानभिष्टोतुं मेधातिथिनाम्ना महर्षिणा दृष्टा 'आ त्वा वहन्तु हरयः'[k] इत्याद्या मैत्रावरुणः पठेत्। तथा च सूत्रम्—'उन्नीयमानेभ्य इत्युक्त आ त्वा वहन्तु हरय इत्युन्नीयमानसूक्तम्'[l] इति। यस्मात् पुरा मेधातिथिर्महर्षिरिन्द्राय सोमं प्रोक्तवान्। मन्त्रदृशा तेन दृष्टाभिरेताभिः ऋग्भिराहूत इन्द्रः प्रथमतः प्रातःसवने सोमं पीतवान्। तस्मान्मैधातिथीनामेतासामनुवचनं युक्तम्।

a. RV. 3. 52. 1.
b. RV. 3. 52. 5.
c. RV. 3. 52. 6.
d. RV. 3. 28. 1.
e. RV. 3. 28. 4.
f. RV. 3. 28. 5.
g. RV. 1. 2. 1.
h. RV. 1. 2. 4.
i. RV. 2. 41. 4.
j. RV. 1. 22. 1.
k. RV. 1. 16. 1.
l. ŚŚ. 7. 4. 1.

एतासामाभिरूप्यमाह—**ताः-पुरोनुवाक्यारूपेण**। 'आ त्वा'[a] इत्याद्याङुपसर्ग- 3.९
वत्यः। हरय इत्यादि हरिशब्दवत्यः। यस्मादेतासां पुरोनुवाक्यारूपमस्ति तस्मात् तद्रूपयुक्तत्वादावत्यो हरिवत्यश्च भवन्ति। आवत्त्वं हि पुरोनुवाक्यालक्षणं प्रसिद्धम्। हरिशब्दवत्त्वं च छत्रिन्यायेन गमयितव्यम्।

देवतानिबन्धनमाभिरूप्यमाह—**ता-यज्ञक्रतुः**। ऐन्द्र्यः इन्द्रदेवत्याः। क्रतु- 3.१०,११
शब्दः संकल्पवचनोऽप्यस्तीति यज्ञविशेषणम्। 'इन्द्रो वै यज्ञस्य देवता'[b] इति
श्रुत्यन्तरे प्रसिद्धिर्हिशब्दार्थः। छन्दःकृतमाभिरूप्यमाह—**ता-प्रातःसवनम्**। 3.१२,१३
सवनस्यास्य गायत्रत्वाद् गायत्रीछन्दस्कानामेतासां पाठोऽनुरूप इत्यर्थः। ऋक्-
संख्यां स्तौति—**ता-उन्नयन्ति**। यस्मादत्र होतृयजमानब्रह्मोद्गातृप्रशास्तृ- 3.१४,१५
ब्राह्मणाच्छंसिपोतृनेष्टाग्नीध्राणां चमसान् नवसंख्याकान् उन्नयन्त्यध्वर्यवः
तस्मात् तदनुवचनरूपाणामृचां नवसंख्यत्वमभिरूपम्। संख्याविषये कंचित्
पक्षं पूर्वपक्षतयोपक्षिपति—**षळु-वदन्तः**। एके शाखिनः प्रातःसवनविषये 3.१६-१९
उन्नीयमानेभ्यः सोमेभ्यः 'आ त्वा वहन्तु'[a] इत्याद्याः षट्संख्याका ऋच एव पठन्ति। सप्तमीम् 'अयं ते स्तोमो अग्रियः'[c] इत्येतामच्छावाकः स्वयं पठेत्। न प्रशास्ता। तच्चमसस्येदानीमनुन्नयनात्। एवं प्रातःसवने सप्त ऋचोऽनुब्रूयात्। उत्तरयोर्माध्यंदिनतृतीयसवनयोरपि सप्तसंख्या एवर्चो ब्रूयात्।

माध्यंदिने 'असावि सोम'[d] इत्याद्याः सप्त। तृतीयसवने 'इहोप यात शवसः'[e] इत्याद्याः। किं पुनः कारणं वदन्तः ते तथा कुर्वन्ति ? नहि प्रतिभामात्रकृतं तदुचितमिति चेत्, उच्यते। यस्मात् स्वस्वधिष्ण्यानपरेण[1] प्राङ्मुखा आसीनाः सप्त होत्रादयो याज्यां पठित्वा वषट्कारं कुर्वन्ति। तस्मात् सप्तयष्टॄणां सप्तयाज्यापठने याज्यायाः पुरोनुवाक्यापठनानन्तरयोग्यत्वादेतासां पुरोनुवाक्यात्वकल्पनया यत्संख्या याज्याः तत्संख्यतया अयं पाठो युक्त इति न प्रतिभामात्रत्वमस्य पक्षस्य। सिद्धान्तमाह—**तद्-अनुब्रूयात्**। वैखलुशब्दौ पक्षव्या- 3.२०

a. RV. 1. 16. 1.
b. ŚB. 1. 4. 5. 4.
c. RV. 1. 16. 7.
d. RV. 1. 84. 1.
e. RV. 4. 35. 1.

1. T. स्वधि'''ज्यामपरेण

वृत्यर्थौ द्रष्टव्यौ । तत् तत्र तस्मिन् विषये यथासूक्तं सूक्तानतिक्रमेणैव पठेत् । सर्वमेव सूक्तं पठेदित्यर्थः । यदुक्तं सप्तहोत्रादियष्टॄणां प्रतियाज्यं सप्तपुरोनुवा-
3.२१,२२ क्यतयैषामवस्थानात् सप्तर्चत्वमेवेति तत् परिहरन् हेतुमाह—**होतुः-उन्नयन्ति**। हिर्हेत्वर्थः । न होत्रादीनां सप्त वषट्कर्तॄणां प्रत्येकमेताः पुरोनुवाक्यारूपतया ज्ञातव्याः । किंतु होतुरेवैताः पुरोनुवाक्या भवितुमर्हन्ति । होत्रा पठनीया एव मैत्रावरुणेनैताः पठ्यन्ते, तत्पुरुषत्वात् । होतृपठनीयपुरोनुवाक्यारूपत्वे चेतरवषट्कर्तृपठितयाज्यानां सपुरोनुवाक्यता सिद्धैव भवति । न च सप्तैवेति संख्यानियमापत्तिः स्वीयत्वे तदापत्तिः; यतः तस्मान्न सप्तर्चमात्रमनूच्यम् । किंतु सकलमेव सूक्तम् । कुतो होतुरेवैताः पुरोनुवाक्या इति चेत्, यस्माद्धोतुः स्वभूतं चमसं होतृचमसमनु पश्चादन्यांश्चमसानुन्नयन्त्यध्वर्यवः । तस्माद्धोतृ-चमसपरिवारत्वादितरेषां होतृचमसतुल्यकक्ष्यतयानुवचनप्रकृतत्वाभावात् होतृ-पुरोनुवाक्या एवैता ऋचो भवेयुः ।

3.२३,२४ अथ होत्रकाणां याज्यापाठं विधत्ते—**अथ-संप्रमुञ्चन्ति** । व्याख्यातमेत-
3.२५,२६ दधस्तात् । [1]अथ मैत्रावरुणस्य[1] प्रस्थितयाज्यामाह—**मित्रं-अनवराध्यै** । यजतीति शेषः । मैत्रावरुण्या मित्रावरुणदेवत्यया । स्तौति—स्वयैव देवतया । यजतीति शेषः । मैत्रावरुण्या यजतीति यदस्ति तत् स्वया मैत्रावरुणस्य स्वभूतया मित्रावरुणाख्यया देवतयैव यजति । मैत्रावरुणस्य हि मित्रावरुणौ देवता । 'मित्रावरुणयोस्त्वा बाहुभ्याम्'[a] इत्यादिलिङ्गात् । तच्च स्वदेवतया यजनं यज्ञमुखस्य यज्ञारम्भस्यानवराध्यै समृद्धये संपद्यते । 'यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञं रक्षांसि जिघांसन्ति'[b] इत्यसमृद्धिप्रसक्तेः श्रुतत्वात् ।

3.२७,२८ ब्राह्मणाच्छंसिनो याज्यां विधत्ते—**इन्द्र-यज्ञक्रतुः** । अयं सोमयागरूपो यज्ञक्रतुरिन्द्रदेवत्य एव । सोमस्येन्द्रदेवत्यत्वात् । 'ऐन्द्रः सोमो गृह्यते मीयते
3.२९-३२ च'[c] इति श्रुतत्वात् । अथ पोतुर्विधत्ते—**मरुतो-यजति** । मारुत्या मरुद्देव-त्यया । यत्र यस्मिन् काले । तत् तेन प्रकारेण । मरुत इन्द्रं पुपुवुः किल ।

a. AŚ. 3. 1. 16. b. TS. 5. 1. 3. 4.

c.

1. T. ···णस्य

पवनं च वृत्रजनितभीतिनिवारणेन तद्वधोपाययोगितेजोऽभिवर्धनलक्षणं द्रष्टव्यम् । तत् तस्मिन् काले एनान् मरुत: सोमपीथे सोमपानेऽन्वाभक्तवान् । एषा चेन्द्रस्य वृत्रवधकर्मणि मरुत्साहायकाचरणादिविषया आख्यायिका इन्द्र-निहवप्रगाथब्राह्मणव्याख्यानावसरे विस्तरेण प्रतिपादिता । तस्मादैन्द्रेऽपि सोमे मरुतामिन्द्रेणैव पूर्वमन्वाभक्तत्वात् पोतृनामा होत्रको मरुद्दैवत्यया 'मरुतो यस्य हि क्षये'[a] इत्यनया प्रथमत: प्रात:सवने, अन्ततोऽन्ते तृतीयसवने च 'आ वो वहन्तु सप्तय:'[b] इत्यनया मारुत्या यजतीत्येतदुपपन्नम् ।

अथ नेष्टु: प्रस्थितयाज्यां विधत्ते—**अग्ने-यजति**। पत्नीवदग्निदेवत्या 3.३३-३५
अग्निपात्नीवती 'अग्ने पत्नीरिहावह'[c] इति लिङ्गात् । त्वष्टारमिति त्वष्टृ-शब्दात् त्वष्टृमती । एवंविधया 'अग्ने पत्नी:'[c] इत्यनयर्चा नेष्टा यजेत् । तदेदद् युक्तम् । यस्माद् देवानां मध्ये त्वष्टा पात्नीवत: पत्नीवद्ग्रहसम्बन्धी भवति । तथा 'देवा वै त्वष्टारमजिघांसन् । स पत्नी: प्रापद्यत । तन्न प्रति प्रायच्छन् । तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति । तस्मात् पात्नीवते त्वष्ट्रेऽपि गृह्यते'[d] इत्यध्वर्युब्राह्मणे श्रुतम् । ऋत्विजां मध्ये नेष्टा पात्नीवत: । 'पत्नीभाजनं वै नेष्टा'[e] इति श्रुत्यन्तरात् । यद्यपि तृतीयसवने 'अमेव न: सुहवा आ हि गन्तन'[f] इत्येषा नेष्टुर्याज्या केवलं त्वष्टृमत्येव, तथापि छत्रिन्यायेनाग्निपात्नीवत्या त्वष्टृमत्या अन्ततश्चेत्युक्तम् । अथाग्नीध्रस्य याज्यां
विधत्ते—**उक्षान्नाय-यजति** । यस्मादग्ने: समिन्धनं दीपनं तदनुगमादय- ३.३६-३८
माग्नीध्रशब्दवाच्य[1] आसीत् । तस्मादग्निसमिन्धनद्वारा अग्निसम्बन्धादस्या-ग्निदेवत्यैव याज्या युक्ता । अन्तत: तृतीयसवने 'इमं स्तोमम्'[g] इत्यनया यजतीत्यर्थ: ॥

इति तृतीय: खण्ड:

a. RV. 1. 86. 1.
b. RV. 1. 85. 6.
c. RV. 1. 22. 9.
d. TS. 6. 5. 8. 4–5.
e. AB. 6. 3. 10.
f. RV. 2. 36. 3.
g. RV. 1. 94. 1.

1. T. तदयानुगमाद् for तदनुगमाद्

4.१,२ इदानीमच्छावाकगोचरं विध्यन्तरमभिधित्सुरुपक्रमते—**अथ-प्रोवाच** । अथेत्यर्थान्तराभिधानोपक्रमार्थः । यत्र यस्मिन् काले तद् वृत्तं वस्तु । किं तत्? मनोरपत्यं नाभानेदिष्ठनामा कश्चिदङ्गिरोभ्यस्सु अङ्गिरोनामसु सत्रमासीनेषु महर्षिषु विषये उपहवमनुज्ञां स्वविषयामीषे इष्टवान् किल । अङ्गिरस्सु इत्येव केषांचित् । अत्रेत्थमाख्यायिका संगृहीता द्रष्टव्या—

नाभानेदिष्ठनामासीन्मनोः पुत्रो महातपाः ।
ब्रह्मचर्यव्रती दीर्घं न्यवसत् स गुरोः कुले ।
तदा तद्भ्रातरो दायं व्यभजन्त परस्परम् ।
भागशून्यमकुर्वंस्तं ब्रह्मचर्यव्रते स्थितम् ।
समावृत्य गुरोर्गेहान्निजं भागं[1] स पृष्टवान् ।
पिता तमब्रवीद् वत्स यत्त्वां विज्ञापयाम्यहम् ।
शृणु तावत्तदेते खल्वृषयस्त्वङ्गिरोभिधाः ।
आसते सत्रमिह यत्तेषां व्यामोहगोचरः ।
तद् गत्वा ब्रूहि सुव्यक्तं कृत्स्नयज्ञाङ्गविद् ह्यसि ।
सत्रं समाप्य च स्वर्गं यास्यन्तस्तत्र यद्धनम् ।
शिष्यते यज्ञसिद्ध्यर्थं तुभ्यं दास्यन्ति ते मुदा ।
इत्येवमुक्तः पित्रा स गत्वा मन्त्रविदग्रणीः ।
ते यज्ञेनेति सूक्ते द्वे ब्रुवन्नङ्गिरसोऽभ्यगात् ।
ते संगृह्यादरादेनमृषिं मन्त्रदृशां वरम् ।
चक्रुस्तं कृत्स्नकर्माङ्गसाक्षिणं क्षीणकल्मषम् ।
इत्येषाख्यायिका नानावेदशाखान्तरस्थिता ।
संगृह्योक्ता विधानार्थमच्छावाकीयकर्मणः ॥

तदा स नाभानेदिष्ठ एतां वक्ष्यमाणामच्छावाकसम्बन्धिनीं होत्रां प्रोक्तवान् ।

4·३,४ अथास्येतरहोत्रकवत् प्रसक्तं प्रवरणं प्रतिषेधति—**सः-प्रवृणुते** । स नाभानेदिष्ठोऽङ्गिरसां सत्रे इळोपह्वानानन्तरमागतवान् किल । तस्माद्धेतोः

1. T. भाजं

प्रवरणमच्छावाकस्य न कुर्वन्त्यध्वर्यवः । प्रवरणकालोत्तरकालीनत्वात्तदागमनस्य । अथ सदोमण्टपस्य बहिः प्रागुदग्देशे अवस्थानं विधत्ते—**स-इच्छते ।** 4.५.६
स नाभानेदिष्ठः पूर्वोक्तरूपदिक्संबन्धिकोणादिकसम्बद्धाद् देशादागतवान् किल । तस्माद्धेतोरेतद्दिक्संबन्धिसदोमण्टपस्य बहिरैशानकोणदिग्देशे अवस्थित उपहवमनुज्ञामिच्छेत् ।

अथाच्छावाकाय पुरोळाशखण्डदानं विधत्ते—**तद्-अपरीळताये ।** 4.७-१८
पुरा[1] अलिकयुरलीकयुरिति वा नामतः वाचस्पतेः कस्यचिदपरपत्यं कश्चिदृषिः । क्षत्रपरीक्षार्थं देवेभ्यो ब्रह्मणा दत्तः ।··· ··· नमिशीया ऋषयस्तेषां सत्रे ।

'नैमिशेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ।।'[a]

इति दर्शनात् । दीक्षाहस्सु उपसद्दिवसेषु च ब्रह्मा बभूव । स किलाभिषुते सोमे सुत्याहनि अच्छावाकीयां प्रोक्तवान्[2] । ननु ब्रह्मकर्मानुतिष्ठत एव कथमच्छावाकीयकर्मकर्तृत्वमिच्छावशात् ? उच्यते । 'तस्माद् यो ब्राह्मणो बह्वृचो वीर्यवान् स्यात् सोऽस्याच्छावाकीयां कुर्यात्'[b] इति विशिष्टतपोविज्ञानादिमत एव कस्यचिदच्छावाकीयकर्मानुष्ठानाहर्त्वश्रवणात् । तस्यैव च तादृग्विशेषणवत्तया तद्योग्यत्वात् । ब्रह्मकर्मणश्च 'ब्रह्मा त्वो वदति जातविद्याम्'[c] इति वेदत्रयविहितविविधकर्माङ्गवैकल्यप्रतिसन्धानरूपतत्तत्प्रायश्चित्तविशेषोपदेशादिरूपस्य तदवस्थेनैव सताऽनुष्ठातुमशक्यत्वाभावात् , ब्रह्मण एव सतः तस्याच्छावाकीयां प्रति कर्तृत्वमत्रोक्तमिति गम्यते । अथवा वेदवचनस्य राजाज्ञादिवदपर्यनुयोग्यत्वाद् यथावचनमेव तदर्थावधारणमनाशङ्कितमतिभिरेव कर्तव्यम् । नात्र कारणान्तरचिन्तया मनः खेदनीयम् । ते नैमिशीया ऋषय उक्तवन्तः । अस्मै अलीकयवे पुरा पूर्वं दीक्षोपसत्सु ब्रह्मत्वं कुर्वाणाय हि वयं ब्रह्मभागं परिहृतवन्तः । परिहरन्नित्येव केषांचित् । तथा

a. *Bhāgavatapurāṇa*. 1. 1. 4. b. AB. 2. 36. 6.
c. RV. 10. 71. 11.

1. T. तद्
2. T. omits ( gep )

सतीदानीमेनं ब्रह्मभागं कस्मै परिहरामः । इदानीं खल्वयमच्छावाको भूत्वा वर्तते । तस्मात् किमयं ब्रह्मभागयोग्यो न वेति सविचारमन्योन्यमुक्तवन्तः । निर्धार्य चाच्छावाकाय सतेऽप्यस्मै ब्रह्मभागं परिहरत यूयमित्यध्वर्यून् प्रत्युक्तवन्तः । ते च तथैव तस्मा अच्छावाकाय ब्रह्मभागं परिहृतवन्तः । यस्मादेवं पुरावृत्तमासीत् तस्माद् यत् पुरोळाशदृगलपरिहरणं स एष ब्रह्मभागपरिहार एव भवति । अथो अपि च न केवलं ब्रह्मभागरूपत्वादेव पुरोळाशदृगलदानम् , अच्छावाकचमसस्येळासंबन्धसिद्धयर्थं च । इतरे हि होत्रादिचमसाः प्रागेव इळासम्बन्धिनो जाताः । इळाह्वानकाले होतृचमसस्यान्वारम्भणादितरेषामपोह्यमानत्वात् । तस्मादच्छावाकचमसस्यापीळाभाक्त्वसिध्यर्थं पुरोळाशदृगलदानमुपपन्नम् ॥

इति चतुर्थः खण्डः

अथाच्छावाकं प्रत्यध्वर्योर्यः प्रैषस्तं प्रसङ्गादनुभाष्य व्याचष्टे—**अथ-**
5.१,२ **आह** । हे अच्छावाक यत्ते यदेव वाद्यं वदनीयं वक्तव्यं वाक्यं तद् वदस्व ब्रूहि । अत्र वाद्यशब्देनोपहवप्रार्थनारूपं वाक्यमुच्यते । तस्यैवात्रौचित्यप्राप्तत्वादिति व्याख्यातम् । अथाच्छावाकपठनीयास्तिस्र ऋचो विधत्ते—
5.३-९ **अच्छा–इति** । अग्निदेवत्या आग्नेय्यः । प्रातःसवनस्याग्नेयत्वं प्रागुक्तम् । या अनुष्टुप् नाम छन्दोऽस्ति सा गायत्र्येव भवति । 'सा गायत्री गर्भमधत्त । सानुष्टुभमसृजत'[a] इति गायत्रीविकारत्वमनुष्टुभः श्रूयते । प्रकृतिविकृत्योश्चाभेदः प्रसिद्धः । गायत्र्येव गायत्रम् । अग्निस्त्रिवृत् त्रिप्रकारो भवति । अङ्गारावस्थो ज्वालावस्थो धूमावस्थ इति । अत्राग्नेयं प्रातःसवनमिति देवतानिबन्धनमाभिरूप्यमुक्तम् । छन्दऋक्संख्ययोश्च देवतासंबन्धित्वात् तद्द्वारकमाभिरूप्यमुक्तम् ।

अथोपहवप्रार्थनारूपस्य दीर्घनिगदस्य पठनं विधत्ते—
5.१० **उत्तमायै–उपसंदधाति** । उत्तमा 'स नो धीती'[b] इत्येषा । तस्यास्त्रिर्वचनमर्थात्

a. AB. 4. 28. 6. b. RV. 5. 25. 3.

सिद्धयति । तत्र यत् तस्यास्तृतीयं वचनमस्ति तदन्ते यः प्रणवः तेन सह 'यज-
मान होतः'[a] इत्यादिनिगदं संधाय पठेत् ।

तमेतं निगदं खण्डश आदाय व्याचष्टे—**यजमान-उपवक्ता** । हे यजमान हे 5.११,१२
होतरिति यजमानादीन् संबोध्य तदभीष्टविविधाशास्यवस्त्वाशंसावचनैः
तदाभिमुख्यसंपादनपूर्वकं तेषां स्वविषयानुज्ञानप्रार्थना क्रियते । तत्र यजमा-
नादिशब्दाः स्पष्टार्थाः इत्युपवक्तेति पदं व्याचष्टे । तत्रोपवक्तेति प्रशास्ता मैत्रा-
वरुण उच्यते । इतरेषां प्रसिद्धैः स्वनामभिरुक्तत्वात् प्रशास्तुरेवानुक्तेः, पारि-
शेष्यात् प्रशास्तुरेवोपवक्तृशब्देन ग्रहणार्हत्वात् । उपवक्तुः प्रशास्तृत्वे मन्त्रपदं
प्रमाणयति—**अपि-इति** । न केवलं मयैतदुपवक्तुः प्रशास्तृत्वमुक्तम् ; अपितु 5.१३,१४
कयाचिद् दाशतयीगतयर्चाप्यभिहितम् । हे अग्ने त्वमध्वरं यज्ञमात्मन इच्छतां
यजमानरूपाणां जनानां मध्ये उपवक्ता मैत्रावरुणो भूत्वा गच्छसि । मानुषाणां
हव्यानि च देवतात्वेन गच्छसीति । मन्त्रान्तरे च प्रशास्तृत्वमग्नेः श्रूयते—
'त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः । विश्वा विद्वाँ
आर्त्विज्या धीर पुष्यसि'[b] इति । खण्डान्तरमुद्धृत्य व्याचष्टे—**इषेषयध्वम्-
आह** । यद्यपि इट्छब्दोऽन्नवाचकः ऊर्क्छब्दस्तद्रसवाचकः, तथाप्यत्र पद- 5.१५-१७
द्वयेनाप्यन्नमेव विवक्षितम् । विशेषस्यानुपयोगात् । द्वितीयाद्वयं प्रथमार्थे
नेयम् । अर्थभूयस्त्वाय पर्यायपदद्वयाभिधानम् । अत एवोक्तमन्नेन समुक्षध्व-
मित्येवैनांस्तदाहेति । हे ब्राह्मणा अन्नेन साधनेनास्मान् सम्यक् सिञ्चत ।
प्रभूतान्नवतः कुरुतेत्यर्थः ।

खण्डान्तरं व्याचष्टे—**नि-आह** । तत् तेन 'नि वो जामयः'[c] इति 5.१८-२०
खण्डेन हे ब्राह्मणाः यद् भवतां जामि ज्ञातिरूपमज्ञातिरूपं च वैरिजातमस्ति तत्
सर्वं नीचैरनुजीवितया गच्छत्वित्येवाभिहितम् । सर्वेषां मध्ये उत्तमा भवत[1] ।
जाम्यजामीति चैकवचनमविवक्षितार्थम् । जाम्यजामिशत्रुनिबर्हणप्रार्थना
मन्त्रान्तरेऽप्यस्तीत्याह—**अपि-इति** । हे अग्ने अस्माकं ज्ञातिरूपा अन्तरा ये 5.२१,२२

a. ŚŚ. 7. 6. 3. b. RV. 1. 94. 6.

c. ŚŚ. 7. 6. 3.

1. T. भव…भाग (?)

शत्रवः सन्ति [1-]ये चाजामयः तान् नाशयेति[-1]। खण्डान्तरं व्याचष्टे—**नि-**
5.२३,२४ **आह**। वो युष्माकं सपत्नाः प्रतिस्पर्धिनो जनाः। यामनीत्यस्य[2] व्याख्या
5.२५-२७ समरण इति। अनन्तरभागं व्याचष्टे—**जेषथ-आह**। अत्र खण्डान्त इति
शब्दो द्रष्टव्यः। केचिदितिशब्दं [न पठन्ति]। [अभि त्व]र्यते अभिमुखं गन्तुं
शीलमस्या इति। आत्मीयया सेनया शत्रोः सेनां जयत हे ब्राह्मणा इत्यनेन
5.२८,२९ खण्डेनोच्यते। **श्रवद्-वदते**। हे ब्राह्मणाः युष्माकं वचनमिन्द्रश्चाग्निश्च
3.३०,३१ शृणोत्वित्याशीर्वाद एवानेन क्रियते। **प्रस्थाय-इच्छते**। हे ब्राह्मणा यूयं
प्रस्थानं हविषः कृत्वा इन्द्राग्न्युपलक्षितेभ्यो देवेभ्यः सोमं वोचत, अस्माभिरिदं
हुतं हविरित्येवं ब्रूत। किंच ब्राह्मणानुपहवमिच्छतोऽस्मानुपह्वयध्वमित्यनेन
सर्वेषु यजमानर्त्विग्लक्षणेषु भूतेषु मनुष्येषु उपहवमनुज्ञां याचतेऽच्छावाकः।

अथ होतुः 'प्रत्येता वामा'[a] इति मन्त्रेणोपहवदानविधिं[3] सिद्धवत्कृत्य
5.३२-३५ स्तौति—**तं-स्माह**। तमच्छावाकं होता 'प्रत्येता वामा'[a] इति मन्त्रेणानुजानी-
यात्। यस्मात् स होता तेषां ब्राह्मणानां मध्ये प्रधानभूतो भवति। तथात्वं
च 'आत्मा वा एष यज्ञस्य यद्धोता'[b] इत्यादिवाक्यान्तरादवगन्तव्यम्। न च
प्रधानभूतेनोपहवदानेऽपि तदितरैस्तस्यादानादनुपहूतत्वापत्तिः। यद् यतः यं
श्रेष्ठः पुरुषः स्वीकरोति स तदुपजीविभिः सर्वैरपि स्वीकृत एव। 'प्रधाना-
नुरोधित्वस्वाभाव्यादप्रधानानाम्'[c] इति न्यायादिति ह स्माह। विद्वज्जन
इति शेषः॥

इति पञ्चमः खण्डः

अथाच्छावाकस्य स्वचमसोन्नयनवेलायां पठनीयं चतुर्ऋचं सूक्तं विधत्ते—
6.१-६ **प्रत्यस्मै-यज्ञक्रतुः**। यज्ञक्रतोरैन्द्रत्वस्य प्रसिद्धत्वाद् इन्द्रदेवत्यानामृचामस्त्ये-

a. ŚŚ. 7. 6. 6.
b. TS. 6. 6. 1. 5.
c.

1–1. T. ये…येति
2. T. समरणे…मनीत्यस्य
3. T. omits मन्त्रेण

वाभिरूप्यम् । तासामनुष्टुप्छन्दस्त्वं स्तौति—**ता-प्रतितिष्ठति ।** ताः 'प्रत्यस्मै 6.७-१०
पिपीषते'[a] इत्याद्याश्चतस्र ऋचः । याज्यां विधत्ते—**प्रातर्यावभिः-भवति ।** 6.११,१२
इन्द्राग्निदेवत्यया प्रातर्यावभिरित्यनया यागं कुर्यात् । यस्मादस्याच्छावाकस्य उक्थं शस्त्रमिन्द्राग्निदेवत्यं सूक्तं[1] भवति, तस्माद् याज्यायाः तद्देवत्यत्वमभिरूपम् । **गायत्र्या-प्रतिष्ठित्यै ।** गतम् । 6.१३-१५

अथ प्रस्थितयाज्यादेरनुच्छ्वासेन पठनीयतामेकीयमभिमतमुपक्षिपति—
**अनवानं-इति ।** अर्धर्चे विच्छिद्योच्छ्वासं कृत्वा याज्यां होतृहोत्रकाः पठेयुरिति 6.१६,१७
पैङ्ग्यस्य महर्षेर्मतं पक्षः । कस्मादिति चेद् वयं देवेभ्यो हविः प्रयच्छन्तः सन्तोऽनवानं पठने हविरत्तुं त्वरमाणेभ्यो देवेभ्यः क्षिप्रं शीघ्रमेव हविश्चर्वादिकं प्रयच्छाम इत्यनेनाभिप्रायेण । विच्छिद्य विच्छिद्योच्छ्वस्योच्छ्वस्य पाठे हि क्रियमाणे तन्निबन्धनः कियानपि कालविक्षेपो विहितो भवेत् । अनवानं पठने तु तदभावात् क्षिप्रं हविःप्रदानं संपादितं स्यादिति अनवानमेव तत्पाठः । इत्थं पैङ्ग्यस्य महर्षेर्मतम् । तथा चान्यत्र श्रूयते—'अनवानं प्रातःसवने यजेद्' इत्युक्त्वा, 'तद् यथाभिहेषते पिपासते क्षिप्रं प्रयच्छेत् तादृक् तत् । अथो क्षिप्रं देवेभ्योऽन्नाद्यं सोमपीथं प्रयच्छानीति । क्षिप्रं हास्मिन् लोके प्रतितिष्ठति'[b] इति ।

पक्षान्तरमाह—**अर्धर्चशः-प्रयच्छति ।** नानवानेन यागः । किंतु अर्धर्चे 6.१८-२०
अर्धर्चे विच्छिद्य विच्छिद्य **उच्छ्वस्योच्छ्वस्य** याज्यापाठं कुर्यादिति कौषीतकिराह । कुत इति चेत् , अर्धर्च इति यदस्ति तदेतच्छन्दसां पर्व भवति । तथा पुरुषशरीरेऽस्मिन्नङ्गानां करादीनां कानिचित् पर्वाणि सन्धिस्थानानि दृश्यन्ते तथैतच्छन्दसां सन्धिस्थानं भवति । तत् तेनार्धर्चशः याज्यानुवचनेन । छन्दसां तत्र तत्र मध्येऽपि सन्धौ सन्धौ देवेभ्यो हविर्दत्तं भवति । अत एव क्षिप्रं हविःप्रदानमविकृतं संपद्यते । इत्येवं कौषीतकिमुनेर्मतम् ।

a. RV. 6. 42. 1. b. AB. 6. 8. 6–7.

1. T. omits

6.२१ अथर्तुप्रैषविषयं ब्राह्मणं वक्तुं प्रतिजानीते—**अथ-मीमांसा।** प्रैषैर्ऋ-
6.२२-२७ ग्भिर्वा याग इति विचारे निर्णय उच्यत इत्यर्थः। तमेवाह—**कण्वो-यजेत्।** पुरा कण्वनामा[1] विश्रुतः कश्चिन्महर्षिरेतान् 'इन्द्रं होत्रात् सजूः'[a] इत्यादिकान् ऋतुयागविषयान् प्रैषान् दृष्टवान् किल। मेधातिथिनामा पुनर्महर्षिः 'इन्द्र सोमं पिब'[b] इत्याद्या दृष्टवान्। स च मेधातिथिः किल कण्वस्य ऋतुप्रैषद्रष्टुः पुत्र इति श्रूयते। तेन पितृपुत्रयोरेकत्वात् प्रैषाणां याज्यानां चैकद्रष्टृकत्वं सिद्धयति। 'यत्र ह क्व च पुत्रस्य तत् पितुः। यत्र वा पितुः तद् वा पुत्रस्य'[c] इत्याम्नानात्। तेन दर्शनेन हेतुना तौ कण्वमेधातिथी मृत्युं मरणधर्मकत्वं तद्धेतुं च पाप्मानमपहतमकुर्वाताम्। तत्रैवं सति यः पुरुषः मृत्युपाप्मनोऽपहतिं कामयमानो भवति, स एताभिः 'इन्द्र सोमं पिब'[b] इत्याद्याभिः याज्याभिरेव न प्रैषैरेव यागं कुर्यात्।

इत्थं विहितस्यैकाहिकस्य कर्मसमुदायरूपस्य तदवयवेषु लोकप्रसिद्ध-
6.२८,२९ पुरुषावयवत्वसंपादनेन पुरुषरूपत्वं संभावयन् स्तौति—**पुरुषो-आज्यम्।** 'पुरुषो वै यज्ञः' इत्यादिना प्रतिज्ञातं यज्ञस्य पुरुषरूपत्वं साधयितुं तदवयवेषु पुरुषावयवत्वं संपादयति—तस्य वागेवाज्यमिति। तस्य यज्ञरूपस्य पुरुषस्य संबन्धिनी वाक् वाचकशब्दरूपैवाज्याख्यं शस्त्रं भवतीति ध्येयम्। किं तयो-
6.३०,३१ राज्यवाचोः सादृश्यमित्याकाङ्क्षायामाह—**सा-शंसति।** सा परापरा पश्यन्तीत्यादिरूपेण प्रसिद्धत्वात् परमार्थनिरूपणदशायामेकरूपा। बहुरूपत्वस्याभिरूप्यव्यञ्जकवैचित्र्यनिबन्धनत्वान्नानेकरूपा भवति यस्मात्। तस्मादेकदेवत्यम् अग्निरेकैव देवता यस्य तत् 'प्र वो देवाय'[d] इत्येतदाज्यशस्त्रं होता पठेत्। देवतानिबन्धनमेकरूपत्वमाज्यस्य वागात्मत्वे सादृश्यम्। अत्र च वचनभङ्ग्या आज्यशस्त्र एव एकत्वधर्मसंबन्धाद् वाग्रूपत्वं संपादयितव्यमिति चोद्यते। एवमुत्तरत्रापि प्रत्येतव्यम्।

a. APŚ. 11. 19. 6.
b. RV. 1. 15. 1.
c. AA. 2. 1. 8.
d. RV. 3. 13. 1.

1. T. कण्वनाम्ना

आज्यशस्त्रादनन्तरभाविनि प्रउगशस्त्रे प्राणदृष्टिः कर्तव्येत्याह—**प्राणाः–शस्यन्ते**। यदेतत् प्रउगं नाम शस्त्रमस्ति तद् यज्ञपुरुषस्य प्राणाः 6.३२-३४
मूर्धन्या इति प्रत्येतव्यम्। तदेतद् युक्तम्। ते प्रसिद्धाः प्राणाः बहवः सप्तसंख्याका इति प्रसिद्धम्। यस्माद्धेतोर्बह्वृचः सप्तसंख्याका देवता वाय्वाद्याः प्रउगशस्त्रे शस्यन्त इत्युपपन्नम्। सप्तसंख्यायोगोऽत्र प्रउगे प्राणत्वसंपादने निमित्तमिति ॥

इति षष्ठः खण्डः

अथ मैत्रावरुणाच्छावाकयोः बाह्वात्मकत्वं संपादयति—**बाहू–शंसतः**। 7.१-३
अत्र शंसितृशब्दाभ्यां शस्यद्वयं लक्ष्यते। यन्मैत्रावरुणपठनीयमच्छावाकपठनीयं च शस्त्रमस्ति, त एते यज्ञपुरुषस्य बाहुरूपत्वेन ज्ञातव्ये।*

**( इति कौषीतकिब्राह्मणव्याख्याने तृतीयदशके अष्टमोऽध्यायः )**

* इतः परं आध्यायसमाप्ति मातृकासु न दृश्यते।

अथ

## एकोनत्रिंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
प्रातःसवनगं कर्म होत्रकाणामितीरितम् ।
माध्यंदिनगतं तेषामथेदानीं विधास्यते ॥
विदधति सोमाभिषवं
मुखत इहाध्वर्यवः सवने ।
तत्र विधेयं कर्म
ग्रावस्तोतुर्विधातुमारभते ॥

1.१-१२ **अथ–विमुश्चत्सु** । अथशब्दोऽधिकारार्थः । माध्यंदिने सवने होत्रककर्मविधिरधिकृतो वेदितव्य इत्यर्थः । हशब्द ऐतिह्यार्थः । तत् तस्मिन् पूर्ववृत्ते काले कस्मिश्चिद् यत्र सर्वचरुनाम्नि देशविशेषे देवा यज्ञं कृतवन्तः । यद्वा यत्र काले तदिति क्रियाविशेषणम् । तत्र देशे काले वा कद्रवाः पुत्रः कश्चिदर्बुदनामा सर्पो माध्यंदिने सवने प्रवृत्ते सति संप्राप्योक्तवान् किल । किमिति चेत्—हे देवा मद्वचनं शृणुत । युष्माकमस्मिन् यज्ञे एका ग्रावस्तोतृसंबन्धिनी होत्रा होतृवेदविहिता नानुष्ठीयते । युष्माभिस्तन्निबन्धनो न्यूनतादोषोऽनभिज्ञात एव वर्तते । तद्विज्ञापनार्थमहमिदानीमत्रागतवानस्मि । नन्वस्माभिरप्रज्ञातस्वरूपेतिकर्तव्यताकासौ येनानुष्ठीयेतेति चेत्, तां होत्रामहं विजानामि । तेनाहं तां युष्मदर्थे करवाणि । मां यथाविधि ग्रावस्तोत्रार्त्विज्येन स्वीकुरुतेति । ते देवा एवमस्तु इत्युक्त्वा तस्योपहवं कृतवन्तः । उपहूतश्च सोऽर्बुदः एता 'अभि त्वा देव'[a] इत्याद्या ग्रावस्तोत्रा पठनीयाः

a. RV. 1. 24. 3.

सोमाभिषवसाधनभूतग्रावमाहात्म्यप्रतिपादकतया अभिरूपा ऋचो दृष्टवान्। तत्र सोमाभिषववेलायां ग्रावसु प्रवदत्सु प्रकर्षेण व्यक्तं व्यवहरत्सु पुरुषेष्विव शब्दं कुर्वाणेषु सत्सु 'प्रैते वदन्तु'[a] इति पठेत्। तत्राद्यं पदं व्याचष्टे—ते ग्रावाणो वदन्ति। अभिषवे कस्यचिच्छब्दस्य समुद्गमः। अतः 'प्रैते वदन्तु'[a] इत्युक्तिरभिरूपा। स ग्रावस्तोता प्रकर्षेण वदति। एताभिर्ऋग्भिस्तत्प्रशंसाविधानात्। अतः 'प्र वयं वदाम' इत्युपपन्नम्। वयमितीह वदिता ग्रावस्तोता आत्मनि बहुवचनान्तं शब्दं प्रयुङ्क्ते। अस्ति खल्वभिषवकर्मणि तत्कर्तॄणां बृहच्छब्दप्रयोगः। तथा च बौधायनः—'तृतीयस्य तृतीये बृहदुपयन्ति। बृहत् बृहदिति'[b] इति। तस्मिन् काले 'बृहद्वदन्ति मदिरेण'[c] इत्यृचं पठेत्। अथाभिषोतृषु समाप्तेऽभिषवे ग्राव्णो विमुञ्चत्सु निक्षिपत्सु सत्सु 'वि षू मुञ्च'[d] इत्यर्धर्चं पठेत्।

अर्बुदसूक्तगतर्चां संख्यां स्तौति—**ता–अभिसंपद्यन्ते**। अभिषोतृहस्त- 1.१३-१५
संबन्धिन्यः खल्वङ्गुलयो दशसंख्याका भवन्ति। ग्रावाणश्चतुस्संख्याकाः। मिलित्वाङ्गुलयो ग्रावाणश्च चतुर्दश भवन्ति। तत् तथा सति एतदभिषवसाधनं हस्ताङ्गुलीयग्रावसमुदायरूपं चतुर्दशसंख्यान्वितं वस्तु ताश्चतुर्दशसंख्याका
ऋचोऽभिसंपन्ना भवन्ति। सूक्तसंबन्धि[1] छन्दः स्तौति—**ता—ग्रावाणः**। जगत्य 1.१६,१७
इति बाहुल्याभिप्रायः। जगत्या भूमेरुत्पन्नत्वेन ग्राव्णां जागतत्वम्। तेनैकनाम्ना अन्वयादाभिरूप्यम्। 'सुपर्णा वाचम्'[e] इति पञ्चमी। 'दशावनिभ्यः'[f] इति सप्तमी। [2-]'सुते अध्वरे'[g] इत्यन्त्या च त्रिष्टुभः[-2]। शिष्टा जागत्यः। तथा चानुक्रमणिकायाम्—'प्रैते षळूना सर्पोऽर्बुदः काद्रवेयो ग्राव्णोऽस्तौत्। पञ्चम्यन्त्ये त्रिष्टुभौ सप्तमी च'[h] इति। तत्रान्त्या परिधानीया। तां छन्दोद्वारेण

a. RV. 10. 94. 1.
b. BŚ. 8. 1. 21.
c. RV. 10. 94. 4.
d. RV. 10. 94. 14.
e. RV. 10. 94. 5.
f. RV. 10. 94. 7.
g. RV. 10. 94. 14.
h. SA. X. 94.

1. T...बन्धि
2-2. T...पू.

1.१८,१९ स्तौति—**अथ-उपाप्ता।** यदेतत्[1] [2]-त्रिष्टुप्छन्दस्कयर्चा परिधानं ग्रावाभिष्टव-
समापनमस्ति-[2] तेनैव हेतुना सवनोचिता त्रिष्टुप् परिगृहीता भवति। अथो-
1.२०,२१ त्सर्गप्राप्तोपवेशनापवादेन ग्रावस्तुतः स्थितिं विधत्ते—**स-ग्रावाणः।** 'यादृक्
स्तुत्यस्तादृक् स्तोता स्याद्'[a] इति न्यायेन ऊर्ध्वतादितिष्ठत्पुरुषसादृश्येन तिष्ठ-
तामिव भासमानानां ग्राव्णां स्तुतिस्तिष्ठतैव सता ग्रावस्तोत्रा[3] क्रियत इति
श्लिष्यत इत्यर्थः।

अथ येन वाससा सोमो नद्धः तेन कृतमुखपरिवेष्टनेन ग्रावस्तुता वक्त-
1.२२,२३ व्यतामभिष्टवस्य निष्टङ्कयति—**स-अभिष्टौति।** सोऽर्बुदः पूर्वमुष्णीषवान-
पिहितचक्षुः वाससा कृतसमुखशिरोवेष्टन एव ग्राव्णां स्तुतिं निर्वर्तितवान्
किल यस्मात्, तस्मादिदानीमप्युष्णीषवान् कृतसमुखशिरोबन्ध एव ग्राव-
स्तुतिं कुर्यात्। सूत्र्यते हि—'ग्रावस्तुत् पूर्वया द्वारा हविर्धाने प्रपद्योत्तरस्य
हविर्धानस्य दक्षिणं चक्रमग्रेण दक्षिणामुखस्तिष्ठन् सोमोपनहनेन मुखं परि-
वेष्टय ग्रावघोषं श्रुत्वा संप्रेषितोऽभिष्टौत्यसंतन्वन्नर्धर्चशोऽनवानं वा'[b] इति।

1.२४-३० इदानीं पावमानीनां ऋचां पठनं विधातुमाह—**अथो-भिषज्यायै।**
अथो अपि च। अत्राख्यायिकाविषये अपरमपि वृत्तमाख्यायिकाविद आहुः।
किमिति चेत्। सोऽर्बुदनामा सर्पः ऋषिरपि जातिस्वभावसामर्थ्याच्चक्षुर्हा
बभूव। चक्षुषा दर्शनेनैव सर्वान् हन्तीति चक्षुर्हा। तत् तथा सति तस्मिन्
यज्ञे सत ऋत्विजः कर्मभूतान् तद्वीक्षणमात्रसमुद्भूतं विषं कर्तृ प्राप्तवत्।
अपीयायेति केषांचिद् आम्नायः। तथा च तत् स्वयमेव सोऽर्बुदाख्यः सर्पः
तत्प्राप्तस्य विषस्यापनोदनसाधनं विचार्य निश्चित्य एताः प्रसिद्धा विषशम-
यित्रीः पावमानीर्ऋचो मध्येऽर्बुदसूक्तं पठितवान्। तेन तेषु संक्रान्तमात्रमेवा-
त्मीयं विषं निःशक्तिकमकरोदित्येवमाख्यायिकाविद[4] आहुः। तस्मादिदानीं
पावमान्य ऋचः पठितव्याः। तत् तत्र यत् पावमानीनां पठनमस्ति तेन यज्ञस्य
शान्तिः सुखसंपादनस्वाभाव्यं यजमानस्य विषजनिततापापनुत्तिश्च संपद्यते।

a.

b. Ś S. 7. 15. 2.

1. T. omits ( gap )

2–2–T...स्ति

3. T. omits ग्राव

4. T. omits विद

अत्र च शंसनक्रमः सूत्रपर्यालोचनयावगन्तव्यः। अत्रार्बुदस्य च पावमानीनां च शंसनमात्रं विहितम्। पूर्वं 'देवा अर्बुदेन'[a] इति क्रमप्रदर्शनमात्रार्थः प्रासंगिकस्तद्विधिः। इह तु होत्रकप्रकरणे ग्रावस्तुतः कर्मणः प्राधान्येन विधिरिति विशेषोऽवसेयः॥

इति प्रथमः खण्डः

ग्रावस्तोतुः कर्म
व्यधायि पूर्वं क्रमाश्रयादधुना।
माध्यंदिनसवनजुषो
दधिघर्मादेर्विधिं प्रदर्शयति॥

**अथ-ब्राह्मणम्।** पवमानो माध्यंदिनश्छन्दोगानां प्रसिद्धः। तेन स्तवने 2.१
कृते सति दधिघर्माख्येन हविषा चरन्त्यध्वर्यवः। तस्य दधिघर्मयागस्य 'अत्र
कालो हि'[b] इत्याद्युक्तमेव ब्राह्मणं द्रष्टव्यम्। पशुपुरोळाशानन्तरं सवनीय-
पुरोळाशयागं विधत्ते—**अथ-ब्राह्मणम्।** तस्या हविष्पङ्क्तेः 'पशवो वै'[c] 2.२
इत्यादिकमुक्तमेव ब्राह्मणम्। अथ 'असावि देवम्'[d] इत्युन्नीयमानसूक्तं
विधत्ते—**वासिष्ठीः-पुरोनुवाक्यारूपेण।** वासिष्ठीर्वसिष्ठेन दृष्टाः तद्दृष्ट 2.३-५
षष्ठमण्डलान्तर्वर्तित्वात् 'असावि देवम्'[d] इत्याद्याः। 'गृभादा दूरउपब्दः'[e]
इत्याङुपसर्गवत्यः। 'हर्यश्व'[f] इति हरिवत्यः। व्याख्यातमन्यत्।

अथैता देवताश्छन्दोद्वारेण स्तौति—**ता-सवनम्।** ता इन्द्रदेवत्या 2.६,७
त्रिष्टुप्छन्दस्काश्च भवन्ति। तद्युक्तम्। यस्मान्माध्यंदिनं सवनमिन्द्रस्य स्वभूतं
त्रिष्टुप्संबन्धि च तस्मादभिरूपाः। ऋचां संख्यां स्तौति—**ता-उन्नयन्ति।** 2.८,९

a. KB. XV. 1. १.
b. KB. XV. 1. ६.
c. KB. XIII. 1. १०.
d. RV. 7. 21.
e. RV. 7. 21. 2.
f. RV. 7. 21. 1.

2.१०-१२ अत्र माध्यंदिने सवने उन्नयन्त्यध्वर्यवः। **अथ-सवनम्**। 'पिबा सोमम्'[a] इति होतुः। 'स ईं पाहि'[b] इति प्रशास्तुः। 'एवा पाहि'[c] इति ब्राह्मणाच्छंसिनः। 'अर्वाङेहि'[d] इति पोतुः। 'तवायं सोमः'[e] इति नेष्टुः। 'इन्द्राय सोमाः'[f] इत्यच्छावाकस्य। 'आपूर्णो अस्य'[g] इत्याग्नीध्रस्य। गतमन्यत्। **अनुवषट्-**
2.१३-१७ **कुर्वन्ति-ब्राह्मणम्**। 'अथेळामुपह्वयते। उपोद्यच्छन्ति'[h] इत्यादिकमिळाविषयं ब्राह्मणम्। 'अथाप आचम्य होतृचमसं भक्षयति'[i] इत्यादिकं होतृचमसविषयम्। 'अत्रापवर्गो हि'[j] इत्यादिकं दक्षिणाविषयम्। 'वैश्वामित्रीम्'[k] इत्यादिकं मरुत्वतीयग्रहपुरोनुवाक्याविषयम्। गतमन्यत्॥

इति द्वितीयः खण्डः

अथ क्रमेण होत्रकाणां त्रयाणां शस्त्रं विधास्यन् स्तोत्रियानुरूपविध्यभिप्रायेण यथाक्रमं छन्दोगविहितान्यपि सोमसंबन्धितया तत्तच्छस्त्रसंव्यवहारार्थं
3.१-११ **स्तोत्राणि** विधत्ते—**वामदेव्यम्-आप्त्यै**। वामदेव्यं नाम सामास्ति वामदेवदृष्टायामृच्युत्पन्नत्वात्। तन्मैत्रावरुणशस्त्रस्य स्तोत्रं भवति। 'वाजपेयस्य यूपः'[l] इतिवत् मैत्रावरुणस्य पृष्ठमित्यत्र व्यवधानेन संबन्धः। तथा सामगानां स्थितेः। शान्तिर्वा इत्यादि गतम्। नौधसमित्यपि सामविशेषस्य नाम। सर्वत्रापि सामाश्रयाद् द्रष्टृनाम्ना साम्नो व्यपदेशः। नोधसा दृष्टायां 'तं वो दस्मम्'[m] [1-]इत्यस्यामुत्पन्नत्वात्। [निधनं] नाम[-1] सामभक्तिविशेषः। 'सर्वे निधनमुपयन्ति'[n] इति सामग्रन्थश्रुतम्। तेन निधनेन तद्वत् तद्युक्तं तन्नौधसं

a. RV. 6. 17. 1.
b. RV. 6. 17. 2.
c. RV. 6. 17. 3.
d. RV. 1. 104. 9.
e. RV. 3. 35. 6.
f. RV. 3. 36. 2.
g. RV. 3. 32. 15.
h. KB. XIII. 6. २-३.
i. KB. XIII. 6. १४.
j. KB. XV. 1. १८.
k. KB. XV. 1. २७.
l.
m. RV. 8. 88. 1.
n. ŚŚ. 8. 10. 3.

1-1. T. इत्यस्याम...नाम

साम भवति । तत्र निधनं प्रतिष्ठा समाप्तिहेतुत्वात् । अतः [2]-प्रतिष्ठाहेतुर्भवति । कालेयं कलिना दृष्टत्वात् तन्नाम साम-[2] । तदच्छावाकस्य स्तोत्रं भवति । तदिळासम्बन्धादैळमिति प्रसिद्धं सत् बृहतीछन्दस्कास्वृक्षु सामगाः कुर्वन्ति । तत्रेळा पशव एव। 'इळेरन्ते सरस्वति'[a] इत्यादिपशुनामत्वात् । पशुहेतुत्वाद् वा । बृहती च पशव एव तद्धेतुत्वात् । तद्धेतुत्वं संख्यासाम्यात् । षट्त्रिंशदक्षरा हि बृहती । तत्संख्यायाश्च पशुहेतुत्वमन्यसामिधेनीविधिप्रकरणे श्रूयते—'षट्त्रिंशतमनुब्रूयात् पशुकामस्य'[b] इति । पशवश्च बार्हताः । तत् 'छन्दांसि पशवश्चाजिमयुः । तान् बृहत्युदजयत् । तस्माद् बार्हताः पशव उच्यन्ते'[c] इत्यन्यत्र श्रुतम् । तस्मात् तत् साम पशुप्राप्तिहेतुर्भवति । अनेन त्रयाणां स्तोत्रियानुरूपविधिरर्थात् कृतोऽवगन्तव्यः । 'कया नश्चित्र'[d] 'कया त्वं न'[e] इति मैत्रावरुणस्य । 'तं वो दस्मम्'[f] 'तत् त्वा यामि'[g] इति ब्राह्मणाच्छंशिनः । 'तरोभिर्वो'[h] 'तरणिरित् सिषासति'[i] इत्यच्छावाकस्य इति । त्रयाणां
सामप्रगाथान् विधत्ते—**अथ-भवति ।** अनुरूपशंसनानन्तरं त्रयो होत्रकाः 3.१२,१३
सामप्रगाथान् शंसेयुः । तथा सामप्रगाथपठने कृते सति यो होतुर्न्यायः स्तोत्रियानुरूपशंसनानन्तरं सामसंबन्धिप्रगाथपठनरूपः तस्मादनितमपगमनाभाव एषां होत्रकाणां सिद्धो भवति । होतृवद्धि होत्रकाणां शस्त्रपरिपाट्यापि भवितव्यम् । तत्र 'कस्तमिन्द्र'[j] इति मैत्रावरुणस्य, 'उदु त्ये मधुमत्तमाः'[k] इति ब्राह्मणाच्छंसिनः, 'उदिन्न्वस्य रिच्यते'[l] इत्यच्छावाकस्य ।

मैत्रावरुणाच्छावाकाभ्यां सामप्रगाथानन्तरपठनीये उक्थमुखाख्ये तदनन्तरपठनीये पर्यासाख्ये च सूक्ते विद्यमानानाम् ऋचां संख्यां स्तौति—**पञ्चर्चे-**

a. PB. 20. 15. 15.
b. TS. 2. 5. 10. 3.
c. TS. 5. 3. 2. 3-4.
d. RV. 4. 31. 1.
e. RV. 8. 93. 19.
f. RV. 8. 88. 1.
g. RV. 8. 3. 9.
h. RV. 8. 66. 1.
i. RV. 7. 32. 20.
j. RV. 7. 32. 14.
k. RV. 8. 3. 15.
l. RV. 7. 32. 12.

2-2. T. प्रतिष्ठावलो...नाम साम

3.१४-१६ **कुर्वतः** । ये मैत्रावरुणस्याच्छावाकस्य चोक्थमुखाख्ये 'सद्यो ह जातः'[a] 'भूय इद् वावृधे'[b] इति सूक्ते स्तः ते उभे अपि खलु पञ्चर्चे भवतः । ये पुनर्द्वयोः 'एवा त्वामिन्द्र'[c] 'इमामू षु'[d] इति पर्यासाख्यसूक्ते ते खल्वेकादशर्चे भवतः । किमत इति चेत्, एतेनोक्थमुखपर्याससूक्तयोः परिमाणसाम्यसंपादनेन तौ मैत्रावरुणाच्छावाकौ अन्तौ होत्रकशस्त्राद्यवसानावधी सदृशावेकरूपौ कुर्वत एव । उचितं खलु उपक्रमोपसंहारैकरूप्यम् ।

इदानीं त्रयाणां क्रमेणोक्थमुखपर्याससूक्तानि तद्दृष्टृविशिष्टर्षिचतुष्टय-
3.१७-२४ संबन्धस्तुतिमुखेन विधत्ते—**विश्वामित्रस्य-प्रजात्यै** । अत्र विश्वामित्रादिशब्दाः तद्दृष्टृसूक्तगामिनो द्रष्टव्याः । षष्ठ्यश्च द्वितीयार्थे । अथ वा सूक्तपदाध्याहारेण[1] योज्यं विश्वामित्रसूक्तमित्यादि । एवमृषीणामित्यत्रापि । अत्र विश्वामित्रस्त्रिष्वपि साधारणः । वामदेववसिष्ठभरद्वाजास्तु क्रमेण प्रत्येकं संबन्धितया साधारणाः इति मिलित्वा चत्वार ऋषयो भवन्ति । मैत्रावरुणः 'सद्यो ह जातः'[a] इति वैश्वामित्रं सूक्तं पूर्वं पठित्वा वामदेवार्षमेव **'आ न इन्द्रः'**[e] इति सूक्तं पठेत्। तच्च युक्तमस्य वामदेव्यसूक्तशंसनम् । यस्मादस्य पृष्ठस्तोत्रं वामदेव्यं भवति । न चैवमेव वैश्वामित्रशंसनेऽपि हेतुर्वचनीय इति शङ्क्यम् । वेदस्यापर्यनुयोज्यत्वात् । ब्राह्मणाच्छंसी 'इन्द्रः पूर्भिद्'[f] इति वैश्वामित्रं पूर्वं पठित्वा 'उदु ब्रह्माणि'[g] इति वासिष्ठं पठेत् । किमनेन वासिष्ठं पठ्यत इति चेत्, किं न पश्यसि ? यस्मादस्य ब्राह्मणाच्छंसिन 'उदु ब्रह्माणि'[g] इति पर्यासो वासिष्ठो भवति । अच्छावाको 'भूय इद्'[h] इति भारद्वाजं पठित्वा 'इमामू षु'[d] इति वैश्वामित्रं पठेत् । आचतुरमित्यादि व्याख्यातम् ।

a. RV. 3. 48. b. RV. 6. 30.
c. RV. 4. 19. d. RV. 3. 36.
e. RV. 4. 20. f. RV. 3. 34.
g. RV. 7. 23. h. RV. 6. 30.

1. T. सूक्त पदेत सारेण (?)

त्रयाणां शस्येषु साधारणं विश्वामित्रसंबन्धं स्तौति—**वैश्वामित्रे-ब्राह्मणम्।** मैत्रावरुणस्य 'सद्यो ह जातः'[a] इति। ब्राह्मणाच्छंसिन 'इन्द्रः पूर्भिद्'[b] 3.२५-२८
इति वैश्वामित्रमुक्थमुखम्। अच्छावाकस्य 'इमामू षु'[c] इति पर्यासो वैश्वामित्रः। एतेषां विश्वामित्रदृष्टमण्डलान्तर्भावित्वात्। विश्वामित्रस्य वाग्रूपत्वं प्रागुक्तम्। तत् तेन विश्वामित्रशंसनेन होत्रकाः सर्वत्र प्रत्येकं स्वात्मनि पर्यवसितं शस्त्ररूपं यज्ञं तन्वते विस्तारयन्ति। इत्येवमेतत्प्रकृतिविषयं ब्राह्मणमुक्तं वेदितव्यम्। इत्यग्निष्टोमसंस्थहोत्रकविध्युपसंहारः॥

इति तृतीयः खण्डः

इह विकृतिषु सत्राहीनरूपेषु माध्यं-
दिनसवननिविष्टां होत्रकाणामभीष्टाम्।
स्फुटतरमथ खण्डैः पञ्चभिः शस्त्रक्लृप्तिं
वदति तदुभयात्मद्वादशाहाश्रयेण॥

तत्र तावदतिरात्रपुटितपृष्ठ्यषळहच्छन्दोमदशमाहरात्मकदशरात्ररूपद्वादशाहाद्यन्तर्वर्तिनोरतिरात्रयोः ऐकाहिकीमुक्तामेव शस्त्रक्लृप्तिमतिदिशन्नाह—
**प्रायणीयोदयनीययोः-भवति।** चकारोऽन्यसमुच्चयार्थः। तच्चान्यत् सत्रा- 4.१
हीनात्मकत्वं प्रकरणसामर्थ्यात्। न केवलं द्वादशाहाद्यन्तर्वर्तिनोरतिरात्रयोः सत्रात्मकत्वमहीनात्मकत्वं वा, ऐकाह्यमेकाहत्वं च भवति। अनेन तयोरेकाह उक्तैव शस्त्रकल्पना द्रष्टव्या। नान्या काचित्। ततश्च तयोर्न किंचिद् विशेषतो वक्तव्यमस्तीत्युक्तं भवति।

एतावतैवातिरात्रयोर्वक्तव्यं परिसमाप्तमिति कृत्वा दशरात्रविषये होत्रकाणां क्रमेण शस्त्रक्लृप्तिं चिकीर्षुः मैत्रावरुणस्य तावन्माध्यंदिने स्तोत्रियानु-
रूपविधिमुन्नयति—**वामदेव्यं-क्रियते।** मैत्रावरुणस्य अहन्यहनि वामदेव्याख्यं 4.२-४

a. RV. 3. 48. b. RV. 3. 34.
c. RV. 3. 36.

साम माध्यंदिनेषु स्तोत्रं भवति । ततश्चोत्सर्गतोऽहरहः 'कया नश्चित्रः'[a] 'कया त्वं नः'[b] इति स्तोत्रियानुरूपौ मैत्रावरुणस्य सिद्धौ । गतमन्यत् ।

अथ त्रयाणां होत्रकाणां साधारणतया अनुरूपतृचपठनानन्तरं कद्वत्प्रगाथ-
4.५-७ पठनं'[1] विधत्ते—**अथ–यन्ति** । अथानुरूपादनन्तरमेतान् 'कस्तमिन्द्र त्वावसुम्'[c] 'कन्नव्यो अतसीनाम्'[d] 'कदू न्वस्याकृतम्'[e] इत्येतान् क्रमेण मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकाः पठेयुः । कस्तमित्यादिकशब्दश्रवणात् कद्वन्त इति प्रसिद्धाः ।

पूर्वं कशब्दस्य प्रजापतिविषयत्वमङ्गीकृत्यार्थवाद उक्तः । इदानीं सुख-
4.८,९ वाचित्वमङ्गीकृत्य प्रशंसति—**अथो–यन्ति** । एते होत्रकाः । अहीनसंबन्धीनि सूक्तान्यहीनसूक्तानि 'शंसा महान्'[f] इत्यादीनि । अन्यान्यन्यानि न तु सर्वेष्वप्यहःसु समानानि । कद्वत्प्रगाथादि । तथा अशान्तानि । तथात्वं चाहीनसूक्तानां तल्लिङ्गात् । तथाविधान्यहीनसूक्तान्युपयुञ्जानाः शंसन्तः सन्त एते सत्रिणः सत्रकर्म कुर्वन्ति । तेन सत्रिणामनर्थापत्तिहेतूनि तानि भवेयुः । तान्यशान्तान्यहीनसूक्तानि एतैः 'कस्तमिन्द्र'[c] इत्यादिभिः कद्वत्प्रगाथैः शान्तानि कुर्वन्तो होत्रकाः सत्रकर्म कुर्वन्ति । कशब्दस्य सुखवाचित्वात् तत्पदयुक्तानां प्रगाथानामशान्तिधर्मनिरासेन शान्ततासंपादनेन सुखहेतुतासंपादकत्वम् ।

कद्वत्प्रगाथानन्तरमुक्थमुखीयाख्यानां 'अप प्राचः'[g] इत्यादीनां पठनं
4.१०-१२ विधत्ते—**अथ–यन्ति** । तन्त्रे भवास्तन्त्र्याः । न तु सूक्तगतत्रिष्टुभ इवागन्तुक्यः । किंतु तन्त्रे शस्त्रारम्भे नित्यतया संबन्धिन्य उक्थानां शस्त्राणां सूक्तात्मकानां प्रतिपदः प्रारम्भरूपाः । गतमन्यत् ।

4.१३ अथ मैत्रावरुणस्योक्थमुखीयां विधत्ते—**अप–अपनुत्त्यै** । मैत्रावरुणः कद्वत्प्रगाथानन्तरं सुकीर्तिना दृष्टाम् 'अपनुदस्व' इत्येवमपनोदशब्दयुक्ताम् 'अप प्राचः'[g] इत्येतामुक्थप्रतिपदं पठेत् । तच्च पाप्मनोऽपनुत्त्यै निरासायैव

a. RV. 4. 31. 1.
b. RV. 8. 93. 19.
c. RV. 7. 32. 14.
d. RV. 8. 3. 13.
e. RV. 8. 66. 9.
f. RV. 3. 49. 1.
g. RV. 10. 131. 1.

1. T. कद्वत्...पठनं

संपद्यते । शत्रूणां पाप्मरूपत्वात् । 'पाप्मा वा अभिमातिः'[a] इति श्रवणात् ।

अथ ब्राह्मणाच्छंस्यच्छावाकयोर्विधत्ते—**यदार्षेय-यन्ति**। इतरयोर्ब्राह्मणा- 4.१४-१६
च्छंस्यच्छावाकयोः सूक्ते यदार्षेये भवतः, तदार्षेये ऋचौ 'ब्रह्मणा ते'[b] 'उरुं नः'[c] इत्येते यथाक्रममुक्थमुखीये भवतः। ब्राह्मणाच्छंसिनो हि 'इन्द्रः पूर्भिद्'[d] इति सूक्तम् । तद् विश्वामित्रार्षम् । ततः तदार्षी 'ब्रह्मणा ते'[b] इत्येषा तस्योक्थमुखीया भवति । अच्छावाकस्य तु 'भय इद् वावृध'[e] इति भरद्वाजार्षं सूक्तम् । तेन तस्य 'उरुं नः'[c] इत्येषा भारद्वाज्येवोक्थमुखीया कर्तव्या । अनयोरुक्थमुखीययोः शंसनेन ब्रह्मणि परिवृढे जगत्कारणे वस्तुनि मुख्ये वा । उरुगाये उरुभिर्बहुभिर्गीयते स्तूयत इतीन्द्र उरुगायः । तस्मिंश्च क्रमेण अहन्यहनि प्रतिष्ठां परिसमाप्तिं गच्छन्तः सत्रिणो यन्ति ॥

इति चतुर्थः खण्डः

अथ चतुर्थपञ्चमषष्ठाहःसु उक्थमुखीयात ऊर्ध्वं सूक्तानां पुरस्तात्
शिल्पाख्यया प्रसिद्धानां केषांचित् तृचानां पठनं विधत्ते—**अथ-भवति** । अथो 5.१,२
उक्थमुखीयानन्तरमेतानि 'प्र वो महे'[f] इत्यादीनि शिल्पाख्यानि तृचानि नवरात्रसंबन्धीनि मध्यमे त्र्यहे, न सर्वत्र, शंसेयुः । यस्मादेष मध्यमस्त्र्यहः शिल्पवान् भवति । तथा याज्ञिकप्रसिद्धेः ।

क्रमेण चतुर्थाद्यहःसु शिल्पतृचानि भागेन दर्शयति—**विराजः-अहः**। 5.३-८
चतुर्थेऽहनि त्रयाणामपि होत्रकाणां विराट्छन्दस्का विमदर्षिदृष्टाश्च ऋचः शिखाख्याः शंसनीयाः । पञ्चमेऽहनि पङ्क्तिच्छन्दस्का महापङ्क्तिच्छन्दस्काश्च पठनीयाः।षष्ठेऽहन्यतिच्छन्दश्छन्दस्काः। तदेतद् युक्तम्। यस्माच्चतुर्थमहर्वैराजं भवति । तदुक्तं प्राक् । तस्मात् तत्र विराजां पठनमुचितम् । एवं पञ्चमस्याह्नः पाङ्क्तत्वात् पङ्क्तीनां शंसनं युक्तम् । तथा षष्ठस्याह्नः आतिच्छन्दसत्वात्

a. TS. 2. 1. 3. 5.
b. RV. 3. 35. 4.
c. RV. 6. 47. 8.
d. RV. 3. 34.
e. RV. 6. 30.
f. RV. 7. 31. 10.

तत्रातिच्छन्दसां पठनमुपपन्नम् । तत्र मैत्रावरुणस्य 'प्र वो महे'[a] 'यजामह इन्द्रम्'[b] इति तृचौ चतुर्थेऽहनि । 'प्रो अस्मा'[c] 'उभे यदिन्द्र'[d] इति पञ्चमे । 'इन्द्राय हि द्यौः'[e] इति तृचं षष्ठे । ब्राह्मणाच्छंसिनः 'कदा वसो'[f] 'यो वाचा'[g] इति चतुर्थे । 'आ याहि कृणवाम'[h] 'यो न इन्द्राभितः'[i] इति पञ्चमे । 'त्वया वयं मघवन्'[j] इति षष्ठे । अच्छावाकस्य 'सचायोरिन्द्र'[k] 'इन्द्र सोममिमं पिब'[l] इति चतुर्थे । 'यच्चिद्धि सत्य'[m] 'अव यत् त्वं शतक्रतो'[n] इति पञ्चमे । 'विदुष्टे अस्य वीर्यस्य'[o] इति षष्ठे ।

न केवलमाभिरूप्यमेव, पृष्ठप्रतिष्ठाहेतुत्वादपि प्रशस्तं शिल्पशंसन-
5.९-११ मित्याह—**अथो-यन्ति** । यत् पृष्ठं बृहतीव्यतिरिक्तेऽन्यस्मिन् कस्मिंश्चिच्छन्दसि क्रियते, तत् पृष्ठमेव न भवति । बृहत्यायतनत्वनियमात् पृष्ठानाम् । अत्र च नवरात्रे होत्रकशस्त्रविषये वामदेव्यादीनि पृष्ठानि बृहत्याः सकाशात् च्यवन्ते । गायत्र्यादिच्छन्दोन्तरे तत्करणात् । अतोऽप्रतिष्ठितानि सन्ति पृष्ठानि एतेषु शिल्पतृचेषु प्रतिष्ठितानि कुर्वन्तो यन्ति होत्रकाः ।

5.१२-१४ प्रकारान्तरेण स्तौति—**अथो-यन्ति** । योऽयं मध्यमस्त्र्यहोऽस्ति स एषोऽन्तरिक्षलोक एव, मध्यवर्तित्वसादृश्यात्[1] । इदं चान्तरिक्षमनारम्भणम् । आरभ्यतेऽवष्टभ्यत इत्यारम्भणमालम्बनम् , तद्रहितमनारम्भणम्[2] । अत एवाप्रतिष्ठानम् । प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठानं मूर्तप्रदेशः । तद्रहितम् । अतोऽन्तरिक्षात्मकत्वात् प्रतिष्ठारहितं मध्यमत्र्यहं शिल्पेषु प्रतिष्ठितं कुर्वन्ति सत्रिणः ।

a. RV. 7. 31. 10.
b. RV. 10. 23. 1.
c. RV. 8. 62. 1.
d. RV. 10. 134. 1.
e. RV. 1. 131. 1.
f. RV. 10. 105. 1.
g. RV. 10. 23. 5.
h. RV. 8. 62. 4.
i. RV. 10. 133. 4.
j. RV. 1. 132. 1.
k. RV. 10. 105. 4.
l. RV. 10. 24. 1.
m. RV. 1. 29. 1.
n. RV. 10. 134. 4.
o. RV. 1. 131. 4.

1. T. साध्यत्वात्
2. T. omits अनारम्भणम्

अथ शिल्पानां तृचत्वं स्तौति—**तानि-यन्ति**। शिल्पानि यानि तानि 5.१५-१७
तृचानि भवन्ति इति व्याख्येयम्। 'तानि वै तृचानीति भवन्ति' इति वा पाठे
तु न क्लेशः कश्चित्। मनुष्याणां शिल्पं हि नृत्तगीतवादितभेदेन त्रिप्रकारम्।
तद्वद् देवानां प्रीतिहेतुत्वात् शिल्पशब्दवाच्यानां शस्त्रभागानां तृचत्वं
युक्तमेव।

अथ दशमेऽहनि मैत्रावरुणस्य स्तोत्रियानुरूपौ विधत्ते—**मा-यन्ति**। 5.१८-२२
दशमेऽहनि मैत्रावरुणस्य 'मा चिदन्यत्'[a] 'मा भेम मा श्रमिष्म'[b] इति बृहती-
छन्दस्कास्वृक्षु मैधातिथं साम पृष्ठं भवति। तत्सामाश्रयभूतानामृचां मेधातिथि-
नाम्ना महर्षिणा दृष्टत्वात् साम मैधातिथमित्युच्यते। तदेतत् प्रशस्तम्। यस्मात्
तस्य मैत्रावरुणस्य दशमादह्नः पूर्वं नवस्वहःसु बृहतीषु पृष्ठं भवति।
वामदेव्यस्य गायत्रीषु भावात्। तत्र लोके श्रीरेकस्थैव भवति। एकस्मिन् ग्रामे
देशे वा कस्यचिदेव श्रीमत्तादर्शनात्। **बृहती** च श्रीरेव तद्धेतुत्वात्। 'बृहत्यौ
श्रीकामः कुर्वीत'[c] इति श्रुतेः। तथा सत्येकत्रैव श्रीरूपबृहतीछन्दसि पृष्ठकरण-
मुपपन्नम्। ततश्च दशमस्याह्नोऽन्तवर्तित्वात् तत्र बृहतीषु पृष्ठकरणे अन्ततोऽ
वसाने श्रियामेव फलभूतायां प्रतिष्ठिताः सत्रमनुतिष्ठन्तो भवन्ति सत्रिणः॥

इति पञ्चमः खण्डः

अथ दशमेऽहन्येव सर्वेषां स्तोत्रियानुरूपानन्तरं द्विपदाशंसनं विधत्ते—
**द्विपदाः-एव**। मैत्रावरुणोऽनुरूपादनन्तरम् 'आ धूर्ष्वस्मै'[d] इति द्विपदां शस्त्वा 6.१-३
एकाहे प्रकृतावग्निष्टोम उत्पन्नं 'सद्यो ह जातः'[e] इत्यादिकं शंसेत्। ब्राह्मणा-
च्छंसी 'उदु त्ये मधुमत्तमाः'[f] 'उदिन्न्वस्य'[g] इत्येतौ स्तोत्रियानुरूपौ। 'त्रिकद्रु-
केषु महिषः'[h] इति स्तोत्रियम् 'तव त्यन्नर्यम्'[i] 'तमिन्द्रं जोहवीमि'[j] 'विश्वाः

a. RV. 8. 1. 1.
b. RV. 8. 4. 7.
c. AB. 1. 5. 10.
d. RV. 7. 34. 4.
e. RV. 3. 48. 1.
f. RV. 8. 3. 15.
g. RV. 7. 32. 12.
h. RV. 2. 22. 1.
i. RV. 2. 22. 4.
j. RV. 8. 97. 13.

पृतना अभिभूतरं नरम्'[a] इति संहार्यमनुरूपं वा शस्त्वा 'रायस्कामः'[b] इति द्विपदां शस्त्वा 'इन्द्रः पूर्भिद्'[c] इत्याद्यैकाहिकमेव शंसेत्। अच्छावाकोऽपि स्तोत्रियानुरूपानन्तरं 'अया वाजम्'[d] इति द्विपदां शस्त्वा ऐकाहिकं शंसेत्। इत्थं होत्रकाः सर्वे द्विपदां शस्त्वा ऐकाहिकानि शंसेयुः। प्रतिष्ठा वा इत्यादि गतम्।

इत्थं मैत्रावरुणस्य छन्दोमवर्जं दशरात्रे माध्यंदिनशस्त्रक्लृप्तिं विधायाधुना ब्राह्मणाच्छंसिनस्तां विधत्ते—**नौधसम्-ब्राह्मणम्**। अहरहः पृष्ठं भव-
6.४
तीत्यनुषङ्गः। तस्योक्तं 'तद् वै निधनवद्'[e] इत्यादि ब्राह्मणं द्रष्टव्यमित्यर्थः। तत्र तावत् पञ्चमेऽहनि ब्राह्मणाच्छंसिनः प्रसंगादच्छावाकस्य च स्तोत्रि-
6.५,६
यानुरूपौ दर्शयति—**पङ्क्तिषुः-अहः**। पञ्चमेऽहनि ब्राह्मणाच्छंस्यच्छावाकयोरर्थे सामगाः पङ्क्तिच्छन्दस्कास्वृक्षु साम प्रणयन्ति प्रापयन्ति। तत्र ब्राह्मणाच्छंसिनः 'इन्द्रो मदाय'[f] 'मदेमदे हि नः'[g] इति। अच्छावाकस्य 'स्वादोरित्था'[h] 'इत्था हि'[i] इत्येतौ स्तोत्रियानुरूपौ सिद्धौ भवतः। 'इन्द्रो मदाय मदेमदे इति स्तोत्रियानुरूपौ'[j] इति पञ्चमेऽहनि द्वयोः सूत्रकारेण स्तोत्रियानुरूपयोर्दर्शितत्वात्।

6.७,८
ब्राह्मणाच्छंसिनः षष्ठे स्तोत्रियानुरूपावाह—**गायत्रीषु-रूपेण**। 'सुरूपकृत्नुमूतये'[k] इत्याद्यासु गायत्रीछन्दस्कास्वृक्षु। तदेतद् गायत्रीषु प्रणयनं षष्ठेऽहनि युक्तम्। यस्मादेतद् गायत्रीषु प्रणयनं रैवतपृष्ठसंबन्धिना षष्ठस्याह्नः स्वभूतेन गायत्रीलक्षणेन रूपेण युक्तं भवति। रैवतस्य साम्नो 'रेवतीर्नः'[l] इत्याद्यासु गायत्रीषु गीयमानत्वात्। यद्वा अहःशब्देन साम लक्ष्यते। अथवा रैवतसंबन्धाद् रैवतशब्देन षष्ठमहर्लक्ष्यते।

षष्ठाहःप्रसंगात् त्रयाणामपि साधारण्येन 'आ सत्यो यातु'[m] 'अस्मा

a. RV. 8. 97. 10.
b. RV. 7. 32. 3.
c. RV. 3. 34. 1.
d. RV. 6. 17. 15.
e. KB. XXIX. 3. ५.
f. RV. 1. 81. 1.
g. RV. 1. 81. 7.
h. RV. 1. 84. 10.
i. RV. 1. 80. 1.
j. ŚŚ. 12. 4. 12.
k. RV. 1. 4. 1.
l. RV. 1. 30. 13.
m. RV. 4. 16.

इदु प्र तवसे'[a] 'शासद् वह्निर्दुहितुः'[b] इत्येतान्यहीनसूक्ताख्यानि सूक्तानि क्रमेण विधत्ते—**अहीनसूक्तानि–हीयते**। यदेतद् अहीनसूक्तानां षष्ठेऽहनि शंसनमस्ति 6.९-१२
तदहीनस्य सन्तत्यै भवति। सन्ततिरविच्छित्तिः। षष्ठेऽहनि अहीनसूक्तशंसने हि षण्णामह्नामहीनरूपैकयज्ञात्मकतालक्षणोऽविच्छेदः सिद्धो भवति। किंच अहीनरूपतासिद्ध्यर्थं चाहीनशब्दवाच्य एव हि यज्ञ अहीनसूक्तशंसनमुपपन्नमिति तच्छंसनात् तस्याहीनरूपता सिद्ध्यति। किंच वयमहीनानक्षीणान् संपूर्णानिव सर्वानैहिकामुष्मिकान् कामानाप्ता भवाम इत्यभिप्रायेण अहीनसूक्तानि शंसेयुः। यस्मादत्र यज्ञे न किंचिदङ्गं हीनं भवति। ऋतकरणभूतैः स्तोत्रैः शस्त्रैश्छन्दोभिश्च समृद्धत्वात्। ब्राह्मणाच्छंसिशस्त्रे पर्यासाख्यमन्त्यं सूक्तं विधत्ते—**उदु–यन्ति**। पर्यस्यते समाप्यतेऽनेन शस्त्रमित्यन्त्यसूक्तवाची पर्यासः। 'अन्त्यानि 6.१३-१५
सूक्तान्युत्तरयोः सवनयोः पर्यासा इत्याचक्षते'[c] इति सूत्रितत्वात्। स ब्राह्मणाच्छंसिनोऽहन्यहनि 'उदु ब्रह्माणि'[d] इति भवति। तदिदमुदु ब्रह्मेति शब्दयुक्तं सूक्तम् ऋतव एव भवति षट्संख्यावत्त्वसाम्यात्। **ता–यन्ति**। ऋक्संख्यास्तु- 6.१६-१८
त्यर्थवादः स्पष्टार्थः॥

इति षष्ठः खण्डः

अथाच्छावाकशस्त्रक्लृप्तिं करोति—**कालेयम्–ब्राह्मणम्**। 'तद् वा 7.१
ऐळम्'[e] इत्यादि। षष्ठेऽहनि स्तोत्रियानुरूपौ विधत्ते—**षट्पदासु–रूपेण**। 7.२,३
षट्पदा 'उभे यदिन्द्र रोदसी'[f] इत्याद्याः। तत्र उभे यदिन्द्र इत्याम्नायक्रमेण वा स्तोत्रियानुरूपौ। 'उभे यदिन्द्र रोदसी'[f] 'दीर्घं ह्यङ्कुशम्'[g] 'अव स्म दुर्हणायतः'[h] इति वा। अत्र 'अव त्या बृहतीः'[i] इत्यनुरूपः। षष्ठस्याह्नो रूपं षट्संख्यान्वयित्वलक्षणम्। तेन रूपेण योगः षट्पदानामस्ति। तेनाभिरूप्यं सिद्धं भवति।

a. RV. 1. 61.
b. RV. 3. 31.
c. ŚS. 12. 3. 2.
d. RV. 7. 23.
e. KB. XXIX. 3. ८.
f. RV. 10. 134. 1.
g. RV. 10. 134. 6.
h. RV. 10. 134. 2.
i. RV. 10. 134. 3.

7.४-६ अथास्य पर्याससूक्तमाह—**अभि-यन्ति**। तद्देवत्यत्वात् ताद्रूप्यम् । अस्य
7.७-९ सूक्तस्य देवताविशेषवाचिपदराहित्यं स्तौति—**तद्-रूपम्**। गतमेतत् । अत्र सूक्ते
'शुनं हुवेम'[a] इत्यस्यामृचि **इन्द्रवाचि**पदश्रवणमस्ति । तेन तस्या निरुक्तत्वात्
7.१०-१२ प्राजापत्यरूपवत्त्वव्यभिचारमाशङ्क्य तस्यामपि तत् संपादयति—**सा-रूपम्**।
एकत्वं हि प्रजापते रूपं प्रसिद्धम् । तेन निरुक्ताया अपि ऋच एकत्वरूपसंभ-
वात् प्रजापतिसंबन्धरूपानपोहः सिद्धचति ।
7.१३-१५ ऋक्संख्यां स्तौति—**दशर्चं-दधाति**। यज्ञस्य पुरुषरूपकल्पनामभिप्रेत्य
यज्ञे प्राणानां धारणमुक्तम् । शस्त्रेषु सूक्तविधिं सिद्धवत्कृत्य सूक्तद्वित्वं स्तौति–
7.१६,१७ **द्विषूक्ता-प्रत्युद्यमाय**। मध्यंदिनशब्देन तत्संबन्धि शस्त्रं विवक्ष्यते । द्वे द्वे सूक्ते
येषां ते तथोक्ताः । द्वे द्वे सूक्ते होत्रकाणां माध्यंदिने सवने भवत इत्यर्थः । तच्च
द्विषूक्तत्वम् , द्वे उक्थे शस्त्रे यस्य निष्केवल्यमरुत्वतीयाख्ये तस्य होतुः श्रेष्ठ-
भूतस्यानुवृत्त्यर्थं भवति । होता हि शस्त्रद्वययुक्तो[1] भवति । होत्रकास्तु यद्यपि
तथा न भवन्ति, तथापि एकस्मिन्नपि शस्त्रे सूक्तद्वयवत्तया होतारमनुगता एव
भवन्ति ।
7.१८-२१ द्विषूक्तत्वं विधान्तरेण स्तौति—**अथो-मध्यंदिनाः**। होतुः संवत्सरत्वं होत्र-
काणामृतुत्वम् । प्राधान्यैकत्वगुणत्वबहुत्वादिसाम्यात् । वसन्तं ग्रीष्मं चैकीकृत्य
ग्रीष्म इति आतपवत्त्वसाम्यात् । तथा वर्षाः शरदं चैकीकृत्य वर्षा इति आप्या-
यितत्वसाम्यात् । हेमन्तं शिशिरं चैकीकृत्य हेमन्त इति शैत्ययोगसाम्यात् ।
7.२२-२५ प्रकारान्तरेण स्तौति—**अथो-मध्यंदिनाः**। आत्मा शरीरावयवी । अङ्गानि
बाह्वादीनि । शिष्टं गतम् ॥

इति सप्तमः खण्डः

इदानीं चतुर्विंशादिषु पञ्चस्वहःसु अहीनसूक्तानाम् 'आ सत्यो यातु'[b]
8.१-५ इत्यादीनां शंसनं विधत्ते—**स्तोमातिशंसं-इति**। यथासंख्याविशिष्टं त्रिवृदादि-

a. RV. 3. 30. 22. b. RV. 4. 16. 1.

1. T. शब्द for शस्त्र

स्तोममेकया ऋचा द्वाभ्यां वातीत्य अधिकसंख्यायुक्ततया शंसनं कृत्वा शस्त्राणि पठित्वा पुनर्माध्यंदिनसवनेषु 'आ सत्यो यातु'[a] इत्यादीन्यहीनसूक्तानि होत्रकाः शंसेयुः। क्वेति चेत्, चतुर्विंशादिषु पञ्चस्वहःसु। तस्मादेतान्यहानि चतुर्विंशादीन्यहानि अहीनसंज्ञया याज्ञिकैराख्यायन्ते। तस्मादेष्वहीनसूक्तानां शंसनमुपपन्नम्। द्विविधानि च गावामयनिकानि अहानि, पराञ्चि अभ्यावर्तीनि च। तत्रानभ्यस्तानि पराञ्चीत्युच्यन्ते। अनभ्यासे हि पराङ्शब्दः प्रसिद्धो वेदेषु। यथा 'पराचीः सामिधेनीरन्वाह'[b] 'पराचा हि पवमानेन स्तुवते'[1c] इति। तानि च षळहव्यतिरिक्तानि चतुर्विंशादीनि अभ्यावर्तीन्यावृत्त्या अनुष्ठीयमानानि। तानि च षाळहिकानि, गवामयने हि षळहावृत्तिश्चोद्यते। तत्रैतानि चतुर्विंशादीन्यहानि पराञ्चि भवन्ति। एतेष्वावृत्तेरचोदितत्वात्। पराञ्चीनीत्यनेनैवानभ्यासे सिद्धेऽपि स्पष्टार्थमनभ्यावर्तीनीत्युक्तम्। एतेष्वहःसु माध्यंदिनसवनेषु अहीनसूक्तानि शंसन्तीति यदस्ति तदेतद् वयं पराञ्चो भूमिलोकात् प्रच्युता इहावृत्तिरहिता एव स्वर्गं लोकं गतवन्तो भवामेति परिभयं द्योतयन्तः शंसेयुः। अहीनसूक्तानामभ्यावर्तिषु संभवात् तच्छंसने अभ्यावर्तनोपपत्तेः।

अथ चोदकप्राप्ताभिरैकाहिकाभिः शस्त्रसमाप्तिं विधत्ते—**अहीनसूक्तानि-एव।** स्पष्टम्। अथ छन्दोमेषु माध्यंदिनीयशस्त्रेषु सूक्तसंख्यां 8.६,७
प्रशास्तुः प्रशंसति—**पञ्च-आप्त्यै।** 'सद्यो ह जातः'[d] 'एवा त्वाम्'[e] 'शंसा 8.८-११
महाम्'[f] 'त्वे ह यत्'[g] यन्न इन्द्रः[h] इति प्रथमे पञ्च सूक्तानि। 'युध्मस्य ते'[i] 'कथा महाम्'[j] 'गर्भे नु सन्'[k] 'त्वे ह यत्'[g] 'का सुष्टुतिः'[l] इति मध्यमेऽपि पञ्च। 'सद्यो ह'[d] 'आ न इन्द्रः'[m] 'आ न स्तुत'[n] त्वं महां इन्द्र तुभ्यम्'[o] इत्युत्तमेऽपि पञ्च। 'त्वे ह यत्'[g] इति सर्वत्र एकविंशतिर्ऋचः। होतुरभावे

a. RV. 4. 16. 1.
b. cf. TS. 5. 1. 8. 5.
c. PB. 13. 9. 16.
d. RV. 3. 48.
e. RV. 4. 19.
f. RV. 3. 49.
g. RV. 7. 18.
h. RV. 4. 22.
i. RV. 3. 46.
j. RV. 4. 23.
k. RV. 4. 27.
l. RV. 4. 24.
m. RV. 4. 20.
n. RV. 4. 29.
o. RV. 4. 17.

1. MSS. स्तुवन्ति

'त्वं महाँ इन्द्र'[a] इत्यस्य स्थाने 'आ सत्यो यातु'[b] इति पठेत्। पशूनां छन्दोरूपत्वात् तन्मितानां छन्दोमानां पशुरूपत्वम्। शिष्टं गतम्।

८.१२-१५ **चत्वारि–आप्त्यै।** ब्राह्मणाच्छंसिनः 'इन्द्रः पूर्भिद्'[c] 'असावि सोम'[d] 'इन्द्रं स्तवा'[e] 'उदु ब्रह्माणि'[f] इति मध्यंदिने चत्वारि सूक्तानि प्रथमे छन्दोमे। 'अध्वर्यवो भरत'[g] 'यस्तिग्मशृङ्गः'[h] 'इन्द्रं स्तवा'[e] 'उदु ब्रह्माणि'[f] इति मध्यमे। 'य एक इद्धव्यः'[i] 'अस्मा इदु'[j] 'त्वं महां इन्द्र यो ह'[k] इति वा 'इन्द्रं स्तवा'[e] इति वा 'उदु ब्रह्माणि'[f] इत्युत्तमे। अच्छावाकस्य 'इमामू षु'[l] 'अपूर्व्या'[m] 'इच्छन्ति त्वा'[n] 'अभि तष्टेव'[o] इति प्रथमे चत्वारि। 'य ओजिष्ठः'[p] 'कदा भुवन्'[q] 'इच्छन्ति त्वा'[n] 'अभि तष्टेव'[o] इति मध्यमे। 'सं च त्वे'[r] 'शासद् वह्निः'[s] 'इच्छन्ति त्वा'[n] 'अभि तष्टेव'[o] इत्युत्तमे। शिष्टं गतम्।

८.१६-१९ अथाहावसंख्यां स्तौति—**पञ्चाहावानि–आप्त्यै।** त्रयाणामपि होत्रकाणां माध्यंदिने शस्त्राणि पञ्चाहावानि भवन्ति। अयं माध्यंदिने विशेषः। नेतरयोरिव सवनयोः अत्र चतुराहावानि। 'स्तोत्रियानुरूपाभ्यां यच्चानन्तरमनुरूपात् परिधानीयायै च'[t] इत्यस्यानन्तरमेव 'अनुरूपादनन्तरः प्रगाथः तस्मादूर्ध्वं पञ्चमं मध्यंदिने'[u] इति सूत्रकृतोक्तत्वात्। स्तोत्रियानुरूपाच्च पूर्वमनुरूपादनन्तरं प्रगाथादनन्तरं परिधानीयातः पूर्वं चेति पञ्चसु स्थानेष्वाहावः कर्तव्यः। गतमन्यत्।

a. RV. 4. 17.
b. RV. 4. 16.
c. RV. 3. 34.
d. RV. 10. 104.
e. RV. 10. 89.
f. RV. 7. 23.
g. RV. 2. 14.
h. RV. 7. 19.
i. RV. 6. 22.
j. RV. 1. 61.
k. RV. 1. 63.
l. RV. 3. 36.
m. RV. 6. 32.
n. RV. 3. 30.
o. RV. 3. 38.
p. RV. 6. 33.
q. RV. 6. 35.
r. RV. 6. 34.
s. RV. 3. 31.
t. ŚŚ. 7. 14. 6.
u. ŚŚ. 7. 14. 7.

**ऐकाह्निकाः–प्रतिष्ठित्यै।** 'उशन्नु षु णः सुमना उपाके'[a] 'ऋजीषी वज्री ४.२०-२३ वृषभस्तुराषाट्'[b] 'पिबा वर्धस्व तव घा सुतासः'[c] इत्येता एकाहे अग्निष्टोम उत्पन्नाः एव याज्याः क्रमेण होत्रकाणां स्युः। अन्यद् गतम्। अभ्यासोऽध्याय-समाप्त्यर्थः॥

इत्यष्टमः खण्डः

ब्राह्मणार्थविमर्शेन यथाशक्ति कृतेन मे।
हृद्व्योमगं नुदन् ध्वान्तं प्रीणातु पुरुषोत्तमः॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिवे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
अध्यायो नवविंश आपदवधि कौषीतकिब्राह्मण-
व्याख्याने वदितैष होत्रकविधिं मध्यंदिनस्थायिनम्॥

## इति कौषीतकिब्राह्मणव्याख्याने तृतीयदशके नवमोऽध्यायः

a. RV. 4. 20. 4.
b. RV. 5. 40. 4.
c. RV. 3. 36. 3.

अथ

# त्रिंशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
प्रपन्नकामार्पणकल्पवल्लीभवन्ति यस्मिन् विहिताः प्रणामाः ।
स्मरामि तद् ब्रह्मखलास्पदायाः पदाब्जमस्मत्कुलदेवतायाः ॥
एवं तावदनन्तरातिगतवत्यध्याय ऊचे श्रुतिः
होत्राशंसिविधेयकर्म सकलं माध्यंदिनीयं क्रमात् ।
त्रिंशेऽस्मिन्नथ यत्तृतीयसवने तेषामनुष्ठेयता-
मापन्नं प्रकृतौ यथैव विकृतौ तद्वक्तुमुज्जृम्भते ॥

1.१ **त्रिष्टुभम्-ब्राह्मणम्** । 'आदित्येभ्योऽनुब्रूहि'[a] इत्युक्तः प्रशास्ता 'आदि-
त्यानामवसा'[b] इति पुरोनुवाक्यां पठेत् । तस्यास्त्रिष्टुभो 'बलं वै वीर्यम्'[c]
1.२ इत्यादि यदुक्तं तदेव ब्राह्मणं भवति । **अथ-ब्राह्मणम्** । छन्दोगैरार्भवे
पवमाने स्तुते सति मनोतादिना इळान्तेन पशुकर्मणा चरेयुः । तस्य पशोः
1.३ 'अथ मनोतामन्वाह'[d] इत्यादि ब्राह्मणं द्रष्टव्यम् । **अथ-ब्राह्मणम्** । 'पशवो
वै हविष्पङ्क्तिः'[e] इत्यादि । उन्नीयमानसूक्तं विधत्ते--**वामदेव्याः-**
1.४,५ **प्रोवाच** । वामदेवार्षा 'इहोप यात'[f] इत्याद्याः । सूत्रितं हि—'इहोप
1.६ यातेत्युन्नीयमानसूक्तम्'[g] इति । **ता-पुरोनुवाक्यारूपेण** । 'आगन्

a. ŚB. 4.3.5.20.
b. RV. 7.51.1.
c. KB. VII. 2. २३, etc.
d. KB. X. 9. १.
e. KB. XIII. 1. १०.
f. RV. 4.35.1.
g. ŚS. 8.2.3.

ऋभूणाम्'[a] इत्याङुपसर्गवत्यः । 'शच्या हरी'[b] इति हरिशब्दवत्यः ।

**ता–करोति** । इन्द्र ऋभवश्च देवता आसामित्यैन्द्रार्भव्यः । अर्धं भजति 1.७,८
सेवत इत्यर्धभाक् । **ता–उदयनम्** । प्रायणं प्रारम्भः । उदयनमपवर्गः । यज्ञस्य 1.९-११
प्रारम्भरूपं हि प्रातःसवनम् । तृतीयसवनं समाप्तिरूपम् । प्रारम्भापवर्गयोश्चैकरूप्यं युक्तम् । प्रातःसवने नवर्चः पठिताः । तथैव नव तृतीयसवनेऽपि । तस्मात् संख्यासाम्यादुपक्रमोपसंहारैकरूप्यसंपत्तेर्नवसंख्यत्वमृचां युक्तम्।
**अथ–तृतीयसवनम्** । ता होत्रकाणां प्रपातयाज्या अन्धश्शब्दवत्यः । 1.१२-१४
'मादयध्वं मरुतो मध्वो अन्धसः'[c] इति श्रवणात् । मादयध्वमित्यादि मदिधातुमत्यः । 'सुतपौ सोमं पिबतम्'[d] पीतवत्यः । जगतीछन्दस्काश्च । जागतत्वं
चाभिरूपं सवनस्यास्य जागतत्वात् । **अनुवषट्कुर्वन्ति–ब्राह्मणम्** । सर्वमेतद् 1.१५-१९
गतम् ।

अथ पात्नीवतयागं विधत्ते—**अथ–अनुसमश्नुवाते** । उक्थे वैश्वदेवाग्नि- 1.२०,२१
मारुतशस्त्रे । अन्तरेण शस्त्रयोरन्तरालदेशे । 'अन्तरान्तरेण युक्ते'[e] इति द्वितीया। अग्नीदाग्नीध्रः 'ऐभिरग्ने'[f] इति याज्यां पठेत् । तेन पात्नीवतयागेन तौ आग्नीध्रनेष्टारौ होतारमनुप्राप्तौ भवतः । तदीयशस्त्रयुगलान्तर्वर्तित्वात् । पात्नीवतयागस्य यद्यप्याग्नीध्र एव शब्दतः प्रकृतत्वात् तच्छब्दपरामर्शार्हः, तथापि पात्नीवतशब्देन नेष्टृविशिष्टतया पात्नीवतग्रहाभिधानान्नेष्टुरपि कथंचित् शाब्दत्वमस्त्येवेति सोऽपि कथंचित् तत्पदेन परामृश्यत इति युक्तम् ।
**ऐन्द्राग्नानि–ब्राह्मणम्** । 'इन्द्राग्नी वै सर्वे देवाः'[g] इत्यादि । **अथ–** 1.२२
**आप्त्यै** । अयं कश्चिदुक्थ्येषु विशेषः । अनुरूपादनन्तरमिन्द्रदेवत्यानि जगती- 1.२३-२५
छन्दस्कानि तृचानि सर्वे होत्रकाः शंसेयुः । तानि च प्रकृतौ 'चर्षणीधृतम्'[h] 'अस्तभ्नाद् द्याम्'[i] 'ऋतुर्जनित्री'[j] इति क्रमेण त्रयाणां होत्रकाणाम् । 'ऋतुर्जनित्री' इति सूक्तम् । इतरे तृचे । विकृतौ तु वक्ष्यन्ते । तत्र जगती नाम

a. RV. 4. 35. 2. b. RV. 4. 35. 5.
c. RV. 1. 85. 6. d. RV. 6. 68. 10.
e. Pā. 2. 3. 4. f. RV. 3. 6. 9.
g. KB. XII. 8. २; XVI. 10. २. h. RV. 3. 51. 1.
i. RV. 3. 30. 9. j. RV. 2. 13.

पशव एव। यस्मात् पशवो जागताः जगत्या पूर्वमाहृतत्वात्। तस्माज्जागतत्वं पशूनां प्राप्त्यै संपद्यते ॥

इति प्रथमः खण्डः

इदानीमहर्गणेषु प्राकृतेभ्यः ऐकाहिकेभ्योऽन्यानि जागततृचानि पठितव्या-
2.१-३ नीति पूर्वपक्षमुखेनाह—**तानि-उपयन्ति।** तान्यैन्द्राणि जागतानि एके शाखिनोऽच्युतानि नित्यानि ऐकाहिकान्येव भवेयुर्न ततोऽन्यानीत्याहुः। यस्मात् सवनधरणानि तानि नित्यानि भवन्ति, तस्मात् न च्यावयितुं शक्यानीत्येवं हेतुं वदन्तस्ते तथाहुः। न पुनरेवं युक्तम्। किंतु नित्येभ्योऽन्यान्यन्यान्येवाहन्यहनि जागतानि भवेयुरित्येष सिद्धान्तः। कुतो हेतोरिति चेत्; यस्मादेते सत्त्रिणोऽन्यदन्यदहरनुतिष्ठन्ति, तस्मात् प्रत्येकं भिन्नत्वादह्नां तेषु जागततृचान्यप्यन्योन्यभिन्नान्येव भवेयुरिति।

2.४-६ त्रयाणां जागततृचानन्तरपठनीयं विधत्ते—**अथ-द्विदेवत्यतायै।** जागतादनन्तरं क्रमात् त्रयो होत्रकाः वरुणदेवत्यम् 'अस्तभ्नाद्'[a] इति बृहस्पतिदेवत्यं 'यो अद्रिभिद्'[b] इति विष्णुदेवत्यं 'विष्णोर्नु कम्'[c] इति एतानि शंसेयुः। तत्र तावदेतेषां वरुणादीनां जगती छन्दः स्वभूतम्। विश्वेदेवरूपत्वात्। 'विश्वान् देवान् जगत्या विवेश'[d] इति श्रुतत्वात्। त्रिष्टुप् छन्द इन्द्रस्य स्वभूतं प्रसिद्धम्। एवं सतीह पुनस्ते जगतीत्रिष्टुभौ छन्दसी विपरीते भवतः। इन्द्रस्य जगती वरुणादीनां त्रिष्टुबिति। इन्द्रदेवत्यानां तृचां जगतीछन्दस्कत्वात्। वरुणादिदेवत्यानां त्रिष्टुप्छन्दस्कत्वात्। तदेतद् वैपरीत्यं द्विदेवत्यतायै भवति। जागतानां तृचानामिन्द्रदेवत्यानां जगतीछन्दोद्वारा वरुणादिसंबन्धाद् द्विदेवत्यता सिद्ध्यति। वारुणादीनां त्रिष्टुब्द्वारा इन्द्रसंबन्धाद् द्विदेवत्यता सिद्ध्येदिति।

2.७-९ तदेव द्विदेवत्यत्वं स्पष्टीकुर्वन्नाह—**ऐन्द्रावरुणम्-भवन्ति।** एतैर्द्विदेवत्यैः सूक्तैरैन्द्रावरुणादीन् ग्रहाननुशंसन्ति स्तुवन्त्येव। यस्मादेते ग्रहा एवमिन्द्रा-

a. RV. 8. 42. 1.
b. RV. 6. 73. 1.
c. RV. 1. 154. 1.
d. RV. 10. 130. 5.

वरुणादिसंबन्धितयाध्वर्युणा गृहीता भवन्ति । ऐन्द्रावरुणो ग्रह इत्यादि ।

एवं त्रयाणां सामान्येन विधाय विशेषतो मैत्रावरुणस्य जागतं तृचमाह—
**चर्षणीधृतं-ब्राह्मणम्** । 'पशवो जगती'[a] इत्यादि । पर्याससूक्तं विधत्ते— 2.१०
**वासिष्ठो-भवति** । वसिष्ठार्षः 'आ वां राजानौ'[b] 'पुनीषे वाम्'[c] इति वा । 2.११-१३
तयोर्वसिष्ठदृष्टत्वात् । सूत्रितं हि—'आ वां राजानाविति पर्यासस्तृतीयपञ्च-
मयोः । मध्यमे च छन्दोमे । पुनीषे वामितीतरेषु'[d] इति । पुरा वसिष्ठर्षिः
मैत्रावरुणसंबन्धिन्या होत्रायाः संबन्धि यत् तृतीयसवनं तद्वर्ति शस्त्रमस्ति
तद् दृष्टवान् । तस्माद्धेतोर्मैत्रावरुणस्य वसिष्ठार्षः पर्यासः इत्युपपन्नम् ।
तृतीयेऽहनि मैत्रावरुणस्य स्तोत्रियानुरूपविधिमुन्नयति—**ककुप्सु-एति** । 2.१४,१५
'प्र मंहिष्ठाय गायत'[e] इत्याद्यासु ककुप्छन्दस्कास्वृक्षु सामगा मैत्रावरुणाय
स्तोत्रं कुर्वन्ति । तेनैतेन ककुभां स्तोत्रियानुरूपत्वेन शंसनाद्धेतोः स मैत्रावरुणः
ककुप्संबन्धिनो ब्राह्मणाच्छंसिनो वशमुपजीवनीयतां गच्छति । तद्वशवर्तित्व-
मन्तरेण तदीयोपादानस्याशक्यसाधनत्वस्य प्रसिद्धत्वात् । उष्णिक्ककुभोस्तुल्या-
क्षरत्वाद् एकत्वं मत्वेयमुक्तिः । तेन 'प्र मंहिष्ठाय गायत'[e] 'प्र सो अग्ने'[f]
इति स्तोत्रियानुरूपौ तृतीयेऽहनि भवत इति सिद्ध्यति ।

त्रयाणामपि चतुर्थेऽहनि स्तोत्रियानुरूपौ विधत्ते—**अथ-यन्ति** । तृतीय- 2.१६,१७
स्याह्नोऽनन्तरं चतुर्थेऽहनि त्रयाणामपि स्वीये स्वीय एव गायत्रीषु उष्णिक्ष्वनु-
ष्टुप्सु च क्रमेण सामानि सामगाः प्रणयन्ति । अत्र मैत्रावरुणब्राह्मणा-
च्छंस्यच्छावाकानां गायत्र्युष्णिगनुष्टुप्संबन्धितां सिद्धवत्कृत्य स्वे स्वे छन्दसी-
त्युच्यते । एतदेव स्पष्टीकृत्याह—**गायत्रीषु-अभ्युद्यन्ति** । गायत्रीषु 'अग्निं वो 2.१८,१९
वृधन्तम्'[g] इत्याद्यासु । उष्णिक्षु 'वयमु त्वामपूर्व्य'[h] इत्याद्यासु । अनुष्टुप्सु 'इम-
मिन्द्र सुतं पिब'[i] इत्याद्यासु । तेषां होत्रकाणां उत्तरोत्तरितायै परोवरीय-
स्त्वाय भवति । यस्मात्तथा तेन प्रकारेण तेषां संबन्धीनि छन्दांसि गायत्र्या-

a. KB. XVIII. 5. ६.
b. RV. 7. 84.
c. RV. 7. 85.
d. ŚŚ. 12. 10. 5-6.
e. RV. 8. 103. 8.
f. RV. 8. 19. 30.
g. RV. 8. 102. 7.
h. RV. 8. 21. 1.
i. RV. 1. 84. 4.

दीनि प्रत्येकं क्रमाच्चतुस्संख्यैरक्षरैरभ्युद्यतानि अधिकानि भवन्ति । गायत्र्या अधिका चतुर्भिरक्षरैरुष्णिक् । तस्या अप्यधिका अनुष्टुप् । चतुर्विंशत्यष्टाविंशतिद्वात्रिंशदक्षरत्वाद् गायत्र्युष्णिगनुष्टुभाम् । अत्र मैत्रावरुणस्य 'अग्निं वो वृधन्तम्'[a] 'अग्निं स्तोमेन'[b] इति स्तोत्रियानुरूपौ । 'वयमु त्वामपूर्व्य'[c] 'यो न इदमिदम्'[d] इति ब्राह्मणाच्छंसिनः । 'इममिन्द्र सुतं पिब'[e] 'पिबा सोमं मदाय कम्'[f] इत्यच्छावाकस्य । मैत्रावरुणस्य पञ्चमेऽहनि स्तोत्रियानुरूपावाह—
2.२०,२१ **पङ्क्तिषु-अहः** । अत्र 'आ ते अग्न इधीमहि'[g] 'सो अग्निर्यो वसुर्गृणे'[h] 'अग्निं तं मन्ये यो'[i] इति स्तोत्रियाः । 'आ ते अग्न ऋचा'[j] इत्यनुरूपः । गतमन्यत् ॥

इति द्वितीयः खण्डः

3.१,२ अथ त्रयाणां षष्ठेऽहनि स्तोत्रियानुरूपावाह—**द्विपदासु-अहः**। सर्वेषां होत्रकाणां द्विपदासु साम प्रणयन्ति सामगाः । षष्ठमहः द्विपदां संबन्धि यस्माद् भवति तस्माद् द्विपदासु प्रणयनं युक्तम् । पुरुष एव षष्ठमहरित्युक्तम् । पुरुषस्य च द्विपदत्वाद् द्वैपदत्वं षष्ठस्याह्नो युक्तम् । मैत्रावरुणस्य 'अग्ने त्वं नः'[k] इति तिस्रः स्तोत्रियाः । तत्र तृतीयामुद्धृत्य चतुर्थीं कुर्यात् । 'अग्ने भव'[l] इत्यनुरूपः । ब्राह्मणाच्छंसिनः 'इमा नु कम्'[m] इति स्तोत्रियः । 'हत्वाय देवाः'[n] 'प्रत्यञ्चमर्कम्'[o] 'अया वाजम्'[p] इति तिस्रोऽनुरूपाः । अच्छावाकस्य 'प्र व इन्द्राय वृत्रहन्तमाय विश्वतो दावन्'[q] इति । प्रसङ्गात् साम्नां

a. RV. 1. 102. 7. b. RV. 5. 14. 1.
c. RV. 8. 21. 1. d. RV. 8. 21. 9.
e. RV. 1. 84. 4. f. RV. 8. 95. 3.
g. RV. 5. 6. 4. h. RV. 5. 6. 2.
i. RV. 5. 6. 1. j. RV. 5. 6. 5.
k. RV. 5. 24. 1. l. RV. 7. 17. 1.
m. RV. 10. 157. 1. n. RV. 10. 157. 4.
o. RV. 10. 157. 5. p. RV. 6. 17. 15.
q. ŚS. 12. 26. 9.

द्विपदासु क्रियमाणानां नाम संख्यां च दर्शयति—**अथो–कुर्वन्ति।** 3.३

इदानीं षष्ठेऽहनि सहचरतया वेदवित्प्रसिद्धानां नाभानेदिष्ठवालखिल्या-वृषाकप्येवयामरुतां लौकिकनृत्तादिशिल्पतुल्यतया शिल्पशब्दवाच्यानां शंसनं विधित्सुराह—**अथो–इति।** द्विपदाभिः सह चरन्ति नित्यमेव संबद्धानि वर्तन्त 3.४-६
इति द्विपदासहचराणि। तथा भवन्तीति वेदवित्प्रसिद्धानि खलु शिल्पानि भवन्ति। तस्माद्धेतोः द्वैपदानन्तरं वालखिल्यादीनि शिल्पानि शंसेयुः। शिल्पानामशंसने कृते वयं शिल्पेभ्यः सकाशाद् गतवन्तो भवेम इति परिभयाच्छिल्पानि शंसेयुः। तत्र प्रथमं होतृकृतस्य नाभानेदिष्ठशंसनस्य रेतःसिक्तिरूपतां तावदाह—
**नाभानेदिष्ठेन–विकरोति।** नाभानेदिष्ठस्य 'इदमित्था'[a] इत्यादिकस्यानिरुक्त- 3.७-९
त्वाद् गुप्तरेतःसिक्तिसारूप्यस्य विद्यमानत्वात् ताद्रूप्योक्तिः। तत् सिक्तं रेतो होता मैत्रावरुणाय ददाति त्वमेतद्विकृतं कुर्विति। स मैत्रावरुणस्तद्रेतो वाल-खिल्याभिर्विकृतं करोति। वालखिल्याः 'अभि प्र वः सुराधसम्'[b] इत्यष्टौ सूक्तानि। रेतःसेकादनन्तरमेतद्विकारः। नाभानेदिष्ठानन्तरं वालखिल्यानां शंसनमिति वालखिल्यानां सिक्तरेतोविकारहेतुत्वम्।

तच्छंसने विशेषमाह—**अथ–शंसति।** विहारो नामान्यसूक्तगतानामृचामन्य- 3.१०
सूक्तपादादिभिः संधायाम्नानमिति तस्यानियमे प्राप्ते उच्यते—**पच्छः–संभरति।** 3.११,१२
प्रथमे इति प्रथमद्वितीये उच्येते। ते पादं पादं विहरन् शंसेत्। प्रथमस्य सूक्तस्य प्रथमामृचं द्वितीयस्य प्रथमाया ऋचः प्रथमेन पादेन सन्धायावस्यति। द्वितीया-भ्यां प्रणौति। ततस्तृतीयाभ्यामवस्यति। ततश्चतुर्थाभ्यां[1] प्रणौति। एवं प्रथमद्वितीययोर्विहारः। तद्यथा—'अभि प्र वः सुराधसं [2-]प्रसुस्तुतं सुराधसम्[-2]। इन्द्रमर्च यथाविदेऽर्चाशिक्रमभिष्टये। यो जरितृभ्यो मघवा पुरूवसुः यः सुन्वते स्तुवते काम्यं वसु। सहस्रेणेव शिक्षति सहस्रेणेव मंहतो शतानीके' इत्यादि। तत् तेन। एनं गर्भम्। पर्वशः पर्वणि पर्वणि सन्धौ सन्धौ। संभरति संभृतं

a. RV. 10. 61. 1. b. RV. 8. 49.

1. T. चतुर्था for चतुर्थाभ्यां 2–2. T omits

3.१३ करोति । **अर्धर्चशो द्वितीये।** तृतीयचतुर्थे अर्धर्चशो विहरेत् । तद्यथा—'यथा
3.१४,१५ मनौ सांवरणौ यथा मनौ विवस्वति' इति । **द्वे-संदधाति।** लोके पुरुषः पुरुष-
शरीरं द्वे कपले दक्षिणोत्तरकपालात्मकार्धद्वयात्मकं भवति। तेनार्धर्चशो
3.१६ विहरणेन ते कपले एव संहिते करोति । **ऋचं-तृतीये** पञ्चमषष्ठे सूक्ते
ऋक्छो विहरेत् । 'एतत् त इन्द्र वीर्यम्'[a] 'उपमं त्वा मघोनाम्'[b] इति ।
3.१७ **कृत्स्नम्-संभरति।** तेन ऋक्छो विहरणेनैनं गर्भं कात्स्न्र्येन संभृतं करोति।
3.१८,१९ **विपर्यस्येत्-जायन्ते।** सप्तमाष्टमे नाराशंसाख्ये सूक्ते आम्नायक्रमातिलङ्घनेन
वैपरीत्येन पठेत् । अष्टमं शस्त्वा सप्तमं शंसेत् । यस्मादेवं तस्माज्जननकाले
गर्भाः गर्भपात्रे पूर्वमूर्ध्वशीर्षतयावस्थिता वैपरीत्येन अधःशीर्षतया यथा योनौ
शिरः पूर्वं निर्गच्छति तथा जायन्ते ।

अथ 'त्यमू षु वाजिनं देवजूतम्'[c] इति तार्क्ष्यशंसनविधिसिद्धवत्कारेण
3.२०-२३ दूरोहणशंसनं विधत्ते—**तार्क्ष्ये-रोहन्ति।** तार्क्ष्यसूक्ते 'त्यमू षु'[c] इत्यस्मिन्
उत्तमायां परिशिष्य 'हंसः शुचिषद्'[d] इत्यस्यां दूरोहणं रोहेत्। तस्य प्रकारो
विषुवति विस्तरेण विहितम् । तत्र योऽयं तार्क्ष्यः स वायुरेव । 'अयं वै तार्क्ष्यः
योऽयं पवते'[e] इति श्रुतत्वात् । वायुश्च प्राण एव अध्यात्मावस्थितस्यैव वायोः
प्राणशब्दवाच्यत्वात् । तेन दूरोहणशंसनेन यजमानाः प्राणतादात्म्यमेव
प्राप्नुवन्ति । अथोत्तमामुपसंशस्य 'चर्षणीधृतम्'[f] 'अस्तभ्नाद् द्याम्'[g] 'अस्माक-
मत्र पितरः'[h] इति तिस्रः 'इन्द्रावरुणा युवम्'[i] 'पुनीषे वाम्'[j] इति पर्यासं च
शंसेत् ॥

इति तृतीयः खण्डः

a. RV. 8. 54. 1.
b. RV. 8. 53. 1.
c RV. 10. 178. 1.
d. RV. 4. 40. 5.
e. AB. 4. 20. 21.
f. RV. 3. 51. 1.
g. RV. 8. 42. 1.
h. RV. 4. 42. 8.
i. RV. 7. 82. 1.
j. RV. 7. 85. 1.

अथ ब्राह्मणाच्छंसिनः षष्ठेऽहनि शंस्त्रं विधित्सुराह[1]—**तं-जातम्।** एवं 4.१,२
मैत्रावरुणो गर्भं जनयित्वा ब्राह्मणाच्छंसिने ददाति एतं त्वं वर्धयेति। तं जातं गर्भं स ब्राह्मणाच्छंसी सुकीर्तिना 'अप प्राच इन्द्र'[a] इति सूक्तेन। तस्य विशेषणं योनिनेति। देवानां योनिभूतेन 'देवयोनिर्वै सुकीर्तिः'[b] इत्यन्यत्र श्रुतेः। तेन प्रतिगृह्णाति स्वीकरोति। जातमिति पदं विना प्रतिगृह्णातीति पाठेऽपि स्वीकार एव लक्ष्यते। अनुरूपादनन्तरं सुकीर्तेः पाठः। तदनन्तरं 'वि हि

सोतोः'[c] इति सूक्तस्य वृषाकपिशब्देनोक्तस्य पाठं विधत्ते—**अथ-आप्त्यै।** 4.३-५
विहिसोतोरिति सूक्तं वृषाकपिशब्देनोक्तम्। गतमन्यत्। अथास्मिन् वृषाकपौ
न्यूङ्खं विधत्ते—**न्यूङ्खयति-प्रतिदधाति।** मध्यमस्य पादस्य द्वितीयोत्तमयोर- 4.६-८
क्षरयोर्न्यूङ्खः कर्तव्यः। तद् यथा—द्वितीये अक्षरे 'यत्रो' इति। चतुर्थे द्वादशोकारं वैराजाख्यं न्यूङ्खमुक्त्वा 'मदद्वृषाकपो ओ ओ ओ अर्यःपुष्टेषु' इत्युत्तरस्मिन्नप्यक्षरे न्यूङ्खं कुर्यात्। प्रतिगरेऽपि तद्वदेव। वैराजन्यूङ्खमुक्त्वा 'मदेथ मदैवो ओ ओ ओ ओ ओथामो दैव' इति। न्यूङ्खश्चान्नमेवेत्युक्तम्। तेन न्यूङ्खनेन जात एव कुमारे अन्नाद्यमेव स्थापयति। नहि जातस्यान्नाद्यन्तरेण जीवनमवकल्पते।

तदनन्तरं कुन्तापाख्यं शस्त्रखण्डं पठेदित्याह—**अथ-आप्त्यै।** आम्नाय- 4.९,१०
प्राप्तस्वारसिकच्छन्दोरूपानतिक्रमेण वृषाकपिसूक्तान्तरसंपादनेन। अथ किमिदं
कुन्तापाख्यं शस्यमित्याकाङ्क्षायामाह—**नाराशंसीः-इति।** 'इदं जना उप श्रुत'[d] 4.११
इति तिस्रो नाराशंस्यः, नाराशंसपदस्य तासु श्रवणात्। 'प्र रेभासो मनीषा'[e] इति तिस्रो रैभ्यः, रेफशब्दवत्त्वात्। 'इन्द्रः कारुम्'[f] इति तिस्रः कारव्याः, कारुशब्दवत्त्वात्। 'यदिन्द्रादः'[g] इति तिस्र इन्द्रगाथाः, इन्द्रकर्माभिधाय-

a. RV. 10. 131. 1.
b. AB. 6. 29. 1.
c. RV. 10. 86. 1.
d. AV. 20. 127. 1; ŚŚ. 12. 14. 1.
e. AV. 20. 127. 5; ŚŚ. 12. 14. 4.
f. AV. 20. 127. 11; ŚŚ. 12. 15. 2.
g. AV. 20. 128. 12; ŚŚ. 12. 15. 5.

1. T. विवक्षुः for विधित्सुः

कत्वात् । 'अरंगरः'[a] इत्याद्या भूतेच्छदस्तिस्रः । 'राज्ञो विश्वजनीनस्य'[b] इति । चतस्रः पारिक्षित्यः परिक्षिच्छब्दवत्त्वात् । 'एता अश्वा आ प्लवन्ते'[c] इत्यादीनि पदान्येतशप्रलापः ।

कथमेतशप्रलापशब्दाभिधेयत्वमेतेषामित्यत आख्यायिकामुपक्षिपति—

4.१२-२५. **एतशो–प्रजापतिना** । एतशनामा कश्चिन्मुनिः पुरा सर्वज्ञः सन् दृप्त इवेमां भूमिं चरन् यज्ञस्यायुर्दृष्टवान् । 'एता अश्वा'[c] इत्यादिकाण्डं यज्ञस्यायुरिवाक्षय्यहेतुत्वात् सारभूतत्वाद् वा आयुः । स मन्त्रदर्शनाभिमानेन दृप्तः पुत्रानब्रवीत् हे पुत्रका अहं यज्ञस्यायुर्दृष्टवानस्मि । तद् युष्माकमभिलपिष्यामि ब्रवीमि । अथो अश्वप्लवनाद्यसंबन्धार्थवादित्वात् मामुन्मत्तं न जानीध्वमिति । पुत्रका इति कुत्सायां कप्रत्ययः तेषां तद्दृप्तत्वमननसंभावनाद्योतकः । एवमेतशेन पित्रोक्तास्ते पुत्रास्तथेति तद्वचनमङ्गीचक्रुः । अनन्तरमेतशः तद् 'एता अश्वा'[c] इत्यादिकं काण्डं यज्ञस्यायुर्भूतं पठितवान् । एवमभिलपतस्तस्यापरिसमाप्त एव काण्डे अकाण्ड एव ज्येष्ठः पुत्रः समीपमागत्य नोऽस्माकमयं पिता दर्पं करोति इति बुध्यमानो मुखपिधानं कृतवान् । तमेतं पिहितमुखं ज्येष्ठपुत्रमेतश उक्तवान्— हे ज्ञानमूढ अपनश्य[1] नाशमदर्शनं च गत्वा । भवन्तं धिगस्तु । तव प्रजां पुत्रपौत्रादिकां पापिष्ठामतिशयेन पापां करिष्यामि । किंच हे जाल्म, यदि मे मम मुखं न त्वमपिगृहीतवान् अभविष्यः तर्हि तव स्वभूतां गाम् अल्पायुषमपि शतायुषमकरिष्यम् । पुरुषमपि त्वत्कुले जातं सहस्रायुषमकरिष्यम् । यस्मात् त्वं मम मुखपिधानं कृतवान् असि तस्मात् तव प्रजां पापिष्ठां करोमीत्युक्त्वा कुपितः शापमुत्सृष्टवान् । यस्मादेवमेतशः पिता शापरूपं वचनमुक्तवान् तस्माद्धेतोरेतशस्य पुत्रा भृगूणां मध्ये आजानेयाः सन्तः पित्राभिशप्तत्वात् पापिष्ठा बभूवुः । पितृकृतस्याभिशापस्य [2-]प्राबल्यात् । पितरं[-2] विशिनष्टि— स्वया देवतया स्वेन प्रजापतिनेति । स्वा आत्मीया देवतैव यत् पिता नाम । नहि पितृसदृशी काचिदभ्यर्चनीया देवता विद्यते । तदाहुः—'शिवे रुष्टे गुरु-

a. AV. 20. 135. 13; ŚŚ. 12. 16. 3.
b. AV. 20.127. 7; ŚŚ.12.17.1.
c. AV. 20. 129. 1; ŚŚ. 12. 18. 1.

1. T. अपगच्छ
2–2. T. प्राबल्यात्पयितुं

स्त्राता गुरौ रुष्टे न कश्चन'[a] इति । श्रूयते च—'यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते । न परां प्राप्नोति पापीयान् भवति'[b] इति । किंच स्वात्मीयोऽयं प्रजापतिः स्रष्टा यत् पिता नाम । इतरस्य साधारण्यात् । प्रजापतेरप्यभ्यधिकतया मन्तव्यः पितेत्यर्थः । तदेवमेवंविधेन महानुभावेन पित्राभिशप्तत्वात् पापिष्ठा एवासन्नित्यर्थः ॥

इति चतुर्थः खण्डः

अथापराश्चतस्र ऋचो विधत्ते—**आदित्याङ्गिरसीरुपसंशंसति** । 5. १
'आदित्या ह जरितरङ्गिरोभ्योऽश्वं दक्षिणामनयन्'[c] इत्याद्या आदित्याङ्गिरःसंबन्धित्वादादित्यांगिरसीनाम्न्यः । तद्विषयामाख्यायिकामाह—**आदित्याः–वेद** । पुरा किलादित्यानामङ्गिरसां च संघर्षः कश्चिज्जातः । कथमिति चेत्, 5.२–१७
वयं युष्मत्तः पूर्वं स्वर्गं लोकं प्राप्नुमः न यूयम् , इत्युभयेषामहमहमिकारूपम् । तेषां मध्ये अङ्गिरसः पूर्वेद्युरेवादित्यान् प्रजिघ्युः । हन्तिरत्र गत्यर्थः । गमयामासुः संदिदिशिर इत्यर्थः । अग्निमित्यर्थात् सिद्धयति । नोऽस्माकं श्वोभूते सुत्या वर्तते । तस्मादस्माकमार्त्विज्यं भवद्भिः कर्तव्यमिति । तेषामङ्गिरसामग्निर्दूतः संदेशहर्ता बभूव । अग्नेरङ्गिरोन्तर्भूतत्वात् । अथाग्नावादित्यसमीपं प्राप्य सन्देशवाक्यमुक्तवति सति त आदित्या अग्निमुक्तवन्तः । वयं पूर्वमेवाद्य सुत्यामध्यासितवन्तः । तस्मात्तेषामद्य सुत्यावसायिनामस्माकं हे अग्ने त्वमेव होता भव । हौत्रं भवता कर्तव्यम् । भवत एव तत्र योग्याधिकारित्वात् । बृहस्पतिर्ब्रह्मत्वकर्ता अस्तु । अयास्य उद्गाता भवतु । अङ्गिरसोऽपत्यं घोरनामा कश्चित् तीव्रतपा ऋषिः अध्वर्युर्भवत्विति । एवमादित्या अग्निमार्त्विज्येन वव्रिरे । अथाग्निस्तथेत्यङ्गीकृत्याङ्गिरस्समीपमागत्य तेभ्यस्तं वृत्तान्तमावेदयामास । अथाग्निसहिता अङ्गिरस आदित्यानेत्यायाजयन् । तानादित्यानङ्गिरसो न निराचक्रुः । आर्त्विज्यनिषेधस्य प्रतिविधि······। अग्निमादित्या एताभिरादित्याङ्गिरसीभिः ऋग्भिः शिशिक्षुः प्रतिबोधयामासुः । तदेतदाख्यायिकाभिहित-

a. b. TS. 2. 5. 4. 4.
c. AV. 20. 135, 6; ŚŚ. 12. 19. 1.

मर्थशरीरमेता ऋचोऽभिवदन्ति स्मारयन्ति । अभिवदन्त इति पाठे एता ऋचोऽ
भिवदन्तः सन्त आदित्या दक्षिणां निन्युरिति योजना । ते आदित्याः श्वेतमश्वं
दक्षिणार्थमानीतवन्तः । कः श्वेताश्व इति चेत् ? अयमादित्य एव श्वेतवर्णाश्व-
रूपावलम्बी दक्षिणाद्रव्यत्वमापद्यत इत्यर्थः । एवं विहितसुत्याः आदित्याः स्वर्गं
प्राप्तवन्तः । य एवमाख्यायिकार्थं वेत्ति सोऽपि स्वर्गं प्राप्नोति ।

अनन्तरं 'यः सभेयः'[a] इत्याद्या दिशांक्लृप्तिसंज्ञा ऋचो विधत्ते—**दिशां-**
5.१८,१९ **क्लृप्तीः–कल्पन्ते**। क्लृप्तिरानुकूल्येनाभिमतफलप्राप्त्यर्थम् असंकीर्णतयावस्थान-
5.२०-२४ लक्षणम्।अनन्तरं 'योनाक्ताक्षः'[b] इत्याद्याः षडृचो विधत्ते—**जनकल्पाः–पशवः**।
[विततावि]त्याद्याः चतस्रः प्रवल्हिकाः । 'भुगित्यभिगतः'[c] इत्याद्यास्त्रयः प्रती-
राधाः । 'वीमे देवा'[d] इत्येषातीवादा । 'यद्देवासो ललामगुम्'[e] इत्याद्या आह-
नस्याः । स्तौति—सर्वा वाचो वदतीति । आसां विचित्रा वाचोयुक्तिश्चास्ति ।
यस्मादेवमत्र सर्वा वाचः पठ्यन्ते तस्मादद्यापि पुरुषोऽविकलेन्द्रियादिपाटवयुक्तः
सर्वा वाचो वदति ।

5.२५-२७ एतासामृचां संख्यां स्तौति—**ता–अश्नुवते**। गतम्। अथ द्वे ऋचौ विधत्ते—
5. २८ **कपृन्नरः–एकपातिन्यौ** । प्रतीकग्रहणं कुर्वन्ति । द्वाभ्यां मिलितानामष्टर्चां
5.२९-३२ संख्यां संपाद्य स्तौति—**ता–उपाप्त्यै** । गतम् । अथैकां विधत्ते—**दाधिक्रीं-**
5.३३-३५ **दधाति**। दाधिक्रा देवता अस्या इति दाधिक्री 'दधिक्राव्णो अकारिषम्'[f]
इत्येषा वाग्धेतुत्वाद् वागित्युच्यते। 'सुरभि नो मुखा करद्' इति तस्यां
वाक्सौरभ्यप्रार्थनादर्शनात्। तेनास्मिन् गर्भे वाचं स्थापयति। पावमानी-
5.३६-३८ स्तिस्र ऋचो विधत्ते—**पावमानं–तत्**। 'सुतासो मधुमत्तमाः'[g] इत्यादि
पवमानदेवत्यं तृचं शंसेत्। तत्र पावमान्य ऋचः पवित्रं शुद्धिसाधनं भवति।
तत् तेन पावमानतृचशंसनेन एनद् गर्भं, लिङ्गव्यत्ययः छान्दसः, पुनाति
शोधयत्येव ॥

इति पञ्चमः खण्डः

a. AV. 20. 128. 1; ŚŚ. 12. 20. 2.
b. AV. 20. 128. 6; ŚŚ. 12. 21. 2.
c. AV. 20. 135. 1.
d. AV. 20. 135. 4; ŚŚ. 12. 23. 4.
e. AV. 20. 136. 4; ŚŚ. 12. 24. 2.
f. AV. 20. 137. 3.
g. AV. 20. 137. 4.

एवं ब्राह्मणाच्छंसिनः शिल्पं विधायाच्छावाकस्य विधत्ते—**तम्-जातम्।** 'प्र वो महे मतयः'[a] इति द्रष्टृनाम्ना एवयामरुदिति सूक्तस्य निर्देशः। 6.१,२
चारयति गमयति। यथा लोके नववयसं कुमारं शनैश्शनैः गमयति एवमेवैतत्।
वृषाकपिवन्न्यूङ्खं विधत्ते—**न्यूङ्खयति-उपयन्ति** । गतमेतत् । षष्ठमहरिति 6.३-६
शिल्पशंसनस्य प्रकृतत्वात् तद्विषयं द्रष्टव्यम्। तदेवं यद्यपि मैत्रावरुणस्य तार्तीयसवनिकशस्त्रक्लृप्तिरत्र प्राधान्येन प्रस्तुता, तथापि केनचित् सामान्येन प्रसक्तौ सत्यां लाघवन्यायानुरोधेन ब्राह्मणाच्छंस्यच्छावाकयोरपि वक्तव्यं क्वचित् क्वचिद् विधीयत एवेति षष्ठेऽहनि द्वैपदस्तोत्रियत्वसामान्यमाश्रित्य त्रयाणामपि तन्त्रेण स्तोत्रियानुरूपविधौ कृते सति द्विपदासाहचर्यप्राप्तशिल्पशंसनविधेरपि शिल्परूपत्वसामान्योपजीवनेन तन्त्रेणैव प्रसक्तौ सत्यां 'नाभानेदिष्ठेनात्र होता रेतः सिञ्चति'[b] इत्यादिना 'ये षष्ठमहरुपयन्ति'[c] इत्यन्तेन संदर्भेण यजमानस्य दृश्यमानभस्मीकरणपर्यन्तातिजुगुप्सितरूपमानुषशरीरपिण्डोपमर्दनेन तद्विलक्षणामृतत्वप्राप्त्यर्हदैवशरीरोत्पादनक्रमोपयोगप्रदर्शनेन अमृतत्वप्राप्तिहेतुतया शिल्पशंसनप्रशंसनमुखेनाच्छावाकपर्यन्तानां शिल्पविधिः प्रविभज्य प्रकटीकृतः।

इदानीं प्रस्तुतं मैत्रावरुणस्य षष्ठेऽहनि द्विपदास्तोत्रियानुरूपविधिमुपसंक्रम्य तदनन्तरं वालखिल्यानां पठनं विधत्ते—**स्तोत्रियानुरूपौ-प्राणाः।** 'अग्ने 6.७-१०
त्वं नो अन्तमः'[d] 'अग्ने भव'[e] इत्येतौ स्तोत्रियानुरूपौ पठित्वा पूर्वोक्तेन प्रकारेण 'अभि प्र वः सुराधसम्'[f] इत्याद्या वालखिल्या ऋचः पठेत्। …ते स्तोत्रियानुरूपौ यजमानस्यात्मैव प्राधान्यात् तदनुवर्ति…त्ये( न्ये )षां वालखिल्या… … … आत्मनः सकाशादनन्तर्हिता अव्यवहिता भवन्तीति प्रसिद्धम्। तस्मात् स्तोत्रियानुरूपाभ्यां वालखिल्यानां व्यवधानं न कर्तव्यम्। किंतु … …
… … …**तद्-वालखिल्याः** ।… … … …वाच्यत्वमिति। नहि 6.११-१६
तेषु रूढोऽयं शब्द इति भावः। उत्तरं यद्वा इति। उर्वरयोः सस्यान्वितयोरभितः स्थितयोः क्षेत्रयोरन्तराले लाङ्गलादिभिरसंभिन्नमभिन्नमूषरात्मक… … … … …लमात्रा रोमपरिमाणा सूक्ष्मत्वात्। अत एवासंभिन्नार्धे

a. RV. 5. 87. 1.
b. KB. XXX. 3. ७.
c. KB. XXX. 6. ६.
d. RV. 5. 24. 1.
e. RV. 7. 17. 1.
f. RV. 8. 49. 1.

[ लो ]हवत् खड्गादिभिर्भेत्तुमशक्या भवन्ति । एवं वालवत् खिलवच्च यस्मादभिन्ना भवन्ति तस्मात् तद्गुणयोगाद् वालखिल्या इत्युच्यन्ते । रूढ··· ··· ···र्थे यत् प्रत्ययः ।

6. १७ अथ शस्यक्रमप्रदर्शनार्थं पूर्वोक्तं स्मारयति—**तार्क्ष्ये-उक्तम्** । 'वायुर्वै तार्क्ष्यः'[a] इत्यादि । एवं मैत्रावरुणस्य शस्यं विधाय ब्राह्मणाच्छंसिनो

6.१८,१९ विधत्ते—**गायत्रीषु-पति** । गायत्रीषु 'एवा ह्यसि वीरयुः'[b] इत्याद्यासु सामगा ब्राह्मणाच्छंसिनोऽर्थे साम प्रणयन्ति । तेन हेतुना स ब्राह्मणाच्छंसी मैत्रावरुणस्य वशं प्राप्नोति । गायत्री मैत्रावरुणस्य ··· ··· ··· ब्राह्मणाच्छंसिनो गायत्रीशंसने मैत्रावरुणोपजीवित्वमस्त्येव । तदेवम्—'एवा ह्यसि वीरयुः'[b] 'एवा ह्यस्य सूनृता'[c] इति द्वितीयेऽहनि ··· ··· ··· ब्राह्मणाच्छंसिनः स्तोत्रियानुरूपाविरयुक्तं भवति । अनुरूपानन्तरपठनीयं जा ··· ··· ··· ··· ।

6.२०,२१ **प्र-मैत्रावरुणस्य** । तस्योक्तमिति 'पशवो जगती'[d] इत्यादिकम् । मैत्रावरुणजागताद् द्विगुणितमेतज्जागतमिति उत्तरोत्तरित्वस्य प्रागुक्तस्य संपत्तेः प्रशस्त ··· ··· स्य संबन्धि जागतं यावद् भवति तद्धि तृचमेव । इदं तु षळृचत्वाद् द्विगुणितसंख्यान्वितं भवतीति पूर्वस्मादुत्तरत्वात् प्रशस्तमेतत् ।

6. २२ अथ पर्याससूक्तं विधत्ते—**कार्ष्णौ-भवति** ।·········'अस्तेव सु'[e], 'अच्छा म इन्द्रम्'[f] इति द्वे सूक्ते कृष्णार्षे । तत्र तृतीयपञ्चममध्यमच्छन्दोमवर्जं 'अच्छा म इन्द्रम्'[f] इति । इतरेषु 'अस्तेव सु प्रतरम्'[e] इतीति विभागः ।

6.२३,२४ **कृष्णो-भवति** ।।

इति षष्ठः खण्डः

7. १-४ अथाच्छावाकस्य शस्यं विधत्ते—**उष्णिक्षु-उप** । ऋतुर्जनित्रीति शब्दयुक्तं सूक्तं जागतं भवति । तस्यो·········भवति । किंतु द्विगुणितषट्संख्याया उप समीपे उपरिष्टाद् एका चर्ग् भवति । अतो ब्राह्मणाच्छंसिन आधिक्यं किमु

a. KB. XXX. 3. २१.
b. RV. 8. 92. 28.
c. RV. 1. 8. 8.
d. KB. XVIII. 5. ६.
e. RV. 10. 42.
f. RV. 10. 43.

वक्तव्यमित्यर्थः । अथ पर्याससूक्तं वि······**भारद्वाजो-च** । भारद्वाजार्षं 7. ५-१०
'सं वां कर्मणा'[a] इति । गतमन्यत् । पर्याससूक्तानि विहितान्यधिकृत्य विशेषं
दर्शयन् अच्छावाकपर्याससूक्तं प्रशंसति—**एकपर्यासो-एव**। द्वौ पर्यासौ ययोस्तौ 7.११-१३
तथा । कथमिति चेत्, 'आ वां राजानौ'[b] 'पुनीषे वाम्'[c] इति द्वौ पर्यासौ मैत्रा-
वरुणस्य भ······न्दोमे च । इतरेषु 'पुनीषे वाम्'[c] इति । ब्राह्मणाच्छंसिनोऽपि
'अस्तेव···'[d] 'अच्छा म इन्द्रम्'[e] इति द्वौ पर्यासौ । तावपि व्यवस्थितावेव ।
तृतीयपञ्चमयोर्मध्यमच्छन्दोमे च 'अस्तेव सु प्रतरम्'[d] इति । इतरेषु
'अच्छा म इन्द्रम्'[e] इति । अच्छावाकस्त्वेकप ··· ··· ··· ··· ···
स्येति । एवं स्थिते यदच्छावाकोऽच्युतपर्यासो भवति, अच्युतो नित्यः
सर्वेष्वहस्स्वेक एव पर्यासोऽस्येति, इतरयोस्त्वन्योन्यगोचरे पर्यासयोर्द्वयो-
रपि प्रच्युतत्वापत्तेः, तदेतदच्युतपर्यासत्वमुपपन्नम् ··· ··· ··· प्रतितिष्ठ-
न्त्यस्मिन्निति प्रतिष्ठा । न च प्रतिष्ठायाः च्युतिर्युक्ता । तस्मादच्युतपर्यासत्वं
प्रतिष्ठाफलाय संपद्यते । एवं द्वितीयप्रभृतीनां पञ्चानां पार्ष्ठिकानामह्ना-
मुक्थ्यशस्त्राण्युपदिष्टानि । छन्दोमानां तु समन[न्तर]मतिदेष्टव्यानीत्यभि-
प्रायेण चतुर्विंशे प्रथमच्छन्दोमातिदेशप्राप्ति होत्रकशस्त्राणां सिद्धवत्कृत्य
तदीयशस्यसंख्यां समुदितां स्तौति—**षट्त्रिंशतं-कामाः** । तथा हि—'आ 7.१४-२१
ते वत्सो मनो यमत्'[f] 'आग्निरगामि'[g] इति स्तोत्रिय·········त (क) षु षोळश ।
पूर्वाभिश्चतुर्विंशतिः । 'युवां नरा'[h] 'पुनीषे वाम्'[c] इति दश । पूर्वाभिश्चतुस्त्रिं-
शत् । अन्त्याया आवृत्तेष्षट्त्रिंशत् । इत्थं प्रथमे छन्दोमे मैत्रा[वरुणः षट्-
त्रिंशतं] चतुर्विंशे शंसतीति । ब्राह्मणाच्छंसी तु चतुर्विंशे चत्वारिंशत्संख्याका
ऋचः शंसति । तथा हि—'य एक इ[द्धव्यः]'[i]······विंशतिः' । 'अच्छा म इन्द्रम्'[e]
इति···दश । ताश्चत्वारिंशत् । एवं प्राम······चतस्र इति स्तोत्रियानुरूपयो-

a. RV. 6. 69. 1.
b. RV. 7. 84. 1.
c. RV. 7. 85. 1.
d. RV. 10. 42. 1.
e. RV. 10. 43. 1.
f. RV. 8. 11. 7.
g. RV. 6. 16. 19.
h. RV. 7. 83. 1.
i. RV. 6. 22. 1.

रष्टौ । 'तदस्मै नव्यम्'[a] इत्यष्टौ । ताः षोळश । 'अजातशत्रुम्'[b] इति पञ्च । ता एकविंशतिः । आ (सू ?) रक्त इति सूक्तान्तर······विंशत् । ता एतास्त्रयाणामत्र प्रत्येकं शस्या ऋचः संभूय विंशत्यधिकशतसंख्याका भवन्ति । शिष्टं प्रागेव व्याख्यातम् ॥

इति सप्तमः खण्डः

संप्रति छन्दोमेषु होत्रकाणां शस्योत्पत्तिविधिसिद्धवत्करणेन केषां यथा
8.१-४ संशय ··· ··· ··· **पञ्च–आप्त्यै ।** त्रीण्यैकाहिकानि 'युवां नरा'[c] 'पुनीषे
वाम्'[d] इति पञ्च सूक्तानि प्रथम एवैवापागपर (?) इति······गत···'इन्द्रा को वां वरुणा'[e] इति सूक्तम् । 'इमा उ वां भूमयः'[f] इति सूक्तशेषः । तच्चतुर्थं सूक्तम् । 'आ वां राजानौ'[g] इति पञ्चममिति मध्यमे । 'तुभ्येदमिन्द्र'[h] इति जागतम् । 'नहि ते क्षत्रम्'[i] इति 'श्रुष्टी वाम्'[j] इति सूक्तम् । 'इमा उ वाम्'[k] इति 'पुनीषे वाम्'[d] इति पञ्चैव सूक्तान्युत्तमेऽपि । पशवोऽश्वादि । गतम् ।
8.५-८ **चत्वारि–आप्त्यै ।** 'प्र मंहिष्ठाय'[l] इति सूक्तम् । 'उदप्रुतः'[m] इति सूक्तम् ।
'यो अद्रिभिद्'[n] इत्येकापि सूक्तमेव । 'यो अद्रिभिदिति चैका'[o] इत्यत्र सूत्रकारेण एकस्या अपि सूक्तस्थाने गणनीयत्वद्योतनार्थं चशब्दोपादानस्य कृतत्वात् । अन्यथा 'चत्वारि सूक्तानि ब्राह्मणाच्छंसी' इति श्रुतिव्याकोपापत्तेः । 'अच्छा
8.९-१२ म इन्द्रम्'[p] इति सूक्तम् । इति चत्वारि सूक्तानि । अन्यद् गतम् । **पञ्च–आप्त्यै ।**
ब्राह्मणाच्छंसी शंसतीत्यनुषंगः । 'नाना हि त्वा हवमाना'[q] इति जागतम् ।

a. RV. 2. 17. 1.
b. RV. 5. 34. 1.
c. RV. 7. 83. 1.
d. RV. 7. 85. 1.
e. RV. 4. 41. 1.
f. RV. 3. 62. 1.
g. RV. 7. 84. 1.
h. RV. 10. 167. 1.
i. RV. 1. 24. 6.
j. RV. 6. 68. 1.
k. RV. 3. 62.
l. RV. 8. 103.
m. RV. 10. 68.
n. RV. 6. 73. 1.
o. ŚS. 12. 25. 5.
p. RV. 10. 43. 1.
q. RV. 1. 102. 5.

'यज्ञे दिवः'[a] इति सूक्तं 'यस्तस्तम्भ'[b] इति षळपि सूक्तम् । 'अस्तेव सु प्रतरम्'[c]
इति । एवम··· ···मध्यमे पञ्च सूक्तानि । 'अस्य श्रवो नद्यः'[d] इति जागतम् ।
'उदप्रुतः'[e] इति सूक्तम् । 'यस्तस्तम्भ'[b] इति षट् सूक्तम् । 'यो अद्रिभिद्'[f] इति
सूक्तम्। 'अच्छा म इन्द्रम्'[g] इत्येवमुत्तमेऽपि पञ्च सूक्तानि। अन्यद् गतम्। **पञ्च–**
**आप्त्यै**। 'तदस्मै नव्यम्'[h] इत्यष्टौ । 'अजातशत्रुम्'[i] इति पञ्च सूक्तं जागतम् । ८.१३-१६
'नू मर्तः'[j] इति सप्त सूक्तम् । 'प्र वः पान्तम्'[k] इति तृचं सूक्तम् । 'उरुं
यज्ञाय'[l] इति तृचं सूक्तम् । 'सं वां कर्मणा'[m] इति सूक्तमिति प्रथमे पञ्च
सूक्तानि । अन्यद् गतम् । **षट्–आप्त्यै**। 'प्र ते महे विदथे'[n] त्रयोदश जागतम् । ८.१७-१९
'विष्णोर्नु कम्'[o] 'प्र वः पान्तमन्धसः'[k] पञ्च सूक्तम् । 'भवा मित्रः'[p] 'उरुं
यज्ञाय'[l] इति तिस्रः सूक्तम् । 'सं वां कर्मणा'[m] इति षट् मध्यमे । 'अर्चा दिवे'[q]
इति नव । 'दिवश्चिदस्य'[r] इति पञ्च जागतम् । 'विष्णोर्नु कम्'[o] 'प्र वः
पान्तमन्धसः'[k] इति पञ्च ··· ··· ··· ··· 'सं वां कर्मणा'[m] इति ।
एवमुत्तमेऽपि षट् सूक्तानि । अन्यद् गतम् ।

अथाहावविधिं सिद्धवत्कृत्य तत्संख्यां स्तौति—**चतुराहावानि–आप्त्यै**।··· ८.२०-२३
··· ··· ··· तथा स्तोत्रियात् पूर्वमनुरूपस्योभयतः परिधानात् पूर्वमिति
चत्वार आहावाः । पशव इत्यादि गतम् । ··· ··· **षष्ठ–आप्त्यै**। मैत्रा- ८.२४-२७
वरुणस्य षष्ठेऽहनि शस्त्रं पञ्चाहावं भवति, नान्यत्र । इतरयोस्तु न क्वचि-
दपि । कु(त ?)त्राप्याहावचतुष्टयातिरेकेण दूरोहणशंसने ··· ··· ···
वि (?) सूत्रितं हि—'तार्क्ष्यस्योत्तमां परिशिष्याहूय दूरोहणं यथा
विषुवति'[s] इति । तेन सह पञ्चाहावा भवन्ति । पशव इत्यादि गतम् ।

a. RV. 7. 97. 1. b. RV. 4. 50. 1.
c. RV. 10. 42. 1. d. RV. 1. 102. 2.
e. RV. 10. 68. 1. f. RV. 6. 73. 1.
g. RV. 10. 43. 1. h. RV. 2. 17. 1.
i. RV. 5. 34. 1. j. RV. 7. 100. 1.
k. RV. 1. 155. 1. l. RV. 7. 99. 4.
m. RV. 6. 69. 1. n. RV. 10. 96. 1.
o. RV. 1. 154. 1. p. RV. 1. 156. 1.
q. RV. 1. 54. 3. r. RV. 1. 55. 1.
s. ŚS. 12. 11. 12.

8.२८-३१ **ऐकाहिका-प्रतिष्ठित्यै ।** उक्तार्थमेतत् ॥

इत्यष्टमः खण्डः

एवं विकृतिविषय उक्थे होत्रकाणां [शस्त्रवि]धिं प्रदर्श्य षोळशिनि
9.१-३ किञ्चिद्वक्तव्यमित्यतिरात्रे पर्यायेषु तेषां शस्यं विधत्ते—**पञ्च-रात्रिच्छन्दसानि ।** रात्रिशब्दः पर्यायाभिप्रायः । होत्रका होतृसहिताः पर्यायेऽनुष्टुबादिपञ्चच्छन्दस्का ऋचः शंसेयुः । तत्प्रकारः प्राक् प्रपञ्चितः । यस्मादेतान्यनुष्टुबादीनि रात्रिसंबन्धीनि छन्दांसीति प्रसिद्धानि भवन्ति । कुत आसामसाधारणो रात्र्याभिसंबन्ध इति चेत् , श्रूयताम्—

पुरा सुराः संश्रितवन्त आसन्नहस्तदीया असुरास्तु रात्रिम् ।
देवासुरास्तुल्यबलास्ततस्ते बभूवुरिन्द्रोऽथ सुरान् बभाषे ॥
विहाय भीतिं विबुधारिनोदे सहायतां मे भजताधुनेति ।
बलीयसीं भीतिमवाप्य सोऽयं न्यलीयत क्वापि निलिम्पसंघः ॥
वृन्दानुवर्तीनि महेन्द्रमेनं छन्दांसि पञ्च तु तदानुजग्मुः ।
संबुध्य सर्वानसुरानरात्सीत् संवर्धितौजास्स[ह तै]र्बिडौजाः ॥
तदास्य साधारण आसयोगो राञ्याः सहेन्द्रस्य च छन्दसां च ।
न देवतान्या निविदादि वातो न रात्रिशस्त्रेष्वितरेष्विवास्ति ॥

9.४ अथैतेषु शस्त्रेषु पञ्चसु स्थानेष्वाहावं विधत्ते—**पञ्चाहावा रात्रिः** । पञ्चसंख्या आहावा यस्याः तथा । पर्यायेषूक्थमुखादूर्ध्वं पञ्चममाहावस्थानम् । सूत्रितं हि—'उक्थमुखात् सर्वेषां रात्रौ'[a] इति । अत्र प्रसंगादन्यद् विधत्ते—
9.५,६ **वाजपेयस्य-रात्रिः ।**

अस्ति सप्तदशस्तोमो वाजपेयाह्वयः क्रतुः ।
वैराजमाज्यमत्र स्याद् घृतस्तोमीयमेव वा ।
माधुच्छन्दस एवापि प्रउगः प्रतिपत् पुनः ।
त्रिकद्रुकीयात्र मरुत्वतीयोक्थनिवेशिनी ।
सूक्तं कयेति पृष्ठं तु रथन्तरमिहेष्यते ।
तदिदासीयमिति च निष्केवल्यं प्रकीर्तितम् ।

a. ŚŚ. 7. 14. 8.

म(प्र मं हिष्ठा?)नुचराद्यत्र तृतीयसवनं भवेत् ।
आनोभद्रीयतापूर्वं सूक्तद्वयमिमम्महे ।
उषसः पूर्वा इति च ऋक्च्छो व्यतिषजन् पठेत् ।
ऊर्ध्वं षोळशिनः शस्तादतिरिक्तोक्थमिष्यते ।
प्र तत्ते च प्र तद्विष्णु स्तोत्रियश्चानुरूपकः ।
अयं वेनः पञ्चकं प्रणव ... चित्र ... ।
उद्धृत्याहूय शस्यं स्याद् दूरोहणमथोत्तमाम् ।
शस्त्वा यज्ञो बभूवेति परिधाय प्रजापते ।
इत्येकया यजेदस्मिन्नाहावाः पञ्च संमताः ।
दूरोहणार्थं आहाव इहापि ह्य ......... ॥

**छन्दसे-अजामितायै** । केचिदजामिताया इत्यधिकं पठन्ति । तथा एत- 9.७
दन्तर ... ... ... ...

... ... ... ...

**अथ-दधाति** । ... ... षोऽपि तिरोअह्न्यशब्दवान् भवति । यस्मा- 9.८-१२
दत्र हूयमानाः सोमास्तिरोअह्न्याः । तिरोभूते पूर्वस्मिन्नहनि अभिषुतत्वात् ।
पूर्वेद्युरेव हि सोमाभिषवः । तस्मात्तदभिधाय ··· ··· त्रोत्तरकालीनेषु अति-
रिक्तोक्थेषु चतुर्षु होतृहोत्रकसंबन्धिषु आहावसंख्यां स्तौति—**चतुराहावानि-** 9.१३-१६
**आप्त्यै** । केचित् 'चतुष्टया वै पशवोऽथो चतुष्पादाः पशूना' ··· ···ां शस्त्राणां
परिधानीया विधत्ते—**क्षैत्रपत्यः-प्रतितिष्ठन्ति** । केचिदर्थवादवाक्ययोरनयो- 9.१७-२०
र्मध्ये 'अस्यामदीनायामन्ततः प्रतितिष्ठास्याम' इत्यधिकं पठन्ति । 'क्षेत्रस्य पतिना वयम्'[a] इत्याद्याश्चतस्रः क्रमेण चतुर्णां परिधानीयाः कर्तव्याः । तत्र क्षेत्रशब्देन इयं पृथिव्येव उच्यते । क्षियन्ति निवसन्ति गच्छन्ति वा अस्यां भूतानीति व्युत्पत्तेः । अन्ततोऽवसानेऽस्याम् । न दीना अदीना महान्तं भार··· ···
···दीनां भवन्ति । इयं तु स्थावरजंगमात्मकं सकलं वहन्त्यपि न···भवति । अत एवास्या अदितिशब्दवाच्यत्वम् । तस्यामदीनायां पृथिव्यां प्रतिष्ठां प्राप्स्यामो वयमित्यभिप्रायेण 'क्षेत्रस्य पतिना'[a] इत्यादिभिः परिधानं कुर्वन्तः अन्ततोऽ

a. RV. 4. 57. 1.

वसानेऽस्यामदीनायां पृथिव्यामेव प्रतिष्ठिता भवन्ति । अथ शस्यं धित्ते—**अथ-**
9.२१-२६ **प्रतिष्ठित्यै** । गतम् ।

**'अथ हारियोजनेन चरन्ति तस्योक्तं ब्राह्मणम् । त्रिष्टुभं हारियोजनस्य**
9.२७,२८ **पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम्'** इत्यधिकः पाठः केषांचित् ।
तत्राहर्गणेषु हारि[ योज ]नस्यानुवषट्कारात् प्रागति[प्रैषस्य ] प्रशास्त्रा
9.२९-३३ पठनीयतया पुरोनुवाक्या विधत्ते—**अथ-अन्वाह** ।··· ···नुवाक्या 'परा याहि मघवन्'[a] इत्येषा । 'जायेदस्तम्'[b] इति वा । प्रैषस्य [ स ]पुरोनुवाक्यत्वं प्रशस्तम् । यस्माद्यः प्रैषः पुरोनुवाक्यारहितो भवति स वीर्यरहित एव भवति । तस्माद् वीर्यवत्त्वाय पुरोनुवाक्या पठितव्या । इतोऽपि पुरोनुवाक्या ··· ··· ···वाक्या विद्यन्त एव तथा प्रस्थितयागप्रैषेष्वपि पुरोनुवाक्या भवन्ति । तस्मात् प्रैषत्वसामान्यादपि सपुरोनुवाक्यत्वं युक्तम् । पुरोनुवाक्यान-
9.३४-३६ न्तरमतिप्रैषस्य पठनं विधत्ते—**अथ-कौषीतकिः** ।··· ··· ··· ···
··· ···तेन यज्ञसन्तानहेतुत्वात् प्रशस्तोऽयमतिप्रैषपाठ इत्येवं कौषीतकि-मुनिराह स्म । वाक्यस्याभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ॥

इति नवमः खण्डः

हस्तान्तर्वर्तिधात्रीफलसमदशकापादिताम्नायवाणी
सिद्धान्तार्थस्थितिभ्यः शशिविशदयशश्शोधिताशावधिभ्यः ।
ध्वस्तान्तेवासिवर्गान्तरविपुलतमस्सहतिभ्यो नति स्ताद्
श्रान्त श्रान्ति··· ··· ··· ···॥
··· ···द्विजता यः समुत्थितः पुण्यतरोः प्ररोहः ।
प्रवर्धमानः स फलं प्रसूतां प्रसत्ति( क्ति ? )मग्र्यां प्रथमस्य पुंसः ॥
इत्याचान्त ··· ··· ···
··· ··· ··· ···
··· ··· ··· ···

व्याख्याने विदधत्तृतीयसवने···यं विधिं हौत्रकं ॥
सावित्र्यामजनिष्ट यः सुमनसो नारायणाद्यज्वनो
यस्यार्षः परमेश्वरश्च जगति स्तव्यौ पितव्यौ सताम् ।

a. RV. 3. 53. 5. b. RV. 3. 53. 4.

त्र्यन्ताम्बुजषण्डचण्डकिरणः श्रीमान् कुमारः सुधी-
र्मीमांसार्णवकर्णधारधिषणो नारायण[ श्चाग्रजौ ] ।।
श्लाघ्यब्रह्मखलाख्यकेरलमहीभूषायमाणोत्तम-
ग्रामोद्भासिमुकुन्दमङ्गलपदप्रख्यातभु······कसा ।
विद्यामार्गगतागतव्यसन ··· ···
···न्मेषसहायसंपदुदितव्याख्यानसंप्रीतिना ।।
लक्ष्मीवागस······न्दिरनिवासैकान्तभङ्गस्थले
श्रीमत्तातपितृव्यनाम दधता तेनोदयाख्यावता ।
विप्रेन्द्रेण कृते कृते कृशधियां कौषीतकिब्राह्मण-
व्याख्याने सुखदे सतामिह दशाध्यायी तृतीया गता ।।

**इति कौषीतकिब्राह्मणव्याख्याने**
**तृतीयदशके दशमोऽध्यायः**

## *APPENDIX I*

## AUTHORS AND WORKS QUOTED


Agniveśya : 40.

*Adhvaryubrāhmaṇa* : 78, 324, 635.

*Adhvaryuveda* : 89, 226.

*Anukramaṇī* : 14, 20, 24, 25, 188, 191, 192, 200, 202, 203, 206, 208, 225, 339, 340, 344, 347, 349, 352, 367, 371, 372, 383, 459, 506, 518, 601, 608, 645.

Arbuda : 343, 644, 645, 646.

Avatsāra : 311.

*Ādhvaryavabrāhmaṇa* : 225.

*Ādhvaryavāmnāya* : 150.

Āpastamba : 40, 96, 108,139,179,391.

*Āpastambavacana* : 61.

*Āpastambasūtra* : 2.

*Ārṣānukramaṇī* : 343.

Āśvalāyana : 3, 40, 70, 84, 108, 113, 126, 139, 193, 391, 424, 584.

*Āśvalāyanasūtra* : 11, 14, 26.

*Āśvalāyanīya* : 17, 31, 70.

*Ṛgveda* : 148.

Etaśa : 670.

*Aitareya* : 3, 4, 12, 15, 16, 19, 39, 40, 52, 55, 67, 70, 78, 125, 126, 148, 151, 167, 170, 181, 194, 215, 230, 256, 259, 369.

*Aitareyabrāhmaṇa* : 67, 124.

*Aitareyaśruti* : 264.

*Aitareyopaniṣad* : 72.

Aitihāsika : 352.

*Aindravāyavagrahabrāhmaṇa* : 313.

Kaṇva : 642.

Kadrū : 644.

Kali : 649.

Kavaṣa : 289, 294.

Kātyāyana : 398, 494.

*Kātyāyanavacana* : 500

Kuṣītakāpatyamuni : 494.

Kauṣītaki : 4, 61, 63, 167, 170, 173, 174, 179, 239, 276, 277, 298, 388, 389, 390, 456, 498, 523, 546, 547, 561, 568, 577, 579, 587, 589, 590, 596, 597, 603, 623, 630, 641.

Kauṣītakin : 217, 218.

Kauṣītakimahāmuni : 163.

Kauṣītakimuni : 284, 336, 457, 596, 623, 641, 680.

Gṛtsamadamaharṣi : 522.

Govindasvāmin : 270.

Gaurivīti : 537.

Gauśra : 388, 389, 524.

Gauśrāyaṇa : 524.

Ghora : 671.

*Jaiminīyasūtra* : 300.

*Talavakārabrāhmaṇa* : 13, 97, 172, 174, 175, 271, 300, 353, 484, 546.

*Talavakāraśākhā* : 167.

*Taittirīya* : 4, 5, 16, 17, 19, 21, 24, 27, 34, 42, 47, 52, 70, 77, 79, 97, 103, 109, 135, 156, 163, 166, 294, 359, 371, 396, 431, 589.

*Taittirīyabrāhmaṇa* : 448.

*Taittirīyabrāhmaṇagrantha* : 42.

*Taittirīyavacana* : 129.

Taittirīyin : 483.

*Dāśatayī* : 124, 147, 209, 336, 388, 503, 539, 639.

*Dvādaśalakṣaṇī* : 590.

*Nirukta* : 29.
Nairukta : 352.
*Paribhāṣā* : 340, 353, 371.
Pāṇini : 314.
Paiṅgya : 63, 64, 217, 388, 389, 561, 596, 597, 641.
Praśravaṇa : 311.
*Bahvṛcabrāhmaṇa* : 46.
*Bṛhadāraṇyaka* : 156.
Bṛhaddiva : 454
*Bṛhaddevatā* : 454.
Baudhāyana : 93, 97, 135, 137, 178, 191, 201, 208, 227, 231, 289, 295, 373, 421, 645.
*Baudhāyanakalpa* : 134.
*Baudhāyanakalpavacana* : 379.
*Baudhāyanavacana* : 76, 226.
*Baudhāyanīya* : 17, 22.
Bharadvāja : 344, 601, 650.
*Bhārata* : 186.
*Bhāradvājīyasūtra* : 17.
Madhuka : 388.
Madhucchandas : 453, 463, 632.
Manu : 271, 273, 601.
Medhātithi : 632, 642, 655.
*Maitreyaśākhā* : 322.
*Yajurbrāhmaṇa* : 67, 84, 304.
*Yajurveda* : 148.
Yājñavalkya : 2, 207.
Yāska : 5, 42, 58, 126, 147, 155, 179, 345, 352, 406, 439, 501, 619.
*Yāskavacana* : 147.
*Laiṅga* : 143.
Vasiṣṭha : 552, 598, 650, 665.
*Vājasaneyaka* : 9, 144, 161, 183, 187, 188, 229, 305.
*Vājasaneyakavākya* : 305.
*Vājasaneyakopaniṣad* : 207.
Vājasaneyin : 170, 205, 402.
Vāmadeva : 609, 630, 650.
Vimadarṣi : 653.
Viśvamanas : 467.
Viśvāmitra : 346, 598, 629, 631, 632, 650, 651.
Vṛttikāra : 309.
Vṛttikṛt : 430.
*Vaiyāsikasūtra* : 9, 377, 550.
*Śatapathabrāhmaṇa* : 23, 433.
*Śatapathaśruti* : 449.
Śabdabrahmavid : 52.
Śākalya : 207.
*Śākalyabrāhmaṇa* : 207.
*Śukrāmanthibrāhmaṇa* : 178.
Śaunaka : 224, 397, 501.
*Śaunakavacana* : 329.
*Sāmagrantha* : 648.
*Sāmaveda* : 148.
Sukīrti : 652.
Suyajñamuni : 224.
Suyajñācārya : 428.
Hiraṇyakeśin : 226.
Hiraṇyastūpa : 538.

*APPENDIX II*

# QUOTATIONS FROM VARIOUS SOURCES

## *ṚGVEDA* ( RV )


1.1.1 : 72
1.1.3 : 128
1.1.7 : 230
1.2 : 340
1.2.1 : 339, 463, 478, 632
1.2.4 : 339, 535, 632
1.3.1 : 270, 611
1.3.10 : 537
1.3.12 : 537
1.4.1 : 373, 656
1.5.1 : 408
1,5.4 : 414
1.6.1 : 408
1.6.4 : 414
1.7.1 : 407
1.7.4 : 414
1.8.1 : 414
1.8.8 : 674
1.9.1 : 408
1.9.4 : 414
1.10.1 : 200
1.10.11 : 391
1.10.12 : 200, 201
1.12.2 : 12
1.12.6 : 12
1.15.1 : 642
1.16.1 : 399, 400, 632, 633
1.16.7 : 633
1.19.9 : 359
1.20.7 : 601
1.22.1 : 192, 632
1.22.5 : 155
1.22.9 : 635
1.22.13 : 610
1.22.14 : 226
1.23.1 : 465
1.23.2 : 465
1.23.4 : 317
1.23.16 : 293, 296
1.23.20 : 91, 425
1.23.22 : 93
1.24.3 : 123, 192, 529, 644
1.24.6 : 676
1.26.10 : 444
1.27.1 : 527
1.27.13 : 76
1.29.1 : 654
1.30.7 : 408
1.30.13 : 527, 528, 575, 656
1.30.20 : 270, 610
1.31.18 : 100
1.32 : 608
1.35.9 : 155
1.36.13 : 242
1.36.14 : 242
1.40.1 : 468
1.40.3 : 468
1.40.5 : 468
1.45.1 : 467
1.46.15 : 209
1.47.1 : 611
1.48.15 : 611
1.51 : 561
1.51.1 : 415, 558
1.52 : 588
1.52.1 : 415, 554
1.53.1 : 415
1.54.1 : 415
1.54.3 : 677
1.55.1 : 677
1.56 : 559, 560, 562
1.57 : 393
1.58 : 497
1.58.9 : 497
1.61 : 657, 660
1.63 : 660
1.64 : 352
1.64.6 : 352, 607
1.74.1 : 46, 47, 270, 273, 492, 610
1.74.3 : 194
1.75.1 : 256, 631
1.79.9 : 133

1.80.1 : 518, 656
1.81.1 : 656
1.81.7 : 656
1.82.6 : 420
1.83 : 291
1.83.1 : 200
1.83.3 : 200, 201, 226
1.84.1 : 633
1.84.3 : 396
1.84.4 : 545, 665, 666
1.84.10 : 400, 656
1.84.13 : 402
1.85.6 : 635, 663
1.86.1 : 635
1.87 : 382
1.89 : 374
1.89.10 : 375, 376, 377
1.90 : 591
1.91 : 351
1.91.1 : 181, 188
1.91.2 : 214, 351
1.91.4 : 181, 189
1.91.5 : 11, 80, 188
1.91.7 : 133
1.91.9 : 13, 188
1.91.11 : 11
1.91.12 : 128, 189, 194
1.91.16 : 188
1.91.17 : 188
1.91.21 : 214
1.92.1 : 611
1.93.1 : 258
1.93.5 : 258
1.94.1 : 635
1.94.1–14 : 531
1.94.6 : 639
1.98.1 : 439
1.98.2 : 440
1.101.1–7 : 599
1.102.1 : 415
1.102.2 : 677
1.102.5 : 676
1.102.7 : 666
1.103.5 : 415
1.104.9 : 648
1.111 : 373
1.112.25 : 206
1.114.11 : 382
1.115.1 : 144, 399, 556
1.115.4 : 556
1.115.5 : 423
1.120 : 206
1.120.1 : 204
1.120.2 : 204
1.120.3 : 204
1.120.4 : 204
1.120.5 : 204
1.120.6 : 204
1.120.7 : 205
1.120.8 : 205
1.120.9 : 205
1.120.12 : 204
1.121 : 548
1.123.6 : 386
1.127.10 : 575
1.128 : 526
1.129.2 : 527
1.130 : 561
1.131.1 : 654
1.131.4 : 654
1.132.1 : 654
1.132.6 : 622, 623
1.133.6 : 526
1.135.1 : 526
1.135.4 : 526
1.136.4 : 526
1.139.3 : 526
1.139.6 : 526
1.139.7 : 527
1.139.11 : 460
1.140.1 : 271, 611
1.142.1 : 250
1.143 : 383
1.150.1 : 611
1.154 : 393
1.154.1 : 164, 195, 387, 664, 677
1.154.2 : 195
1.155 : 393
1.155.1 : 677
1.156.1 : 677
1.156.2 : 214
1.156.3 : 215
1.156.4 : 232
1.159 : 373
1.161.4 : 566
1.164 : 459
1.164.2 : 460
1.164.13 : 460

1.164.23 : 336
1.164.40 : 210
1.164.45 : 131, 330, 583
1.164.48 : 68, 459
1.164.50 : 193, 461
1.165 : 453, 454, 457, 554, 587
1.165.1 : 452
1.165.9 : 454
1.165.10 : 454
1.165.15 : 454
1.168.6 : 611
1.173.4 : 541
1.175.1 : 544
1.176.1 : 545
1.185.1 : 281
1.185.2–8 : 503
1.186.5 : 385
1.189.1 : 181, 231
1.191.6 : 619
1.192.13 : 611
2.3.11 : 377
2.9.2 : 223
2.11.1 : 508, 509. 510
2.11.21 : 345
2.12 : 501, 574
2.12.1–14 : 503
2.13 : 393, 561, 663
2.14 : 660
2.14.1 : 415
2.15 : 575
2.15.1 : 416
2.16.1 : 415
2.17.1 : 415, 676, 677,
2.19.1 : 415
2.21 : 558, 560, 600
2.21.1 : 415
2.22.1 : 655
2.22.4 : 655
2.23 : 203
2.23.1 : 232
2.23.19 : 203
2.32.4 : 385
2.33.1 : 201, 381
2.33.10 : 201
2.35. : 291
2.35.3 : 291, 296
2.36. : 522
2.36.3 : 635
2.37. : 522
2.41.1 : 465
2.41.3 : 465
2.41,4 : 465, 632
2.41.19 : 225, 227 228
2.41.20 : 225, 226
2.41.21 : 227
3.1 : 597, 598
3.1.1 : 596
3.1.23 : 259, 631
3.3.1 : 381
3.6.9 : 380, 663
3.8.1 : 242
3.8.4 : 242, 243
3.8.6 : 242
3.8.10 : 243
3.10.1 : 271, 611
3.10.7 : 611
3.13 : 329, 452, 535, 553
3.13.1 : 326, 330 331, 332, 463, 492, 642
3.13.1, 2 : 276
3.16.1 : 611
3.17.4 : 259
3.20 : 351
3.20.1 : 351
3.20.4 : 351, 357
3.20.5 : 351
3.21.1 : 256, 631
3.22.4 : 444
3.24.4 : 444
3.25.4 : 326, 333, 334
3.26.4 : 512
3.26.5 : 513
3.27.1 : 13, 65, 66 68, 280
3.27.5 : 13
3.27.6 : 13
3.27.7 : 230
3.27.9 : 231
3.28.1 : 231, 632
3.28.4 : 632
3.28.5 : 632
3.29.4 : 222
3.30 : 660
3.30.9 : 663
3.30.22 : 658

3.31 : 657, 660
3.32.15 : 648
3.34 : 650, 651, 653, 660
3.34.1 : 656
3.35.1 : 416
3.35.4 : 653
3.35.6 : 648
3.36 : 650, 651, 660
3.36.2 : 648
3.36.3 : 661
3.38 : 660
3.41.1 : 414
3.42.1 : 414
3.45.1 : 400
3.46 : 659
3.47.2 : 346
3.47.4 : 356, 357
3.48 : 650, 651, 659
3.48.1 : 655
3.49 : 659
3.49.1 : 652
3.51 : 393
3.51.1 : 663, 668
3.51.7 : 346
3.51.10 : 408
3.52.1 : 632
3.52.5 : 632
3.52.6 : 632
3.53.2 : 420
3.53.4 : 680
3.53.5 : 680
3.60 : 493, 494
3.60.1 : 463
3.60.5 : 369
3.62 : 676
3.62.1 : 676
3.62.10 : 182
3 62.13 : 231
4.1 : 259
4.1.1 : 261
4.4.10 : 195
4.7.7 : 271, 494, 611
4.8.5 : 12
4.10.1 : 25, 433
4.10.2 : 24, 25
4.10.3 : 25
4.10.4 : 25
4.12.6 : 99, 421
4.15.1 : 251, 630
4.16 : 558, 560 562, 565 656, 660
4.16.1 : 658, 659
4.16.4 : 565
4.17 : 659, 660
4.17.20 : 387
4.19 : 650, 659
4.20 : 493, 650 659
4.20.4 : 661
4.22 : 659
4.23 : 659
4.24 : 659
4.27 : 659
4.29 : 659
4.31.1 : 607, 649, 652
4.32.1 : 408
4.35 : 368
4.35.1 : 633, 662
4.35.2 : 663
4.35.5 : 663
4.35.8 : 369
4.40.5 : 558, 559 562, 565 668
4.41.1 : 676
4.42.8 : 668
4.46.3 : 467, 514
4.46.5 : 478
4.47.1 : 508
4.47.2 : 508
4.50.1 : 677
4.50.6 : 374
4.52.1 : 606, 611, 612
4.52.4 : 611
4.53.5 : 497
4.53.7 : 189
4.54 : 372
4.54.1 : 371
4.57.1 : 679
5.4.5 : 102
5.6.1 : 272, 277, 514, 666
5.6.2 : 666
5.6.4 : 666
5.6.5 : 666
5.6.6 : 444
5.11.1 : 611

5.13.4 : 13
5.14.1 : 23, 666
5.14.3 : 12
5.17.1 : 541
5.23.6 : 69
5.24.1 : 666, 673
5.25.1 : 320
5.25.3 : 638
5.25.7 : 535, 536
5.28.3 : 103
5.28.6 : 65, 68
5.29 : 468
5.30.1 : 540
5.31.3 : 415
5.34.1 : 415, 676, 677
5.39.1 : 542
5.39.1–2 : 544
5.40.1 : 499
5.40.4 : 661
5.41.16 : 519
5.43.1 : 296
5.44.1 : 610
5.44.15 : 23
5.46 : 494, 495
5.46.7 : 385, 494
5.46.8 : 494
5.50.1 : 496, 512
5.51.4 : 499
5.51.5 : 453, 499
5.51.6 : 499
5.51.8 : 499
5.51.11 : 548
5.55.1-9 : 531
5.55.5 : 124
5.60.8 : 391
5.65.1 : 508
5.72.1 : 499
5.75.1 : 278
5.75.1–9 : 277, 278
5.75.9 : 277, 278
5.76.1 : 205, 611
5.77.1 : 205
5.78.1 : 499
5.79.1 : 277
5.81 : 493
5.81.2 : 226, 227
5.81.5 : 120, 157
5.82.1 : 572
5.82.2 : 372, 512, 529, 530
5.82.3 : 372, 512
5.82.4 : 372
5.82.7 : 181, 465
5.82.9 : 182
5.85.2 : 188
5.87 : 574
5.87.1 : 673
6.2.1 : 464, 553
6.2.10 : 553
6.2.11 : 553
6.9.1 : 248, 281
6.15.14 : 91, 166
6.16.10 : 17, 65
6.16.13 : 192
6.16.16 : 392
6.16.19 : 392, 675
6.16.23 : 610
6.16.27 : 270, 274
6.16.34 : 11, 22, 80, 214
6.16.39 : 214
6.16.40 : 192
6.17.1 : 344, 538 648
6.17.2 : 648
6.17.3 : 648
6.17.15 : 656, 666
6.18 : 557, 560 561, 564
6.18.1 : 538
6.20 : 557, 560, 561, 564, 575
6.22 : 557, 560, 561, 564 660
6.22.1 : 675
6.24.1 : 415
6.25 : 538
6.30 : 650, 653
6.31.1 : 574
6.32 : 660
6.33 : 660
6.34 : 660
6.35 : 660
6.37.2 : 416
6.37.5 : 546
6.38.1 : 546
6.40 : 538
6.40.1 : 545
6.42.1 : 545, 574 641
6.42,4 : 518

6.44.7 : 385
6.44.14 : 415
6.44.15 : 415
6.44.16 : 415
6.46.1 : 358, 563 564
6.47.1 : 386
6.47.8 : 401, 559 566, 653
6.48.1 : 382
6.50.4 : 183
6.51.13 : 508
6.51.15 : 508
6.52.7 : 478
6.52.13 : 376
6.58.1 : 201
6.61.1 : 508, 514, 527
6.61.4 : 508
6.61.10 : 467, 478 499
6.68.1 : 676
6.68.10 : 663
6.68.11 : 393
6.69 : 393
6.69.1 : 675, 677
6.69.3 : 393
6.69.7 : 613
6.69.11 : 393
6.71.1 : 208, 469
6.71.6 : 519
6.73 : 393
6.73.1 : 664, 676, 677
7.1 : 14, 507
7.1.1 : 606, 609 611
7.1.3 : 14
7.1.18 : 14
7.11.3 : 611
7.12 : 598
7.12.1 : 611
7.15.1 : 212
7.16.1 : 271, 611
7.16.11 : 382
7.17.1 : 666, 673
7.18 : 659
7.19 : 660
7.21 : 647
7.21.1 : 647
7.21.2 : 647
7.22.1 : 364, 507, 510, 571
7.22.4 : 510, 571
7.22.7 : 510
7.23 : 650, 657, 660
7.24.6 : 389
7.27.1 : 599
7.31.1 : 407
7.31.10 : 653, 654
7.32.3 : 656
7.32.12 : 649, 655
7.32.14 : 649, 652
7.32.18 : 574
7.32.20 : 649
7.32.22 : 150, 358, 362, 463, 464, 542, 563, 589, 590
7.34.1 : 512, 609
7.34.4 : 401, 608, 655
7.35.1 : 482
7.36.9 : 422
7.51.1 : 662
7.51.2 : 367
7.56.1 : 512
7.62.1 : 556
7.65.1 : 580
7.66.4 : 478
7.66.7 : 478, 580
7.66.14 : 556
7.66.16 : 136, 622
7.68.1 : 606, 611
7.72.4 : 552
7.73.4 : 611
7.74.1 : 514, 611
7.77.1 : 611
7.80.1 : 611
7.82.1 : 611
7.82 : 393
7.82.1 : 668
7.83.1 : 675, 676
7.84 : 393, 665
7.84.1 : 675, 676
7.85 : 665
7.85.1 : 668, 675, 676
7.91.7 : 598
7.92 : 598
7.92.1 : 150
7.94.7 : 580

7.95.2 : 291
7.95.4 : 465
7.97.1 : 677
7.97.10 : 393
7.99.4 : 677
7.100.1 : 677
8.1.1 : 528, 655
8.2.1 : 347, 350, 357, 408, 468
8.2.2 : 347
8.2.3 : 347
8.2.4 : 468
8.2.7 : 468
8.2.13 : 575
8.2.16 : 407
8.3.1 : 360, 608
8.3.3 : 543
8.3.9 : 649
8.3.13 : 545, 574, 652
8.3.15 : 649, 655
8.3.13 : 574
8.4.7 : 655
8.5.4 : 478
8.5.14 : 209, 210
8.6.1 : 408
8.6.4 : 414
8.7 : 591
8.8.1 : 508
8.9.1 : 208
8.11.7 : 675
8.13.1 : 407, 408
8.13.16 : 408
8.16.5 : 101
8.17.11 : 407
8.19.30 : 665
8.21.1 : 392, 665, 666
8.21.4 : 601
8.21.9 : 392, 666
8.23.1 : 467, 611
8.24.1 : 467, 608
8.25.1 : 467
8.25.10 : 467
8.26.1 : 611
8.26.4 : 467
8.26.23 : 467, 499
8.27 : 601
8.27.1 : 467
8.27.13 : 514
8.28 : 601
8.28.4 : 601
8.29 : 601
8.29.1 : 602
8.29.4 : 608
8.30.1 : 601
8.31.9 : 508
8.31.10 : 601
8.32.1 : 407
8.32.4 : 612
8.33.1 : 545
8.33.7 : 545
8.36.1 : 515
8.36.1-6 : 503, 515
8.38.1 : 580
8.38.7 : 612
8.42 : 393
8.42.1 : 232, 664 668
8.42.2 : 232, 233
8.42.3 : 188
8.43.9 : 425
8.44.12 : 11
8.44.26 : 34, 534
8.45.22 : 408
8.45.40 : 580
8.46.1 : 398, 404
8.46.3 : 556
8.46.25 : 514
8.48.2 : 232
8.48.3 : 320
8.48.13 : 377, 378
8.49 : 667
8.49.1 : 673
8.53.1 : 668
8.54.1 : 668
8.54.3 : 574
8.61.1 : 360
8.61.7 : 360
8.62.1 : 654
8.62.4 : 654
8.63.1 : 527
8.64.6 : 407
8.64.10 : 407
8.65.8 : 317
8.66.1 : 649
8.66.9 : 543, 574, 575, 652
8.68.1 : 356, 468
8.68.2 : 347, 357
8.68.3 : 347, 357
8.68.4 : 408, 468
8.68.7 : 468
8.69.1 : 403, 404

8.69.4 : 408
8.69.10 : 403
8.69.13 : 403
8.70.5 : 556, 564, 574
8.72.13 : 208
8.81.1 : 408
8.84.8 : 193
8.85.1 : 611
8.88.1 : 648, 649
8.89.5 : 542, 544
8.89.7 : 542
8.90.1 : 514
8.92.1 : 407
8.92.4 : 407
8.92.7 : 414
8.92.19 : 363, 407
8.92.28 : 518, 674
8.93.1 : 414, 580
8.93.19 : 607, 649, 652
8.93.31 : 478, 528, 530
8.93.34 : 601
8.95.1 : 508
8.95.2 : 408
8.95.3 : 666
8.96.7 : 124, 183
8.97.1 : 542, 544
8.97.2 : 543, 545
8.97.3 : 543
8.97.10 : 656
8.97.13 : 655
8.98.1 : 400
8.98.7 : 392
8.98.10 : 392
8.99.3 : 555, 556, 557
8.101.1 : 514
8.101.5 : 514
8.101.9 : 514
8.101.11 : 556
8.102.7 : 665, 666
8.103 : 676
8.103.8 : 665
9.1.1 : 202
9.5.9 : 439
9.46.4 : 476
9.61.10 : 350
9.63.28 : 589, 590
9.66.19 : 23
9.69.6 , 52
9.71.6 : 232
9.83.3 : 206
9.83.5 : 210
9.87.1 : 350
9.92.4 : 208
9.96.5 : 23, 388
9.107.6 : 350
9.114.4 : 202
10.1.5 : 195
10.2.1 : 91, 166
10.2.3 : 181
10.5.12 : 510
10.7.3 : 568
10.9.1 : 384
10.9.2 : 293
10.13.2 : 226
10.14.4 : 386
10.16.12 : 131
10.19.1 : 321
10.21.1 : 510
10.22.1 : 510
10.22.5 : 511
10.22.7 : 511
10.22.9 : 511
10.23.1 : 654
10.23.5 : 654
10.24.1 : 654
10.25 : 506
10.30 : 273, 289, 293, 294, 295
10.30.1 : 288, 296
10.30.10 : 289, 290
10·30.11 : 289, 290
10.30.12 : 268, 270 272, 273, 282, 286, 289, 294, 509, 568, 611
10.35.1 : 482
10.36.1 : 482
10.37.7 : 557
10.37.10 : 563
10.42 : 393, 674
10.42.1 : 675, 677
10.43 : 674
10.43.1 : 675, 676, 677
10.44 : 493
10.46.1-23 : 405
10.48 : 600
10.48.1 : 415
10.49.1 : 415
10.51.1 : 66

10.51.8 : 18, 78
10.52.1 : 76
10.53.4 : 76
10.53.6 : 99, 387
10. 61 : 530, 548
10.61.1 : 667
10.61.26 : 530
10.61.27 : 530
10.62 : 530
10.63 : 482
10.63.3 : 374
10.63.10 : 182
10.63.15 : 181, 183 184
10.63.16 : 181, 184
10.64.6 : 477
10.65.1 : 482
10.68 : 393, 676
10.68.1 : 677
10.71.10 : 233
10.71.11 : 147, 409 637
10.73 : 354, 357 453, 554
10.73.1 : 354, 607
10.73.7 : 356
10.73.11 : 554
10.74.6 : 360, 607 608
10.85.19 : 33, 213
10.85.24 : 99
10.86.1 : 534, 669
10.88.6 : 246, 440
10.89 : 660
10.90.13 : 410
10.94 : 343
10.94.1 : 645
10.94.4 : 645
10.94.5 : 645
10.94.7 : 645
10.94.14 : 645
10.96 : 558, 561, 565
10.96.1 : 401, 415 677
10.96.10 : 565
10.96.13 : 405
10.100.1 : 482
10.103.5 : 415
10.104 : 660
10.104.3 : 416
10.105.1 : 654
10.105.2 : 312
10.105.4 : 654
10.107.2 : 312
10.111.3 : 556, 560, 563, 564
10.112.2 : 415
10.112.6 : 415
10.114.9 : 286
10.120 : 457
10.121.1 : 520
10.121.10 : 610
10.123 : 203
10.123.1 : 202, 374
10.123.6 : 203
10.130.4 : 347
10.130.5 : 664
10.131.1 : 652, 669
10.133.1 : 402
10.133.4 : 654
10.134.1 : 654, 657
10.134.2 : 657
10.134.3 : 657
10.134.4 : 654
10.134.6 : 657
10.138.3 : 557
10.157.1 : 602, 666
10.157.4 : 666
10.157.5 : 666
10.163.2 : 583
10.167.1 : 676
10.172.1 : 602
10.172.3 : 591
10.176.2 : 122, 223
10.177 : 559, 560, 562
10.177.1 : 202
10.178 : 562
10.178.1 : 668
10.180.2 : 134
10.183.1 : 202
10.184.1 : 98, 447
10.189.1 : 610, 616, 617
10.191.5 : 121
10.191.15 : 96, 180

*VĀJASANEYĪ SAṂHITĀ*
( VS )

2.11 : 156
2.13 : 154, 157
2.25 : 75
2.31 : 370
3.5 : 623
3.9 : 164, 326
3.37 : 421
4.25 : 572
8.59 : 386, 422
13.3 : 197, 199
31.12 : 211
16.52 : 142
18.38 : 45
20.74 : 339
21.5 : 182
27.31 : 339
31.12 : 211

*VĀJASANEYĪ SAṂHITĀ*
( VSK ) [ Kāṇva ]

2.34 : 155, 156

*TAITTIRĪYA SAṂHITĀ*
( TS )

1.1.1.1 : 72, 144
1.1.4.2 : 179
1.2.1.1 : 9, 43
1.2.1.2 : 379
1.2.2.1 : 173, 465
1.2.3.3 : 187
1.3.1.1 : 120
1.3.3.1 : 385
1.3.7.2 : 192
1.3.13.1 : 9, 43,
1.3.14.4 : 46
1.4.3.4 : 296
1.4.4.1 : 338
1.4.45.2 : 127
1.5.1.2 : 24
1.5.1.4 : 19
1.5.2.3 : 27
1.5.5.2 : 514
1.5.7.2 : 514
1.5.7.3 : 137
1.5.7.5 : 267
1.5.9.1-2 : 98
1.5.9.2 : 416
1.5.9.2-3 : 33
1.5.10.1 : 71
1.5.10.2 : 7
1.5.11.5 : 182
1.6.2.2 : 52
1.6.2.4 : 94
1.6.7.1 : 421
1.6.9.1 : 30, 553
1.6.10.6 : 52, 239
1.6.11.4-5 : 21
1.7.3.1 : 61, 94
1.7.4.1 : 133, 426
1.7.5.4 : 215
1.7.6.6-7 : 47
1.7.7.1 : 157
1.7.12.2 : 136
1.8.2.2 : 296
1.8.4.1 : 128
1.8.4.2 : 129
1.8.5.1 : 134
1.8.10.2 : 624
2.1.1.1 : 267
2.1.3.5 : 653
2.2.5.4 : 32
2.2.9.5 : 237
2.2.11.4 : 183
2.3.2.2 : 14, 74, 162, 189, 233, 288
2.3.12.1 : 267
2.4.11.4 : 74
2.4.12.2 : 125, 294
2.4.14.1 : 107
2.5.3.1 : 101
2.5.3.2-3 : 34
2.5.3.4 : 267
2.5.3.7 : 109
2.5.4.3 : 34, 111
2.5.4.4 : 89, 671
2.5.4.4-5 : 89
2.5.4.5 : 90
2.5.5.1 : 88
2.5.5.1-2 : 103
2.5.5.2 : 105
2.5.5.4 : 112
2.5.5.6 : 112
2.5.6.3 : 30, 427
2.5.7.1-2 : 68
2.5.8.4 : 280
2.5.8.6 : 132
2.5.8.7 : 70
2.5.9.1 : 69, 75, 214
2.5.9.4 : 75
2.5.9.6 : 76
2.5.10.3 : 649
2.5.11.1 : 630
2.6.1.1 : 21, 77
2.6.1.2 : 78, 133
2.6.2.1 : 24, 81

2.6.2.2 : 80
2.6.2.5 : 135
2.6.2.5–6 : 166
2.6.2.6 : 520
2.6.3.1 : 80
2.6.3.2 : 553
2.6.6.1 : 66
2.6.6.4 : 90
2.6.6.5 : 79
2.6.7.1 : 432
2.6.8.3 : 79
2.6.8.5–6 : 156
2.6.8.7 : 157
2.6.9.2 : 346
2.6.9.7 : 95
2.6.10.1 : 97
3.1.1.3 : 169
3.1.3.1 : 177
3.1.5.1 : 255
3.1.8.2 : 108, 114, 387, 475
3.2.2.2 : 423
3.2.9.7 : 8, 300
3.3.4.3 : 91
3.4.1.1 : 431
3.4.3.4 : 548
3.4.3.7 : 70
3.4.5.1 : 136, 477
3.4.9.6 : 448
3.5.5.1 : 13, 379
3.5.7.1 : 39
4.2.3.3 : 119
4.2.9.2 : 226
4.5.10.5 : 142
5.1.3.4 : 634
5.1.8.1 : 267
5.1.8.5 : 659
5.2.1.1 : 215
5.2.5.3 : 191, 597
5.2.6.1–2 : 236
5.3.2.1 : 88, 389
5.3.2.3–4 : 401, 649
5.3.2.4 : 359
5.3.4.7 : 12
5.3.5.4 : 572, 629
5.3.5.13 : 157
5.3.7.3 : 97
5.3.8.1 : 519
5.3.8.2 : 277
5.4.1.3 : 622
5.4.3.3 : 42, 91
5.4.4.3 : 91
5.4.4.5 : 295, 308
5.4.5.2 : 44, 114
5.4.7.7 : 445
5.4.8.5 : 42
5.4.9.2 : 7
5.4.10.1 : 48, 76
5.4.10.2 : 483
5.4.10.4–5 : 17
5.5.1.4 : 387
5.6.2.1–2 : 91, 288
5.6.4.5 : 69
5.6.5.1 : 331
5.6.8.6 : 326, 327, 445
5.6.9.1–2 : 311
5.7.3.3 : 8
6.1.1.1 : 163, 425, 603
6.1.3.1 : 420
6.1.6.1 : 39
6.1.6.2 : 371
6.1.7.7 : 382
6.1.7.7–8 : 79
6.1.9.1 : 114, 475
6.2.2.4 : 319
6.2.2.6 : 7
6.2.5.2–3 : 216
6.2.5.3 : 216
6.2.9.2 : 226
6.2.9.4 : 225
6.2.10.3 : 267
6.3.2.1 : 2
6.3.2.5 : 37, 308
6.3.5.4–5 : 192
6.3.7.1 : 65
6.3.10.5 : 317
6.3.11.6 : 80
6.4.3.3 : 289
6.4.5.1 : 297
6.4.7.3–4 : 314
6.4.9.1–2 : 211
6.4.9.4 : 319
6.4.10.2–3 : 178
6.5.1.4 : 424
6.5.3.3 : 324
6.5.3.4 : 16
6.5.8.4–5 : 635
6.5.10.4 : 150
6.6.1.5 : 640
6.6.3.4 : 127, 425
6.6.6.2 : 447
6.6.7.3 : 310
6.6.11.1 : 396
6.6.11.6 : 406
7.1.1.2 : 390
7.1.1.4 : 67, 304, 588

7.1.1.5 : 371, 589
7.1.6.1 : 477, 484
7.1.10.2 : 484
7.3.1.1–2 : 605
7.3.1.2 : 604
7.3.4.1 : 4
7.3.8.2 : 590
7.4.1.2 : 590
7.4.1.3 : 452
7.4.2.1 : 5, 6
7.4.2.3 : 590
7.4.6.2 : 590

*KĀṬHAKA SAṂHITĀ*
( KS )

4.16 : 7, 164, 387
28.2 : 322
29.1 : 396

*MAITRĀYAṆĪYA SAṂHITĀ*
( MS )

2.4.3 : 86
3.10.6 : 309, 431
4.9.2 : 197
4.9.4 : 206
4.9.9 : 209
4.10.3 : 119, 120
4.13.4 : 253, 254

*ATHARVAVEDA SAṂHITĀ*
( AV )

6.35.1 : 591
6.36.3 : 601
7.4.1 : 372
7.14.3 : 229, 232
7.73.4 : 209, 210
20.13.4 : 208, 379
20.127.1 : 669
20.127.5 : 669
20.127.7 : 670
20.127.11 : 669
20.128.1 : 672
20.128.6 : 672
20.128.12 : 669
20.129.1 : 670
20.135.1 : 672
20.135.4 : 672
20.135.6 : 671
20.135.13 : 670
20.136.4 : 672
20.137.3 : 672
20.137.4 : 672

*AITAREYA BRĀHMAṆA*
AB )

1.1.1 : 164
1.1.14 : 16, 78
1.2.1 : 5
1.3.1 : 167
1.3.5 : 378
1.4.8 : 7, 86
1.5.10 : 655
1.5.22 : 296
1.5.23 : 14
1.5.24 : 234
1.6.1 : 46
1.6.6 : 162
1.6.7 : 53, 54
1.6.8 : 170
1.6.9–10 : 170
1.7.1 : 181
1.7.1–2 : 176
1.7.3 : 179
1.9.5 : 183
1.10.7 : 208
1.11.5 : 180
1.11.9 : 4
1.12 : 259
1.12.2 : 16
1.13.1 : 187
1.13.8 : 233
1.13.31 : 16
1.16.43 : 16
1.16.44 : 193
1.17.1 : 12, 194
1.17.2 : 12
1.17.8 : 337
1.19.11 : 40
1.20.4 : 573
1.22.15 : 31
1.25.2–3 : 215
1.27.1 : 39
1.29.4 : 228
1.30.1 : 229
1.30.8–9 : 230
2.1.3 : 240
2.2.4 : 469
2.7.11 : 256
2.8.2 : 292
2.14.7 : 308, 400
2.15.6 : 66
2.16.5 : 66
2.17.6 : 331
2.18.11 : 270
2.20.7 : 18
2.23.1–2 : 313
2.23.6 : 319
2.24.6 : 420
2.24.11 : 311
2.26.6 : 52
2.27.3 : 318

2.27.8 : 319
2.31.3 : 66
2.34.1 : 326, 328, 329
2.36.3 : 267
2.36.4 : 115
2.36.6 : 637
2.40.2 : 620
2.40.4 : 357
3.5.4 : 315
3.8.6–7 : 85
3.11.1 : 329
3.11.9 : 597
3.12.4 : 381
3.13.1 : 15
3.17.8 : 350
3.18.4–5 : 360
3.19.4 : 538
3.20. : 124
3.21 : 125
3.21.1 : 67, 449
3.21.2 : 67
3.24.11 : 538
3.25.1 : 39
3.26.1 : 39
3.27.1 : 296, 344
3.31.9 : 29
3.32.4 : 378
3.36.1 : 383
3.38.4 : 61
4.1.4 : 294, 395
4.3.2 : 401
4.3.4 : 279
4.12.2 : 450
4.14.1 : 452
4.20.21 : 668
4.26.13 : 438
4.28.6 : 258, 332, 638
5.3.1 : 506
5.3.5 : 19
5.9.1 : 524
5.23.6 : 350
5.29.6 : 55
5.30.4 : 607
5.31.3 : 66, 371
5.32.2 : 151
5·32.6 : 153
5.33.1 : 148
5.33.2 : 151
5.33.3 : 209, 604
5.34.2 : 152
5.34.3 : 409
6.3.10 : 635
6.8.6–7 : 641
6.12.2–3 : 369
6.20.20 : 46, 232, 332, 364, 375,
6.29.1 : 669
6.29.4 : 308
6.35.11 : 93
6.36.11 : 203
7.9.1 : 113
7.13.9 : 359
7.25.4 : 70
7.26.5 : 152
8.2.3 : 85, 555
8.28.9 : 55
8.30.2 : 369

*KAUṢĪTAKI BRĀHMAṆA*
(KB)

I.2. १, २ : 4
I.2. ९ : 114
I.2. १२ : 114
I.2. २२ : 67
I.3. १९ : 17
I.3. २१ : 17
I.3. ३३ : 38
I.4. २ : 77
I.4. ६ : 237, 519
II.1. १ : 427
II.1. ४ : 60
II.1. ६ : 55
II.1. १५ : 45
II.3. २० : 45
II.4. ९ : 114
II.4. २१ : 49
II.5. ३ : 53
II.5. ४ : 296
II.6. २ : 57
II.6. २३ : 49
II.7. ४ : 54
II.7. १६ : 33, 49
III.3. ८ : 132
III.3. २५ : 194
III.3. ३४ : 133
III.4. १४ : 281
III.4. २२ : 19
III.5. १५ : 166
III.5. २५ : 281
III.6. ९ : 82, 83
III.6. १२ : 166
III.7. १८ : 80
III.8. ८ : 94
III.8. १७ : 135, 136, 138

III.9. २ : 99
III.9. २० : 99
III.10. १९ : 168, 279, 560
III.10. ३० : 99
III.10. ३४ : 99
IV.1. ६ : 101
IV.4. ३ : 110
IV.4. २१ : 392
IV.6. २ : 158
IV.6. ३ : 111
IV.8. ४ : 115
IV.10. ३ : 117
V.1. १७ : 123
V.2. ९ : 123
V.2. २४ : 126
V.3. १ : 119
V.5. १७ : 461
V.6. १ : 129
V.7. ५ : 130
V.7. १८ : 130
V.8. २ : 386
V.8. ११ : 395
VI.5. १८ : 185
VI.10. १४ : 113
VI.11. १ : 159
VII.1. १ : 389, 390, 433
VII.2. २३ : 662
VII.4. ११ : 191
VII.5. १ : 163
VII.12. १०, ११ : 4
VII.7. १२ : 425
VII.12. २२ : 446
VII.12. २१ : 189
VII.12. ४३ : 16
VIII.1. १२ : 120
VIII.2. २२ : 232
VIII.4. १ : 211
VIII 4. १-६ : 30
VIII.4. ९ : 31,199
VIII.4. १३-१६ : 31
VIII.4. १५, १६ : 176
VIII.8. २८ : 211
VIII.9. १, २ : 38
IX.1. १२-१४ : 162
IX.2. २२ : 223
IX.3. १ : 446
X.5. १ : 168, 446
X.6. १७ : 163
X.7. २४, २५ : 4
X.8. ३०-३२ : 631
X.9. १ : 662
XI.5. २ : 276
XI.8. ८ : 529
XI.9. ३ : 268
XII.1. १ : 296
XII.4. १३ : 363
XII.5. १० : 286
XII.5. १६, १७ : 568
XII.7. ६ : 304
XII.7. ७ : 312, 368
XII.8. २ : 663
XII.8. १८ : 304
XII.9. ३ : 448
XII.10. ५ : 446
XIII.1. १० : 344, 368. 662
XIII.1. १० : 662
XIII.1. २० : 647
XIII.2. १ : 215, 495
XIII.4. १ : 232
XIII.4. २२ : 319
XIII.5. २१ : 345
XIII.5. २३ : 320
XIII.6. १ : 318
XIII.6. २, ३ : 648
XIII.6. १४ : 648
XIII.6. १५ : 232
XIII.7. २१ : 410
XIV.2. ४ : 354
XIV.2. २२ : 347
XIV.7. ७ : 344
XV.1. १ : 647
XV.1. ६ : 647
XV.1. १८ : 648
XV.1. २७ : 648
XV.2. ६ : 453
XV.5. ५ : 542
XV.6. ७ : 354
XVI.3. ३३, ३४ : 482
XVI.7. २२ : 530
XVI.8. १० : 494
XVI.8. ३७ : 164
XVI.8. ४१ : 389
XVI.9. ११ : 164
XVI.9. १२ : 450
XVI.10. १ : 109
XVI.10. २ : 663
XVI.10. ५, ६ : 109
XVII.1. १ : 405
XVII.4. ३ : 405
XVII. 4.[illegible] : 307

XVII.5. १५ : 412
XVIII.5. ६ : 665, 674
XVIII.8. २ : 562
XVIII.9. ७ : 449
XIX.1. २२ : 441
XIX.2. ३, ४ : 450
XIX.5. ७ : 455
XIX.5. ९ : 437
XIX.5. २१ : 456
XX.1. १ : 485
XX.2. ६ : 492, 547
XX.2. ३० : 592
XX.3. ५ : 465, 496
XX.3. १६ : 466
XX.4. ६ : 466
XX.5. २३ : 541
XX.6. ३ : 470, 502
XXI.3. १८ : 477
XXI.5. ५ : 480
XXI.6. १० : 567
XXI.6. २३ : 481, 582
XXI.6. २४ : 485
XXII.1. १ : 495
XXII.1. ५-७ : 462
XXII.1. ९ : 492
XXII.5. ६ : 469
XXIII.2. २ : 475, 512
XXIII.2. ८ : 513
XXIII.2. ९ : 511
XXIII.2. १२ : 519, 543
XXIII.4. १३ : 518
XXIII.7. १ : 477
XXIV.4. १ : 570
XXIV.4. २० : 542
XXIV.4. २३ : 543
XXV.1. १६ : 553
XXV.4. १० : 564
XXV.4. १५ : 564
XXV.12. २४ : 573
XXV.13. १ : 573
XXVI.1. ७ : 363
XXVI.1. १५, १६ : 456
XXVI.7. २ : 596
XXVI.8. १० : 494
XXVII.1. १०, ११ : 197
XXVII.2. १६, १७ : 371
XXVII.2. १९ : 609
XXVII.11. १७, १९ : 490
XXVII.12. २ : 507
XXVIII.2. १५ : 252
XXVIII.3. २८ : 130
XXVIII.3. ३७ : 380
XXIX.1. १ : 343
XXIX.3. ५ : 656
XXIX.3. ८ : 657
XXX 3. ७ : 673
XXX.3. २१ : 674
XXX.6. ६ : 673


*JAIMINĪYA BRĀHMAṆA* ( JB )


1.43 : 271
1.132 : 332
1.259 : 168, 353
2.35 : 547
2.53 : 172
2.65 : 174
2.134 : 578
2.281 : 97
2.419 : 175
2.426 : 175
2.442 : 484
3.287 : 13


*JAIMINĪYA UPANIṢAD BRĀHMAṆA* ( JUB )


1.1.8 : 331
1.6.2.4 : 300
1.12.3.2 : 341
1.12.3.3 : 341
1.12.3.4 : 341
2.2.3.9–10 : 315, 411
3.2.6 : 410
3.3.4.8 : 353
4.2.2 : 331
4.22.9 : 198


*PAÑCAVIṂŚA BRĀHMAṆA* ( PB )


2.1.1 : 332
3.13.3 : 364, 375
4.9.13 : 414
6.3.1–2 : 390
6.3.6 : 14
6.3.11 : 333, 336
6.3.13 : 452
9.8.10 : 408, 452, 617
10.5.4 : 331
12.13.13 : 395

13.9.16 : 659
18.4.7 : 590
20.15.15 : 649
25.13.1 : 71

*ŚATAPATHA BRĀHMAṆA* ( ŚB )

1.1.1.10 : 267
1.3.5.8 : 451
1.4.5.4 : 633
1.5.1.23 : 153
1.5.4.1 : 21
1.9.1.4 : 94
2.2.3.22 : 23
2.4.4.12 : 341
2.4.4.13 : 341
2.5.2.23 : 28, 267
3.8.4.8 : 44
4.1.1.10 : 344
4.1.1.22 : 239
4.2.1.23 : 310
4.3.1.21 : 323
4.3.4.23 : 346
4.3.5.20 : 662
4.4.2.15 : 380
4.5.1.16 : 433
5.1.1.1 : 170
6.2.2.39 : 449
6.6.3.16 : 137
9.5.2.8 : 315
10.3.3.7 : 466
11.1.8.1 : 170
12.9.2.8 : 408
13.1.7.2 : 255
14.4.1.22 : 187
14.4.2.23 : 188
14.4.2.24 : 183, 229
14.4.2.27 : 9
14.6.10.4 : 6
14.6.9.7 : 145
14.6.9.24 : 161
14.9.4.26 : 359

*TAITTIRĪYA BRĀHMAṆA* ( TB )

1.1.2.8 : 118
1.1.7.2 : 8
1.2.1.5-6 : 39
1.2.1.20 : 71
1.2.1.26 : 89
1.2.2.2 : 484
1.2.3 : 315
1.3.4.5 : 162, 357
1.4.4.9 : 273
1.5.3.4 : 55
1.5.12.5 : 359
1.6.2.3 : 182
1.6.8.6 : 423
1.6.9.1 : 83
1.7.2.3, 4 : 319
1.7.6.3 : 312
1.7.8.1 : 312
2.1.2.2 : 267
2.1.2.9 : 55
2.1.2.10 : 440
2.1.3.4 : 36
2.1.4.1 : 42
2.1.5.2 : 39
2.1.9.2 : 49, 50, 54
2.1.9.3 : 152
2.3.1.3 : 13
3.2.4.1 : 175
3.2.8.9-10 : 7
3.3.5.5 : 469
3.3.7.3 : 439, 479, 548
3.3.8.11 : 96
3.5.3.1 : 132
3.5.3.2 : 132
3.5.7.5 : 91
3.5.9.1 : 94
3.5.10.5 : 96
3.7.5.10-11 : 97
3.7.5.13 : 20
3.7.11.5 : 61
3.8.10.4 : 255
3.12.9.7 : 9

*GOPATHA BRĀHMAṆA* ( GB )

2.1.9 : 105

*AITAREYA ĀRAṆYAKA* ( AA )

1.1.1 : 353, 517
1.1.2 : 278, 397
1.2.4 : 40
1.3.2 : 224
1.4.1 : 270, 505
1.4.2 : 381
2.1.1 : 555
2.1.2 : 619
2.1.7 : 156, 175, 475
2.1.8 : 642

2.2.1 : 198
2.2.2 : 198, 553
2.2.3 : 52, 618
2.2.4 : 198
2.3.3 : 20, 264, 308
2.3.4 : 449
2.3.5 : 40
2.3.6 : 72, 578
2.4.1 : 173
3.1.6 : 295, 346
3.2.1 : 68
3.2.3 : 156
4.1 : 516, 518, 574
4.3 : 516
4.4 : 516
4.6 : 516
4.7 : 516
4.9 : 516
4.10 : 516, 517

*KAUṢĪTAKI ĀRAṄYAKA* (KA)

1.1.1 : 614
1.1.22 : 130
1.2 : 67

*TAITTIRĪYA ĀRAṆYAKA* (TA)

1.20.1 : 404
1.23.4 : 521
1 26.5 : 241
2.8.1 : 217
2.19.1 : 268
3.1.1 : 323
3.6.1 : 323
4.5.5 : 200
6.1.4 : 439

*AITAREYA UPANIṢAD* (AU)

1.1 : 5
2.4 : 410, 464, 470, 475

*KAUṢĪTAKI BRĀHMAṆA UPANIṢAD* (KBU)

1.3.1 : 52
1.6.1 : 57
3.2 : 466, 618

*CHĀNDOGYA UPANIṢAD* (Ch.U)

1.1.5 : 410
1.1.10 : 54, 56, 357
3.14.1 : 24, 615
3.14.1-2 : 24
3.16.1 : 331
5.1.15 : 314, 411
6.2.3 : 550
6.2.4 : 550

*ĪŚĀVASYA UPNIṢAD* (Īśā U)

17 : 95

*BṚHADĀRAṆYAKA UPANIṢAD* (BṛhU)

1.3.1 : 31
1.3.7 : 316
1.3.20 : 305
1.4.7 : 329
1.4.10 : 629
1.4.11 : 305
3.1.9 : 374
3.9.1-2 : 208
5.14.4 : 402
6.1 : 355, 396

*BṚHADĀRAṆYAKOPANIṢADBHĀṢYAVĀRTTIKAM* (Bṛh Bhā.Vārttika)

Sambandha, 8 : 162
1.4.1851, 1852 : 308

*TAITTIRĪYA UPANIṢAD* (TU)

3.10.4 : 198

*KAṬHA UPANIṢAD* (KU)

1.3.4 : 26
2.21 : 282

*MAITRĪ UPANIṢAD* (Maitrī U)

6.36 : 30, 41
2.6-7 : 314

*PRAŚNA UPANIṢAD* (Praś U)

2.3 : 360
3.8 : 198
4.3 : 171
5.5 : 427

*MUṆḌAKA UPANIṢAD* (Muṇḍ U)

1.2.4 : 9

*ĀŚVALĀYANA ŚRAUTA SŪTRA* (AŚ)

1.1.2 : 3

1.1.4–7 424
1.3.3 70
1.3.3–5 70
1.3.5 70
1.10.1 96
1.12.12 147
2.1.21 11
2.1.30 14
2.8.4 17
2.9.1–2 113
2.14. 7 106
2.14.7–10 108
2.14.19–20 84
2.14.21 91
2.15.9 26
2.16.8 193
2.17.16 126
2.18.9 129
2.18.13 129
3.1.16 634
3.6.27 38
3.10.2 139
4.1.1 40, 391
4.1.8 620
4.8.16 31
4.13.2 162
5.9.5 334
5.10.10 149
5.20.6 354
6.3.1 399
11.7.8 584


*ŚĀNKHĀYANA SRAUTA SŪTRA* ( ŚS )


1.1.4 : 136
1.1.18 65
1.1.19–21 276
1.1.22 276
1.1.26 269
1.3.5–6 64
1.4.1–13 65
1.4.5 65, 66, 75, 214
1.4.6 66
1.4.14 69
1.4.15 69
1.4.21 71, 72
1.4.22 72
1.4.23 73
1.5.5 132
1.5.7 75
1.5.8 75
1.5.9 75
1.6.2 75
1.6.3 75
1.6.4 75
1.6.5 75
1.6.6 75, 153
1.6.9 75, 153
1.6.11 76
1.6.12 76
1.6.14 76
1.6.15 76
1.7.1 21
1.7.2 21
1.7.3 21
1.7.4 21
1.7.5 21
1.8.1 80
1.8.2 80
1.8.4 83
1.9.3 91
1.10.2–3 92
1.10.4 92
1.12.5 93
1.12.8 93
1.12.12 94
1.13.1 21, 94
1.13.2 21, 94
1.13.3 94
1.14.6 95
1.14.8 95
1.14.16 95
1.14.17 96
1.14.20 96
1.14.21 96
1.15.5 99
1.15.12 99
1.15.14 99
1.15.16 100
1.15.17 100
1.17.1 91
1.17.9 84
2.2.2 40
2.2.3–4 11
2.2.6 12
2.2.7–8 11
2.2.11 12
2.2.12 13
2.5.1 17
2.5.3 591
2.5.4–5 19
2.5.6 20
2.5.10–11 21
2.5.13 23
2.5.18 25
2.5.19 21

| | | |
|---|---|---|
| 2.5.20 | : | 21 |
| 2.5.24 | : | 26 |
| 2.7.1 | : | 61 |
| 2.8.8 | : | 35 |
| 2.8.14 | : | 36 |
| 2.8.16–17 | : | 37 |
| 2.9.4 | : | 41 |
| 2.9.12 | : | 43 |
| 2.9.13 | : | 43 |
| 2.12.4 | : | 47 |
| 2.12.12 | : | 47 |
| 2.14.2 | : | 618 |
| 3.1.1 | : | 101 |
| 3.1.2 | : | 102 |
| 3.1.4 | : | 103 |
| 3.1.5–6 | : | 102 |
| 3.1.7 | : | 102 |
| 3.2.1 | : | 103 |
| 3.2.3 | : | 105 |
| 3.3.1 | : | 106 |
| 3.3.5 | : | 595 |
| 3.5.8 | : | 601 |
| 3.8.1 | : | 107 |
| 3.8.2 | : | 110 |
| 3.8.6–18 | : | 108 |
| 3.8.14 | : | 107, 110 |
| 3.8.15 | : | 107 |
| 3.11.7–9 | : | 112 |
| 3.11.11–15 | : | 112 |
| 3.11.14 | : | 112 |
| 3.12.13 | : | 116 |
| 3.12.14 | : | 116 |
| 3.12.15 | : | 117 |
| 3.12.16 | : | 117 |
| 3.12.17 | : | 117 |
| 3.13.6–11 | : | 119 |
| 3.13.15 | : | 119 |
| 3.13.17 | : | 194 |
| 3.13.20 | : | 119 |
| 3.13.27 | : | 120 |
| 3.13.29 | : | 121 |
| 3.14.19 | : | 126 |
| 3.16.8 | : | 134 |
| 3.16.23 | : | 131, 132 |
| 3.16.24 | : | 133 |
| 3.19.1 | : | 139, 140 |
| 3.19.2 | : | 139 |
| 3.19.7 | : | 139 |
| 4.4.11 | : | 370 |
| 4.6.10–11 | : | 151 |
| 4.6.17 | : | 151 |
| 4.7.1–2 | : | 154 |
| 4.7.3 | : | 154 |
| 4.7.4 | : | 155, 156 |
| 4.7.8 | : | 156 |
| 4.7.17 | : | 154, 157 |
| 4.12.10 | : | 610 |
| 5.3.1–6 | : | 166 |
| 5.3.7 | : | 167 |
| 5.3.8 | : | 168 |
| 5.3.9 | : | 168 |
| 5.4.1–4 | : | 174 |
| 5.4.7 | : | 176 |
| 5.5.1 | : | 176 |
| 5.5.6 | : | 185 |
| 5.7.2 | : | 194 |
| 5.7.3 | : | 195 |
| 5.7.5 | : | 191 |
| 5.9.1 | : | 197 |
| 5.9.1–2 | : | 31 |
| 5.9.2 | : | 197 |
| 5.9.4 | : | 199 |
| 5.9.8–9 | : | 199 |
| 5.10.15 | : | 209 |
| 5.10.17 | : | 209 |
| 5.10.18 | : | 209 |
| 5.10.21 | : | 209, 210 |
| 5.10.23 | : | 210 |
| 5.11.1 | : | 212 |
| 5.11.2 | : | 213 |
| 5.13.3 | : | 227 |
| 5.13.5 | : | 228 |
| 5.13.11 | : | 229 |
| 5.17.6 | : | 254 |
| 5.17.8 | : | 253, 254 |
| 5.17.10 | : | 256 |
| 5.18.1 | : | 256 |
| 5.19.9 | : | 631 |
| 6.2.1 | : | 285 |
| 6.2.2 | : | 268 |
| 6.3.1 | : | 268 |
| 6.3.8 | : | 268 |
| 6.3.8–9 | : | 284 |
| 6.3.9 | : | 269 |
| 6.3.10 | : | 270 |
| 6.6.14–15 | : | 278 |
| 6.7.1 | : | 289 |
| 6.7.2 | : | 290 |
| 6.7.3 | : | 290 |
| 6.7.4 | : | 291 |
| 6.7.5 | : | 291 |
| 6.7.6 | : | 291 |
| 6.7.7 | : | 292 |
| 6.7.10 | : | 292 |
| 6.8.1 | : | 297 |
| 6.8.1–2 | : | 297 |
| 6.9.13 | : | 303 |
| 7.1.1 | : | 309 |

7.1.1–5 : 309
7.1.8 : 311
7.2.1 : 313
7.2.4 : 315
7.2.7 : 315
7.2.10 : 315
7.3.1 : 315, 316
7.3.2–3 : 316
7.3.4 : 315
7.4.1 : 632
7.4.1–3 : 317
7.4.5 : 317
7.4.15 : 318
7.4.17 : 318
7.5.1 : 318
7.5.4 : 318
7.5.7 : 319
7.5.8 : 319
7.5.10 : 319
7.6.1 : 320
7.6.3 : 320, 639
7.6.4 : 320
7.6.6 : 320, 321, 640
7.6.7 : 321
7.6.8 : 321
7.8.2 : 322
7.8.7 : 525
7.9.1 : 326, 327, 334, 565
7.9.1–2 : 327
7.9.2 : 326
7.9.2–3 : 328
7.9.3 : 71, 72, 75, 326, 328, 329
7.9.4 : 331
7.9.6 : 326, 333
7.9.5–6 : 333
7.9.8 : 333
7.10.3 : 339
7.10.4 : 339
7.10.7 : 340
7.10.9 : 535
7.14.6 : 660
7.14.7 : 660
7.14.8 : 678
7.15.2 : 646
7.16.1 : 344
7.17.6 : 345
7.19.2–4 : 346
7.19.5 : 346
7.19.6 : 335
7.19.15 : 355
7.19.16 : 354
7.19.17 : 355
7.19.23 : 355, 356
7.19.24 : 355
7.20.4 : 360
7.20.5 : 360
7.20.6–7 : 360
7.25.3–4 : 348
7.27.29 : 224
8.1.4 : 367
8.1.6 : 367
8.1.9 : 368
8.2.3. : 368, 662
8.2.5 : 369
8.2.6 : 370
8.2.13 : 370
8.3.1–2 : 371
8.3.5 : 381
8.3.8 : 372
8.3.9 : 372
8.3.10 : 372
8.3.11 : 373
8.3.16 : 374
8.4.1 : 377
8.4.5–6 : 379
8.5.1 : 380
8.6.1–2 : 381
8.6.3 : 382
8.6.4 : 382
8.6.6 : 383
8.6.7 : 384
8.6.9–10 : 385
8.6.12–14 : 386
8.6.15 : 386
8.6.17 : 387
8.7.19 : 375
8.7.21 : 419
8.8.1 : 420
8.8.3 : 420
8.8.4 : 420
8.8.6–7 : 421
8.8.9 : 421
8.8.11 : 421
8.9.1 : 421
8.9.2 : 422
8.9.5 : 422
8.10.3 : 648
8.11.10–11 : 428
8.12.7 : 432
8.13.5 : 432
8.13.6 : 433
8.15.12 : 211
8.16.1 : 71
8.16.3 : 335

8.17.3 : 307
8.21.3 : 376
9.5.2 : 395, 396, 397, 399, 404
9.5.4 : 400
9.5.5–8 : 400
9.5.9–13 : 400
9.6.1–5 : 401
9.6.6 : 401
9.6.6–10 : 402
9.6.11–13 : 402
9.6.18 : 404
9.17.2 : 414
9.22.6–7 : 440
9.24.1–4 : 444
9.24.9 : 444
9.25.1 : 445
9.25.2 : 445
9.26.1–2 : 446
10.1.6–9 : 585
10.2.2 : 463, 492
10.2.7 : 495
10.3.2–3 : 496
10.3.6 : 465
10.3.12–13 : 496
10.3.14–15 : 497
10.4.2–3 : 499
10.4.8 : 500
10.5.9 : 572
10.5.9–10 : 510
10.5.12 : 510
10.5.14–15 : 511
10.6.2 : 514
10.7.2 : 522
10.8.14 : 530
10.9.17 : 591
10.9.16-17 : 592
10.10.7 : 594
10.10.8 : 594, 595
10.11.5 : 598
10.11.8 : 601
10.11.9 : 601
10.12.6 : 610
10.13.7–9 : 607
10.13.10 : 607
10.13.11 : 607
10.13.17 : 609
10.13.26–28 : 617
10.14.6 : 617
10.19.1 : 619
10.19.2 : 619
10.20.1 : 620
10.20.2 : 621
10.21.10 : 622
10.21.11 : 622
10.21.16 : 623
10.21.17 : 624
11.2.1 : 452
11.2.4 : 453
11.4.1 : 462, 488
11.4.1–2 : 463
11.4.4–5 : 583
11.5.1 : 465
11.5.2 : 465
11.5.3 : 466
11.5.4 : 466
11.7.1 : 474
11.7.3–5 : 474
11.8.1 : 476
11.8.2–3 : 476
11.8.4 : 476
11.10.2 : 535
11.10.3–4 : 536
11.10.7 : 538
11.10.10 : 538
11.11.15 : 542
11.12.5 : 543
11.12.9 : 547
11.12.10–11 : 547
11.12.12 : 547
11.12.13 : 548
11.13.1-3 : 568
11.13.11–19 : 554
11.13.15 : 552
11.13.20 : 554
11.13.30–31 : 557
11.14.3–4 : 557
11.14.5–10 : 558
11.14.11–13 : 558
11.14.14 : 559
11.14.15–19 : 559
11.14.20–29 : 562
11.15.1 : 571
11.15.7 : 572
11.15.11–12 : 575
12.3.2 : 657
12.4.12 : 656
12.10.5–6 : 656
12.11.12 : 677
12.14.1 : 669
12.14.4 : 669
12.15.2 : 669
12.15.5 : 669
12.16.3 : 670
12.17.1 : 670
12.18.1 : 670

12.19.1 : 671
12.20.2 : 672
12.21.2 : 672
12.23.4 : 672
12.24.2 : 672
12.25.5 : 676
12.26.9 : 666
13.2.1 : 429
13.2.8 : 430
13.14.1 : 620
13.14.6 : 345
13.19.7 : 489
13.19.20 : 482
13.21.1–13 : 428
13.19.4 : 441
13.22.1–6 : 427
18.6.1–6 : 362

*BAUDHĀYANA ŚRAUTA-SŪTRA* ( BŚ )

1.12.16 : 97
1.15.5 : 94
1.16.1 : 76
1.16.3 : 78
1.18.15 : 93
2.1.5 : 9
2.2.2 : 410
2.3.4 : 410
3.2.6 : 22
3.3.6 : 22
5.2.25 : 191
5.10.8 : 128
5.11.4–7 : 134
5.13.27 : 134
5.15.3–5 : 135
5.17.7 : 137
6.6.1 : 413
6.15.14 : 208
6.16.4 : 178
6.21.26 : 226
6.25.18 : 227
6.30.20 : 231
6.30.22 : 231
6.30.23 : 231
7.3.6–7 : 295
7.7.22 : 349
8.1.21 : 645
8.13.15 : 373
8.14.24 : 379
8.16.9 : 421
8.19.14–15 : 289
9.7.14–17 : 201
10.2.6 : 208
24.8.4 : 45
24.18.2–3 : 17

*ĀPASTAMBA ŚRAUTA-SŪTRA* ( APS )

1.21.1 : 2
2.17.1 : 76
3.4.5 : 157
3.12.1 : 61
3.16.17 : 112
3.17.4 : 108
3.17.5–6 : 108
5.23.2 : 40, 391
8.8.15 : 289
8.21.2 : 312
9.1.1 : 139
10.21.1 : 179
11.19.6 : 642
12.1.1 : 61
12.21.13 : 368
16.18.3 : 12
24.11.2 : 66
24.13.6 : 81, 83

*ĀPASTAMBA PARIBHĀṢĀ-SŪTRA* ( APPS )

1.8 : 15, 221
1.29. ( 30 ) : 2

*BHĀRADVĀJA ŚRAUTA-SŪTRA* ( BhŚ )

5.17.7 : 17

*MĀNAVA ŚRAUTASŪTRA* ( MŚ )

5.1.3.18 : 12
5.1.4.14 : 132

*HIRAṆYAKEŚI ŚRAUTA-SŪTRA* ( HKŚ )

7.5.25 : 226

*SARVĀNUKRAMAṆĪ* ( SA )

2.2 : 294
2.5 : 195
2.7 : 273
2.14–16 : 144
2.14–17 : 58, 555
3.4–5 : 398
4.2 : 24
5.1 : 500
5.2 : 204
5.5 : 205
6.3 : 205
6.5 : 204
6.6 : 204

6.7–8 : 205
7.1 : 348
7.5 : 205
8.1 : 20
8.4 : 348
8.27 : 601
11.2 : 348, 358
11.6 : 347
12.1 : 340
12.4 : 206
12.12 : 351
12.13 : 206, 353, 371
12.14 : 339
I.1 : 340
I.2–3 : 340
I.10 : 200
I.22 : 192
I.24 : 192
I.32 : 608
I.40 : 208, 349
I.64 : 352
I.80 : 518
I.81 : 518
I.83 : 200
I.91 : 188, 351
I.112 : 206
I.120 : 204
I.143 : 383
I.164 : 459
I.165 : 454
II.23 : 203
II.33 : 201
II.41 : 225
III.20 : 351
IV.10 : 25
IV.54 : 371
V.46 : 494
V.76–77 : 205
V.82 : 372
V.85 : 188
VI.1 : 344
VI.17 : 344
VI.53 : 201
VI.58 : 201
VII.1 : 14
VII.22 : 364
VII.51 : 367
VIII.2 : 347
VIII.41 : 188
VIII.42 : 188
VIII.68 : 347
IX.1 : 202, 347
X.25 : 506
X.94 : 343, 645
X.120 : 454

*BṚHADDEVATĀ* ( Bṛh. D )

IV.66–68 : 501

*ṚK-PRĀTIŚĀKHYA* ( ṚK. Prā )

16.1 : 329
16.17 : 204
17.16-17 : 397
18.21 : 224

*ĀPIŚALI-ŚIKṢĀ*

1.1 : 271

*NIGHAṆṬU*

1.1 : 29
3.1 : 427
3.6 : 9

*NIRUKTA* ( N )

1.4.2 : 5
1.7.1 : 345
1.7.4 : 147
1.8 : 409
1.8.1 : 147, 156
1.9.2 : 406
1.11.1 : 42
2.4.1 : 187
2.14.3 : 126
2.16.2-3 : 352
2.24.1 : 58
4.9.1 : 619
4.22 : 179
4.22.1 : 29
4.27 : 460
7.21.1 : 439
10.10.1 : 501

*MANUSMṚTI* ( Manu )

1.8 : 273
2.92 : 409
2.169 : 96
4.37 : 620
4.54 : 620
5.55 : 271

*ĀPASTAMBA DHARMA-SŪTRA* ( APDH )

1.8.15 : 96

*YĀJÑAVALKYA SMṚTI* ( YS )

1.97 : 2

*MAHĀBHĀRATA* (MBh)

1.1.188 : 247, 460

1.1.248 : 59, 620
1.3.123 : 295
Sabhā-dyūta, 69.9 : 186
13.134.46 : 385
13.318.2 : 187

*BHAGAVADGĪTĀ* ( BG )

3.10 : 307
8.6 : 615

*VIṢṆU PURĀṆA*

2.8.29-34 : 444
2.8.97 : 57

*BHĀGAVATA PURĀṆA*

1.1.4 : 637

*ŚIVA PURĀṆA*

5.1.8.22 : 521

*LIṄGA PURĀṆA*

13.5 : 143

*KŪRMA PURĀṆA*

1.12.269 : 461

*SOMOTPATTI*

6 : 108

*AṢṬĀDHYĀYĪ* ( Pā )

2.3.4 : 663
3.1.88 : 550
3.4.9 : 113
3.4.96 : 316
6.1.37 : 273
6.1.106 : 273
6.2.1 : 87
6.3.21 : 294
8.2.14 : 273

*MAHĀBHĀṢYA* (MB)

2.3.36 : 18
6.1.84 : 162, 178
5.2.94 : 42
Laṇ-sūtra : 104, 112

*VĀKYAPADĪYA* (VP)

1.1 : 53
1.123 : 330
1.124 , 53

*DHĀTUPĀṬHA*

508 : 158
593 : 292
1096 : 31

*JAIMINĪYA SŪTRA* (JS)

1.1.25 : 111
1.2.7 : 267
1.2.2 : 55
1.2.26 : 28
2.1.33 : 267
2.1.36 : 300
2.2.6 : 249
2.3.10 : 106
3.5.18 : 44
3.6.37 : 438
3.6.43 : 112, 393, 395, 483,
4.3.25 : 390
5.1.1 : 438
5.3.21 : 3
5.3.29 : 167
5.3.30 : 167
5.3.37-8 : 390
5.3.40 : 391
5.4.1 : 380

6.1.43 : 70
6.2.4 : 248
6.2.4-5 : 116
6.2.23-26 : 32
6.2.27 : 32, 37
6.5.4 : 104
6.6.1 : 104
6.6.19 : 438
6.7.21, 22 : 282
9.2.16 : 350, 359, 362
10.4.43-44 : 590
10.5.11 : 44, 112
10.5.29 : 81
10.6.2 : 350, 362
10.6.51 : 299
10.8.5 : 83
10.8.69 : 90
12.2.3 : 3

*ŚLOKAVĀRTTIKA* ( SV )

1.34 : 266
Apoha, 33 : 82

*BRAHMA SŪTRA* (BS)

2.1.5 : 9, 377 550
3.4.26 : 486
4.1.15 : 420

*NAIṢKARMYA SIDDHI*

1.49 : 480

*BRAHMA SIDDHI* ( B. *Siddhi* )

p 6 : 9

*SĀṂKHYA KĀRIKĀ*
1 : 6

*PAÑCĪKARAṆA-VĀRTTIKAM*
1 : 275

*NYĀYAMAKARANDA*
p 259 : 174, 473

*NYĀYAVĀRTTIKA-TĀTPARA ṬĪKĀ*
p 61 : 28

*VIŚVASĀRATANTRA*
Paṭala II : 161, 163

*KUMĀRASAMBHAVA*
( Kumāra )
1.1 : 72

*VIKRAMĀRKACARITAM*
VII. 121 : 569

*ĀRYABHAṬĪYA*
Kālakriyāpāda 6 : 16

*TANTRASAMGRAHA*
1.8 : 280

*SUBHĀṢITĀVALI*
3427 : 251

*AMARAKOŚA* ( AK )
2. Vanavarga 6 : 144, 179

## *APPENDIX III*

# UNIDENTIFIED QUOTATIONS


यावज्जीवमग्निहोत्रं जुहोति । ( विधायकवाक्यम् ) 32

प्रादेशस्तु दशाङ्गुलः । ( अग्निवेश्यवचनम् ) 40

श्यामः श्वा आहुतिमभ्यवहरति तस्य योऽनुदिते जुहोति । शबलः श्वा आहुतिमभ्यवहरति तस्य य उदिते जुहोति । ( श्रुत्यन्तरे ) 61

व्रतं नाम च सङ्कल्पः स चाव्रत्यनिवर्तनम् । ( आहुः ) 63

मरुतामिन्द्रः । ( श्रूयते ) 125

सर्वं यच्च स्वरूपसत्तयैवानन्यशेषं तत् सुखम् । ( विचक्षणा आचक्षते ) 126

वसन्तो ग्रीष्मो वर्षा अभिपूर्यमाणः पूर्वपक्षः पूर्वाह्णोऽहरेते ह वै देवा ऋतवः । शरद्धेमन्तः शिशिरो वारणपरपक्षोऽपराह्णो रात्रिरेत उ ह पितर ऋतवः । ( श्रूयते ) 131

प्रहृत्याभिजुहोत्यश्नावग्निरिति । ( कल्पः ) 192

अकूध्रीच्यः प्रवर्ग्यस्य प्राणरूपाः । ( वाजसनेयिनः ) 205

असहायः समर्थोऽपि कार्यसिद्धिं न विन्दति । ( लोकप्रसिद्धिः ) 209

त्रीन् स्तभ्नोति । ( शब्दप्रवृत्तिः ) 209

नापोरेवत्यै पुरस्ताज्जपेन्न जुहुयाद् । ( सूत्रम् ) 286

द्वौ पाणी द्वौ पादौ द्वौ स्तनाविति षडङ्गः । मध्यदेहो द्वे पार्श्वे पृष्ठं कुक्षिः शिर इति षड्विधः । ( केचिदाहुः ) 311

तृचयोर्द्वे तिस्रः करोति । ( वचनम् ) 363

इन्द्रियैरर्थोपलब्धिर्जागरितम् । ( लक्षणम् ) 416

अनादिनिधनः कालः । ( दर्शनात् ) 460

अपरं सन्धित्सतोऽपरं प्रच्यवते । ( लौकिकोपालम्भवचनम् ) 524

त्रिवृत्पञ्चदशं सप्तदशमेकविंशम् , पञ्चदशं सप्तदशमेकविंशं त्रिणवम्, सप्तदशमेकविंशं त्रिणवं त्रयस्त्रिंशमिति त्र्यावृतश्चतुरुत्तरिणोऽभिजितः स्तोमाः ।

त्रिवृत् पञ्चदशं सप्तदशं पञ्चदशं सप्तदशमेकविंशं सप्तदशमेकविंशं त्रिणवमेकविंशं त्रिणवं त्रयस्त्रिंशमिति चतुरावृतो त्रिरुत्तरिणो विश्वजितः स्तोमाः । ( वचनम् ) 534

पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम् । ( आहुः ) 540

पृष्ठशब्दः स्तोत्रकर्मवचनः । ( न्यायविदः ) 571

न हि गोभ्यः परं किंचित् कल्याणमिह विद्यते । ( पुराणवचनम् ) 619

कालश्चैको विभुर्नित्यः प्रविभक्तोऽपि गम्यते । ( आहुः ) 620

ऐन्द्रः सोमो गृह्यते मीयते च । ( श्रुतत्वात् ) 634

प्रधानानुरोधित्वस्वाभाव्यादप्रधानानाम् । ( न्यायात् ) 640

यादृक् स्तुत्यस्तादृक् स्तोता स्याद् । ( न्यायः ) 646

वाजपेयस्य यूपः । 648

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन । ( आहुः ) 671

## *APPENDIX IV*

## VARIANTS IN THE KB TEXT READINGS ACCORDING TO UDAYA

| Passage | | | Udaya's reading | Variant mentioned by Udaya |
|---|---|---|---|---|
| II. | 6. | १० | हैवास्य हुतं | हैवास्योदितं |
| II. | 6. | ११ | रात्र्या उ शीर्षन् | रात्र्या उ ह्नि शीर्षन् |
| III. | 2. | २२ | बर्सं | |
| XII. | 1. | २ | अपोऽच्छ यन्ति | अपो यच्छान्ति |
| XII. | 2. | २० | ह्यनु स्तौति | हि यती: स्तौति |
| XII. | 6. | ४ | यथाद: | अथाद: |
| XII. | 6. | १४ | स्वर: साम | स्वरसाम |
| XVIII. | 7. | | at the end adds: ते वै षड् भवन्ति । षड् वा ऋतव: । ऋतूनेव तत् प्रीणाति । | |
| XVIII. | 8. | ११ | अच्युतो | अच्युता |
| XVIII. | 9. | २ | omits वषट्कारेषु | वषट्कारेषु |
| XVIII. | 9. | ६ | स्तुतौ | स्थित |
| XIX. | 7. | १८ | as printed | adds : षळहो वा उ सर्व: संवत्सर इति वदन्त: |
| XXIII. | 1. | १७ | विमदन् | व्यमदन् |
| XXIII. | 6. | २७ | इति | अथ |
| XXIII. | 9. | २ | संवृञ्जीत | संपृञ्चीत |
| XXIII. | 11. | ४–६ | as printed | आतिच्छन्दसं For प्राजापत्यं |
| XXIII. | 11. | ३१ | उभये | अभये |
| XXV. | 3. | २१ | as printed | adds: महादिवाकीर्त्यमेवैतस्याह्न: पृष्ठं स्यादिति त्वेव स्थितम् |
| XXV. | 4, 5, 6, 7 | | See the Commentary text pp. 556 to 562 | |
| XXV. | 8. | २२ | संस्थापयिषेयु: | संतिष्ठापयिषेयु: |

| Passage | Udaya's reading | Variant mentioned by Udaya |
|---|---|---|
| XXV. 12. ४–६ | omitted | तत्राग्निमारुते रौद्रीं शस्त्वा होतैवयामरुतं पङ्क्तिशंसं शंसति। पञ्चपदा पङ्क्तिः। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै। नेदच्छावाकस्य शिल्पमन्तरयामेति। |
| XXV. 13. २ | omitted | प्रतिष्ठा वा अग्निष्टोमः प्रतिष्ठित्या एव। |
| XXV. 13. ५ | विश्वजिता | विश्वजितो |
| XXV. 13. १८ | वत्सच्छवीं | वत्सच्छवीन् |
| XXVI. 5. १५ | not clear | सैवासीदिति |
| XXVI. 7, 8 | अभ्यारभ्य ( in all places ) | अभ्यारब्ध ( in all places ) |
| XXVI. 7. ७ | अभ्यारभ्य वसन्ति | अभ्यारब्धवन्ति स्युः |
| XXVI. 11. ४ | अत्र न्वापि | अत्र न्वा अपि |
| XXVII. 2. १३ | नानुष्टुबायतनं रिच्यात् | नानुष्टुभ आयतनं रिञ्च्यात् |
| XXVII. 5. ६, १० | यदा, तदा | यथा, तथा |
| XXVII. 5. १३ | as printed | omitted |
| XXVII. 9. २० | सासावेव | सोऽसावेव |
| XXVIII. 4. १ | अङ्गिरोभ्यस्सूपहवम् | |
| XXVIII. 5. २५ | as printed | इति omitted |
| XXIX. 1. २६ | अधीयाय | अपीयाय |
| XXIX. 5. १५ | शिल्पतृचानि | तृचानि |
| XXX. 4. २ | as printed | जातं omitted |
| XXX. 5. १४ | अभिवदन्ति | अभिवदन्तः |
| XXX. 9. ७ | omitted अजामितायै | adds अजामितायै |
| XXX. 9. १५, १६ | omitted | as printed |
| XXX. 9. १६ | omitted | as printed |
| XXX. 9. २७, २८ | omitted | as printed |

## *APPENDIX V*

## CORRECTIONS IN THE KB TEXT ( 1968 )

| | | | |
|---|---|---|---|
| I. | 1. | २ | °मूचु: |
| I. | 1. f. n. | 2 | सतनू: |
| I. | 5. | ६ | भवत्या पूर्वा° |
| III. | 7. | १२ | प्रियतमे |
| VII. | 12. | २० | मयोभुव |
| VIII. | 12. | १५ | अनन्तर्हितो |
| X. | 3. | १८ | सप्ता दशभ्यो |
| X. | 4. | १५ | एकस्थोऽभ्रातृव्य: |
| XI. | 8. | २३ | भ्रेषोऽन्वेतो: |
| XII. | 2. | १४ | यदास्वैषी° |
| XII. | 5. | १६ | वानुदिते |
| XIII. | 5. | ७ | युक्ता |
| XIII. | 6. | ३ | अथेळा° |
| XVIII. | 9. | २ | वपारूपं |
| XIX. | 2. | १३ | महाव्रती° |
| XIX. | 3. | ८ | पशुपुरोळाश° |
| XXV. | 13. | १८ | वत्सच्छवीं |
| XXVI. | 5. | १३ | °मसमवल्लताया |
| XXVI. | 5. | १५ | योन्यवादं |
| XXVI. | 12. f.n. | 2–2 | ऐतीव ( omits वा ) |
| XXX. | 5. | १८ | दिशांक्लृप्ती° |

4